॥ श्रीः ॥

दमयन्तीकथा

अथवा

नलचम्पूः ।

महाकविश्रीत्रिविक्रमभट्टविरचिता ।

चण्डपालकृतया

विषमपदप्रकाशाख्यव्याख्यया सहिता ।

जयपुरराजधानीस्थैः

राजगुरुपर्वणीकरोपनामनारायणभट्ट- पण्डितदुर्गाप्रसाद- पाठशालाध्यापक-
पण्डितशिवदत्तैः, पाठान्तरानुक्रमणिकाशुद्धिपत्रैः
संयोज्य संशोधिता ।

सा च

मुम्बय्यां

निर्णयसागराख्यमुद्रणयन्त्रालयाधिपतिना मुद्रयित्वा प्रसिद्धिं नीता ।

शके १८०७ पार्थिवनामसंवत्सरे ।

भूमिका।

संप्रति हि चक्रवर्तिभूपालप्रोत्साहनेन विद्यावृद्धिमभिलषमाणेषु तत्र तत्र विद्वत्सु प्राचीनाप्रसिद्धान्वेदशास्त्रादिग्रन्थान्प्रकटीकुर्वत्सु सत्सु, श्रीमथुरापुष्कराख्यप्रसिद्धतरक्षेत्रद्वयान्तरालवर्तिजयपुराख्यराजधानीनिवासी दाक्षिणात्यमहाराष्ट्रजातीयो महाराजाधिराजविद्यागुरुत्वाश्रयपर्वणीकरकुलोत्पन्नः श्रीगङ्गारामभट्टपुत्रः श्रीगुरुचरणारविन्दलब्धशास्त्रदृष्टिः कश्चिदेकोऽहमपि पूर्वजसंगृहीतपुस्तकेषु प्राचीनतरमतिमनोहरं नलचम्पूनामकं काव्यग्रन्थमुपलभ्य लोके प्रायोऽप्रसिद्धस्यास्य प्रसिद्धिमभीप्समानः प्रथमं पुस्तकाल्पत्वेनप्रायोऽशुद्धस्य शोधनेप्रवृत्तोऽस्मि ।

अथायं ग्रन्थः केन कदा कथं निर्मित इति जिज्ञासायामेतद्ग्रन्थस्य विवृत्तिनामकबृहट्टीकालिखितकिंवदन्तीतः किंचिदवगम्यते ।

तथाहि ।

"पुरा किल कस्मिँश्चित्पुरेऽधीतसकलशास्त्रो राजपूज्यः कश्चिद्देवादित्यनामा द्विजन्मा बभूव। तस्य जन्मारभ्याधीतकुकर्मानधीतविद्यस्त्रिविक्रम इति सुतोऽभूत्। एकदा हि केनचित्प्रयोजनेन देवादित्यभट्टे ग्रामान्तरं गते तदुद्वेजितः परमामर्षी कश्चिद्द्विपश्चित्तदन्तरं विचार्य तत्रागत्य 'राजन्, मया सह शास्त्रार्थं केनापि बुधेन कारय, अन्यथा जयपत्रं देहि' इति राज्ञे निवेदितवान्। अथ भूभृता 'देवादित्यमानय' इत्यादिष्टेन राजदूतेन तद्गृहं गत्वा तं ग्रामान्तरगतं निशम्य तत्पुत्र एव राजसभायां शास्त्रार्थार्थमाहूतः। अथ तेन त्रिविक्रमभट्टेन पश्चात्तापपरितप्तेन 'भगवति भारति, मयि मूर्खे कृपाकटाक्षपातं मुञ्च, अद्यात्रागतेन महापण्डितेन त्वद्भक्तस्य सर्वमपि यशो मा हीयेत, यथाहं तेन संवादं कृत्वा विजेष्ये' इति स्वगृहवासिनी पितृपराराधिता सरस्वती देवी समभ्यर्थिता। ततोऽपारकरुणानिधिरियम् 'यावत्त्वत्पितागमिष्यति तावत्त्वन्मुखे वसामि' इति प्रोचे। अथ प्राप्तसरस्वतीवरप्रसादः सोऽयं राजसभागतोऽनेककोटिभिस्तं पान्थपण्डितं पराजित्य प्रसन्नतरपार्थिववितीर्णानेकाभरणभूषितो गजस्कन्धाधिरूढः स्वगृहानानन्दितपरिजनस्वजनान्प्रतिनिवृत्य च 'यावत्पित्रागमनं मदीयमुखे सरस्वती वसतीति तावद्यशोऽर्थकमपि प्रबन्धं करिष्यामि' इति संचिन्त्य, 'पुण्यश्लोको नलो राजा पुण्यश्लोको जनार्दनः। पुण्यश्लोका च वैदेही पुण्यश्लोको युधिष्ठिरः' इति पुराणात्पुण्यश्लोकनलस्य महाभारतीयवनपर्वान्तर्गतं सुचरित्रं गद्यपद्यैर्ग्रन्थितुमारब्धवान्। एवं प्रवृत्तस्यास्य सप्तमोच्छ्वाससमाप्तिदिवस एव

ग्रन्थसमाप्तिप्रतिबन्धकपित्रागमनेन मुखारविन्दान्निर्जगाम सरस्वती । तेनैष चम्पूग्रन्थोऽसमाप्तकथ एव स्थित इति गुरुमुखोद्गतः प्रवादः" इति ।

अयं कविः श्लेषोक्तिचतुरोऽतिप्राचीनोऽतिप्रसिद्धश्चेति सरस्वतीप्राप्तवरप्रसादस्य नात्याश्चर्यकृत् । तथापि कस्मिन्समयेऽनेनेयं चम्पूर्विरचितेति किंचिदुच्यते । अत्र चम्प्वां प्रथमोच्छ्वासे कादम्बरीकथाकर्तृबाणभट्टस्य नामोल्लेखनेन, प्रसिद्धतरश्रीभोजराजविनिर्मितसरस्वतीकण्ठाभरणाख्यसाहित्यग्रन्थे 'पर्वतभेदिपवित्रं जैत्रं नरकस्य बहुमतङ्गहनम् । हरिमिव हरिमिव हरिमिव वहति पयः पश्यत पयोष्णी' (६ उ. २९ श्लो.) इत्येतच्चम्पूगतपद्यस्यैकावल्यलंकारोदाहरणेन च, बाणभट्टभोजराजसमयान्तरालसमये लब्धजन्मनानेनेयं नलचम्पूरुत्पादितेत्यनुमीयते । अस्याः, चण्डपालजैनकृतैका, गुणविनयगणिकृतैका, दामोदरभट्टकृतैकेति तिस्रष्टीका उपलभ्यन्ते । त्रिविक्रमप्रशंसायां च 'प्राच्याद्विष्णुपदीहेतोरपूर्वोऽयं त्रिविक्रमः । निर्ममे विमलं व्योम्नि यत्पदं यमुनामपि' इति पद्यं षष्ठोच्छ्वासारम्भे चण्डपालकृतटीकायामुपलभ्यते । अत एव घण्टामाघादिवद्यमुनात्रिविक्रमेति तस्य संज्ञान्तरम् ।

अथ किंनाम चम्पूरिति चेत् । उच्यते । काव्यं हि तावद्दृश्यश्रव्यभेदेन द्विविधम् । तत्राद्यं रूपकोपरूपकभेदाद्विविधम् । द्वितीयं गद्यमयपद्यमयमिश्रभेदेन त्रिविधम् । इदमेव च मुख्यं पश्चकाव्यम् । तत्र यन्मिश्रमित्युक्तं तदेव चम्पूः । 'गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते' इति साहित्यदर्पणोक्तेः । यथा रामायणचम्प्वादिः । इयं च चम्पूः सर्वास्वेव चम्पूषु मूर्धन्यभूतेति सहृदयहृदयविनोदायाधिजिगमिषूपकाराय चावश्यं प्रकटयितव्येति सर्वोऽप्ययं श्रमः सफलः स्यात् ।

एवंभूतस्यास्य ग्रन्थस्य प्रकटीकरण उद्यतस्य संध्यावन्दनाद्याश्रमकर्मादिभिरलब्धविशेषसमयस्य व्यग्रीभूतहृदयस्य मम परममित्रेण लट्टूजीति प्रसिद्धाख्येन संस्कृतपाठशालाध्यापकपण्डितशिवदत्तेन, इतस्ततो द्वित्रपुस्तकसंपादनेन, तिसृषु टीकासुपरमोत्तमया विषमपदप्रकाशाख्यया व्याख्यया सह अनायासेनान्वयप्रदर्शकविषयविभागमण्डितमुद्रणोपयोगिनूतनपुस्तकलेखनेन, प्राप्तैकटीकापुस्तकस्य प्रथमोच्छ्वासेऽलब्धपत्रषट्कत्वात्तत्पूरणेन, टीकायां जैनव्याकरणीयसूत्राण्यपनीय सर्वत्र पाणिनीयव्याकरणसूत्रलेखनेन, क्वचित्क्वचिद्बृहट्टीकातष्टिप्पणीकरणेन एतद्ग्रन्थीययावत्पद्यानामकारादिवर्णरीत्यानुक्रमणीसंपादनेन, तथा मित्रवरपण्डितदुर्गाप्रसादशर्मणा च नूत्नलिखितपुस्तकावलोकनेन प्रूफसंशोधनेन, आधुनिकानेकसंकेतावबोधनेन च साहाय्यमदायीति ताभ्यामतीव प्रसन्नान्तरात्मना धन्यवादमाशीर्वादं च वितरामि ।

अथैवं परमपरिश्रमेण कृतशोधनस्याप्यस्य ग्रन्थस्य प्रकटीभवनमवेक्षमाणः साम-

र्थाभावान्मुद्रणं कर्तुमनीप्समानः संप्रति विद्यारसिकशिरोमणये मुम्बयीनगरप्रतिष्ठिताय निर्णयसागरनामकमुद्रायन्त्रालयाधिपतये जावजीदादाजीतिनाम्ने श्रेष्ठिन इदं पुस्तकं समर्पितवान् । तेन स्वमुद्रया, मायया परमेश्वरेण विश्वमिव, इदं पुस्तकमेकमपि क्षणादेवानेकतां प्रापितमिति तमप्याशिषा संयोजयामि ।

अत्र परमदयालुभिर्यैर्यानि पुस्तकान्यत्र विषये वितीर्णानि तेऽपि धन्यास्तानि च धन्यानीति पुनः पुनरभ्याशासे जगदीश्वरमिति । । तानि च यथा ।

१ मूलपुस्तकम्-	राजगुरुमैथिलश्रीनरहरिशर्मणः ।
१ टीकापुस्तकम्- दामोदरकृता-	”
१ बृहट्टीकासहितपुस्तकम्-	वैद्यश्रीकृष्णरामस्य ।
१ एवंभूतमेवान्यत्पुस्तकम्-	पण्डितदुर्गाप्रसादशर्मणः ।
१ चण्डपालटीकापुस्तकम्-	पण्डितशिवदत्तस्य ।
१ मूलपुस्तकम-	मम-
१ पुनर्द्वितीयम्-	”
१ चण्डपालटीकापुस्तकम्-	”
१ मूलपुस्तकम्-	खाडिल्करोपनामकस्यापाशास्त्रिणः ।

इत्येवं परपरिश्रमेण वारंवारं कृतशोधनस्य पाठान्तरलेखनेनालंकृतस्य मुद्रणोत्तरं शुद्धिपत्रेण सनाथीकृतस्याप्यस्य ग्रन्थस्य प्रमादादिपुरुषस्वभावसुलभदोषात् यदि कुत्रचिद्दोष आपतेत्तं सकलसहृदयजनाः 'गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः । हसन्ति दुर्जनास्तत्र समादधति सज्जनाः' इत्यभियुक्तोक्तेः समाधाय क्षाम्यन्त्विति कृताञ्जलिः प्रार्थयते

भट्टनारायणशर्मा ।

जयति मधुसहायः सर्वसंसारवल्ली-
जननजरठकन्दः कोऽपि कंदर्पदेवः ।
तदनु पुनरपाङ्गोत्सङ्गसंचारितानां
जयति तरुणयोषिल्लोचनानां विलासः ॥ २ ॥
अगाधान्तः[1]परिस्पन्दं विबुधानन्दमन्दिरम् ।
वन्दे रसान्तरप्रौढं स्रोतः सारस्वतं [2]वहत् ॥ ३ ॥

किमपि प्रणेयं तदेतन्मनसि कृत्वाभीष्टदेवताप्रणतिपूर्वकमेव समारब्धव्यमिति पूर्वाचार्यप्रणीतसमाचारमर्यादानुल्लङ्घनः सूक्तजलनिधिरपि जडैरलब्धमध्यो विचित्रपदपङ्क्तिसरित्पाथोवीचिसंघट्टः श्रीत्रिविक्रमभट्टः प्रतिपादनीयसर्वरसकथोपक्रमे सदाशृङ्गारत्वादिन्द्रादीनेकान्तशान्तत्वाद्वीतरागप्रभृतीनपहाय सर्वरसात्मकं परमेश्वरं शंकरमेव प्रणुवन्नाह—**जयतीत्यादि** ॥ हैमवत्याः संबन्धिनि कामसंतापवाहिनि कंदर्पदेवपीडां दधान उरसि चान्दनो रसनिषेक इव संतापापहरणाद्रौहिणद्रुमरसाभिषेक इव योऽसौ भगवांश्चन्द्रमौलिः सुधांशुशेखरः स जयति सर्वोत्कृष्टो भवति । "सर्वोत्कृष्टश्च सर्वेषां नमस्यः स्यात्" इति नमस्कारः प्रतीयते । नमस्कारेण च प्रबन्धकर्तृव्याख्यातृश्रोतॄणामिष्टफलसंपत्तिः । रसा निषिच्यन्तेऽस्मिन्निति रसनिषेको रसाधार इत्यप्येकदेशेन प्रतिपत्तव्यम् । रसाश्च शृङ्गारादयः । तांश्च कवय एव व्यक्तीकर्तुं प्रभवन्ति । अतस्तदनु रसाधारस्य भगवतः पश्चाद्रसव्यक्तिनिमित्तानां कवीनां वाल्मीकिव्यासकालिदासप्रभृतीनां निरन्तररसाविष्कारिणो वाग्विलासा विजयन्ते ॥ अत्र च पूर्वार्धेन वक्ष्यमाणप्रबन्धार्थोऽपि सूच्यते—गिरिर्भीमनृपः । "गिरिर्भीमनृपे सूर्ये स्वभावे पर्वते जले" इत्युक्तेः । तस्य सुताया दमयन्त्या दुर्वारस्मारविकारसंतप्त उरसि नलश्चन्दनरसनिषेको भविष्यति । स च चन्द्रवंश्यानां मौलिर्मुकुटायमान इति ॥ १ ॥

स किंसहायः किंमूलः किमुपकरणश्च कामो यो जगतः शिवतातिभ्यां शिवाभ्यामपि स्वीकृत इत्याह—**जयतीति** ॥ कोऽप्यद्भुतवैभवः कंदर्पदेवो जयति । किंभूतः । मधुसहायो वसन्तसखः । नहि सखायमन्तरेण कश्चिन्महाकार्यकरणाय प्रवर्तते । तथा सर्वस्याः संसारवल्ल्या उत्पादनाय कठिनकन्दः । कठिनकन्दाद्ध्यविच्युता वीरुद्वृद्धिः । कंदर्पदेवादनन्तरं पुनःपुनर्नेत्रापाङ्गप्रदेशक्रोडे कामुकजनलक्ष्यीकरणाय प्रवर्तितानां नववयःसुन्दरीनेत्राणां कटाक्षादिविभ्रमो जयति ॥ २ ॥

अथ यदवाचि "तदनु च विजयन्ते वाग्विलासाः" इति तद्गुणानेव श्लोकत्रयेणाह—**अगाधेति** ॥ सरस्वती भारती नदीविशेषश्च । तस्या इदं सारस्वतम् । स्रोतः

१ परिस्पन्दि. २ महत्.

प्रसन्नाः कान्तिहारिण्यो नानाश्लेषविचक्षणाः ।
भवन्ति कस्यचित्पुण्यैर्मुखे वाचो गृहे स्त्रियः ॥ ४ ॥
किं कवेस्तेन काव्येन किं काण्डेन धनुष्मतः ।
परस्य हृदये लग्नं न घूर्णयति यच्छिरः ॥ ५ ॥

प्रवाहं वन्दे नमस्कुर्वे स्तुवे वा । नदीपक्षे प्रवाहस्य तद्धर्मत्वान्न किंचिद्दुर्घटम् । परं भारतीपक्षेऽन्यधर्मस्यान्यत्रारोपलक्षणसमाधिना गिरां नैरन्तर्येऽपि स्रोतःशब्दः । यथा "उन्मिमील कमलं सरसीनां कैरवं च निमिमील मुहूर्तात्" इत्यत्रोन्मीलननिमीलने नेत्रधर्मावपि कमलकुमुदयोरारोपिते । किं कुर्वत् । वहत्प्रवर्तमानम् । पक्षे प्रसरत् । तथा अगाधो महार्थतयालब्धमध्योऽन्तर्मध्ये प्रकरणान्मनसि परिस्पन्दश्चमत्कारी स्फूर्तिविशेषो यस्य । पक्षेऽगाधो गम्भीरोऽन्तर्मध्ये परि समन्तात्स्पन्दश्चलनमावर्तविशेषो यस्य । तथा विबुधानां देवानां पण्डितानां वा हर्षस्थानम् । भारतीविलासेन हि सुराणामपि प्रमोदः संपद्यते । पक्षे वीनां पक्षिणां मध्ये बुधा राजहंसास्तेषां हर्षस्थानम् । तथा रसानां शृङ्गारादीनामन्तरेण विशेषेण प्रौढं प्रगल्भम् । पक्षे रसाया भूमेरन्तरे मध्ये प्रवहति स्म । कर्तरि क्तः । सरस्वती किल म्लेच्छदेशे न्यग्भूय तदन्ते पुनरुद्भवतीति लोकश्रुतिः ॥ ३ ॥

प्रसन्ना इति ॥ कीदृश्यो वाचः । नानानेकधा प्रसन्नाः प्रसादगुणोपेताः । शब्दगुणः प्रसाद ओजोमिश्रितशैथिल्यात्मा । अर्थगुणस्तु प्रसादो वैमल्यं झटित्यवबोधगोचरत्वम् । तथा च काव्यप्रकाशकारः—"श्रुतिमात्रेण शब्दानां येनार्थप्रत्ययो भवेत् । साधारणः समग्राणां स प्रसादो गुणः स्मृतः" इति । यद्वा प्रसन्नाः समासरहिताः । उक्तं च—"माधुर्यमभिवाञ्छन्तः प्रसादं च सुमेधसः । समासवन्ति भूयांसि न पदानि प्रयुञ्जते" इति । तथानेकधा कान्तिगुणेन हर्तुं मनो वशीकर्तुं शीलं यासाम् । शब्दगुणः कान्तिरौज्ज्वल्यम् । ग्राम्यादिभिरनभिप्रयुक्तत्वमिति यावत् । अर्थगुणस्तु कान्तिर्दीप्तरसत्वम् । तथा नाना शब्दगुणार्थगुणार्थालंकारशब्दालंकाररूपं चतुर्विधं श्लेषं विशेषेण चक्षते याः । शब्दगुणो मसृणत्वं श्लेषः । अर्थगुणस्तु श्लेषो घटना । शब्दकृतः शब्दालंकारः श्लेषः । अर्थकृतस्तु श्लेषोऽर्थालंकारः । स्त्रियस्तु प्रसन्नास्तोषान्विताः । तथा कान्त्या वपुषो गुणविशेषेण मनोज्ञाः । तथा नानानेकविधे स्पृष्टक–विद्धक–उद्धृष्ट–पीडन–लतावेष्टक–वृक्षाधिरूढ–तिलतण्डुल–क्षीरनीर–ऊरूपगूढ–जघनोपश्लेष–स्तनालिङ्गन–ललाटिक–रूपे द्वादशविध आलिङ्गने विचक्षणा दक्षाः ॥४॥५॥

---

1 तस्य.

अप्रगल्भाः पदन्यासे जननीरागहेतवः ।
सन्त्येके बहुलालापाः कवयो बालका इव ॥ ६ ॥
अक्षमालापवृत्तिज्ञा कुशासनपरिग्रहा ।
ब्राह्मीव दौर्जनी संसद्वन्दनीया समेखला ॥ ७ ॥
रोहणं सूक्तरत्नानां वृन्दं वन्दे विपश्चिताम् ।
यन्मध्यपतितो नीचः काचोऽप्युच्चैर्मणीयते ॥ ८ ॥

अथ कुकविनिन्दाव्याजेन विपरीतगिरामग्राह्यत्वमाह— **अप्रगल्भा इति ।** एके कवयो बालका इव सन्ति । किंभूताः कवयः । पदानां सुप्तिङन्तरूपाणां न्यासे नैयत्यप्रयोगेऽप्रगल्भा अनिपुणाः । तथा जनानां विदुषां नीरागे रागाभावे हेतवः कारणम् । नहि तादृशां काव्यं श्रुत्वा रसिकानां कश्चिच्चमत्कारः संजायते । तथा बहुल आलापो येषाम् । एतेन निःसारवक्तृत्वोक्तिः । बालकास्तु पदन्यासे चरणक्षेपेऽनिपुणाः । तथा जनन्या मातू रागहेतवोऽनुरागकारणम् । तथा बह्वीर्लाला निष्ठीवनजलानि पिबन्तीति बहुलालापाः । यद्वा बह्वयो लाला अप्स्वरूपा येषु ॥ "**ऋक्पूः–**" इति सूत्रेण समासान्तः ॥ ६ ॥

कारणं विनापि केचित्परोत्कर्षमसहिष्णवः । ततस्तानेव क्षुद्रान्काव्यप्रवृत्तिभङ्गहेतूञ्शब्दमात्रेण गौरवयन्नाह— **अक्षेति** ॥ दुष्टानां कृत्याकृत्यभव्याभव्यविशेषविवेकविकलानां जनानामियं दौर्जनी संसत्सभा वन्दनीया नमस्कार्येत्युपहासवाक्यम् । श्लेषतस्तु वन्दे गुप्तौ करणीया वन्दनीया । केव । ब्रह्मणां विप्राणामियं ब्राह्मी द्विजसभेव । यथा द्विजसभा वन्द्यते तथा दुर्जनसंसदपि वन्द्या । किंभूता दौर्जनी । अक्षमया रुषा संभाषणस्य वृत्तिं जानाति कोपोल्लापयुग्वाक्प्रसरा । तथा कुशासनस्य कुत्सितशिक्षणस्य स्वीकारो यस्याः । तथा समे साधावपि खला प्रतिपक्षभूता । द्विजसभा त्वक्षमालाया भ्रमणं जानाति या । तथा दर्भासनस्य स्वीकारो यस्याः । तथा मेखलया मौञ्ज्या सहिता ॥ ७ ॥

रोहणमिति ॥ सुभाषितान्येव रत्नानि तेषां प्रशस्तरत्नानां वा रोहणमुत्पत्तिस्थानं माणिक्यशैलो वा । कचबन्धे कच्यन्तेऽर्था अनेनास्मिन्वा काचः प्रबन्धः क्षारमृद्विकारश्च । विपश्चितो ह्येतादृशमपि प्रबन्धं व्याख्यानप्रागल्भ्यादनुगृह्योत्कर्षं लम्भयन्ति ॥ ८ ॥

---

१ सूक्ति. २ वृन्दे वृन्दम्.

अत्रिजातस्य या मूर्तिः शशिनः सज्जनस्य च।
क्व सावैरात्रिजातस्य तमसो दुर्जनस्य च॥ ९॥
निश्चितं ससुरः कोऽपि न कुलीनः समेमतिः।
सर्वथासुरसंबद्धं काव्यं यो नाभिनन्दति॥ १०॥
सदूषणापि निर्दोषा सखरापि सुकोमला।
नमस्तस्मै कृता येन रम्या रामायणी कथा॥ ११॥
व्यासः क्षमाभृतां श्रेष्ठो वन्द्यः स हिमवानिव।
सृष्टा गौरीदृशी येन भवे विस्तारिभारता॥ १२॥

आस्तां सज्जनदुर्जनयोः शीलेन साम्यम्। यावन्मूर्त्यापि महदन्तरमिति निरूपयन्नाह—**अत्रीति**॥ अत्रिमुनिजातस्य शशाङ्कस्य न त्रिभिर्जातस्य सज्जनस्य च या मूर्तिः सर्वाभीष्टा सा वै स्फुटं रात्रिजातस्य तमसस्त्रिजातस्य दुर्जनस्य च क्व। यतो दुर्जनस्य वैरा वैरप्रधाना। सज्जनस्य त्ववैरा॥ ९॥

निश्चितमिति॥ सुष्ठु रसाः शृङ्गारादयो यत्र तथा बद्धं रचितं काव्यं ग्रन्थं यो नाभिनन्दति स निश्चितं ध्रुवं ससुरो मद्यपः कोऽपि। नच कुलीनः नाभिजातः। सर्वथा समे साधावमतिः। असुरैः संबद्धं मिलितं काव्यं भृगुं यो न नन्दति स सुरो देवः कोऽपि। तथा न कौ भूम्यां लीन आश्लिष्टः। स्वर्ग एव तस्यावस्थानात्। तथा मा लक्ष्मीः, इः कामः, ताभ्यां सहितः समेर्विष्णुस्तत्र सेवनाय मतिर्यस्य। विष्णुपक्षीय इति भावः॥ १०॥

संप्रति वाग्विलासाधारानुदारान्वाल्मीकिप्रभृतीन्कतिचित्कवीन्वर्णयन्नाह—**सदूषणेति**॥ अपिर्विरोधे। स च दूषणखरयोर्दोषार्थकठिनार्थकत्वे भवेत्। परिहारस्तु दूषणखरौ राक्षसौ यत्र वर्णितौ। इहानुक्तोऽपि वाल्मीकिः प्रतीयते। "प्रौढविशेषणयोगाद्विशेष्यप्रतिपत्तिः" इति वचनात्। किं चासौ भगवान्मर्त्यलोके काव्यसृष्टिप्रथमवेधा निरुपमरमणीयकरामायणनिर्माणप्रवीणतयैव निर्दिश्यमानः प्रकृष्यते। नत्वितरसाधारणसंज्ञामात्रनिर्देशेन। अतएव कवितोत्कर्षचमत्कृतेन वाक्यसमाप्तिं प्रतीक्षितुमक्षमेण त्रिविक्रमेण वाक्यगर्भेऽपि तस्मै नम इति भक्तिप्रकर्षप्रकाशनमुक्तम्। अर्धयोर्व्यत्यासपाठे तु गर्भितदोषशङ्कैव न स्यात्॥ ११॥

व्यास इति॥ स कृष्णद्वैपायनो वन्द्यः। किंभूतः। क्षान्तानां मध्येऽतिशयेन

१ तस्मै नमः.

कर्णान्तविभ्रमभ्रान्तकृष्णार्जुनविलोचना ।
करोति कस्य नाह्लादं कथा कान्तेव भारती ॥ १३ ॥

शश्वद्वाणद्वितीयेन नमदाकारधारिणा ।
धनुषेव गुणाढ्येन निःशेषोरञ्जितो जनः ॥ १४ ॥

इत्थं काव्यकथाकथानकरसैरेषां कवीनाममी
विद्वांसः परिपूर्णकर्णहृदयाः कुम्भाः पयोभिर्यथा ।
वाचो वाच्यविवेकविक्लवधियामीदृग्विधा मादृशां
लप्स्यन्ते क्व किलावकाशमथवा सर्वसहाः सूरयः ॥ १५ ॥

वाचः काठिन्यमायान्ति भङ्गश्लेषविशेषतः ।
नोद्वेगस्तत्र कर्तव्यो यस्मान्नैको रसः कवेः ॥ १६ ॥

प्रशस्यः । तथा येनेदृशी सर्वत्र विख्याता विस्तरणशीलं भारतं यस्यां सा भवे संसारे गौर्वाक्सृष्टा । क इव । हिमवानिव । किंभूतः सः । क्षमाभृतां भूभृतां श्रेष्ठः । तथा येन भवे शिवे रतानुरक्तैवंभूता गौरी सृष्टा । किंभूता । विस्तारिणी भा कान्तिर्यस्याः ॥१२॥

कर्णेति ॥ कर्णस्य राधेयस्यान्ते विनाशे सति विभ्रमेण विस्मयेन वेर्गरुडस्य भ्रमेण वातिलाघवेन भ्रान्ता विचरितुं प्रवृत्ताः कृष्णपार्थधृतराष्ट्रा यस्याम् । केव । कान्तेव । किंभूता । श्रवणपर्यन्ते विलासेन भ्रान्ते स्फुरिते कृष्णार्जुने श्यामवलक्षे विलोचने नेत्रे यस्याः ॥ १३ ॥

शश्वदिति ॥ बाणः कविः शरश्च । गुणाढ्यकविर्बृहत्कथाकारो गुणेन ज्यया युक्तश्च । न मदाकारं स्तब्धत्वादिरूपं धरतीत्येवंशीलः कविः । बाणाकर्षणाय नमदाकारं धरतीत्येवंशीलं धनुः । रञ्जितः प्रमोदं प्रापितः । अरमत्यर्थं जितो जनः प्रतिपक्षलोकश्च ॥ १४ ॥

इत्थं कविवर्णनं संक्षिपन्नाह—**इत्थमिति** ॥ तर्हि कथाग्रथनप्रयत्नेन किमित्याह—**अथवेति** ॥ १५ ॥

भङ्गश्लेषमुक्तिविशेषेण संवृण्वन्नाह—**वाच इति** ॥ यतो हेतोः कवेः काव्यकर्तुर्नैको रसो नैका रुचिः प्रसक्तिलक्षणा व्युत्पत्तिलक्षणाप्यस्ति ॥ १६ ॥

काव्यस्याम्रफलस्येव कोमलस्येतरस्य च ।
बन्धच्छायाविशेषेण रसोऽप्यन्यादृशो भवेत् ॥ १७ ॥

अस्ति समस्तमुनिमनुजवृन्दवृन्दारकवन्दनीयपादारविन्दस्य भगवतो विधेर्विश्वव्यापिव्यापारपारवश्यादवतीर्णस्य संसारचक्रे क्रतुक्रियाकाण्डशौण्डस्य शाण्डिल्यनाम्नो महर्षेर्वंशः ॥ क ॥

श्रूयन्ते च[2] यत्र श्रवणोचिताश्चन्दनपल्लवा इव[3] केचिदनूचानाः शुचयः[4] सत्यवाचो[5] विरञ्चिवर्चसोऽर्चनीयाचारा ब्रह्मविदो ब्राह्मणाः । पुण्यजनाश्च न च येलङ्कापुरुषाः, सत्सूत्राश्च[6] न च येलम्पटाः, प्रसिद्धाश्च न च येलम्पाकाः, कामवर्षाश्च न च येलङ्घनाः सन्मार्गस्य, नववयसोऽपि न च येलम्बालकाः, महाभारतिकाश्च न च येरङ्गोपजीविनः, सेविताप्सरसोऽपि न च येरम्भयान्विताः ॥ ख ॥

किं बहुना ।

जानन्ति हि गुणान्वक्तुं तद्विधा[7] एव तादृशाम् ।
वेत्ति विश्वंभरा भारं गिरीणां गरिमाश्रयम् ॥ १८ ॥

ननु प्रसत्तिमार्गेण कोमलमेव काव्यं निबध्यताम् । किमितरेण व्युत्पत्तिमार्गेण भङ्गश्लेषकृतकाठिन्येनोद्वेगहेतुनेत्यत आह—**काव्यस्येति** ॥ कोमलस्य प्रसन्नस्येतरस्य व्युत्पन्नस्य काव्यस्य रचनाचारुत्वेन रसोऽपि शृङ्गारादिरसोऽप्यन्यादृशोऽन्यरूपो व्युत्पत्तिचर्यया सोत्कर्ष इव स्यात् । कस्येव । आम्रफलस्येव । यथाम्रफलस्याकारवैसादृश्यं बन्धस्य वृन्तस्य नीलपीतादिच्छायायाश्च विशेषेण यावद्रसः स स्वादोऽप्यन्यादृग्भवति । बध्यतेऽनेनेति कृत्वा बन्धो वृन्तं फलारम्भकरसकणिकारूपो वा । काव्यपक्षे बन्धो रचना ॥ १७ ॥ क ॥

श्रूयन्त इति ॥ यत्र महर्षेर्वंश ईदृशा ब्राह्मणाः श्रूयन्त इत्यन्वयः । कीदृशाः । श्रवण आकर्णन उचिता योग्याः । पुण्यरूपत्वात् । चन्दनपल्लवास्तु श्रवणयोः कर्णयोरवतंसीकरणाय योग्याः । पुण्यजना यातुधाना लङ्कावासिनो नेति विरोधः । पुण्याः पवित्रा जना लोका अलमत्यर्थं न कापुरुषा इति विरोधपरिहारेण ब्राह्मणाः प्रश-

---

१ फलस्यापि. २ च श्रवणोचिताः. ३ इव तत्र केचित्. ४ सूरयः. ५ सत्यवाचिनः. ६ सुसूत्राश्च. ७ तादृशाः.

तेषां वंशे विशदयशसां[1] श्रीधरस्यात्मजोऽभू-
द्देवादित्यः[2] स्वमति[3]विकसद्वेदविद्याविवेकः
उत्कल्लोलां दिशि दिशि जनाः कीर्तिपीयूषसिन्धुं
यस्याद्यापि श्रवणपुटकैः कूणिताक्षाः पिबन्ति ॥ १९ ॥
तैस्तैरात्मगुणैर्येन त्रिलोक्यास्तिलकायितम् ।
तस्मादस्मि सुतो जातो जाड्यपात्रं त्रिविक्रमः ॥ २० ॥
सोऽहं हंसायितुं मोहाद्बकः पङ्गुर्यथेच्छति ।
मन्दधीस्तद्वदिच्छामि कविवृन्दारकायितुम् ॥ २१ ॥
भङ्गश्लेषकथाबन्धं दुष्करं कुर्वता मया ।
दुर्गस्तरीतुमारब्धो बाहुभ्यामम्भसां पतिः ॥ २२ ॥
उत्फुल्लगल्लैरालापाः[5] क्रियन्ते दुर्मुखैः सुखम् ।
जानाति हि पुनः सम्यक्कविरेव कवेः[6] श्रमम् ॥ २३ ॥

स्यन्ते । एवमग्रेऽपि । तथा सूत्रेण तन्तुना सहिता अप्यत्यन्तं पटाभाववन्तः । सूत्रेणोपवीतेन वेदपाठेन वा युक्ता अपि न लम्पटा लालसाः । तथा प्रकर्षेण सिद्धा अग्निसंस्कारेण निष्ठां प्राप्ता अपि पूपाद्यास्ते कथमलं न पच्यन्ते स्म । प्रसिद्धा विख्याता न लम्पाका लम्पटाः । तथा कामवर्षिणोऽपि नालं मेघाः । अभिलषितदातारोऽपि सन्मार्गस्य लङ्घना न । तथाल्पावस्था अपि नालं शिशवः । तरुणावस्था अपि न दीर्घकेशाः । अग्निहोत्रित्वात् । तथा महान्तो नटा अपि न नृत्यभूम्युपजीविनः । महान्तो भारताख्यायका अपि नात्यर्थं गोपान्नृपाज्जीवन्ति । "राजान्नं तेज आदत्ते" इति दोषश्रवणात् । तथा भुक्तदेवाङ्गना अपि न रम्भया युताः । सेवितानि जलप्रधानानि सरांसि यैस्तथाविधा अपि न च येऽरमत्यर्थं भयान्विताः ॥ ख ॥ १८ ॥

तेषामिति ॥ कूणिताक्षाः सुखात्किंचिन्निमीलितनेत्राः ॥ १९ ॥ २० ॥

सोऽहमिति ॥ मोहादज्ञानाद्गतिमानपि बकः स्वभावसुभगगतेर्हंसस्यापेक्षया पङ्गुः । अथवा दैवात्कथंचिद्भग्नचरणत्वाद्बकः पङ्गुः ॥ २१ ॥

भङ्गेति ॥ यथा बाहुभ्यां दुस्तरः समुद्रस्तथा भङ्गश्लेषकथाबन्धोऽपि । दुष्कर इत्यौपम्याद्वस्तुसंबन्धः । "अभवन्वस्तुसंबन्ध उपमा परिकल्पकः" इति ॥ २२ ॥

उत्फुल्लेति ॥ दुष्टमुखैः क्रियमाणत्वादालापा अपि दुष्टा निन्दाकराः ॥

१ वचसाम्. २ त्रेमादित्यः. ३ सुमति. ४ निधिः. ५ उल्लापाः. ६ कविश्रमम्.

संगता सुरसार्थेन रम्या मेरुचिराश्रया ।
नन्दनोद्यानमालेव स्वस्थैरालोक्यतां कथा ॥ २४ ॥
उदात्तनायकोपेता गुणवद्वृत्तमुक्तका ।
चम्पूश्च हारयष्टिश्च केन न क्रियते हृदि ॥ २५ ॥

अस्ति समस्तविश्वंभराभोगभास्वल्ललामलीलायमानः, समानः सेव्यतया नाकलोकस्य, ग्राम्यकविकथाबन्ध[2] इव नीरसस्यमनोहरः, भीम इव भारतालंकारभूतः, कान्ताकुचमण्डलस्पर्शी इवाग्रणीः सर्वविषयाणाम्, अनधीतव्याकरण इवादृष्टप्रकृतिनिपातोपसर्गलोपवर्णविकारः, पशुपतिजटाबन्ध[3] इव विकसितकनककमलकुवलयोच्छलितरजःपुञ्जपिञ्जरितहंसावतंसया[4] प्रचुरचलच्चको-

"उल्लापाः" इति पाठे काकुभाषितानि ॥ दुर्मुखैः स्वैरं क्रियन्ते । गल्लशब्दो ग्राम्योऽप्यत्र दुर्मुखानामकवीनां ग्राम्याणां निन्दाभिधाने प्रयुक्तः समुचित एव ॥ २३ ॥

संगतेति ॥ रुचिरो रम्य आश्रयो नलोपाख्यानलक्षणो यस्याः सेयं मम स्वस्थैरव्यग्रैरालोक्यतां विमृश्यताम् । स्वस्थे चित्ते बुद्धयः संचरन्ति । किंभूता । शोभनो रसः शृङ्गारादिर्यत्र तथोक्तेनार्थेन संगतोचिता । औचित्यं हि रसस्य परमरहस्यम् । उक्तं च—"अनौचित्यादृते नान्यद्रसभङ्गस्य कारणम् । प्रसिद्धौचित्यबन्धो हि रसस्योपनिषत्परा ॥" तथा रम्या भङ्गश्लेषोक्तिभिर्मनोहरा । पक्षे स्वः स्वर्गे तिष्ठन्तीति कृत्वा स्वस्थैः स्वर्गवासिभिः ॥ खर्परे शरि वा विसर्गलोपः ॥ किंभूता । सुराणां सार्थो वृन्दं तेन संगता कृतसङ्गा । तथा मेरुः सुरगिरिश्चिरमाश्रयो यस्याः ॥ २४ ॥

उदात्तेति ॥ उदात्तेन महात्मना नायकेन नलेनोपेता । तथौजःप्रसादादिगुणयुक्तं वृत्तं छन्दोबद्धं मुक्तकं गद्यात्मकं च यस्यां सा चम्पूर्गद्यपद्यमयी साङ्कोच्छ्वासा कथोदात्तेन महार्घेण नायकेन हारमध्यरत्नेनोपेता । तथा तन्तुमत्यो वृत्तमुक्ता वर्तुलमौक्तिकानि यस्यां सा मुक्ताहारलता च केन चित्ते वक्षसि च न क्रियते ॥ २५ ॥

अस्तीति ॥ "आ समुद्रात्तु वै पूर्वादा समुद्राच्च पश्चिमात् । तयोरेवान्तरं गिर्योरार्यावर्तं विदुर्बुधाः" इति मनूक्तलक्षण आर्यावर्तो नाम प्रसिद्धो देशोऽस्ति । किंभूतः । नीरेण

१ आलोच्यताम्. २ प्रबन्धः. ३ जटाजूटबन्धः. ४ राजहंस.

रचक्रवाककारण्डवमण्डलीमण्डिततीरया भगीरथभूपालकीर्तिपताकया स्वर्गगमनसोपानवीथीयमानरिङ्ग[1]त्तरङ्गया गङ्गया पुण्यसलिलैः प्लावितश्चन्द्रभागालंकृतैकदेशश्च, सारः सकलसंसारचक्रस्य, शरण्यः पुण्यकारिणाम्, आरामो रामणीयककदलीवनस्य, धाम धर्मस्य, आस्पदं संपदाम्, आश्रयः श्रेयसाम्, आकरः साधुव्य[2]वहाररत्नानाम्, आचार्यभवनमार्यमर्यादोपदेशानामार्यावर्तो नाम देशः ॥ क ॥

यस्मिन्ननवरतध[3]र्मैकर्मोपदेशशान्तस[4]मस्तव्याधिव्यतिकराः पुरुषायुषजीविन्यः सकलसंसारसुखभाजः प्रजाः । तथाहि । कुष्ठयो[5]गो गान्धिकापणेषु, स्फोटप्रवादो वैयाकरणेषु, संनिपातस्तालेषु, ग्रहसंक्रान्तिर्ज्योतिःशास्त्रेषु, भूतविकारवादः सांख्येषु, क्षयस्तिथिषु, गुल्मवृद्धिर्वनभूमिषु, गलग्रहा मत्स्येषु, गण्डकोत्थानं प[6]र्वतवनभूमिषु, शूलसंबन्धश्चण्डिकायतनेषु, दृश्यते न प्रजासु ॥ ख ॥

धान्येन च मनोज्ञः । पक्षेऽरसिकस्य मनोज्ञः । तथा भरतवर्षस्य मण्डनभूतः । पक्षे भारतस्येतिहासस्य । तथा विषयो देशः । पक्षे इन्द्रियार्थः । तथा न दृष्टः प्रकृतीनां निपातः स्वपदात्पतनम्, उपसर्गो धनापहारादिरुपद्रवः, लोपो देवदायब्रह्मदायाद्यपालनम्, वर्णविकारश्चातुर्वर्ण्याव्यवस्था यस्मिन् । पक्षे प्रकृतयो धात्वादयः, निपाताश्चादयः, उपसर्गाः प्रादयः, लोपः प्रसक्तस्यादर्शनम्, वर्णविकारोऽक्षरविकृतिः । तथा चन्द्रभागया नद्या चन्द्रखण्डेन च भूषितैकदेशः । क ॥

यस्मिन्निति ॥ कुष्ठमौषधविशेषो रोगविशेषश्च । स्फुट्यते व्यज्यतेऽर्थोऽनेनेति स्फोटो वैयाकरणप्रसिद्धं शब्दब्रह्म । स च वाक्यस्फोटः पदस्फोटश्चेति द्विधा नित्यश्च । तस्य प्रकर्षेण वादः कथनम् । स्फोटस्य पिटकस्य प्रवादश्च । संनिपात उभयहस्तयोजनम् । यदुक्तम्—“ शस्यां दक्षिणहस्तेन तालं वामेन योजयेत् । उभयोर्हस्तयोः पातः संनिपातः स उच्यते ॥ ” वातपित्तश्लेष्मणामेकत्र योगो रोगविशेषश्च । ग्रहाणां सूर्यादीनां मेषादिराशौ संक्रान्तिः । ग्रहो बन्धनं तस्य संक्रान्तिश्च । भूतः प्रधानाख्यं तत्त्वं

१ रङ्गत्. २ व्यवहाराणाम्. ३ धर्मैकर्मोपशान्त; धर्म्यधर्मोपदेश; धर्मकर्मणोपशान्त. ४ समस्ताधिव्याधि; सर्वव्याधि. ५ प्रयोगः. ६ पर्वतभूमिषु.

यत्र चंतुरगोपशोभिताः सङ्ग्रामा इव ग्रामाः, तुङ्गसकलभवनाः सर्वत्र नगा इव नगरप्रदेशाः, सदाचरणमण्डनानि नूपुराणीव पुराणि, सदानभोगाः प्रभञ्जना इव जनाः, प्रियालपनसाराणि यौवनानीव वनानि, विटपिहिताश्चेटिका इव वाटिकाः, निर्वृतिस्थानानि सुकलत्राणीवेक्षुक्षेत्रसत्राणि, जलाविलक्षणाः पशुपुरुषा इ-

मूलप्रकृतिः। ततो महान्। महतस्तस्मादहंकारः। अहंकाराच्च पञ्च तन्मात्राणि (पृथिव्यादिपञ्चतन्मात्राणि)। एवमष्टौ। तत एकादशेन्द्रियाणि पञ्च भूतानि चेति षोडश विकाराः। एवं चतुर्विंशति तत्त्वानि। पञ्चविंशस्तु पुरुषः। तथा च—"मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त। षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः" इति सांख्याः। ततश्च तेष्वेव भूतविकाराणां वादः प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहः। पक्षे भूतस्य प्रेतस्य विकारः। क्षयः सूर्योदयकालावृत्तित्वं रोगविशेषश्च। गुल्मः स्तम्बो रुग्वा। गले ग्रहणं बडिशेन रोगविशेषश्च। गण्डकाः खड्गिपशवो ह्रस्वस्फोटका वा। शूल आयुधविशेषो रोगविशेषश्च॥ ख॥

यत्रेति॥ यत्र देश एते पदार्थाः। तद्यथा। येषु परिषन्मण्डपेषु ग्रामवृद्धा उपविशन्ति ते चतुरास्तैस्तथा गोपैरुपशोभिताः। यद्वा चतुरैर्दक्षैर्गोपैः पाशुपाल्यजीविभिरुपशोभिताः। गोशब्दस्य पशुमात्रवचनत्वात्। सङ्ग्रामपक्षे "च" इति छेदनीयम्। तुङ्गान्युच्चानि सकलानि सर्वाणि संपूर्णानि वा भवनानि गृहा यत्र। नगाश्च तुङ्गैः पुंनागैरुपलक्षितं कलभैरिभडिम्भैः सहितं वनं यत्र। पुंनागकरिपोतयुता इत्यर्थः। यद्विश्वप्रकाशः—"तुङ्गः पुंनागनागयोः। तुङ्गः स्यादुन्नतेऽन्यवत्"। पुराणि शोभनमाचरणमेव मण्डनं यत्र। नूपुराणि सर्वथा चरणभूषणानि। दानभोगाभ्यां सहिता जनाः। शश्वन्नभोगा वायवः। दयितानां सकामोल्लापेन साराणि यौवनानि। वनानि प्रियालं राजादनं पनसं चेयूति प्राप्नुवन्ति। विटपिभ्यस्तरुभ्यो हिता वाटिकाः। चेटिका दास्यस्तु विटैः पिहिता वेष्टिताः। इक्षुक्षेत्रे सत्राणि दानशालाः। निर्वृत्या वृतेरभावेन स्वच्छन्दं स्थीयते यत्र। निर्वृतेः सुखस्यास्पदानि कलत्राणि। तडागभागा जलाविला जलार्थिभिः सदा सेव्यतया जलपिच्छिलाः क्षणाः अवतारादितीरप्रदेशा यत्र। यद्वा जलैराविला नीरन्ध्राः पूर्णाः क्षणाः खातकानि यत्र। अगाधाः। पशुपुरुषास्तु जडा विलक्षणा व्यपेतशास्त्राः। यद्वा अविभिर्मेण्ढैर्लक्ष्यन्ते। यद्वावीन्मेण्ढाँल्लक्षयन्ति। पश्चात्कर्मधारयः। प्रत्यक्षादिप्रमाणरहिताश्च। कूपा भग्नकुम्भकर्णाः स्फुटितघटकण्ठाः। घन प्राचुराः

१ चतुरङ्ग. २ क्षेत्राणि.

वाप्रमाणास्तडागभागाः, कुपितकपिकुलाकुलिता[1] लङ्केश्वरकिंकरा इव भग्नकुम्भकर्णघनस्वापाः कूपाः, पीवरोधसः सरित इव गावः, सतीव्रतापदोषाः सूर्यद्युतय इव कुलस्त्रियः ॥ क ॥

यत्र च मनोहारिसारसद्वन्द्वास्तत्पुरुषेण द्विगुना चाधिष्ठिताः कादम्बरीगद्यबन्धा इव दृश्यमानबहुव्रीहयः केदाराः ॥ ख ॥

किं बहुना।

नास्ति सा नगरी यत्र न वापी न पयोधरा।
दृश्यते न च यत्र स्त्री नवापीनपयोधरा ॥ २६ ॥

स्वाः स्वकीयाः पातालमूलोत्था न तु प्रवाहादिपूरिता आपः पानीयानि येषु। यद्वा घनस्वा बहुद्रव्या आपो येषु। वापीकूपादौ हि जीर्णोद्धारार्थं निधिर्भवतीति ख्यातिः। किंकरास्तु भग्नः श्रीरामागमनकथनेन कुम्भकर्णस्य रक्षसो घनः प्रचुरः षण्मासावधिकः स्वापः शयनं यैः। गावः पीवरं च तदूधश्च पीवरोधस्तस्मात्पीवरोधसो हेतोः सरित इव। यद्वा पीवरमूध आपीनं येषाम्। अत्र "गोशब्दो धेन्वर्थोऽपि स्त्रीनरलिङ्गः" इति व्याडिः। ततः पुंस्त्वादनङ् न। सरितस्तु पीव स्थूलं रोधस्तटं यासाम्। कुलस्त्रियः सतीव्रतेनापगता नष्टा दोषाः कलङ्का यासाम्। सूर्यद्युतयस्तु तीव्रतापदोषेण सहिताः ॥ क ॥

यत्रेति ॥ किंभूताः केदाराः। मनोहारीणि सारसानां द्वन्द्वानि येषु। तथा तत्पुरुषेण तत्स्वामिना द्विगुना गोयुगयुक्तेनाधिष्ठिताः बहवोऽपि गावः सन्ति। द्विगुनेति चोपलक्षणम्। अथवा चकारोऽप्यर्थे। द्विगुनापि तत्पुरुषेणाधिष्ठिताः। तथा दृश्यमाना बहवो व्रीहयो येष्विति भूमेः सस्यसंपदुक्ता। गद्यबन्धास्तु मनोहारिणः साराः श्रेष्ठाः। सद्वन्द्वाः द्वन्द्वसमाससहिताः। तथा तत्पुरुषेण द्विगुना च समासेनाधिष्ठिताः। तथा दृश्यमानबहुव्रीहिसमासाः। तथा च द्वन्द्वतत्पुरुषद्विगुबहुव्रीहिसमासबहुला इत्यर्थः ॥ ख ॥

नास्ति सेति ॥ यत्र देशे सा कापि नगरी नास्ति। यस्यां न वापी निपानम्। न पयोधरा पयःप्रधाना भूमिः। न च तरुणी पीनस्तनी स्त्री दृश्यते। यदि पुनस्तत्त्रयमपि चतुर्थपादेन विशेषणीकर्तुमाग्रहस्तर्हि पयोभूम्योरेवं व्याख्यायते। "णु स्तुतौ"। नवं स्तुतिमाप्नुताऽभीक्ष्णमिति नवापिनी। तथाभूते इनपयसी स्वामिजले धरतीति तथोक्ता

---

1 कुलित.

अपि च।

भवन्ति फाल्गुने मासि[1] वृक्षशाखा विपल्लवाः।
जायन्ते न तु[2] लोकस्य कदापि च[3] विपल्लवाः ॥ २७ ॥

यत्र[4] सौराज्यरञ्जितमनसः सकलसमृद्धिवर्धित[5]महोत्सवपरम्परारम्भनिर्भराः, सततमकुलीनं कुलीनाः, प्राप्तविमानमप्राप्तविमानभङ्गाः[6], कतिपयवसुविराजित[7]मनेकवसवः, समुपहसन्ति स्वर्गवासिनं जनं जनाः ॥ क ॥

कथं चासौ स्वर्गान्न[8] विशिष्यते ॥ ख ॥

यत्र गृहे गृहे गौर्यः स्त्रियः, महेश्वरो[9] लोकः, सश्रीका हरयः, पदे पदे धनदाः सन्ति लोकपालाः। केवलं न सुराधिपो राजा। न[10] च विनायकः कश्चित् ॥ ग ॥

वापी। भूस्तु वपन्त्यभीक्ष्णमिति वापिनः कर्षकास्तेषामिना आजीवहेतुत्वात्स्वामिनः पयोधरा मेघा यस्यां तथाभूता। पश्चान्नञ्संबन्धः। अवृष्टिनिष्पाद्यसस्येति भावः। अयमर्थस्तेनाहः। प्रशस्तस्वामिपयस्का वापी, अवृष्टिनिष्पादितसस्या भूमिः, तरुणी पीनस्तनी च कान्ता, यस्यां दृश्यते सैव नगरी यत्र देशेऽस्तीति। अथवा यत्र देशे सा नगरी नास्ति यस्यां नगर्यां वापी स्त्री च न दृश्यते। कीदृशी वापी। न न पयोधरा। अपि तु पयोधरा। नञ्द्वयस्य प्रकृतार्थसूचकत्वात्। स्त्री च किंभूता। नवा तरुणी। तथा पीनपयोधरा। सर्वास्वपि नगरीषु पयोधरा वाप्यस्तरुण्यः पीनस्तन्यश्च स्त्रियो दृश्यन्त इति भावः ॥ २६ ॥

भवन्तीति ॥ शाखा विगतपल्लवा यत्र भवन्ति। जनस्य विपदां लवा अपि न स्युः ॥ २७ ॥

यत्रेति ॥ यत्र जनाः स्वर्गिणमपि न्यक्कुर्वन्ति। कुलीना अभिजाताः। विमानता तिरस्कारः। वसु धनम्। पक्षे कुः पृथ्वी तस्यां लीनाः। विमानं देवयानम्। वसवोऽष्टौ ध्रुवादयः। देवन्यक्कारस्तुल्यार्थे व्याख्येयः ॥ क ॥

कथं चायं स्वर्गान्नाधिकः ॥ ख ॥

यत्रेति ॥ गौर्यो गौराङ्ग्यः शुद्धोभयान्वया वा स्त्रियः। महानीश्वरोऽतिसमृद्धः। सह-

1 मासे. 2 च. 3 न. 4 यत्र च. 5 समृद्धिबृद्धिवर्धित. 6 सङ्गाः. 7 राजित. 8 स स्वर्गलोकान्न. 9 सर्वत्र महेश्वरः. 10 न विनायकः.

यत्र चलतासंबन्धः कलिकोपक्रमश्च पादपेषु दृश्यते न पुं[1]रुषेषु ॥ क ॥

यत्र चमरकवार्ता परमहिमोपघातश्च तुहिनाचलस्थलीषु श्रूयते न प्रजासु ॥ ख ॥

यश्च नीतिमत्पुरुषाधिष्ठितोऽप्यनीतिः, सवटोऽप्यवटसंकुलः, कारूपयुतोऽप्यगतरूपशोभः ॥ ग ॥

यत्र च गुरुव्यतिक्रमं नक्षत्रराशयः, मात्राकलहं लेखशालिकाः, मित्रोदयद्वेषमुलूकाः, अपत्यत्यागं कोकिलाः, बन्धुजीवविघातं[2] ग्रीष्मदिवसाः, कुर्वन्ति न जना[3]ः ॥ घ ॥

श्रिया शोभया सश्रीकाः । हरयोऽश्वाः । धनप्रदा नृपाः । स्वर्गे त्वेकस्मिन्नेव गृहे गौरी उमा । एक एव महेश्वरः शिवः । सलक्ष्मीको विष्णुरेक एव । न बहवः । धनदः कुबेर एकस्मिन्नेव स्थान एक एव । केवलं परम् । अधिपिबतीत्यधिपः । सुराया मद्यस्याधिपः सुराधिपो न राजा । नच कोऽपि विरुद्धनायकः । सुरामधिपिबतीति वाक्ये लक्ष्यदूषणमणप्रसङ्गात् । सुराप्रपावत् । स्वर्गे तु सुराणामधिप इन्द्रः । विनायको गणेशः ॥ ग ॥

यत्रेति ॥ लतासंबन्धो वल्लीयोगः । कलिकाया उपक्रमः । पक्षे "चलतासंबन्धः" इति समुदितं पदम् । चलता लौल्यम् । कलिः कलहः । कोपः क्रुध् । तयोः क्रमः ॥ क ॥

यत्रेति ॥ चमरका गोविशेषाः । परममुत्कृष्टं हिमं तुहिनम् ॥ पक्षे मरको मरणबाहुल्यम् । परस्य महिमा माहात्म्यम् । तस्योपघातः ॥ ख ॥

यश्चेति ॥ न विद्यत ईतिरुपद्रवोऽस्मिन्नित्यनीतिः । वटा न्यग्रोधाः । अवटाः कूपादिगर्ताः । कारवः शिल्पिनः । तथा न गता न भ्रष्टा रूपशोभा यस्य । अगैर्नगैस्तरुभिश्चोपशोभा यस्येति वा ॥ अपिर्विरोधे ॥ स च तुल्यार्थव्याख्यया । कुत्सितमीषद्वारूपं कारूपम् ॥ ग ॥

यत्र चेति ॥ इदमेते कुर्वन्ति न जनाः । गुरुर्बृहस्पतिः । मात्रा वर्णावयवः । मित्रः सूर्यः । बन्धुजीवं बन्धूकम् । पक्षे सुगमम् । मात्रा जनन्या सह ॥ घ ॥

---

१ सत्पुरुषेषु. २ घातम्. ३ मजाः.

किं बहुना ।

देशः पुण्यतमोद्देशः कस्यासौ न प्रियो भवेत् ।
युक्तोऽनुक्रोशसंपन्नैर्यो जनैरिव योजनैः ॥ २८ ॥

तस्य विषयस्य मध्ये निषधो नामास्ति जनपदः प्रथितः ।
तत्र पुरी पुरुषोत्तमनिवासयोग्यास्ति निषधेति ॥ २९ ॥

जननीतिमुदितमनसा सततं सुस्वामिना कृतानन्दा ।
सा नगरी नगतनया गौरीव मनोहरा भाति ॥ ३० ॥

यस्यामभ्रंलिहेन्द्रनीलशालशिखरसहस्रनिर्भृतांशुजालबालशाद्वलाङ्कुराग्रग्रासलालसाः स्खलन्तः खे खेदयन्ति मध्येदिनं सादिनं रविरथतुरंगमाः ॥ क ॥

यस्यां च स्फटिकमणिशिलानिबद्धभवनप्राङ्गणगतासु संचरद्गृहिणीचरणालक्तकपदपङ्क्तिषु पतन्ति निर्मलसलिलाभ्यन्तरतरत्तरुणारुणकमलकाङ्क्षया मुग्धमधुपपटलानि ॥ ख ॥

देश इति ॥ अनुक्रोशेन कृपया संपन्नैर्जनैर्युक्तोऽसौ देशः सर्वस्यापि प्रियः । पक्षेऽनुक्रोशे संपन्नान्यन्नजलतृणादिभिः समृद्धानि । अथवानुगताः परस्परसंबद्धाः क्रोशा अनुक्रोशास्तैः संपन्नानि ॥ २८ ॥

तस्येति ॥ पुरुषोत्तमो विष्णुः पुंश्रेयांश्च ॥ २९ ॥

जनेति ॥ जनस्य नीत्या हृष्टमनसा सुप्रभुणा कृतहर्षा । तथा न भ्रष्टनया अपि तु सन्नीतिमती । सा पुरी रम्या भाति । यत एवानष्टनया अतएव जनो नीतिमान् । गौरी तु नगस्य हिमाद्रेस्तनया । तथा जननी मातेति हेतोर्हृष्टमनसा । अतएव शोभनेन हर्षोचिताकृतिसुन्दरेण स्वामिना स्कन्देन कृतानन्दा । तथा मनसि हरो यस्याः ॥ ३० ॥

यस्यामिति ॥ शालः प्राकारः । इन्द्रनीलमणिकिरणान्नीलतृणतुल्याँल्लिलिक्षवः सप्तसप्तिसप्तयः स्खलन्ति ॥ क ॥

यस्यां चेति ॥ स्फटिकस्य सलिलं पदपङ्क्तेश्च कमलमुपमानम् ॥ ख ॥

---

१ नासौ. २ निःसृतांशुः. ३ ग्रासग्रहणलालसाः. ४ स्खलन्तः खेदयन्ति. ५ मध्यंदिने. ६ तुरंगाः. ७ संगतासु. ८ निपतन्ति.

यस्यां च विविधमणिनिर्मितवासभवनभव्यभित्तिषु स्वच्छासु स्वां छायामवलोकयन्त्यः कृतापरस्त्रीशङ्काः कथमपि प्रत्यानीयन्ते प्रियैः प्रियतमाः ॥ क ॥

यस्यां च दिव्यदेवकुलालंकृताः स्वर्गा इव मार्गाः, सततमपांसुवसनाः सागरा इव नागराः, समत्तवारणानि वनानीव भवनानि, सुरसेनान्विताः स्वर्गभूपा इव कूपाः, अधिकंधरोद्देशमुद्भासयन्तो हारा इव विहाराः ॥ ख ॥

यस्यां च बहुलक्षणाः सुधावन्तो दृश्यन्तेऽन्तः प्रचुराः प्रासादा बहिश्च वारणेन्द्राः । सुशोभितरङ्गाः समालोक्यन्तेऽन्तः संगीतशाला बहिश्च क्रीडाकमलदीर्घिकाः । बहुधान्यनिरुद्धाः कथमप्यभिगम्यन्तेऽन्तः पण्यस्त्रियो बहिश्च क्षेत्रभूमयः । नानाशुकविभूषणाः शोभन्तेऽन्तः सभा बहिश्च सहकारवनराजयः । ससौगन्धिकप्रसारा विराजन्तेऽन्तर्विपणयो बहिश्च सलिलाशयाः ॥ ग ॥

यस्यां चेति ॥ दिवि भवैरिव दिव्यै रम्यैर्देवकुलैर्देवगृहैः । पक्षे दिव्यैः स्वर्गोद्भवैः कल्पद्रुमादिभिर्देवानां कुलैरन्वयैर्वालंकृताः । अपांसु रेणुरहितं वसनं वस्त्रं येषाम् । पक्षे सुष्ठु वसन्त्येष्विति सुवसनाः । "अपाम्" इति कर्तरि षष्ठी । जलाधारा इत्यर्थः । मत्तवारणोऽपाश्रयो मत्तेभश्च । सुरसेन सुजलेन । स्वर्गभूपास्तु सुरसेनया त्रिदशसैन्येनान्विताः । अधिकमिति क्रियाविशेषणम् । धरोद्देशः पृथ्वीप्रदेशः । विहाराश्चैत्यानि । पक्षे कंधरोद्देश इत्यधिकंधरोद्देशम् । विभक्त्यर्थेऽव्ययीभावः ॥ ख ॥

यस्यां चेति ॥ क्षणो भूमिका । सुधा लेपविशेषः । पक्षे बहूनि लक्षणानि येषाम् । तथा सुष्ठु धावन्तः । रङ्गो नर्तनस्थानम् । पक्षे सुशोभिनस्तरङ्गा येषु । बहुधेति भिन्नं पदम् । अन्यैर्विटैर्निरुद्धाः । पक्षे बहुभिर्धान्यैर्निरुद्धाः । आशुकविः शीघ्रकविः । पक्षे शुकाः पक्षिणः । सुगन्धीनि द्रव्याणि पण्यमेषां ते सौगन्धिका वणिजः कल्हाराणि वा । प्रसारो लघ्वापणो विस्तरश्च ॥ ग ॥

---

१ विनिर्मिता. २ स्वर्भूपः. ३ संगीतकशाला. ४ प्रसरा. ५ राजन्ते.

किं बहुना।

भूमयो बहिरन्तश्च नानारामोपशोभिताः।
कुर्वन्ति सर्वदा यत्र विचित्रवयसां मुदम्॥ ३१॥

यस्यां च भक्तभाजो[1] देवतायतनेषु देवताः संनिधाना दृश्यन्ते हट्टेषु वणिग्जनाः। अक्षरसावधानाः कविगोष्ठीषु कवयो विलोक्यन्ते द्यूतस्थानेषु द्यूतकाराः। कान्तारागप्रियाः करिणो राजद्वारेषु संचरन्ति वेश्याङ्गणेषु भुजङ्गाः॥ क॥

यस्यां च चतुरुदधिवेलाविराजितसकलधराचक्रचूडामणौ मणिकर्मनिर्मितरम्यहर्म्यतया[2] सुरपतिपुरीपराभवकारिण्याम्। अव्ययभावो[3] व्याकरणोपसर्गेषु न धनिनां धनेषु। दानविच्छित्तिरुन्माद्यत्करिकपोलमण्डलेषु न त्यागिगृहेषु। भोगभङ्गो भुजङ्गेषु न विलासिलोकेषु। स्नेहक्षयो रजनिविरामविरमत्प्रदीपपात्रेषु न प्रतिपन्नजनहृदयेषु। कूटप्रयोगो गीततानविशेषेषु न व्यवहारेषु। वृत्तिकलहो वैयाकरणच्छात्रेषु न स्वामिभृत्येषु। स्थानकभेदश्चित्रकेषु[4] न सत्पुरुषेषु॥ ख॥

भूमय इति॥ बाह्ये आरामैर्मध्ये रामाभिरुपशोभिताः। यस्यां रम्यवयसां यूनां विविधपक्षिणां च मुदं कुर्वन्ति। वपुष्मतां कालकृतावस्था पक्षी च वयः॥ ३१॥

यस्यां चेति॥ भक्तो भक्तिमान्। भक्तं चान्नम्। संनिधानं नैकट्यम्। सम्यङ्निधिश्च। अक्षरं वर्णः। पक्षे अक्षः पाशकः। अक्षरसे स्थितमवधानं येषाम्। कान्तारे वने अगः सल्लक्यादिवृक्षस्तत्प्रियाः। पक्षे कान्ता वधूः॥ क॥

यस्यां चेति॥ अव्ययभावोऽव्ययत्वम्। पक्षे व्ययो दानादिनोपयोगस्तदभावः। दानविच्छित्तिर्मदशोभा त्यागविच्छेदश्च। भोगः सर्पवपुर्विलासश्च। भङ्ग आमर्दनम्। कुण्डलीकरणमिति यावत्। व्याघातश्च। स्नेहस्तैलादिः प्रेमा वा। प्रतिपन्नानि परस्परप्रतीतानि च तानि जनहृदयानि च। गीतस्य ताना द्वये। एके कूटाख्याः पञ्चत्रिंशत्। अन्ये च शुद्धाख्याश्चतुर्दश। एवमेकोनपञ्चाशत्। तेषां विशेषेषु कूटशब्दप्रयोगः। पक्षे कूटं कपटं प्रयोगो व्यापारः। वृत्तिः शास्त्रविवरणम्। आजीवनं च। स्थानक-

1 भक्तिभाजो. २ हर्म्यरम्यतया. ३ अव्ययीभावो. ४ चित्रेषु.

किं बहुना ।

त्रिदिवपुरसमृद्धिस्पर्धया भान्ति यस्यां
सुरसदनशिखाग्रेष्वाग्रहग्रन्थिनद्धाः ।
नभसि पवनवेल्लत्पल्लवैरुल्लसद्भिः
परमिह वहन्त्यो वैभवं वैजयन्त्यः ॥ ३२ ॥

अपि च ।

चार्वी सदा सदाचारसज्जसज्जनसेविता ।
नगरा न गरीयस्या संपदा सा विवर्जिता ॥ ३३ ॥

तस्यामासीन्निजभुजयुगलबलविदलितसकलवैरिवृन्दसुन्दरीनेत्रनीलोत्पलगलद्बहलबाष्पपूरप्लवमान[1]प्रतापराजहंसः, सकलजलनिधि[2]वेलावननिखातकीर्तिस्तम्भभूषितभुवनवलयः, विश्वंभ[3]राभोग इव बहुधारणक्षमः, प्रासाद इव नवसुधाहारी, रविरिवानेकधामाश्रयः। दनुजलोक[4] इव सदानवः स्त्रीजनस्य, वसिष्ठ इव विश्वा-

भेदः संमुखं पराङ्मुखं संपूर्णावयवरूपं पार्श्वागतम् । ततो भागद्वयेनैकतः पततान्यत्र च चटता क्रमेण ऋजु ऋज्वागतव्यर्धाक्षार्धऋजुसंज्ञानि चेति स्थितस्थानकानि पञ्च । गमनमालीढं त्वरितं त्रिभङ्गमित्याख्यानि च चत्वारि गच्छत्स्थानकानीति । एवं च नवानां स्थानकानां भेदश्चित्रेषु । पक्षे स्थानकस्य रक्षणीयनगरादेर्भेद उपजापो न सत्पुरुषेषु सत्त्वात् ॥ ख ॥

त्रिदिवेति ॥ सुराणां सदनानि प्रासादा विमानानि च । आगृह्यन्त एभिरित्याग्रहा अङ्कुटकास्तेषु ये ग्रन्थयस्तैर्नद्धाः । वेल्लत्पल्लवैश्चलदञ्चलैः । उल्लसद्भी राजद्भिः । वैभवं माहात्म्यम् । सर्वोऽपि । विजिगीषुर्बद्धपरिकरः पताकां दर्शयतीति भावः ॥३२॥

चार्वीति ॥ चार्वी मनोज्ञा । सततं साध्वाचारप्रह्वसाधुश्रिता सा नगरी पुरी गरीयस्या श्रिया न त्यक्ता ॥ ३३ ॥

तस्यामिति ॥ शत्रुकान्ताश्रुपूरे तरन्प्रताप एव राजहंसो यस्य । तथा जयस्तम्भैर्भूषितभूमण्डलः । तथा स्तम्भोपमदोर्दण्डे न्यस्ता शालभञ्जिकेव जयलक्ष्मीर्यस्य । स वीरसेनसूनुर्नल इति प्रसिद्धो नृप आसीत् । बहुधानेकशो रणे क्षमः। पक्षे बहूनां धा-

१ प्लवप्लवमानः. २ जलधि. ३ वसुंधरा. ४ दनुलोक.

मित्रत्रासजननः, जनमेजय इव परीक्षितनयः, परशुराम इव परशुभासितः, राघव इवालघुकोदण्डभङ्गरञ्जितजनकः, सुमेरुरिव जातरूपसंपत्तिः, तुहिनाचल इव पुण्यभागीरथीसहितः, चिन्तामणिः प्रणयिनाम्, अग्रणीः साङ्ग्रामिकाणाम्, उपाध्यायोऽध्ययनविदाम्, आदर्शो दर्शनीयानाम्, आचार्यः शौर्यशालिनाम्; उपदेशकः श[1]स्त्रशास्त्रस्य, परिवृढो दृढप्रहारिणाम्, अग्रगण्यः[2] पुण्यकारिणाम्,अपश्चिमो विपश्चिताम्, अपाश्चात्यस्त्यागवताम्, अचरमश्चातुर्याचार्याणाम्, अपर्यन्तभूभाराधारस्तम्भभूतभुजकाण्डकीलितशालभञ्जिकायमानविजयश्रीः, श्रीवीरसेनसूनुः, समस्तजगत्प्रासादशिरःशेखरीभूतकान्तकीर्तिध्वजो, राजा, राज्यलक्ष्मीकरेणुकाचापलसंयमनशृङ्खलः, खलवृन्दकन्दलदावानलो नलो नाम ॥ क ॥

यस्येन्दुकुन्दकुमुदकान्तयः सकललोककर्णप्रियातिथयो गुणाः सततमेकब्रह्माण्डसंपुटसंकीर्णनिवासव्यसनविषादिनः पुनरनेकब्रह्माण्डकोटिघटनामभ्यर्थयमाना इव भगवतो विश्वसृजः कमलसंभवस्य कर्णलग्नाः[3] स्वर्गलोकमधिवसन्ति स्म[4] ॥ ख ॥

रणे क्षमः। आभोगः पूर्णता। वसुधां देवद्विजसंबद्धां हरत्येवंशीलो न। पक्षे नवया सुधया लेपविशेषेण हारी रम्यः ॥ अनेकधा सप्ताङ्गत्वाद्बहुधा माया लक्ष्म्या आश्रयः। पक्षेऽनेकस्य प्रचुरस्य धाम्न आश्रयः ॥ सदा नित्यं नवो रम्यतयापूर्व एव। पक्षे दानवैः सह ॥ विश्वेषाममित्राणां त्रासकृत्। पक्षे विश्वामित्रो मुनिः ॥ परीक्षितो नयः षाड्गुण्यं येन। पक्षे परीक्षेरभिमन्युसुतस्य सुतः। परस्मिञ्छुभे आसितः। पक्षे परशुः कुठारः ॥ अलघुको गौरवार्हः। तथा दण्डस्य वधपरिक्लेशार्थहरणलक्षणस्य भङ्गेन मुक्त्या रञ्जितलोकः। पक्षे बृहद्धनुर्भङ्गहर्षितजनकाख्यनृपः ॥ जाता रूपसंपत्तिर्यस्य। पक्षे जातरूपं सुवर्णं संपत्तिर्यस्य ॥ पुण्यभजनशीलो। रथवान्। हितैः सह। पक्षे पुण्यगङ्गान्वितः ॥ प्रणयिनामर्थिनां चिन्तितप्रदो मणिरिव ॥ जगतः प्रासादः कीर्तेश्च ध्वज उपमानम् ॥ क ॥

यस्येति ॥ यस्य नलस्य प्राचुर्यादेकस्मिन्ब्रह्माण्डेऽमान्तोऽनेकब्रह्माण्डनिर्माणं कार-

---

१ शस्त्रशास्त्रेषु. २ अग्रेगण्यः. ३ कर्णलग्नाः. ४ स्वर्लोक.

यस्मिंश्च राजनि जनितजनानन्दे नन्दयति मेदिनीम्, गीतेषु जातिसंकराः, तालेषु नानालयभङ्गाः, नृत्येषु विषमकरणप्रयोगाः, वाद्येषु दण्डकरप्रहाराः, पुण्यकर्मारम्भेषु प्रबन्धाः, सारि[1]द्यूतेषु पाशप्रयोगाः, पुष्पितकेतकीषु हस्तच्छेदाः, न्य[2]ग्रोधेषु पादकल्पनाः, कञ्चुकमण्डनेषु नेत्रविकर्त[3]नानि, आ[4]सन् । न प्रजासु ॥ क ॥

यश्च कोऽप्यन्यादृश एव लोकपालः । तथाहि । अपूर्वो विबुधपतिः, अदण्डकरो धर्मराजः, अजघन्यः प्रचेताः, अनुत्तरो धनदः ॥ ख ॥

यिष्यन्त इव स्वर्गिभिर्नित्यमेव श्लाघ्यमानत्वात्कर्णलग्नाः श्रुतौ विज्ञापनार्थं निकटीभूताः ॥ ख ॥

यस्मिंश्चेति ॥ गीतादिष्वेव जातिसंकरादीनि न प्रजास्विति परिसंख्ययावधारणम् ॥ गीतेषु नन्दयन्तीप्रभृतयो जातयोऽष्टादश । तासु संकरो मिश्रप्रतीतिः । पक्षे जातयो विप्राद्याः । संकरोऽनुचितसंबन्धेन विप्लवः ॥ तालश्चञ्चत्पुटादिः । लया द्रुतमध्यविलम्बितलक्षणाः । पक्षे आलयो गृहम् ॥ करणानि तलपुष्पपटादीन्यष्टोत्तरशतसंख्यानि । पक्षे विषमात्स्वार्थे कः । रणो युद्धम् ॥ दण्डः कोणः । करः पाणिः । पक्षे दण्डो वधादिः । करो राज्ञे देयोंऽशः । प्रहारो घातनम् । प्रबन्धाः सातत्यानि प्रकृष्टबन्धाश्च ॥ पाशो बन्धो बन्धनरज्जुश्च ॥ सारयो हि दायैर्बध्यन्ते । अक्षार्थस्तु पाशक एव प्रतीतः ॥ हस्तः केतकीगर्भः पाणिश्च ॥ पादस्य मूलस्य रचना । न्यग्रोधपादपः पादात्रचयति कल्पयति । पक्षे पादस्याङ्घ्रेः कल्पना कर्तनम् ॥ नेत्रं वस्त्रविशेषो नयनं च । विशेषेणाङ्गप्रमाणेन कर्तनं विकर्तनं विखण्डनं च ॥ क ॥

यश्चेति ॥ कोऽपि विस्मयहेतुः । लोकं जगत्पालयन्ति ये तेभ्योऽन्यादृशो विसदृश एव लोकं प्रजां पालयतीति कृत्वा लोकपालः ॥ स्वोक्तमेव द्रढयति— तथाहीत्यादिना ॥ यतो विबुधानां सुराणां पतिः सपूर्वः पूर्वदिग्युक्तत्वात् । नलस्त्वपूर्व उत्कृष्टो विबुधानां विदुषां पतिः ॥ दण्डपाणिर्यमः । नलस्तु न दण्डो वधादिः, करो राज्ञे देयोंऽशो यस्मादित्यदण्डकरः । तथा धर्मप्रधानो राजा धर्मराजः । धर्मविजयत्वात् ॥ प्रचेता वरुणः सह जघन्यया पश्चिमया वर्तते । नलस्त्वजघन्योऽकुत्सितः प्रकृष्टचेताश्च । यदुक्तम्— “जघन्यं चरमे शिश्ने जघन्यं गर्हितेऽन्यवत्” ॥ धनदः कुबेरः सहोत्तरया दिशा वर्तते । नलस्तु न विद्यत उत्तर उत्कृष्टोऽस्मादित्यनुत्तरः । तथा धनं ददातीति धनदः ॥ ख ॥

---

१ सारद्यूतेषु. २ न्यग्रोधपादपेषु. ३ कर्तनानि. ४ न प्रजानामासन्.

येन[1] प्रचण्डदोर्दण्डमण्डपमण्डलीविश्रान्तविजयश्रिया श्रवणोत्पलदलायमानमानिनीमानलुण्टाकलोचनेन पृथ्वी प्रिया च कामरूपधारिणी सातेन भुक्ता ॥ क ॥

यस्याः सकलजनमनोहारिविशेषकम्, पृथुललाटमण्डलम्, अभिलषणीयकान्तयः कुन्तलाः, श्लाघनीयो नासिक्यभागः, बहुलवलीकः सरोमालिकालंकारश्च मध्यदेशः, प्रकटितकामकोटिविलासः काञ्चीप्रदेशः ॥ ख ॥

किं बहुना ।

यस्याः कृष्णागुरुचन्दनामोदबहुलकुचाभोगभूषणा[2] नृत्यतीवाङ्गरङ्गे रमणीयतया निरुपमा नवा यौवनश्रीः ॥ ग ॥

येनेति ॥ विजयता सुनेत्रेण येन भूः कान्ता च सातेन सुखेन निर्विष्टा भुक्ता । सातं सुखम् ॥ यदमरसिंहः—"शर्मसातसुखानि च" इति ॥ कामरूपो देशविशेषः । प्रिया तु काम्यत इति काममभिलषणीयं रूपम्, काममतिशयेन रूपं वा धरतीत्येवंशीला ॥ क ॥

यस्या इति ॥ यस्या भुवः विशेषक-लाट-कुन्तल-नासिक्य-मध्यदेश-काञ्चीइत्येवंरूपा देशाः । लवली लताविशेषः । सरसां मालिका श्रेणिः । कामकोटिनाम्नी देवी ॥ प्रियापक्षे विशेषकं तिलकम् । ललाटमलकम् । कुन्तलाः केशाः । नासिकायां भवो नासिक्यः । मध्यदेश उदरम् । बहुला बह्व्यो बलय उदररेखा यत्र । तथा सह रोमपङ्क्तिमण्डनेन ॥ प्रकटितानङ्गोत्कर्षविलासः काञ्चीप्रदेशः श्रोणी ॥ ख ॥

यस्या इति ॥ अङ्गेऽङ्गाख्यदेश एव रङ्गे नर्तनस्थाने निरुपमवायौ सति वनश्रीर्नृत्यतीव ॥ वाततरलनमेव नर्तनम् । कृष्णा पिप्पली । अगरुचन्दनौ वृक्षविशेषौ । तेषामामोदः । बहूनां लकुचानामाभोगो विस्तारः । तौ भूषणं यस्याः । पक्षे चर्चावशात्कालागरुचन्दनयोरामोदेन व्याप्तस्तनविस्तारमण्डना । नवेति यौबनश्रीरिति च भिन्नम् ॥ ग ॥

---

१ येन च. २ कृष्णागरु.

किं चान्यत्।

अन्य एव नवावतारः स कोऽपि पुरुषोत्तमो योनमीनरूपदूषितः, नाङ्गीकृतविश्वविश्वंभराभारोऽपि कूर्मीकृतात्मा, न वराहवपुषा क्लेशेन पृथ्वीं बभार, न च नरसिंहः समुत्सन्नहिरण्यकशिपुः, न बलिराजबन्धनविधौ वामनोदैन्यमकरोत्, नापि रामोलङ्केश्वरश्रियमपाहरत्, नापि बुद्धः कल्किकुलावतारी ॥ क ॥

किं बहुना।

धन्यास्ते दिवसाः स येषु समभूद्भूपालचूडामणि-
र्लोकालोकगिरीन्द्रमुद्रितमहीविश्रान्तकीर्तिर्नलः।

किं चेति ॥ कोऽप्यपरिच्छेद्यमहिमा। तथा नवः पूर्वविलक्षणोऽवतारो जन्म यस्य स तथाभूतः। यदि वा "णु स्तुतौ" इत्यस्य नवाः स्तुतयोऽवतार्यन्ते यस्मिन्निति स्तवास्पदम्। सर्वोर्वीपतिभ्योऽन्योऽसाधारण एव स नलो राजा। पुरुषेषूत्तमः ॥ तथा अमो रोगोऽस्यास्तीत्यमी। नामी अनमी नीरोगः। यदि वा नमयति शत्रूनवश्यमिति कृत्वा नमी। प्रतापाक्रान्तारिचक्र इत्यर्थः ॥ तथा न रूपे दूषितः। तथा स्वीकृतधराधुरोऽपि न कूर्मिभङ्गुरः। कुत्सितोर्मिः पीडा यस्य स कूर्मिः। अङ्गीकृतभारो हि पीडावान्भवति। यदुक्तम्—"ऊर्मिः पीडाजवोत्कण्ठाभङ्गप्राकाश्यवीचिषु"। तथा वरमाहवं पुष्णता क्लेशेन न धरामपि तु सुखेनेत्यर्थः ॥ नरेषु सिंहः शौर्यात्। नच समुत्सन्नं हिरण्यं धनं कशिपु भोजनाच्छादनादि यस्मात् ॥ तथा बलिनां राज्ञां बन्धने विधाने वा मनोदैन्यं न चाकरोत् ॥ रामः सुन्दरः। अलमत्यर्थं कस्य ब्रह्मण ईश्वरस्य शंभोश्च श्रियं नापि न च हृतवान्। देवस्वापहारी नेत्यर्थः। ब्रह्मेशौ देवानामुपलक्षणम् ॥ बुद्धो विद्वान्न पापिकुलोत्पन्नः ॥ अन्य एव पुराणपुरुषाद्दशावताराद्विसदृश एव। नवावतारो नवसंख्यावतारः। कोऽप्ययं पुरुषोत्तमो विष्णुरित्युक्तिलेशः ॥ तत्पक्षे मीनकूर्मवराहनरसिंहवामनरामबुद्धकल्किनोऽवताराः। हिरण्यकशिपुबलिलङ्केश्वरास्तत्प्रतिपक्षाः ॥ रामः परशुरामोऽपि। तदा। अलमिति भित्त्वा कु ईषदीश्वरः केश्वरः सहस्रार्जुनो जमदग्निहोमार्जुनीमात्रहरणात् ॥ रामः कृष्णः। तथा केन वायुनेष्टे समर्थो भवति पवनाशनत्वात्। यद्वा कस्य पानीयस्य यमुनाह्रदलक्षणस्येश्वरः स्वामी केश्वरः कालीयसर्पस्तस्य श्रियमपजहार ॥ क ॥

---

१ नाङ्गीकृतविश्वंभरा. २ समुच्छिन्नः ३ किं च.

लोकास्तेऽपि चिरंतनाः सुकृतिनस्तद्वक्त्रपङ्केरुहे
यैर्विस्फारितनेत्रपत्रपुटकैर्लावण्यमास्वादितम् ॥३४॥

अपिच ।

ये कुन्दद्युतयः समस्तभुवनैः कर्णावतंसीकृता
यैः सर्वत्र शलाकयेव लिखितैर्दिग्भित्तयश्चित्रिताः ।
यैर्वक्तुं हृदि कल्पितैरपि वयं हर्षेण रोमाञ्चिता-
स्तेषां पार्थिवपुंगवः स महतामेको गुणानां निधिः ॥३५॥

यस्य च युधिष्ठिरस्येव न क्वचिदपार्थो वचनक्रमः, मरुमण्डलमिवापापं मानसम्, महानसमिव सूपकारसारं कर्म, कार्मुकमिव सत्कोटिगुणं दानम्, दानवकुलमिव दृष्टवृषपर्वोत्सवं राज्यम्, राजीवमिव भ्रमरहितं सर्वदा हृदयम् ॥ क ॥

यश्च परमहेलाभिरतोऽप्यपारदारिकः । शान्तनुतनयोऽपि न कुरूपयुक्तः ॥ ख ॥

किं बहुना ।

सदाहंसाकुलं बिभ्रन्मानसं प्रचलज्जलम् ।

यस्य चेति ॥ अर्थादपेतोऽपार्थः । अन्यत्र पृथाया अपत्यत्वात् । अपापं निष्पापम् । पक्षेऽपेता आपो यस्मात् ॥ सुष्ठु उपकारेण सारम् । पक्षे सूपकारैः सूदैः सारम् ॥ सत्पात्रप्रतिपादनाद्दानं सच्छोभनम् । कोटिः संख्या । पक्षे कोटिरटनिः । गुणो ज्या ॥ वृषो धर्मः । पर्व पौर्णमास्यादि उत्सवः पुत्रजन्मविवाहादिस्ते दृष्टा अनुष्ठिता यत्र । पक्षे वृषपर्वा दानवः ॥ भ्रमः संशयः । पक्षे भ्रमरेभ्यो हितम् ॥ क ॥

यश्चेति ॥ हेला शृङ्गारचेष्टा । यद्वा पर उत्कृष्टो मह उत्सवो यस्यां तस्यामिलायां पृथ्व्यां रतः ॥ राजन्वती हि मही सदुत्सवा । विरोधे महेला स्त्री ॥ शान्तश्चासौ नुतनयश्च । शान्तो जितेन्द्रियः । तथा नुतः स्तुतो नयो नीतिर्यस्य ॥ तथा न कुत्सितरूपयुक्तः । पक्षे शान्तनुपुत्रो गाङ्गेयः कुरूणां क्षत्रियाणामुपयोगी ॥ ख ॥

सदेति ॥ भूभृतो गिरयो नृपाश्च । तन्नाथत्वं द्वयोरपि ॥ सत्यप्येवं हिमाचलो यस्य साम्यं नायाति । यतः । सदाहं सखेदम् । साकुलं व्यग्रम् । प्रचलत्कम्प-

---

१ यस्य. युधिष्ठिर इव.

भूभृन्नाथोऽपि नो याति यस्य साम्यं हिमाचलः[1] ॥ ३६ ॥

अपि च ।

नक्षत्रभूः क्षत्रकुलप्रसूतेर्युक्तो नभोगैः खलु भोगभाजः ।
सुजातरूपोऽपि न याति यस्य समानतां कांचन काञ्चनाद्रिः ॥ ३७॥

तस्य च[2] महामहीपतेरस्ति स्म प्रशस्तिस्तम्भः[3] सकलश्रुतिशास्त्रशासनाक्षरमालिकानाम्, न्यग्रोधपादपः पुण्यकर्मप्ररोहाणाम्[4], आकरः साधुव्यवहाररत्नानाम्, इन्दुः पार्थिवनीतिज्योत्स्नायाः, कन्दः सकलकलाङ्कुरकलापस्य, सागरः समस्तपुरुषगुणमणीनाम्, आलानस्तम्भश्चपलराज्यलक्ष्मीकरेणुकायाः, सकलभुवनव्यापारपारावारनौकर्णधारः[5], सुधाम्भोनिधिडिण्डीरपिण्डपाण्डुरयशःकुशेशयखण्डमण्डितसकलसंसारसराः[6], सरागीकृतसमस्तपार्थिवानुजीवी, जीवितसमः, प्राणसमः, हृदयसमः, शरीरमात्रभिन्नो द्वितीय इवात्मा, कुलक्रमागतः, संक्रान्तिदर्पणः सुखदुःखयोः, स्वभावानुरक्तः, शुचिः, सत्यपूतवाक्[7], कृतज्ञः, ब्राह्मणः सालङ्कायनस्य सूनुः[8] श्रुतशीलो नाम महामन्त्री ॥ क ॥

मानम् । जडं व्यामूढम् । मानसं चेतः । बिभर्ति ॥ सिद्धान्ते तु मानसं सरः । सदेति भिन्नम् । प्रचलज्जलं यत्र ॥ शेषं प्रतीतम् । आकुलशब्दो भावप्रधानो यथा तिष्ठन्ति च निराकुलाः ॥ ३६ ॥

नक्षत्रेति ॥ यस्य नलस्य काञ्चनाद्रिर्मेरुः कांचन कांचिदपि समानतां नायाति । सुष्ठु जातरूपं सुवर्णं यत्र ॥ नलपक्षे रूपं सौन्दर्यम् । अतो द्वयोरपि सुजातरूपत्वात्साम्ये निषेधः । यतो नायं क्षत्राद्भवति स्म । तथा भोगैर्न युक्तः ॥ नलस्तु क्षत्रप्रसूतिर्भोगभाक् ॥ सिद्धान्ते तु नक्षत्राणां भूः स्थानम् ॥ तथा नभसि गच्छन्ति ये तैर्नभोगैर्देवैर्युक्तः ॥ ३७ ॥

तस्य चेति ॥ तस्य नरपतेः श्रुतशीलो नामामात्योऽस्ति स्म आसीत् ॥ यशसां कु-

---

१ हिमालयः. २ च महीपतेः. ३ प्रशस्तप्रशस्तिस्तम्भः. ४ पुण्यकर्मारम्भप्ररोहाणाम्. ५ व्यापारनौकर्णधारः. ६ संसारकासारः. ७ सत्यवाक्. ८ सालङ्कायनसूनुः.

मित्रं च मन्त्री च सुहृत्प्रियश्च विद्यावयःशीलगुणैः समानः ।
बभूव भूपस्य स तस्य विप्रो विश्वंभराभारसहः सहायः ॥ ३८ ॥

अपिच ।

ब्रह्मण्योऽपि ब्रह्मवित्तापहारी स्त्रीयुक्तोऽपि प्रायशो विप्रयुक्तः ।
सद्वेषोऽपि द्वेषनिर्मुक्तचेताः को वा तादृग्दृश्यते श्रूयते वा ॥ ३९ ॥

अथ स पार्थिवस्तस्मिन्नमात्ये परिजनपरिवृढे प्रौढप्रेमणि निगूढमन्त्रे मन्त्रिणि तृणीकृतस्त्रैणविषयरसे सौराज्यरागजनने जननीयमाने जनस्य, सर्वोपधाशुद्धबुद्धौ निधाय राज्यप्राज्यचिन्ताभारमभिनवयौवनारम्भरमणीये रम्यरमणीजननयनहृदयप्रिये प्रियंगुभासि जितमदनमहस्यपहसितसुरासुरसौभाग्ययशसि विस्मापितसमस्तजनमनसि लसल्लावण्यपुञ्जपराजितसकलसमुद्राम्भसि कान्तिकटाक्षितचन्द्रमसि वयसि वर्तमानो मानितमानिनीजनयौवनसर्वस्वः स्वयमनवरतं सकलसंसारसुखसंदोहमन्वभूत् ॥ क ॥

तथाहि ।

कदाचिदनुत्पन्नविषमरणभयो गरुड इवाहितापकारी हरिवाहनविलासमकरोत् ॥ ख ॥

शेशयानि, संसारस्य सर उपमानम् ॥ क ॥

ब्रह्मण्य इति ॥ ब्रह्मणे हितो ब्रह्मण्यः ॥ तथा ब्रह्म वेत्ति ॥ तथा तापहारी ॥ तथा विप्रैर्द्विजैर्युक्तः ॥ तथा सन्शोभनो वेषो यस्य ॥ विरोधांशः सुगम एव । ब्रह्मवित्तं ब्रह्मस्वम् । विप्रयुक्तो वियुक्तः ॥ ३८ ॥ ३९ ॥

अथेति ॥ अथानन्तरमेवंवर्णनीयेऽमात्ये राज्यभारं निवेश्यैवंवर्णनीये वयसि वर्तमानो राजा सुखातिशयं सिषेवे ॥ क ॥

कदाचिदिति ॥ असंजातविषमयुद्धभीरहितानामपकारी । हरिरश्वस्तस्य वाहनं वाह्यालीप्रवहणम् । स एव विलासः । पक्षे विषान्मरणभयम् । अहिः सर्पः ।

१ च. २ प्रौढप्रेम्णि. ३ गूढमन्त्रे. ४ जननीसमाने. ५ प्रियङ्गुमञ्जरीभासि. ६ पराजितसमुद्राम्भसि. ७ मानिनीयौवनसारसर्वस्वः. ८ अनवरतसकल.

कदाचिच्चन्द्रमौलिरिव मदनबाणासनातिमुक्तशरसंछादितायां पर्वतभुवि विजहार ॥ क ॥

कदाचिदच्युत इव शिशिरकमलाकरावगाहनोत्पन्नपुलककोरकिततनुरनन्तभोगभाक्सुखमन्वतिष्ठत् ॥ ख ॥

कदाचिन्नलिनयोनिरिव राजसभावास्थितः प्रजाव्यापारमचिन्तयत् ॥ ग ॥

कदाचिन्मयूर इव कान्तोन्नमत्पयोधरमण्डलीविलासेन हर्षमभजत् ॥ घ ॥

कदाचिन्नक्षत्रराशिरिवाश्विन्या सेनया संमन्वितो मृगानुसारी बहुशष्पवनमार्गे बभ्राम ॥ ङ ॥

हरेर्विष्णोर्वाहनविलासो यानलीला ॥ ख ॥

कदाचिदिति ॥ मदनो बाणोऽसनोऽतिमुक्तकः शरश्च मुञ्ज एभिर्वृक्षैः सम्यक्छादितायां पर्वतक्षोण्याम् । पक्षे मदनः कामस्तस्य बाणासनं धनुस्तत्प्रक्षिप्तैः शरैर्बाणैर्विधुरायां पर्वतभुवि । पर्वताद्भवति स्मेति पार्वत्याम् ॥ क ॥

कदाचिदिति ॥ कमलानामाकरो वनम् । पक्षे कमलायाः श्रियाः करः पाणिः ॥ अनन्ताभोगोऽनेकविलासः शेषाहिवपुश्च ॥ ख ॥

कदाचिदिति ॥ राज्ञः सभा । पक्षे रजसा गुणेन निर्वृत्ते भावे स्थितः ॥ व्यापारो व्यवहारो निर्माणं च ॥ ग ॥

कदाचिदिति ॥ कान्ताङ्गना काम्या च ॥ पयोधरः स्तनो मेघश्च ॥ विलास उपभोगः स्फुरणं च ॥ घ ॥

कदाचिदिति ॥ अश्वाः सन्त्यस्यां तया सेनया युक्तः । तथा मृगानुगामी बहुबालतृणपथेऽभ्राम्यत् ॥ पक्षे अश्विनीमृगौ नक्षत्रे । इनेन रविणा सह सेनयेत्यश्विनीविशेषणम् ॥ बहुश इति भिन्नम् । पवनमार्गो द्यौः ॥ अत्र पकारात्प्राग्विसर्जनीय उपध्मानीयो वा ॥ शष्पपदे तु षकार एव ॥ तदेवंरूपभेदेऽपि श्रुतिसाम्यान्न दोष इति कविसमयः ॥ तथा च चण्डदासकृते श्रीचण्डिकाचरिते महाकाव्ये—"पुष्पादपामिह सदाधिगमे समृद्ध्यापुष्पादपाः फलभराश्च विनम्रभावम् । पुष्पादपापि दधतो मुनिवत्सुजन्मापुष्पादपाति मधु साधु मधुव्रतौघाः" ॥ अस्यार्थः—अपां जलानाम् । अधिगमे

१ सहितः. २ बहुशष्पवनमार्गे.

कदाचिदाञ्जनेय इवाक्षविनोदमन्वतिष्ठत् ॥ क ॥

कदाचिद्वानरेश्वर इव सुग्रीवो वैदेहीति ब्रुवाणस्यालघुकाकुत्स्यस्यार्थिनः प्रार्थना क्रियतां सफलेति वानरपुंगवानादिदेश ॥ ख ॥

कदाचिन्मकरकेतन इव सुमनसो मार्गणान्विधाय स्वंगुणं कर्णपूरीचकार ॥ ग ॥

प्राप्तौ सत्याम् । पुष्पात्कुसुमात् । फलभरात्फलातिशयात् च या समृद्धिस्तया । पादपास्तरवो विनम्रभावमापुः ॥ समृद्धौ हि नम्रता स्यात् ॥ जलाधिगमः पुष्पफलानां हेतुः । तानि च समृद्धेः । सा च नम्रताया इति ॥ तथा पुष्पाणामवक्षणं यत्र । तथाऽपापि पापरहितम् । शोभनं जन्म यथा मुनयो दधति । तद्वदेतेऽपि मधुव्रतौघाः सुजन्म धारयन्तः सन्तो मधुमकरन्दमपुः पिबन्ति स्म ॥ पादैरङ्घ्रिभिः पादेषु मूलेषु वा पतन्त्यभीक्ष्णमित्यनेन मधुप्राचुर्योक्तिः ॥ अत्रायुक्पादयोः षकार एव । युक्पादयोस्तु विसर्जनीयोपध्मानीयान्यतर एव न तु षकारः ॥ परं श्रुतिसाम्यान्न दोषः ॥ एवमेव विसर्जनीयजिह्वामूलीयषकारेष्वपि यथा "ये सहजनिष्कलङ्काचारा अपि भान्ति निस्त्रिकूटगमात् । सुधियः काष्ठादशकंधराधिकं सपदि तेऽश्नुवते" ॥ अस्यार्थः—सहजोऽकृत्रिमो निःकलङ्को निर्दोष आचारो येषां ते सुधियः काष्ठादशकं दिक्चक्रं धरैः पर्वतैरधिकमश्नुवते व्याप्नुवन्ति । स्त्रीणामभावो निस्त्रि । कूटं छद्म । तस्य गमो भ्रंशः इति समाहारद्वन्द्वः । एतेन जितेन्द्रियत्वोक्तिः । अपिर्विरोधे । येषां किल सहजस्वर्णायां लङ्कायां चारो गतिः । ते कथं त्रिकूटाचलगमनाभावेन भान्ति । दशकंधरो रावणः । काष्ठा दिशः । अत्र स्वर्णार्थनिष्कशब्दे षकार एव, निष्कलङ्कशब्दे जिह्वामूलीयविसर्गौ इति बोध्यम् ॥ क ॥

कदाचिदिति ॥ अक्षैः पाशकैः । विनोदं क्रीडाम् ॥ पक्षे अक्षस्य रावणेः । विनोदं वधम् ॥ क ॥

कदाचिदिति ॥ शोभना ग्रीवा यस्य । वै स्फुटार्थे । मह्यं देहीति ब्रुवाणस्य । तथा आ समन्ताल्लघ्व्यां काकौ भिन्नकण्ठध्वनौ तिष्ठतीत्यालघुकाकुत्स्थस्तस्य याञ्चावशात्स्वरभेदवतोऽर्थिनो याचकस्य प्रार्थना सफला क्रियतामित्यमुना प्रकारेण नरपुंगवान्नरश्रेष्ठानादिष्टवान् ॥ वा समुच्चये ॥ पक्षे वैदेही सीतेति प्रलपतोऽलघोर्गुरो रामस्य काकुत्स्थस्य सप्रयोजनस्य प्रार्थना सफला क्रियतामिति वानरपुंगवान्कपीशः सुग्रीवो नियुक्तवान् ॥ ख ॥

कदाचिदिति ॥ मार्गणान्याचकान् । इष्टार्थसंप्रदानेन सौमनस्ययुक्तान्विधाय स्वस्य

1 स्वस्य गुणम्.

कदाचिदम्भोनिधिरिवोच्चैःस्तननाभिरम्याः, कृतानिमेषनयनविभ्रमाः, सकंदर्पाः, सिषेवे वेलाविलासिनीः ॥ क ॥

कदाचिद्दशरथ इवायोध्यायां पुरि स्थितः सुमित्रोपेतो रममाणरामभरतप्रेक्षणेन क्षणमाह्लादमन्वभूत् ॥ ख ॥

एवमस्य सकलजीवलोकसुखसंतानमनुभवतो यान्ति दिनानि॥ग

अथ कदाचिदुन्नमत्पयोधरान्तरपतद्धारावलीविराजिताः, कमलदलकान्तनयनाः, सुरचापचक्रवक्रभ्रुवः, विद्युन्मणिमेखलालंकारधारिण्यः, शिञ्जानामुक्तकलहंसकाः[2], प्रौढकरेणुसंचारहारिण्यः, कम्रकंधराः, तिरस्कृतशशाङ्ककान्तिकलापोच्चमुखमण्डलाः, सकलजगज्जेगायमानगुणमिमम्[3]अनुपमरूपलावण्यराशिराजितं राजानमवलोकयितुमिवावतरन्ति स्म वर्षाः[4] ॥ घ ॥

गुणं त्यागाख्यं जगतोऽपि कर्णौ पूर्येते अनेनेति कर्णपूरः । चक्रौ कर्णपूरीचकार ॥ पक्षे सुमनसः पुष्पाणि । मार्गणा बाणाः । गुणो ज्या । कर्णपूरः कर्णान्तकर्षणम् ॥ ॥

कदाचिदिति ॥ उच्चैःस्तनाभ्यां नाभ्या च रम्या ॥ तथा निर्निमेषनेत्रलीलाः सकामाः । वेलायां वारके विलसन्ति भोगायोपतिष्ठन्त इत्येवंशीला वारस्त्रीः । सिषेवे॥अम्भोनिधिस्तु वेला अम्भोवृद्धीः । कीदृशीस्ताः । उच्चैःस्तननेन शब्देनाभिरम्याः॥तथा कृतमनिमेषाणां मत्स्यानां नयनं प्रापणं यैस्तथोक्ता विविधा भ्रमा आवर्ता यासु ॥ तथा कं जलं तस्य दर्पेण मोक्षेण सह ॥ दृपेर्मोचनार्थत्वात् ॥ तथा विलसन्त्यभीक्ष्णम् ॥ क ॥

कदाचिदिति ॥ न योद्धुं शक्याऽयोध्या संज्ञा च । तस्यां पुरि । सुमित्रैरुपेतः सुमित्रया कलत्रेण ॥ विलसन्त्यो रामा विलासिन्यो यत्र तेन भरतसंगीतेन विक्रीडद्रामभरतयोरवलोकनेन चाह्लादं नलो दशरथश्च भेजे ॥ ख ॥ ग ॥

अथेति ॥ अनन्तरं कस्मिन्नपि समये नृपमवेक्षितुं वर्षा अवातरन् ॥ वर्षाशब्दगतस्त्रीत्वेन वर्षाणां साक्षात्स्त्रीत्वमध्यवसितम् ॥ ततश्च पयोधरा मेघाः स्तनाश्च । पतद्धारावली पतन्ती धाराश्रेणी चलन्ती हारावली च । यद्वा पयोधरयोः स्तनयोरन्तर्मध्येऽपतन्तोऽतिसंहतत्वादप्रविशन्तो हारा यासाम् । तथा वलीभिरुदरे लेखाभिर्विराजिताः ॥ कमलदलानां कान्तमिष्टं नयनमतिवाहनं यासाम् । वर्षाणां ह्यतिवाहने कमलानामुल्लासः । पक्षे कमलदलवत्कान्तनेत्राः ॥ इन्द्रधनुश्चक्रमेव वक्रे भ्रुवौ यासाम् ।

१ कृतानिमिष. २ हंसकाः. ३ गुणग्रामम्. ४ वर्षाङ्गनाः.

यत्र च।

आकर्ण्य स्मरयौवराज्यपटहं जीमूतनूत्नध्वनिं
नृत्यत्केकिकुटुम्बकस्य[2] दधतं मन्द्रां मृदङ्गक्रियाम्।
उन्मीलन्नवनीलकन्दलदलव्याजेन रोमाञ्चिता
हर्षेणेव समुच्छ्रिता[3] वसुमती दध्रे शिलीन्ध्रध्वजान्॥४०॥

अपिच।

पर्णैः कर्णपुटायितैर्नवरसप्राग्भारविस्फारितैः
शृण्वन्तो मधुरं द्युमण्डलमिलन्मेघावलीगर्जितम्।
शाखाग्रग्रथमानसौरभभरभ्रान्तालिपालिध्वजा-
स्तोषेणेव वहन्ति पुष्पपुलकं धाराकदम्बद्रुमाः॥४१॥

पक्षे सुरचापचक्रवद्वक्रभ्रुवः॥ विद्युदेव मणिमेखला तां तथालमत्यर्थं कस्य जलस्यारं वेगं धारयन्ति। यद्वा कारस्य राज्ञे देयांशस्य धारिण्यः। वर्षा हि सस्यादिसाधकत्वात्करस्यापि साधनम्। पक्षे विद्योतमानमणिकाञ्चीभूषणधारिण्यः॥ शिञ्जाना गर्जन्त्यस्तथा मुक्ता मानसं प्रति प्रस्थापिता हंसका याभिः। यद्वा मुक्तहंसानि कानि जलानि यासु। तत्समये हंसानां मानसे गमनात्। पक्षे शिञ्जाने शब्दायमाने आमुक्ते बद्धे हंसके चरणाभरणे यासाम्॥ प्रकर्षेणोढं कं जलं तेन रजःसंचाररोधिकाः। पक्षे प्रगल्भगजगमनमनोज्ञाः॥ कं जलं धरन्तीति कंधरा मेघास्ते कम्रा रम्या यासु। पक्षे कंधरा ग्रीवा॥ छादितशशाङ्ककान्तयः। तथा काय पानीयाय लापाः कलापाः। कुटुम्बिनीजनगीयमानरासकाः। तैरुच्चमुखा मेघालोकनायोन्मुखा मण्डला देशा यासु। पश्चात्कर्मधारयः। पक्षे निर्जितेन्दुदीप्त्यतिशयमुच्चमुत्कृष्टमुन्नतकपोलं वा मुखबिम्बं यासाम्॥ ध॥

आकर्ण्येति॥ युवा चासौ राजा चेति युवराजस्तस्य भावो यौवराज्यम्। कामस्य तरुणराजत्वपटहोपमं नृत्यत्केकिनां च मृदङ्गविधिं दधानं घनगर्जितं श्रुत्वा मुदेव विकसत्कन्दलच्छलेन पुलकिता भूरभूत्। शिलीन्ध्रध्वजानधारयत्॥४०॥

पर्णैरिति॥ वसन्ते पुष्प्यन्ति ते धूलीकदम्बा वर्षासु च धाराकदम्बाः॥ शाखाग्रे मिलन्तः सौरभभराक्रान्ता उपर्युपर्यटन्तश्च तेऽलयश्च त एव पालिध्वजाः प्रसिद्धचिह्नानि येषां ते धाराकदम्बद्रुमाः पुष्पमेव पुलकं मदेन वहन्ति॥ हर्षहेतुर्गर्ज-

1 यत्र. 2 कदम्बकस्य. 3 समुच्छ्रितान्.

[1]अथ क्रमेण

नीरं नीरजनिर्मुक्तं नीरजस्कं भुवस्तलम् ॥
जातं जातिलतापुष्पगन्धान्धमधुपं वनम् ॥ ४२ ॥

अपिच ।

[2]धुतकदम्बकदम्बकनिष्पतन्नवपरागपरागममन्थराः ।
[3]हृततुषारतुषा रतिरागिणां प्रियतमा मरुतो मरुतो ववुः ॥४३॥

ततश्च । तिरस्कृततरणित्विषि, विगलद्वारिविप्रुषि, शान्तचातकतृषि, निर्वाणवारणवपुषि, मानिनीमानग्रहग्रन्थिमुषि, जनितजवासकशुषि, [4]विधववधूविद्विषि, वर्धितमण्डूकत्द्दषि, मुद्रितचन्द्रमसि, विद्राणपङ्कजसरसि, स्वाधीनप्रियप्रेयसि, प्रोषितकलहंसवयसि, नष्टनक्षत्रमण्डलमहसि, मेचकितनभसि, निष्पतन्नीपरजसि, स्फुटकुटज[5]रजःपुञ्जपिञ्जरिताष्टदि[6]ग्भासि, भासुरसुरचापचक्रभृति,

नश्रवणमेव । रसो जलं रागश्च । अन्योऽपि द्युमण्डलान्मिलन्त्या योषितः शब्दं श्रुत्वैवंविधो भवति "ग्रन्थ बन्धन" इति यौजादिकाद्विकल्पिते णिचि ग्रथितुं शीलमेषामिति चानशि ग्रथमानाः । यत्कविरहस्ये "गाथां ग्रन्थयति ग्रथत्यविरतं श्लोकांश्च लोकेत्तरान्गद्यं ग्राथयति स्फुटार्थललितं यो नाटकं ग्रन्थति । ग्रथ्नाति श्रुतिशास्त्रयोर्विवरणं ग्रन्थाननेकांश्च यः स्वच्छं यस्य मनः स्वभावसरलं न ग्रन्थते कुत्रचित्" इति । अस्मादात्मनेपदमपि । तथा च । "वहति जलमियं पिनष्टि गन्धानियमियमुद्ग्रथते स्रजो विचित्राः । मुसलमिदमियं च पातकाले मुहुरनुयाति कलेन हुंकृतेन" इति ॥ ४१ ॥

नीरमिति ॥ नीरं जलमम्भोजमुक्तं भूतलं निःपांसु वनं च जातीपुष्पसौरभान्धभृङ्गं जातम् ॥ ४२ ॥

धुतेति ॥ कम्पितकदम्बद्रुमसमूहान्निःसरन्योऽसौ नवः परागस्तत्संगमेन मन्थरा मन्दाः ॥ तथा ऊढसीकरकणाः ॥ तथा रतिरागोऽस्ति येषां तेषामतिदयिता मरुतो वाता मरोः पर्वताद्वान्ति स्म ॥ परागमेति परापूर्वः पर उत्कृष्ट आगमो वा ॥४३॥

ततश्चेति ॥ तिरस्कृता रवित्विषो येन । इन्द्रगोपा वर्षासु जाताः क्षुद्रजन्तवः ॥ क्र्योतत्क्षरत्तमालानां संबन्धि यद्धारागृहं तस्य सदृशि ॥ क्षीरोदधौ निद्रायमाणो बाणासुरबाहु-

---

१ अथ क्रमेणेति क्वचित्पुस्तके नास्ति. २ मधुकदम्ब. ३ धृत. ४ विरहिवधू. ५ कुसुमरजः. ६ दिग्भागभासि.

मयूरमदकृति, महिषशोषस्दृति, विस्तरत्सरिति, शाद्वलहरिति, विद्योतमानविद्युति, वहन्मन्दमेघंकरमरुति[1], हृष्यत्कृषाणयोषिति, पुष्प्यत्केतकीगन्धपानमत्तमधुकृति, प्रोद्भूतभूरुहि, दरिद्रनिद्राद्रुहि, सगर्वगोदुहि, कदम्बस्तम्बालम्बिमधुलिहि, मुदितमदनाट्टहासाय-मानघननादमुचि, पच्यमानजम्बूफलश्यामलितवनान्तररुचि, रचितपान्थसार्थशुचि, श्रूयमाणमदमधुरमयूरवाचि, विनिद्रकोशातकीशालिनि, यूथिकाजालिनि, नवमालिकामालिनि, कन्दलभाजि, पच्यमानजम्बूतरुवनराजिभ्राजि, भिक्षाक्षणक्षेपितपरि-[2]व्राजि, शान्तसारङ्गरुजि, नीडनिर्माणाकुलबलिभुजि, सान्द्रेन्द्रगोपयुजि, श्च्योतत्तमालधारागृहसदृशि, श्यामायमानदशदिशि, दिवापि श्रूयमाणरजनिशङ्काकुलचक्रवाकचक्रक्रुशि[3], शकटसंचाररुधि, पल्लवितवीरुधि, विश्रान्तजिष्णुक्ष्मापालयुधि, क्षीणोक्षक्षुधि, क्षीरसमुद्रनिद्राणबाणबाहुच्छिदि, सिन्धुरोधोभिदि, दवदहननुदि, विरहिमनस्तुदि, जनितजनमुदि, तापिच्छच्छायानुच्छेदिनि, छन्नकुटीमध्यबध्यमानवाजिनि, विकसितबकुलवनविराजिनि, सीरसीमन्तितग्रामसीमनि, विजयमानमनोजन्मनि जाते जगज्जीविनि, जीमूतसमये कदाचिदनम्भसि दिवसे मृगयावनपालकः प्रविश्य राजानं विज्ञापयामास ॥ क ॥

" देव,

किं स्यादञ्जनपर्वतः स्फटिकयोर्द्वन्द्वं दधद्दीर्घयो-
रम्भोमेदुरमेघ एष किमुत श्लिष्यद्बलाकाद्वयः ।

च्छिद्विष्णुर्यत्र ॥ सीमन्त इव सीमन्तः । ततः करोतिण्यन्तात्क्ते । तारकादित्वादितचि वा रूपम् ॥ तस्मिन्नित्थंभूते मेघसमय आखेटकारण्यपालको नृपं व्यज्ञापयत् ॥ क ॥ किं स्यादिति ॥ दीर्घस्फटिकद्वयोपेतोऽञ्जनगिरिः, बलाकाद्वयान्वितः सजलो जलदः,

१ मेघाङ्कमारुति. २ कुपित. ३ चक्रवाकक्रुशि.

शून्यः किंनु करेण कुञ्जर इति भ्रान्तिं समुत्पादय-
न्दंष्ट्रा[1]द्वन्द्वकरालकालवदनः कोलः कुतोऽप्यागतः ॥४४॥

ततश्चासौ

भिन्दन्कन्दकसेरुकन्दलभृतः स्निग्धप्रदेशान्भुवो
भञ्जन्नञ्जनशैलशृङ्गसदृशः फुल्लतामण्डपान् ॥
मन्दं मन्दरलीलयाब्धिसदृशं मथ्नंश्च लीलासरः
क्रोडः क्रीडति भा[2]पयन्निव भवत्क्रीडावने रक्षकान्" ॥४५॥

राजा तु तदाकर्ण्य चिन्तितवान् ।

"अच्छाच्छैः शुकपिच्छगुच्छहरितैश्छन्ना[3] व[4]नान्तास्तृणैः
सेव्याः संप्रति सान्द्रचन्द्रकिकुलैरुत्ताण्डवैर्मण्डिताः ॥
येषु क्षीरविपाण्डु पल्वलपयः कल्लोलयन्तो मना-
ग्वाता वान्ति विनिद्रकेतकवनस्कन्धे लुठन्तः शनैः ॥ ४६ ॥

माद्यन्ति च[5] तेषु संप्रति प्रोथिनः । तद्युज्यते विहर्तुम्" इ-
त्यवधारयन्नाहूय बाहुकनामानं सेनापतिमादिदेश ॥ क ॥

"भद्र द्रु[6]तमनुष्ठीयताम्, समादिश्यन्तां कृतवैरिविपत्तयः पत्तयः, पर्याण्यन्तां मनस्तुरगास्तुरगाः, सज्जीक्रियन्तां निजवेगनि[7]-

शुण्डाशून्यो हस्ती, किमिति भ्रान्तिं जनयन्देव कुतोऽपि कोलः सूकर आगात् ॥४४॥

भिन्दन्निति ॥ मन्दरलीलया करणभूतया भाययन् ॥ अत्र करणाश्रयेनात्वमात्मनेपदं षुगागमश्च न भवति ॥ ४५ ॥

अच्छाच्छैरिति ॥ चन्द्रकिणो मयूराः । पल्वलमखातं सरः ॥ ४६ ॥

माद्यन्तीति ॥ प्रोथिनः सूकराः ॥ क ॥

भद्रेति ॥ पर्याणं करोत्यश्वानाम् । "तत्करोति तदाचष्टे" इति णिचि पर्याणयत्यश्वान् । पश्चात्संबन्धनिवृत्तौ व्याकरणं सूत्रयतीति त्रिलोकीं तिलकयतीतिवत्कर्म-

---

१ दंष्ट्रायुग्म. २ भापयन्; भीषयन्. ३ छन्नान्. ४ वनान्तान्. ५ वनेषु. ६ द्रुतं मद्वचनमनुष्ठीयताम्. ७ विनिर्जित.

र्जितमातरिश्वानः श्वानः, समारोप्यन्तामपनीताहितायूंषि धनूंषि, गृह्यन्तां निर्मथितप्रोथियूथपाशाः पाशाः" इति॥ क॥

अथ[1] मौलि[2]मिलन्मुकुलितकरकमलयुगलेन सेनापतिना "यदाज्ञापयति देवः" इत्यभिधाय त्वरया तथा कृते सति॥ ख॥

स्वयमपि

निर्मांसं मुखमण्डले परिमितं मध्ये लघुं कर्णयोः
स्कन्धे बन्धुरमप्रमाणमुरसि स्निग्धं च रोमोद्गमे।
पीनं पश्चिमपार्श्वयोः पृथुतरं पृष्ठे प्रधानं जवे
राजा वाजिनमारुरोह सकलैर्युक्तं प्रशस्तैर्गुणैः[3]॥ ४७॥

आरुह्य च क्रमेण कार्दमिककर्पटावनद्धमूर्धजैर्दण्डखण्डपाणिभिः क्रूरकर्मोचिताकारैर्वागुरावाहिभिरनन्तैः कृतान्तदूतैरिव पाशहस्तैः पा[4]पर्द्धिकैरनुगम्यमानः, दूरादुन्नमितकंधरैस्त[5]थोर्ध्वकर्णसंपुटैरकाण्डोड्डीनप्राणैरिव वनप्राणिभिराकर्ण्यमानहर्षितहयहेषारवः, पवनकं[6]म्पिततरुशाखाग्रपल्लवव्याजेन दूरादेवोत्क्षिप्तहस्ताभिरुड्डीयमानशकुनिकुलकोलाहलच्छ[7]लेन भयान्निवार्यमाण इव वनदेवताभिः, अभिमुखागतैरुन्मिषत्तरुपुष्पप्रकरमकरन्दबिन्दुवर्षवाहिभिर्वनविनाशशङ्कितैरर्घ्यमिवोपपादयद्भिरुपरुध्यमान इव वनमारुतैः, उन्निद्रसान्द्रकुसुमकेसराङ्कु[8]रजालजटिलाभिर्भयादु[9]द्गतरोमाञ्चप्रपञ्चाभिरिवोद्भ्रान्तभृं[10]ङ्गरवगद्गदरुदितेन निषिध्यमान इव वनवीरुद्भिः, उद्भिन्नभास्वद[11]मन्दकन्दलावलोकनेनानन्द्यमानः श्वानुगतो-

त्वम्॥ मन इव तुराः शीघ्रा गच्छन्तीति॥ निर्मथिताः प्रोथियूथपानां वराहयूथपानामाशा इच्छा यैः॥ क॥ ख॥ ४७॥

आरुह्य चेति॥ कर्दमेन नीलीलोहमलादिना रक्तं कार्दमिकम्। श्वभिरश्वैश्चानु-

1 अथेति क्वचित्पुस्तके नास्ति. 2 मौलिमण्डलमिलत्. 3 हयानां गुणैः. 4 पापर्द्धिकपुरुषैः. 5 स्तब्धोर्ध्वकर्ण. 6 प्रकम्पित. 7 व्याजेन. 8 तरुणतरु. 9 उद्भूत. 10 भृङ्गाङ्गनारव. 11 अनन्त.

ऽप्यश्वानुगतः सगजमप्यगजं तद्वनमाससाद ॥ क ॥

ततश्च केचिदुद्यत्परश्वधा गणपतयः, केऽपि दृष्टसिंहिकासुतविक्रमाः शशधराः, केऽपि पाशपाणयो जम्बुकदिक्पालाः, केऽपि हरिमार्गानुसारिणो बलभद्राः, केऽपि चक्रपाणयो मधुसूदनाः, केऽपि शिवागमानुवर्तिनो रौद्राः, केऽप्याहिताग्नयो विप्रलोकाः, केऽपि खण्डिताञ्जनाधरप्रवालाः प्रभञ्जनाः, केऽप्युत्खातदन्तिदन्तमुष्टयो निस्त्रिंशाः, तस्य पृथ्वीपतेराकुलितश्वापदाः पदातयो वनं रुरुधुः ॥ ख ॥

ततश्च तैः क्रियन्ते विकलभा वननिकुञ्जाः कुञ्जराश्च, ध्रियन्ते-

गतो राजा । गजोपेतम् । अगः पर्वतस्तत्समीपोद्देशोऽप्यगस्तत्र जातमगजं तद्वनमाप ॥ क ॥

ततश्चेति ॥ उद्यन्तः पलायमानाः परे उत्कृष्टाः श्वानस्तान्दधति ॥ तथा गणस्य सेनायाः पतयः हेरम्बाश्च उद्गृह्यमाणपरशवः ॥ सिंहिकासुतः केसरिकिशोरो राहुश्च । शशं धरतीति शशधरः पत्तिश्चन्द्रश्च ॥ पाशः पाणौ यस्य स पाशपाणिर्वरुणश्च ॥ जम्बुकः शृगालो वरुणश्च । यद्विश्वप्रकाशः—" जम्बुकः फेरवे नीचे प्रतीचीदिक्पतावपि " ॥ हरिं सिंहं मार्गं मृगसमूहं चानुसरन्ति । बलेन भद्राः शक्ताः । पक्षे हरेर्विष्णोर्मार्गोऽध्वा । बलभद्रो बलदेवः ॥ चक्रं पाणौ यस्य स चक्रपाणिर्विष्णुश्च । मधु क्षौद्रं दैत्यश्च । सूदनं क्षरणं मारणं च ॥ शिवा शृगाली तस्या गमो गतिः । पक्षे शिवस्यागमाः शास्त्राणि । रौद्रा भीषणाः शैवाश्च ॥ गृहीतहविर्भुजो वीन्शकुन्तान्प्रलोकयन्तः । पापर्द्धिका हि कपोतादिपातनाय तरूणामधस्तात्तापनीसंज्ञकामग्नीष्टिकां कुर्वन्ति । पक्षे साग्निहोत्रा विप्रलोकाः ॥ खण्डिता अञ्जनस्य पञ्चिकपक्षिणोऽधरप्रवालाः पुच्छाधःपिच्छानि यैः । यद्वाऽञ्जनस्य शाखिनोऽधःपल्लवाः । वातास्तु खण्डितोऽञ्जनाख्यायाः प्रियाया ओष्ठपल्लवो यैः ॥ उत्खाता दन्तिदन्ता यैस्तथोक्ता मुष्टयः संग्रहा येषाम् । पक्ष उत्क्षिप्तदन्तिदन्तप्रधानो मुष्टिस्त्सरुर्येषु । निस्त्रिंशाः क्रूरकर्माणः खड्गाश्च ॥ ईदृशास्तस्य पत्तयो वनं वेष्टयामासुः ॥ ख ॥

ततश्चेति ॥ विगताः कलभा येभ्यस्ते व्यपेतकरिपोताः । कुञ्जरास्तु विकलकान्तयो

---

१ केचिदुद्यतपरश्व; कतिचिदुद्यत्परश्वधा. २ शिवागमानुसारिणो. ३ पल्लवाः.

ऽनेकधा[१]रयातिपातिनः खड्गाः खड्गिनश्च, कृष्यन्ते कूजन्तः कोदण्डदण्डा गण्डकाश्च, विक्षिप्यन्ते परितः शराः शरभाश्च, भज्यन्ते तरवस्तरक्षवश्च ॥ क ॥

क्षणेन च पतन्ति पीवरा वराहाः, सीदन्ति दन्तिनः, विरसं रसन्ति सातङ्का रङ्कवः, प्र[२]काशैलं शैलं भयादारोहन्ति रोहिताः, शरसं[३]घातघूर्णिता यान्ति महीं महिषाः, दुर्गसंश्रयं श्र[४]यन्ते तरलितने[५]त्राश्चित्रकाः, त्वरिततरं तरन्तीवोत्पतन्तो नभसि निजजवनि[६]र्जिततुरंगाः कुरङ्गाः ॥ ख ॥

तत्र च व्यतिकरे

जाताकस्मिकविस्मयैः किमिदमित्याकर्ण्यमानः सुरैः
संत्रासोज्झितकर्णतालचलनाद्दिग्दन्तिनः कम्पयन् ।
जन्तूनां जनितज्वरः स मृगयाकोलाहलः कोऽप्यभू-
द्येनेदं स्फुटतीव निर्भरभृतं ब्रह्माण्डभाण्डोदरम् ॥ ४८ ॥

राजाप्येकशरप्रहारपातितमत्तमातङ्गः सर्वतो विहारिहरिहरिणशशकशम्बरवराहहननहेलया विचरन्नितस्ततस्त[७]रुणतरतमालमञ्जरीजालनीलोद्धुषितस्कन्धकेसरमूर्ध्वस्तब्धकर्णसंपुटमश्वच[८]क्राय क्रु[९]ध्यन्तमाघूर्णितघोणमनवरतकृतघनघोरघर्घररवमुत्क्षिप्तपुं[१०]च्छगुच्छमभिमुखमेकस्मिन्नतिसान्द्रभद्रमुस्तास्तं[११]म्बभाजि पङ्किलपल्व-

भयादिति शेषः । खड्गा द्विधारत्वादनेकया धारया पतन्त्यभीक्ष्णम् । गण्डकास्तु रयेणातिपतन्ति । य उद्भिन्नशृङ्गाः प्रौढास्ते खड्गिनः । अतएव रयातिपातिनः ॥ त एव बालका गण्डकाः । अतएव कूजन्तः ॥ तरक्षवश्चित्रकाद्याः ॥ क ॥

क्षणेन चेति ॥ सातङ्काः सभयाः । रङ्कवो मृगाः ॥ प्रकाशाः स्पष्टा एला लता यत्र शैले । रोहितः श्वापदः ॥ चित्रकोऽपि तद्विशेषः ॥ ख ॥ ४८ ॥

१ धारया पातिनः. २ प्रकाशैरलम्. ३संघातघातघूर्णितायाम्. ४संश्रयन्ति. ५नेत्रानेत्रकाः. ६ विनिर्जित. ७ तरुणतमाल. ८ चक्रायोपरि; चक्रोपरि. ९कुप्यन्तम्. १०पुच्छम्. ११स्तम्बकदम्बभाजि.

लप्रदेशे तं शूरशूकरमपरमिव दवदहन[1]दग्धाद्रिमद्राक्षीत् ॥ क ॥

[2]दृष्ट्वा च रचितशरसंधानलाघवो राघव इव राक्षसेश्वरस्य तस्योपरि परिणद्धविविधपत्त्रैः [3]पतत्रिभि[4]रभ्यवर्षत् ॥ ख ॥

तत्र च व्यतिकरे

किमश्वः पार्श्वेषु प्लवनचतुरः किंनु नृपतिः
शरान्मुञ्चन्नुच्चै[5]श्चलतरकराकृष्टधनुषा ।
किमालोलः कोलः परिहृतशरः शौर्यरसिको
न जानीमस्तेषां क इह [6]परमो वर्ण्यत इति ॥ ४९ ॥

अपिच ।

अजनि जनितपृथ्वीमण्डलोत्पातकम्पं
किमपि चलितशैलं द्वन्द्वयुद्धं तयोस्तत् ।
स्खलिततुरगवेगो विस्मयेनैष यस्मि-
न्दिनपतिरपि शौर्याश्चर्यसाक्षी बभूव ॥ ५० ॥

अथ कथमपि नाथं प्रोथियूथस्य [7]जित्वा
ज्वरित इव विशालं सालसः [8]सालमूले ।
सुखमभजत राजा राजमानः श्रमाम्भः-
कणकलितकपोलालोलल्लीलालकेन ॥ ५१ ॥

[9]तत्र च स्थितं श्रममुकुलितनयनारविन्दम्, आन्दोलयन्तः कुसुमिततरून्, तरलयन्तः शिखिशिखण्डमण्डलानि, ताण्डवय-

अजनीति ॥ स्वभावतोऽपि मध्यंदिने स्खलिता*श्ववेगो रविस्तत्र कवेरूहः ॥५०॥

अथेति ॥ ज्वरित इव सालस इत्यनेन श्रमातिशयोक्तिः । अन्योऽपि ज्वरितो मूलादीनि सेवमानः स्वेदबिन्दुलक्ष्यमाणज्वरापगमो राजते ॥ ५१ ॥

तत्र चेति ॥ श्रममुकुलितनेत्रकमलं नृपं कम्पितनीपकाननाः पवना हर्षयांच-

---

१ दग्धमद्रिम्. २ स राजा दृष्ट्वा च. ३ पत्रिभि. ४ अभिववर्ष. ५ द्रुततर. ६ निपुणः. ७ हत्वा. ८ सालमूलम्. ९ तत्र स्थितम्.

* "दिवसस्याष्टमे भागे मन्दीभवति भास्कर" इति वसिष्ठोक्तेः ।

न्तस्तनुलतापल्लवनिवहान्, [1]वहन्तो वहन्निर्झरजलशिशिरशीकरनिकरान्, [2]करालयन्तः कुटजकुड्मलानि, मकरन्दबिन्दुस्रुचो मन्दमानन्दयामासुः कम्पितनीपवनाः पवनाः ॥ क ॥

अनन्तरमनवरतकरालकाल[3]कौलेयककुल्लकवलनाकुलितकोलकरिकुरङ्गकण्ठीरवकिशोर[4]पृष्ठप्रधाविते परितः परिजने, जनितविविध[5]मृगवधूवधव्याधीन्व्याधान्निवारयितुमिवान्तरान्तराप्रसारितकरे मध्यस्थतां गतवति भगवति गभस्तिमालिनि, सहसंवर्धितमृगविनाशशोकभरादिव वनवीरुधां पतत्सु पुष्पलोचनेभ्यो बाष्पेष्विव मध्याह्नोष्णविलीनमकरन्दबिन्दुषु, श्रूयमाणेषु वनदेवतानां वनविमर्दोपालम्भेष्विव तरुखण्डोड्डीनविविधविहङ्ग[6]विरुतेषु, विघट्टितार्भककुरङ्गकुटुम्बिनीकरुणकूजितव्याजेनान्यायमिव पूत्कुर्वतीषु [7]वनराजिषु, इतस्ततः संचरच्चटुलतरतुरंग[8]खुरशिखरशिखोत्खातधरणिमण्डलाद्वनविनाशवार्तां गगनचरेभ्यः कथयितुमिवोत्पतितेऽम्बरतलमकृत[9]परित्राणे च मूर्छित इव [10]पुनः पुनः पतति भुवि भवनपारावतपतत्रिपत्रधूसरे धूलिपटले, सकम्प[11]कपिकलापोल्लनलुलिततरुतरुणमञ्जरीपुञ्जनिकुञ्जा[12]दुद्वेजिते मञ्जु गुञ्जति वनान्तरमपरमुच्चलिते चञ्चलचञ्चरीकचक्रवाले, चङ्क्रमणक्रमेण च संपन्ने सैन्यस्य श्रमावसरे तस्यैव [13]सरससरलशालद्रुमस्याधस्तान्निषण्णे [14]श्रमभाजि राजनि ॥ ख ॥

ऋुः । कुटजकलिकानां करालनं विकासनम् ॥ क ॥

अनन्तरमिति ॥ कौलेयकः श्वा । कोलः सूकरः । पूत्करणमार्तव्याहरणम् ॥ख॥

१वहन्तो निर्झर. २ किसलयन्तः; कलयन्तः. ३ कौलेय. ४ पृष्ठतः मधाविते परिजने. ५मृगवधव्यधान्; मृगवधव्याधीन्. ६ रुतेषु. ७ वनस्थलीषु. ८ खुरशिखोत्खात. ९ परित्राणावमूर्च्छित. १० पुनः पतति. ११ कपिकुलकलापोल्लनतरुणतरुमञ्जरी. १२ उद्विजिते. १३ सरसशाल १४ अश्रमभाजि.

अकस्मात्कुतोऽपि

वल्लीवल्कपिनद्धधूसरशिराः स्कन्धे दधद्दण्डकं
ग्रीवालम्बितमृन्मणिः परिकुथत्कौपीनवासाः कृशः ।
एकः कोऽपि पटच्चरं चरणयोर्बद्ध्वाऽध्वगः श्रान्तवा-
नायातः क्रमुकत्वचा विरचितां भिक्षापुटीमुद्वहन् ॥ ५२ ॥

आगत्य च राजानमवलोक्य स[1]विस्मयमेवमेष चिन्तयां-चकार ॥ क ॥

अब्जश्रीसुभगं युगं नयनयोर्मौलिर्महोष्णीषवा-
नूर्णारोमसखं मुखं च शशिनः पूर्णस्य धत्ते श्रियम् ।
पद्मं पाणितले गले च सदृशं शङ्खस्य रेखात्रयं
तेजोऽप्यस्य य[2]था तथा सजलधेः कोऽप्येष भर्ता भुवः ॥ ५३ ॥

तदेवंविधाः ख[3]लु महनीया महानुभावा भवन्तीत्येवम[4]वधार्य समुपसृत्य "स्वस्ति स्वकान्तिनिर्जितमकरध्वजाय तुभ्यम्" इत्य-वादीत् ॥ ख ॥

राजापि सविस्मयमना मनागुन्नमितमस्तकः स्वागतप्रश्नेनाभि-नन्द्य "तीर्थयात्रिक, कुतः प्रष्ठव्योऽसि । क्व च कियच्चाद्यापि ग-न्तव्यम् । उ[5]पविश । विश्रम्य कथय कांचिद[6]पूर्वां किंवदन्तीम् । अ-

वल्लीति ॥ कुथितवती सटिते कौपीनवाससी यस्य । "परिकुथत्" इति पाठे कुथो वर्णकम्बलः । रथ्यानिपतितजरत्पटखण्डैर्निर्मितत्वात् ॥ पटच्चरो जीर्णवस्त्र-खण्डम् ॥ क्रमुकत्वचा पूगद्रुमवल्केन ॥ ५२ ॥

अब्जेति ॥ सजलधेरिति भुवो विशेषणम् ॥ उष्णीषमुत्तमाङ्गे लक्षणविशेषः ॥ तथोर्णा भ्रूमध्ये शुभरोमावर्तः ॥ यद्विश्वः—"उष्णीषं तु शिरोवेष्टे किरीटे लक्षणा-न्तरे" । तथा । "ऊर्णा मेषादिलोम्नि स्यादन्तरावर्तके भ्रुवोः" ॥ ५३ ॥

---

१ सविस्मयमेव. २ तथा यथा. ३ खलु महानुभावा महनीयाः. ४ अवधारयन्समभिसृत्य; अवधार्योपसृत्य; अवधारयन्नुपसृत्य. ५ उपविश्य. ६ अपूर्विकाम्.

नेकदेशदृश्वानः किलाश्चर्यदर्शिनो भवन्तीति । न चाकस्मिकं दर्शनमपूर्वः परिचयः स्वल्पा प्रीतिरित्येकमप्याशङ्कनीयम् । अपूर्वदर्शनेऽपि न जात्या मणयः स्वां स्वच्छतामपह्नुवते । तदेहि । मुहू[1]र्तमेकत्र गोष्ठीसुखमनु[2]भवावः” इत्येनमवादीत् ॥ क ॥

असावपि “अपूर्वकौतुकक[3]थाकर्णनरसिक, श्रूयतां यद्येवम्” इत्यभिधाय सुखोपविष्टस्यास्य समीपे स्व[4]यमुपविश्य कथयितुमारभत ॥ ख ॥

अस्ति स्वर्गसमः समस्तजगतां सेव्यत्वसंख्याग्रणी-
    र्देशो दक्षिणदिङ्मुखस्य तिलकः स्त्रीपुंसरत्नाकरः ।
यस्मिंस्त्यागमहोत्सवव्यसनिभिर्धन्यैरशून्या जनै-
    रुद्देशाः स्पृहणीयभावभरिताः कं नोत्सुकं कुर्वते ॥ ५४ ॥
कथं चा[5]सौ न प्रशस्यते ॥ ग ॥

यत्र त्रिपुरपुरंध्रिरोध्रतिलकहारिणा हरिर्वि[6]रिञ्चिचूडामणिमरीचिचक्रचकोरचुम्बितचरणनखचन्द्ररुचिनिचयेन भगवता [7]सेव्यते सेव्यतयाऽपहसितकैलासश्रीः श्रीशैलः शूलपाणिना ॥ घ ॥

यत्र च विकचविविधवनविहारसुरभिसमीरणान्दोलितकदलीदलव्यजनवीज्यमाननिधुवनविनोदखेदविद्राणनिद्रालुद्रविडमिथुनसनाथपरिसराः सरसघननिचुलतलचलच्चकोरचक्रवाककुलकपिञ्जलमयूरहारीतहारिण्यो नाकलोककमनीयतां कलयन्ति क-

राजापीति ॥ किंवदन्तीं वार्ताम् ॥ जात्या मणयो विशिष्टजातीयरत्नानि ॥ क ॥ ख ॥
अस्तीति ॥ स्त्री च पुमांश्च स्त्रीपुंसौ । “अचतुर—” इत्यादिना निपात्यते ॥ ५४ ॥ ग ॥
यत्रेति ॥ त्रिशूलपाणिना त्रिपुरान्तकेन । तत्रस्थेन हि त्रिपुरासुरो हतः ॥ घ ॥

---

१ मुहूर्तमेकमेकत्र. २ अनुभवामः. ३ कथानकाकर्णन. ४ स्वयमप्युपविश्य. ५ नासौप्र. ६ विरिञ्चि. ७ सेव्यतया सेव्यते.

लमकेदारसाराः सरससहकारकारस्कराः कावेरीतीरभूमयः ॥ क ॥

किं बहुना ।

अस्तु स्वस्ति समस्तरत्ननिधये श्रीदक्षिणस्यै दिशे
स्वर्गस्पर्धिसमृद्धये हृदयहृद्गोदावरीरोधसे ।
यत्र त्रस्तकुरङ्गकार्भकदृशः संभोगलीलाभुवः
सौख्यस्यायतनं भवन्ति रसिकाः कंदर्पशास्त्रं स्त्रियः ॥५५॥

तत्र प्रणतसुरासुरशिर[1]ःशोणमरीचिचयबहलकुङ्कुमानुलेपपल्लवितपादारविन्दद्वयस्य क्रौञ्चभिदो भगवतः सु[2]गन्धिगन्धमादनाधिवासिनः स्कन्ददेवस्य दर्शनार्थमितो गतवानस्मि ॥ ख ॥

तस्माच्च निवर्तमानेन क्वचिदेकस्मिन्नध्वरो[3]धिनि न्यग्रोधपादपतले दीर्घाध्वश्रान्तेन वि[4]श्राम्यता मया श्रूयतां यदाश्चर्यमालोकितम् ॥ ग ॥

अतिललितपदवि[5]न्याससारसाधुसिन्धुरवधूस्कन्धमधिरूढा, प्रौढसखीसहायप्राया, प्रान्तपतच्चा[6]रुचामरमरुन्नर्तितालकवल्लरी, कर्णकुवलयालंकारधारिणी, रुचिररुचिमञ्जरणनूपुरा, पुरःसरसरागगान्धर्विककण्ठकन्दरविनिःसरत्सरसगीतप्रेङ्खोलनप्रयोगेषु दत्तावधाना, नेत्रे मनाङ्मीलयन्ती, ध्रियमाणमायूरातपत्रमण्डला, मण्डलितमदनचा[7]पचक्रवक्रभ्रूः, भूपालपुत्रिका कापि क्वापि कुतोऽप्युच्चलिता तदेव न्य[8]ग्रोधच्छायामण्डपमशिश्रियत् ॥ घ ॥

तां चालोक्य चिन्तितवानस्मि विस्मितमनाः ॥ ङ ॥

"किं लक्ष्मीः स्वयमागता मुररिपोर्देवस्य वक्षःस्थलात्कोपात्पत्युरुतावतारमकरोद्देवी भवानी भुवि ।

१ शिरस्तारशोणमणिमरीचिनिचयबहुल. २ सुगन्धगन्ध. ३ रोधिन्यग्रोध. ४ विश्रम्यता. ५ विन्यासस्साधु. ६ चारुचामीकरचामर. ७ चापवक्र. ८ न्यग्रोधपादपच्छाया; न्यग्रोधपादपपतच्छाया.

श्यामाम्भोजसदृक्षपक्ष्मलचलन्नेत्रामिमां पश्यतो
धातस्तात करोषि किं न वदने चक्षुःसहस्रं मम ॥ ५६ ॥

अपिच ।

इन्दोः सौन्दर्यमास्यं कलयति कमलस्पर्धिनी नेत्रपत्रे
कालिन्द्याः कुन्तलालो तुलयति विभवं भव्यभङ्गैस्तरङ्गैः ।
तस्याः किं श्लाघ्यतेऽन्यत्सुभगगुणनिधेः काप्यपूर्वैव यस्याः
पुष्पेषोर्वैजयन्ती जयति युवजनोन्मादिनी यौवनश्रीः॥५७॥

अपिच ।

आकारः स मनोहरः स महिमा तद्वैभवं तद्वयः
सा कान्तिः स च विश्वविस्मयकरः सौभाग्यभाग्योदयः ।
एकैकस्य विशेषवर्णनविधौ तस्याः स एव क्षमो
[1]यस्यास्मिन्नुरगप्रभोरिव भवेज्जिह्वासहस्रद्वयम् ॥ ५८ ॥

सापि यथा त्वमिदानीं मामिह पृच्छसि तथार्धपथमिलितं कंचिदुदीचीनमध्वगं दक्षिणस्यां दिशि प्रस्थितमादरेण पृच्छन्ती मुहूर्तमिव तत्रैव विश्रमितुमारभत ॥ क ॥

श्रुतश्चायं मयापि तेन तस्याः पुरः कस्यचिदु[2]दीच्यनरपतेः श्लाघ्यमानस्य क[3]थावशेषालापः ॥ ख ॥

तस्मिन्स्मितसुखे यूनि यूपदीर्घभु[4]जद्वये ।
ते धन्या न्यपतन्येषां कंदर्पसदृशे दृशः ॥ ५९ ॥

आकार इति ॥ उरगप्रभोर्वासुकेर्यथा जिह्वासहस्रद्वयं वर्तते तथा यस्यैतावत्यो जिह्वा भवेयुः स एव वर्णयितुं क्षमो भवेत् ॥ यदा "जिह्वासहस्रं मुखे" इति पाठः । तदा सहस्रशब्दोऽनन्तबहुत्ववचनः ॥ ५८ ॥ क ॥

---

१ यस्य स्यादुरगप्रभोरिव मुखे जिह्वासहस्रद्वयम्; यस्यास्मिन्नुरगप्रभोरिव भवेज्जिह्वासहस्रं मुखे. २ उदीचीनं नरपतेः. ३ कथाशेषालापः. ४ भुजद्वया.

किं बहुना ।

सा त्वं मन्मथमञ्जरी स च युवा भृङ्गस्तवैवोचितः
श्लाघ्यं तद्भवतोः किमन्यदपरं किं त्वेतदाशास्महे ।
भाग्यैर्योग्यसमागमेन युवयोर्मानुष्यमाणिक्ययोः
श्रेयानस्तु विधेर्विचित्ररचनासंकल्पशिल्पश्रमः[१] ॥ ६० ॥

तन्न जाने स कः सुकृती तेन तस्याः श्रवणादेवोल्लसद्बहुलपुलकाङ्कुरोत्तम्भितांशुकायाः पुरो[२] विस्तरेणैवं वर्णितः ॥ क ॥

न च मयापि विस्मयविस्मतविवेकेन केयं[३] कस्येयं कुत्र कुतो वा प्रस्थितेति प्रश्नाग्रहः कृतः । केवलमदृष्टपूर्वरूपोत्पन्नाकस्मिककौतुकातिरेकास्तमितसमस्तान्यव्यापारेणैकाग्रतया ग्रहनिरुद्धेनेवान्धेनेव मूकेनेव[४] मूढेनेव मूर्छितेनेव संजातसंतमसेनेव[५] विषविघूर्णितेनेव[६] स्तौभस्तम्भितेनेव[७] गतायामपि तस्यां तेनाध्वनीनेन सह तत्रैव[८] न्यग्रोधतरुतले सुचिरमासितमासीत् ॥ ख ॥

तदायुष्मन्नेष कथितः स्ववृत्तान्तः ॥ ग ॥

तस्यां दिशि तया सकलजगज्ज्योत्स्नया, अस्मिन्नपि देशे निःशेषजननयनकुमुदेन्दुना त्वया दृष्टेन, दृष्टं यद्द्रष्टव्यम् । अभूच्च मे श्लाघ्यं जन्म । जाते कृतार्थे चक्षुषी । संपन्नः सफलः परिभ्रमणप्रयासः ॥ घ ॥

तदिदानीं किमन्यत् ॥ ङ ॥

सा त्वमिति ॥ अत्राप्रत्यक्षमपि बुद्धिकल्पितं नलं प्रत्यक्षमिव मन्यमानो भवतोरित्याह । भवती च भवांश्च भवन्तौ । "पुमान्स्त्रिया" इत्येकशेषः ॥ मानुषत्वे भूषणभूतत्वात्तयोर्माणिक्यत्वम् ॥ ६० ॥

नेति ॥ स्तोभश्चेष्टाविघातः ॥ ख ॥

---

१ क्रमः. २ पुरतः. ३ केयमिति क्वचित्पुस्तके नास्ति. ४ मूकेनेवेति क्वचित्पुस्तके नास्ति. ५ संजातान्धतमसेनेव. ६ विषघूर्णितेन. ७ मोहसंस्तम्भितेनेव. ८ त्वया चाद्य.

अनुमन्यस्व स्वविषयगमनाय माम्" इत्यभिधाय व्यरंसीत् ॥क॥

राजाप्येतदाकर्ण्य चिन्तितवान् ॥ ख ॥

स्त्रीमाणिक्यमहाकरः स विषयः पन्थोऽप्ययं तथ्यवा-
ग्व्यापारोऽपि विधेर्विचित्ररचनस्तत्किं न संभाव्यते।
किं त्वाश्चर्यमदृष्टरूपविभवाप्याकर्ण्यमाना सती
कान्तेत्युन्नतचेतसोऽपि कुरुते नाम्नैव निम्नं मनः ॥६१॥

तथाहि।

नो नेत्राञ्जलिना निपीतमसकृत्तस्याः स्वरूपामृतं
नो नामान्वयपल्लवोऽपि च मया कर्णावतंसीकृतः।
चित्रं चुम्बति चुम्बकाश्मकमयो यद्वद्बलाद्दूरत-
स्तद्वत्तर्जितधैर्यमेतदपि मे तस्यां मनो धावति ॥ ६२ ॥

सोऽयं दुर्लभेष्वनुरागः पुंसाम्, अज्वरमस्वास्थ्यम्, अदौर्गत्यं दौःस्थ्यम्, अविषास्वादनमाघूर्णनम्, असाध्वसं कम्पनम्, अनात्मविक्रयं पारवश्यम्, अजरं जाड्यम्, अनिन्धनं ज्वलनम्, अलग्नग्रहमुन्मादनम्, अवात्याघातमुद्भ्रमणम्, अमौनं मौक्यम्, अहीनश्रुति बाधिर्यम्, अनष्टदृष्टिकमन्धत्वम्, अस्खलितमनोरथं मनःस्तम्भनम्, अमन्त्र आवेशः ॥ ग ॥

सर्वथा नमः सुस्थितजनदुर्जनाय मनोजन्मने, यस्यायमेवंविधो व्यापार इत्यवधारयन्नवतार्य सर्वाङ्गिभ्यो भूषणानि तस्मै सदयमदात् ॥ घ ॥

स्त्रीति ॥ निम्नमभिलाषदीनत्वाल्लाघवास्पदम् ॥ ६१ ॥

नो नेत्रेति ॥ यद्वद्यथा चुम्बकसंज्ञमश्मकम् । पाषाणं कर्म ॥ अयो लोहं कर्तृ ॥ चुम्बति । तथा मेऽपि मनस्तस्यां धावति ॥ ६२ ॥

सोऽयमिति ॥ आवेशो व्यन्तरादेर्मनसि प्रवेशः ॥ ग ॥

---

१ पाथः. २ अलमं ग्रहम्.

तैस्तैरालापैः स्थित्वा[1] च कंचित्समयमिममथ[2] यथाप्रस्थितं पान्थं कथमपि प्रेषयामास[3] ॥ क ॥

स्वयमपि तत्कालान्तरालमिलितैर्नक्षत्रैरिव सार्द्रमृगशिरोहस्तैः सश्रवणचित्रकृत्तिकोपस्करवाहिभिः पापर्द्धिकपरिजनैरनुगम्यमानो राजा निजावासमयासीत् ॥ ख ॥

ततः प्रभृति च

हृद्योद्यानमरुत्तरङ्गितसरित्तीरे[4] तरूणामध-
स्तल्पेऽनल्पसरोजिनीनवदलप्रायेऽपि खिन्नात्मनः ।
धीरस्यापि मनाङ्मनस्तृणकुटीकोणान्तराले बला-
ल्लग्नोऽस्येति विभाव्यते परवशैरङ्गैरनङ्गानलः ॥ ६३ ॥

एवमस्य

पुनरपि तदभिज्ञान्पृच्छतः पान्थसार्था-
न्प्रतिपथमथ यूनो यान्ति तस्य क्रमेण ।

स्वयमपीति ॥ राजा निजहर्म्यमगात् ॥ तत्कालं तत्क्षणात् । अन्तरालेऽध्वमध्ये । राजा चन्द्रोऽपि तदा । तस्मिञ्ज्योतिःप्रसिद्धे काले कलासमूहे अष्टशतीलक्षणे यदन्तरालं तत्र ॥ मिलितैः परिजनैरनुगम्यमानः । कीदृशैः । सार्द्राणि सास्रत्वाच्च्योतन्ति हरिणशिरांसि येषु तथाविधा हस्ता येषां तैः । सश्रवणां सकर्णाम् । चित्रस्य चित्रकायस्य कृत्तिकां त्वचम् । उपस्करं मृगयोपयोगि वहन्ति तैः ॥ आर्द्रशब्दो भाववचनः । पक्षे सह आर्द्रया नक्षत्रेण, सार्धं मृगशिरो हस्तश्च नक्षत्रं येषु । श्रवणचित्रे नक्षत्रे । अनयोः समाहारद्वन्द्वः । तेन सह । ताश्च ताः कृत्तिकाश्च तासामुपस्करं समवायं वहन्ति ॥ ख ॥

हृद्येति ॥ हृदयस्य बन्धनं हृद्यम् ॥ ६३ ॥

तमसो यत्र विनाशः पथिकोच्छ्वासः पदार्थनिर्भासः ।
उदयं प्रतिपाद्यासौ भुवनमुदे जयति चण्डरुचिः ॥

---

१ स्थित्वा स च. २ इमं यथा. ३ संप्रेषयामास. ४ सरस्तीरे.

हरचरणसरोजद्वन्द्वमुद्राङ्कमौले-
र्मदनमदनिवासा वासराः प्रावृषेण्याः ॥ ६४ ॥

इति श्रीत्रिविक्रमभट्टविरचितायां दमयन्तीकथायां हर[2]-
चरणसरोजाङ्कायां प्रथम[3] उच्छ्वासः समाप्तः ॥

इति विषमपदप्रकाशमेतं दमयन्त्यास्तनुते स्म चण्डपालः ।
शिशुमतिलतिकाविकासचैत्रं चतुरमतिस्फुटभित्तिचारुचित्रम् ॥

इति चण्डपालविरचिते दमयन्तीकथाविवरणे प्रथम
उच्छ्वासः समाप्तः ॥

अथ द्वितीय उच्छ्वासः ।

अथ कदाचिद्दैवगल[4]द्बहल[5]परिमलमिलदलिकुलाकुलितकुटजकदम्बकुसुमकर्णपूरशून्यकाननासु, विश्राम्यन्मदमुखरमयूररसनावलीकलक्कणितासु, विरलतरतडिल्लताललितलावण्यासु, विगतहंसद्विजराजिषु, पतत्पयोधरासु, क्षीणशुक्रासु, वृद्धास्विव गतप्राया-

अथेति ॥ अनन्तरमितीति सति स राजा निकटकानने विचरन्किंनरमिथुनेन गीयमानं रागविशेषेणोच्चार्यमाणमिदमिति वक्ष्यमाणमनश्लीलमग्राम्यं श्लोकत्रितयमाकर्णितवान् । किं विशिष्टः । कलहंसा एव हासस्तेन रम्यायां तरुण्यामभिनवप्रवृत्तायाम् ॥ अथ च शरदेव तरुणी युवतिः । तस्यामागतायां रागात्स्वयं प्राप्तायाम् । उत्सुक उत्क इत्युत्कयन्तरम् ॥ तदा मदेन क्षीबतया तरुणिमोद्रेकेण वा कलकलो यस्याः ॥ तथा शुभ्रत्वाद्धंसोपमौ हासहारौ स्तोऽस्यामिति कर्मधारयान्मत्वर्थीयः । न कर्मधारयादिति तु प्रायिकम् ॥ किं विदधानः कुर्वाणः । काम् । रतिं चित्तासक्तिम् । कासु । वर्षासु । किंभूतासु । गतप्रायासु स्वल्पशेषासु । तथा कुसुमान्येव कर्णपूरा उत्तंसास्तैः शून्यानि काननानि वनानि यासु । तथा मदेन मुखराणां मयूराणां या र-

---

१ समविषमकविश्रीत्रिविक्रम; श्रीभट्टत्रिविक्रम. २ हरचणसरोजाङ्कः. ३ प्रथमोच्छ्वासः.
४ विगलत्. ५ बहुल.

सु वर्षासु, रतिमकुर्वाणो मदकलकलहंसहासहारिण्यामुत्सुक[1]स्तरुण्यामिवागतायां शरदि, द्विरदमदगन्धसंबन्धानुधाविते[2] कुसुमित[3]सप्तच्छदच्छायासु विस्फूर्जति[4] रोषोद्धुषितकेसरकरालकण्ठे कण्ठीरवकदम्बके[5], गृहदीर्घिकामृणालिकाकाण्डखण्डनविरामरमणीयमुन्नदत्सु शरत्समयप्रवेशमङ्गलमृदङ्गेष्विव हंस[6]मण्डलेषु, स्मरशरनिकरनिर्मथितपान्थ[7]सार्थप्रहाररुधिरनिष्यन्दबिन्दुसंदोह इव वनस्थलीषून्मिषति बन्धुरबन्धूककुसुमप्रकरे, प्रसरन्तीषु शरल्लक्ष्मीप्रवेशानन्दवन्दनमालासु निःशङ्कशुककुलावलीषु, श्रूयमाणासु स्मरराजराज्यविजयघोषणासु पक्वकलमगन्धशालिपालिकाबालिकाहर्षगीतिषु, शरच्छ्री[8]कटाक्षेषून्मीलत्सु नील[9]नीरजेषु, क्वणति वर्षावधूप्रस्थानपटहे षट्चरणचक्रवाले, प्रभात इव घनतिमिरविरामरमणीयेजाते जलनिधिशयनशायिशार्ङ्गिनिद्राद्रुहि विनिद्रसान्द्ररससरोजराजिराजितसरसि शरत्समये, स महीपतिः समासन्नवनविहारि[10]किंनरमिथुनेन गीयमानमिदमनश्लीलं श्लोकत्रयमशृणोत् ॥ क ॥

सनावली जिह्वाश्रेणिस्तस्याः कलक्वणितम् । तद्विभ्राम्यद्विरमद्यासु । वर्षोदये हि केकायन्ते न प्रान्ते । मदाभावात् । तथा स्तोकविद्युदुद्द्योतासु । व्यपेतहंसपक्षिपङ्क्तिषु । भ्रश्यद्घनासु । क्षीणशुक्राख्यग्रहासु ॥ कास्विव । वृद्धास्विव ॥ तदा । रतिः संभोगः । गतं प्रकृष्टमयमिष्टफलं दैवं यासाम् । तथा कुसुमैः पुष्पदामभिः कर्णपूरैश्च शून्यं कं शिर आननं च यासाम् । तथा रसनायाः काञ्च्याः क्वणितस्य मुखरमयूररवो ललितस्य मधुराङ्गविन्यासस्य लावण्यस्य च लोचनलेह्यकमनीयगुणस्य विरलतडिदुपमानम् । तथा व्यपेतहंसशुभ्रदन्तराजिषु पतत्कुचासु । तथा क्षीणं गर्भसंभवाभावाद्विनष्टं शुक्रं पुंवीर्यं यासु । न पुनर्निवृत्तवीर्यास्विति व्याख्येयम् । पुंसां वीर्यं स्त्रीणां रज इति

---

१ उत्सुकश्च. २ द्विरदमदगन्धसंधानधाविते; द्विरदमदगन्धानुसंधानवासितासु. ३ वासितकुसुमित ४ विस्फूर्जिते. ५ कुटुम्बके. ६ मृदङ्गेषु हंस. ७ पथिकप्रहार; पान्थप्रहार. ८ शरत्स्त्री; सरःश्री. ९ नीलसरोजेषु. १० विहारहारि.

धन्याः शरदि सेवन्ते प्रोल्लसच्चित्रशालिकान् ॥
प्रासादान्स्त्रीसखाः पौराः केदारांश्च कृषीवलाः ॥ १ ॥
नमिताः फलभारेण न मिताः शालिमञ्जरीः ॥
केदारेषु हि पश्यन्तः के दारेषु विनिःस्पृहाः ॥ २ ॥
प्रावृषं शरदं चापि बहुधाकाशहारिणीम् ॥
विलोक्य नोत्सुकः कः स्यान्नरो नीरजसंगताम् ॥ ३ ॥

प्रसिद्धेः। अतएव न विद्यते बलं वीर्यं यासामित्यबलाः ॥ रसनाशब्दः काञ्चीपक्षे न परं तालव्यः। दन्त्योऽप्यस्ति। तथा च विश्वप्रकाशः—"रसना काञ्चिजिह्वयोः" इति॥ द्विरदमदगन्धस्य संबन्धो द्विरदमदगन्धोऽयमिति प्रत्यभिज्ञा तयानुधाविते। संधानपाठे-तु संधानं संधिर्मैत्री सादृश्यमिति यावत्। शरदि सप्तच्छदाः पुष्यन्ति। ते च मदग-न्धयस्ततो गजभ्रान्त्या सरोषं विस्फूर्जति सिंहवृन्दे। मृणालिकाकाण्डस्य खण्डनाय योऽसौ विरामोऽर्थान्नादस्यैव। तेन रम्यं यथा भवति स्थित्वा स्थित्वा मृणालं चर्बन्ति तत्कषायसंशुद्धकण्ठाश्च नादं कुर्वन्तीत्यर्थः। हंसमण्डलानि शरत्प्रवेशमङ्गलमृदङ्गाः॥ बन्धूककुसुमस्यातिलौहित्याद्विरहिजनरुधिरत्वम् ॥ शुकावलिस्तोरणम् ॥ कलमस्य श्वेतशालेः, गन्धशालेश्च रक्षिका गीतयः कंदर्पराजजयघोषणाः॥ विकसन्नीलोत्पला-नि शरल्लक्ष्मीकटाक्षाः॥ भृङ्गगणश्च यान्त्या वर्षावध्वाः प्रयाणपणवः॥ घनो मेघो घ-नं च सान्द्रम्। शयनस्थानम्। निद्राद्रोहो विनिद्रसान्द्रसरोजराजितसरस्त्वं च शरत्प्र-भातयोः समानम् ॥ क ॥

॥ न...इति ॥ प्रोल्लसन्त्यश्चित्रशालिका आलेख्यभूमिका येषु। पक्षे चित्रा बहु-कसलशालयः॥ स्त्रीसखा इत्युभयत्र योज्यम् ॥ १ ॥

...लवाः स्त्रीसखा इत्याह—**नमिता इति** ॥ हि यस्मात्कारणात्। दारेषु के निः-कुल...स्युः। किं कुर्वन्तः। फलभारेण नमिता वक्रिता न मिताः स्तोकाः केदारेषु क्षे-त्रेषु ...लिमञ्जरीः पश्यन्तः। तद्दर्शनं ह्युद्दीपनविभावः॥ २ ॥

प्रावृषमिति ॥ रमणीयत्वात्। बहुधा पुनः पुनर्विलोक्य प्रावृषमाकाशस्य व्यो-म्नस्तिरोधायिनीं नीरजसं निःपांशुं गतामतिक्रान्तां शरदं च काशपुष्परम्याम्। तथा नीरजैः पद्मैः संगतामन्विताम् ॥ ३ ॥

---

१ शालमञ्जरीः. २ केदारेष्विह. ३ वापि.

अनेन मृदुमूर्छनातरङ्गरङ्गिताक्षरेण श्रवणपथप्रथमप्रियातिथिना श्लोकत्रयेण विष[1]विषमविषयवैरस्यव्रतव्रततिकठिनकुठारेण, दारपरिग्रहपराङ्मुखोऽपि शृङ्गारशृङ्गिशृङ्गमुत्तुङ्गमा[2]रोप्यमाणस्तदेवोद्यानममन्दमन्दारमकरन्दामोदमत्तमधुकरमधुरझंकाररमणीयमुपसर्तुमारभत ॥ क ॥

प्रथमसंमुखप्रेङ्खितेन चलच्चन्दनामोदनन्दिना[3]न्दोलनवेगवित्रस्तकुसुमिततरुशिखरसु[4]प्तसुरतश्रमखिन्नकिंन[5]रीनिबिडतरपरिरभ्यमाण किंनरनमस्कृतेन क्रीडाकमलदीर्घिकातरङ्गोत्सङ्गरङ्गत्तरुणतामरसरसबिसरोद्गारहारिणा यौ[6]वनमदनिरुद्धनैषधीधम्मिल्लवल्लरीचलनविलासल[7]ासकेन वनमारुतेनोत्पुलकिततनुः स्तोकमन्तरम[8]तिक्रम्य "देव, भवद्वैरिवधूवदने वने च नारङ्गतरूपशोभे भान्ति गण्डशैलस्थलालंकारधारिण्यो लोध्रलताः, नागरुचिताश्चन्दनपत्रभङ्गाः, नालिकेरचितस्तिलकः, नवा दृष्टिपथमवतरति घनाञ्जनयष्टिका, नाभिरम्या नीलतमालका, नाधरीकृतस्ता[9]म्बूलीरागः, पल्लवितमेत-

अनेन श्लोकत्रयेण प्रियाग्रहविमुखोऽप्युच्चैः शृङ्गारगिरिशिखरं नीयमानस्तदेव वनं गन्तुमारेभे ॥ क ॥

तत ईदृग्विधेन वायुना रोमाञ्चिततनुः देवेत्याद्यामन्त्र्य तवारिस्त्रीमुखे वने चेदमिति भङ्गश्लेषोक्तिदक्षया वनरक्षिकया कथ्यमानानि वनकौतुकस्थानानि नलो...लोकयत् ॥ आन्दोलनवेगेत्यादावान्दोलनं तरोरेव पवनकृतम् ॥ त्वदरिस्त्रीमुखे संभोगा...र्थं गतसौन्दर्ये कपोलफलकालंकारिण्यो लोध्रस्य विलेपनरूपस्य लता मण्डनवल्लयो...यं वान्ति। अगरुद्रवेण चिताश्चन्दनद्रव्यस्य पत्रभङ्गाः पत्रवल्लयः ॥ अलिकं ललाटं ...तस्कं पुण्ड्रम् ॥ वा समुच्चये घनं सान्द्रमञ्जनं तस्य यष्टिः शलाका ॥ अभिरम्या ...नम् । प्रकर्षेण नीलाः कुटिलकेशाः अधरोऽस्यास्तीत्यधरी ओष्ठवान्। ताम्बूलराग ओष्ठसंबद्धः कृत इति भावः ॥ सर्वत्र नञ्संबन्धः ॥ अवतरतीति तु संनिहितमेव योज्यं

---

१ विषमविषय. २ समारोप्यमाणः. ३ अमन्दान्दोलत. ४ सुखसुप्त. ५ किंनरीजन. ६ यौवनमदानिरुद्धापाङ्गनैषधी; यौवनमदरुद्धापाङ्गनैषधीय. ७ हास्यलासकेन. ८अतिक्रम्य वनपालिका राजानं जगाद. ९ ताम्बूल.

दृश्यतेऽशोकजालम्। इतश्च काञ्चनगिरिरिव सुरचितः क्रीडापर्वतः। इतश्च गूर्जरकूर्चमिवाखण्डितप्रवालं बालशालवनम्। इतश्च भर्वद्वैरिनगरमिवानेकविधबकुलसंकुलं कूपकुलम्। इतश्च धूर्जटिजटाजूट इव पुंनागवेष्टितो वापीपरिसरः। इतश्च कुरुसेनेव कृताश्वत्थामहिता च क्रीडासरित्पुलिनपालिः।" इति भङ्गश्लेषोक्तिकुशलया वनपालिकया निवेद्यमानानि वनविनोदस्थानान्यवलोकयांचकार॥ क॥

चलच्चकोरचक्रवाकचक्रचञ्चुचञ्चलचञ्चरीकचरणचूर्णितचम्पकाङ्कुरमरिचमञ्जरीदलदन्तुरेण वनमार्गेण स्तोकमन्तरमतिक्रान्तस्तया पुनरेवं बभाषे॥ ख॥

"देव, पुरंदरानन्दिनन्दनोद्यानस्पर्धिनोऽस्य वनस्य किं किं वर्ण्यते॥ ग॥

न प्रत्येकम्। पल्लवितशब्दो लक्षणया प्रवृद्धार्थः। शोकात्सप्रलापमनोदौस्थ्याज्जातं शोकजम्। अलमनर्थः॥ वने च नारङ्गतरुभिः कृतशोभे सहजच्युतस्थूलपाषाणस्थलीभूषणा लोध्रस्य तरुविशेषस्य लताः शाखा भान्ति॥ नागेभ्यो रुचिताश्चन्दनतरोः पत्राणां भङ्गा विशेषाः॥ तिलको वृक्षो नालिकेरैस्तरुभिर्व्याप्तः॥ नवा नवीना। अञ्जनस्य शाखिनो यष्टिः प्रकाण्डः॥ तमालका इति ह्रस्वे कः। अतएव नाभिरम्या नाभिदघ्ना इति भावः॥ नाधरीकृतो न हीनीकृतः। ताम्बूली वल्ली। रागः सक्तिः॥ किसलयितमशोकानां जालं खण्डः॥ इतश्च सुष्ठु रचितः सुरैश्रितो व्याप्तश्च॥ प्रवालाः पल्लवाः। पक्षे अखण्डिताः अतएव प्रवृद्धा वालाः केशा यत्र॥ अनेकविधैर्बकुलैः संकुलम्। पक्षे अनेका विधवा मृतभर्तृका येषु कुलेषु तैः कुलैर्गोत्रैः संकुलम्॥ पुंनागमगः अन्यत्र पुमान्नागो वासुकिः॥ कृता उत्पादिता अश्वत्थाः पिप्पला यस्याम्। तथा महिता चार्वी। पक्षे कृतमश्वत्थाम्ने द्रोणसुताय हितं यया॥ क॥

चलदिति॥ संचारयोग्येन मार्गेण कियदपि व्यवधानमतिक्रान्तः पुनरपि तयैव बभाषे॥ ख॥

देवेति॥ देव, नन्दनस्पर्धिनोऽस्य किं वर्ण्यते॥ ग॥

---

१ गुर्जर. २ क्वचित्पुस्तके चक्रवाकचक्रेति नास्ति. ३ स पुनरेवम्; पुनरेषः. ४ किं वर्ण्यते.

यत्र। त्रिजटाश्रयमनेकजटाः, स्फुरदेकपुष्पकमनेकपुष्पाः, समुद्वेजितराममानन्दितरामाः, समुपहसन्ति लङ्केश्वरं तरवः ॥ क ॥

यस्मिंश्च मत्तमयूरहारिणि भद्रभुजंगप्रयाते विचित्रक्रौञ्चपदे[1] छंन्दःशास्त्र इव वैतालीयं मालिनी[2] शिखरिणी पुष्पिताग्रा च दृश्यते विविधा जातिः ॥ ख ॥

यस्मिंश्च। एकभीमार्जुनविनिर्जितानाक्रान्तानेकभीमार्जुनाः, कोपितैकनकुलानाह्लादितानेकनकुलाः, सहदेवेनैकेन स्पर्धमानाननैकैः सहदेवैः संगताः। न बहु मन्यन्ते कुरुवीरान्वीरुधः ॥ ग ॥

किं चान्यदवलोकयतु देवः।

पटलमलिकुलानामुन्नमन्मेघनीलं
भ्रमदुपरि तरूणां पुष्पितानां विलोक्य।
मृदुमदकलकेकानिर्भरो नृत्यसक्त-
स्तरलयति कलापं मन्दमन्दं मयूरः ॥ ४ ॥

यत्रेति ॥ रावणं तरवो हसन्ति ॥ त्रिजटा रावणस्वसा। जटा मूलानि ॥ पुष्पकं विमानं कुसुमं च ॥ रामो दाशरथिः। रामाः स्त्रियः ॥ अनेकजटा इत्येकशब्देन संख्योपलक्ष्यते। ततोऽनेकशब्दोऽसंख्यातवचनः ॥ क ॥

यस्मिंश्चेति ॥ वै स्फुटमियं ताली तालद्रुमः। इयं जातिर्मालती दृश्यते ॥ द्वे अपि कीदृश्यौ। माला अस्यामस्ति। तथा शिखरयुक्ता कुसुमिताग्रभागा च। किंविशिष्टे वने। मत्तैर्मयूरै रम्ये। तथा भद्रं मनोज्ञं भुजंगानामहीनां विटानां च प्रयातं यत्र। क्रौञ्चः पक्षी ॥ पक्षे मत्तमयूरं भुजंगप्रयातं क्रौञ्चपदा वैतालीयं मालिनी शिखरिणी पुष्पिताग्रा च छन्दोनामानि ॥ जातिश्च उक्तादिरुत्कृत्यन्ता ॥ ख ॥

यस्मिंश्चेति ॥ वने वीरुधो लताः कुरुवीरान्न गौरवयन्ति ॥ आक्रान्ता अनेके बहवो भीमा अम्लवेतसा अर्जुनाश्च याभिः ॥ यद्विश्वप्रकाशः—"भीमोऽम्लवेतसे शंभौ घोरे वापि वृकोदरे" ॥ नकुला जीवाः। सहदेवास्तरवः ॥ कुरुवीरपक्षे भीमार्जुननकुलसहदेवाः पाण्डवाः ॥ ग ॥

१ मध्यमणिविभूषिते, चम्पकमालाचित्रे, हरिगीताकर्णनसुखे, शार्दूलविक्रीडिते, हरिणीमनोहरे, सहरिणप्लुते छन्दःशास्त्रे. २ शालिनी.

अपिच।

भ्राम्यद्द्विरेफाणि विकासभाञ्जि
संयोज्य पुष्पाणि शिलीमुखेषु।
इह स्थितः सर्वजगज्जयाय
धनुःश्रमं पुष्पशरः करोति ॥ ५ ॥

इतश्च

हरिति हरिणयूथं यूथिकाजालमूले
कुसुमजमधुबिन्दुस्यन्दसंदोहभाजि।
मधुरमधुकरालीगीतदत्तावधानं
लिखितमिव न दूर्वापल्लवानुल्लुनाति ॥ ६ ॥

इतोऽपि

सोऽयं क्रीडाचलो भव्य लोभव्यसनवर्जित[1]।
यस्मिन्नासन्नसारङ्गा सारं गायति किंनरी ॥ ७ ॥
राजते राजतेनायं सानुना सानुनायकः।
यस्मिन्निशम्य गायन्तं किंनरं किं न रंस्यते ॥ ८ ॥

भ्राम्येति ॥ शिलीमुखाः शराः। इहेत्युद्यानस्योद्दीपनविभावातिशयोक्त्या कामस्य स्थितिरुच्यते। एतावता सुरभिकुसुमसंपदुक्ता ॥ ५ ॥

हरितीति ॥ हरिति शाद्वले यूथिकासमूहस्याधःप्रदेशे मधुबिन्दुसंदोहसंबन्धात्स्पृहणीयेऽपि गीतिरसिकतया मृगाणां दूर्वाङ्कुराग्रहणमुक्तम् ॥ ६ ॥

सोऽयमिति ॥ हे भव्य, हे लोभेन व्यसनैश्च विवर्जित, सोऽयं क्रीडागिरिः ॥ यस्मिन्गिरावासन्नमृगा किंनरी सारमुत्कृष्टं गायति। गीतप्रकर्षाकृष्टत्वात्सारङ्गाणामासन्नता ॥ ७ ॥

राजत इति ॥ अयं सानुनायको गिरी रजतनिर्मितेन सानुना तटेन राजते ॥ यस्मिन्गायन्तं किंनरं निशम्य श्रुत्वा न किं रंस्यते। रंस्यत एव ॥ ८ ॥

---

1 वर्जितः

इतश्चास्य

जनयति जलबुद्धिं बाललीलामृगाणा-
मयमिह पटुकान्तिः स्फाटिको भित्तिभागः।
इह हरितमणीनामुल्लसन्तो मयूखाः
सरसनवतृणालीलोभमुत्पादयन्ति ॥ ९ ॥

इयं च

गौरवं गौरवंशस्य पर्वतः पर्वतस्थले।
भ्रमरी भ्रमरीणस्य कुरुतेऽकुरुतेन ते ॥ १० ॥

अपिच।

इह कवलितकन्दं कंदरे कन्दलिन्यां
भुवि विरचितकेलि क्रीडति क्रोडयूथम्।
इह सरसिजगर्भभ्रान्तभृङ्गं कुरङ्गाः
सरसि सरलयन्तः कंधरां[1] कं धयन्ति ॥ ११ ॥
इह पुनरनिशं निशम्य भिन्न-
द्रुममुकुलानि कुलानि षट्पदानाम्।
श्रुतसुखकरणं रणन्ति वीणां
तदनुगुणां गुणयन्ति[2] किंनरेन्द्राः ॥ १२ ॥

गौरेति ॥ गौरो वंशोऽन्वयो यस्य तस्य ते। पर्वतस्थले गिरिस्थले। पर्वतो गच्छतः। अतएव भ्रमेण देहवैक्लव्येन भ्रमिसंज्ञेन खिन्नस्य सतोऽकुत्सितरुतेन भ्रमरी भृङ्गी गौरवं प्रतिपत्तिविशेषं कुरुते ॥ १० ॥

इहेति ॥ कं जलम्। धयन्ति पिबन्ति ॥ ११ ॥

इहेति ॥ रणन्तीति शत्रन्तं षट्पदकुले विशेषणम् ॥ तस्य भृङ्गरणितस्यानुगुणामनुगामिनीम् ॥ १२ ॥

---

१ कंधराः. २ क्वणयन्ति; गणयन्ति.

इतश्च क्रीडाचलस्थलकमलदीर्घिकातीरतरुतलमनुसरतु देवः ॥ क ॥

यत्र च

वहति नवविकासोल्लासिकिंजल्कलुभ्य-
न्मधुकरकृतगीता नर्तयन्नब्जराजीः।
वनकरिमदगन्धस्पर्धिसप्तच्छदाली-
कुसुमजकणशारः शारदीनः समीरः" ॥ १३ ॥

राजा तु तेन तस्याः सकलल[1]लितवनप्रदेशप्रकटनप्रियालापप्रपञ्चेन परितोषितः "साधु भोः सारसिके सुभाषितमञ्जरि, साधु। गृहाण पारितोषिकम्" इत्यभिधाय सर्वाङ्गीणाभरणप्र[2]दानेन प्रसन्नाननां तामकरोत् ॥ ख ॥

त[3]तश्च संचरच्चटुलभृङ्गविहंगवेगवे[4]ल्लद्बकुलचम्पकचूतचन्दनमन्दारामन्दस्यन्दमानमकरन्दबिन्दुसंदोहाडम्बरिताकाण्डप्रावृषि, प्रलम्बताम्बूलवल्लीवलयितनितम्बनिम्बकि[5]म्बजम्बीरजम्बूस्तम्बकदम्बके, कुसुमितकरवीरवीरुधि कोरकितकरञ्जाञ्जननिकुञ्जशिञ्जानशुककपिञ्जले, जलदसमयनीरदनीलतमतमालतलताण्डवितशिखण्डिनि, मण्डलितमदकलक[6]लहंसोत्तंसकमलवापीमण्डिते, मञ्जरितासिन्दुवारसुन्दरामोदनन्दिनि मन्दतरमारु[7]तान्दोलनविलोल[8]कक्कोलकुटलफलनालिकेरलवङ्गपूगपुंनागनारङ्गरङ्गितविहङ्गे भृङ्ग-

वहतीति ॥ कुसुमजकणा मकरन्दलवास्तैः शारः शबलः। शरदि भवानि मुद्रादीनि विद्यन्ते येषां ते शारदिनः कृषीवलास्तेषामिनः स्वामी। तत्तत्सस्यसंपत्तिहेतुत्वात् ॥ १३ ॥

ततश्चेति ॥ भृङ्गमुखनखरेत्यादौ भृङ्गो धूम्याटः पक्षी ॥ क ॥

---

१ ललितपल्लवित. २ मदानप्रसन्नाननाम्. ३ अनन्तरं चेतस्ततश्च संचरत्; इतस्ततश्च संचरत्. ४ वेल्लकुचलसद्बकुल. ५ निम्बजम्बीर. ६ कलहंसमण्डलोत्तंस. ७ आन्दोलित. ८ कक्कोलपनसकुटलफल; पनसकुसुमकुट्मलफल; कङ्कोलकटफल.

मुखनखरपञ्जरजर्जरितसर्जखर्जूरमञ्जरीरजःपुञ्ज[1]पांसुलभुवि, भुवो भूषणायमाने, सर्वर्तुनिवासनामनि[2] वने विहर्तुमारभत ॥ क ॥

तत्र[3] च व्यतिकरे प्रलय[4]प्रचण्डपवनोल्लासिततनुतुहिनाचलगण्डशैललीलामाकलयन्तः, मन्दमरुत्तरङ्गिततनुतरशरदभ्रविभ्रमायमाणाः, सुरवारणेन्द्रविक्षोभितगगनमन्दाकिनीपतत्पाण्डुर[5]डिण्डीरपिण्डपटलानि विडम्बयन्तः,शकलोदितेन्दुमण्डलसहस्रसंछादितमिव गगनमापादयन्तो, मन्दर[6]गिरिपरिक्षेपक्षुभितक्षीरवारिधिदूरसमुच्छलितदुग्धकल्लोललीलां दर्शयन्तः, शेषाहिफणचक्रवालधवलाः, प्रमुदितहराट्टहासलवा इव मूर्तिमन्तः पतन्तः, अमन्दमन्द्र[7]कोलाहलभरितभुवनान्तरालाः, सपदि धरातलमुत्फुल्लपाण्डुपङ्कजप्रकरप्रकारेण मण्डयन्तो निपेतुः कुतोऽपि पुण्डरीकपाण्डुपक्षपत्रराजयो राजहंसाः ॥ ख ॥

तथाविधे च व्यतिकरे विस्मयविस्मृतनिमेषतया निर्वातनिश्चलनीलोत्पलपलाशशोभायमानलोचनः कौतुकाकूततरलितमनाः सपरिजनो नरपतिरवलोकयन्निश्चल एवावतस्थे[8] ॥ ग ॥

ते च धार्तराष्ट्रा अपि कृतपाण्डुपक्षपाताः, द्विजातयोऽपि सुराजिताः,केचिदुच्चचञ्चुपुटविघटितनिकटबालस्थल[9]कमलकुट्मलाः सं[10]रसबिसकिसलयानि कवलयन्तः, केऽप्युन्नत[11]सरलगलनालयो न-

तत्रचेति शकलोदितेति ॥ शकलः खण्डशशी हंससदृशो भवति ॥ मन्दरगिरिरेव परिक्षेपो मन्थाः ॥ ख ॥

तथेति ॥ शोभायमानलोचनेत्यत्र शोभाशब्दात्तद्वति वर्तमानादुपमानात्कर्तृवाचकादाचारेऽर्थे क्यङ् । एवं विभ्रमायमाणेत्यादयोऽपि व्याख्याताः ॥ ग ॥

ते चेति ॥ कृष्णैश्चरणाननैर्हंसा धार्तराष्ट्रा । कृतः पाण्डुपक्षाणां शुभ्रपक्षतीनां

---

१ पुञ्ज. २ नाम्नि. ३ तत्र व्यतिकरे. ४ मलयकालकरालप्रचण्ड. ५ पाण्डुडिण्डीर. ६ अमन्दमन्दर. ७ अमन्दमदकलकोलाहल. ८ एवावतिष्ठते स्म. ९ बालशैवालस्थल. १० सरल. ११ उन्नमित.

लिनवनविमुखाः खमालोकयन्तः[1], केचिदुत्क्षिप्तपक्षविक्षेपपवनकम्पितकन्दलाः सलीलमुत्पतन्तः, केचिन्मदमधुरनिजनिनादनिर्जितशिञ्जाननूपुराः, पुरःपुरोऽस्य धावन्तो विचरितुमारभन्त ॥ क ॥

राजापि परिधावितविहङ्गग्रहणाग्रहसमग्रव्यग्रपरिग्रहः[2] परिहासोन्मीलदमलदन्तकान्तिस्तबकिताधरपल्लवो विहसन्नेव[3] तेषामन्यतममनुच्चचटुलचरणचारीचर्यया चारु संचरन्तमीषदुत्क्षिप्तपक्षविलास[4]विहसितविलासिनीलास्यलीलमुन्नमिताग्रग्रीवं जग्राह हेलया हंसम् ॥ ख ॥

उत्क्षिप्तः स च तेन रक्तकमलगर्भविभ्रमायमाणपाणिपल्लवे, पाण्डुपद्म इव पद्मरागशुक्तितले, क्षणमुदयशैलशोणमाणिक्यशिखरशिखायामिन्दुरिव[5], विराजितो[6] राजहंसो मृदुवाद्यमानरौप्यघनघर्घरीजर्जरस्वरेण[7] कृतस्वस्तिशब्दो विस्पष्टवर्णविशेषं[8] राजानमुपश्लोकयांचकार ॥ ग ॥

पाण्डुपङ्कजसंलीनमधुपालीसमं गलम् ।
यो बिभर्ति विधेयात्ते ना कपाली स मङ्गलम् ॥ १४ ॥

पातो न्यासो यैः । तथा द्विजातयः पक्षिणः सुष्ठु राजिताश्च ॥ विरोधे धार्तराष्ट्राः कुरवः । पाण्डुर्नृपः । पक्षपातस्तद्गृह्यत्वम् ॥ द्विजातयो विप्राः । सुरया जिताः ॥ गलनालिः कण्ठकाण्डम् ॥ क ॥

राजेति ॥ सलयश्चरणन्यासश्चारी ॥ ख ॥

उत्क्षिप्त इति ॥ पाणिपल्लवस्य पद्मरागशुक्तिः शोणमाणिक्यशिला चोपमानम् । हंसस्य तु पाण्डुपद्म इन्दुश्च ॥ ग ॥

पाण्ड्विति ॥ श्वेतसरोजलीनालिश्रेणिनिभं कण्ठं यो धारयति स ना पुरुषः कपाली कपालमाली । अर्थाच्छिवस्तव मङ्गलं क्रियात् ॥ १४ ॥

---

१ अवलोकयन्तः. २ व्यग्रसमस्तपरिजनः; समस्तव्यग्रपरिकरः. ३ विहसन्निव. ४ पक्षविक्षेपविलास. ५ माणिक्यशिलायाम्. ६ व्यराजत. ७ स्वरेण च. ८ विशेषमेष राजानम्.

अपिच ।

सरलप्रियंगुणाढ्यं लम्बितमालं विचित्रतिलकं च ।
वनमिव वपुस्तवैतत्कथमवनं नृप जनस्यांभूत् ॥ १५ ॥

अपिच ।

वरसहकारकरञ्जकवीरतरोऽशोकंमदनपुंनाग ।
विविधद्रुममय राजन्कथमसि न बिभीतकः क्वापि ॥ १६ ॥

अपिच ।

बाणकरवीरदमनकशतपत्रकबन्धुजीवकसुजाते ।
नृप विविधविटपरूपस्तथापि विटपः कथं नासि ॥ १७ ॥

सरलेति ॥ सरला अकुटिलाः प्रिया यस्य । तथा गुणाढ्यं शौर्याद्याढ्यम् । तथा लम्बितस्रक् । तथा विविधपुण्ड्रं तव वपुर्जनस्यावनं रक्षकमभूत् । वनमिव तदा सरलप्रियंगुणेति समाहारद्वन्द्वः । तथा लम्बिनः प्रलम्बास्तमाला यत्र । तथा विशिष्टाश्चित्रकायास्तिलकवृक्षाश्च यत्र । नृपेत्यामन्त्रणे । कथमिति विरोधे । अवनशब्दस्य वनप्रतिषेधार्थत्वात् ॥ १५ ॥

वरेति ॥ वराः सहकारकाः सचिवादयो यस्य । तथा रञ्जयतीति रञ्जकः । तथा वीराणां शूद्रकादीनामिव तरो बलं जवो वा यस्येति संबुद्धौ न दीर्घः । न शोको यस्य । एतेन धीरत्वोक्तिः । मदन इव मदनः कामः । पुंनाग इति नागशब्दः प्रशंसायाम् । इत्यामन्त्रणैः प्रकृतोऽर्थः । विविधद्रुममयेतिपदाद्द्रुमार्थोऽप्यूह्यः । तद्यथा । सहकार आम्रः, करञ्जको नक्तमालः, वीरतरुर्नदीसर्जः । यदमरः— "नदीसर्जो वीरतरुरिन्द्रद्रुः ककुभोऽर्जुनः ।" अशोकः कङ्केल्लिः, मदनः शल्यः, यत्फलं विवाहे वधूवरपाणौ बध्यते । पुंनागः सुरपर्णिका । कथमिति विरोधे । बिभीतकस्याक्षार्थत्वात् । प्रकृते तु विभीतको विशेषेण भीत इति कुत्सायामनुकम्पायां वा कन् ॥ १६ ॥

बाणेति ॥ बाणः करवीरो दमनकः शतपत्रकं बन्धुजीवकं जातिश्चेति विटपाः । एतन्मयस्त्वमसि शब्दतः । अर्थतस्तु बाणाः करे यस्य । वीरान्दमयसि । शतसंख्यं पत्रं वाहनं यस्य । शेषादिति कप् ॥ बन्धून् जीवयस्युपकरोषि । शोभना जातिः क्षत्राख्या यस्य । उभयथाप्येतानि नृपेति च संबोधनानि । असीति त्वव्ययं त्वमित्यर्थे ।

---

१ आसीत्. २ मदनशोक.

रा[1]जा तु तदाकर्ण्य सविस्मयम् "अहो अस्य धैर्यं मनुष्यसंनि[2]धौ, आश्चर्यं रूपे, माधुर्यं वाचि, प्राचुर्यं प्रज्ञायाम्, औदार्यमर्थे, गाम्भीर्यं वर्णव्यक्तौ। प्रायेणाहारमैथुननिद्राभयभ्रमणमात्रविवेकासु कथं प्रागल्भ्यमेतत्पक्षिजातिषु। तदेष विहंग[3]व्यञ्जनः कोऽपि कामचारी भविष्यति। सर्वथा मनसापि नावज्ञेयाः केऽपि प्राणिनः। य[4]तः कर्मतः कामतः शापतः सं[5]छन्नरूपाण्यपि भ्रमन्ति विविधाश्चर्यभाञ्जि भू[6]तानि" इति चिन्तयन्नुचितज्ञस्तमीषदुल्लसितसिन्दुवारमञ्जरीभिरिव कुन्दकान्तदन्तदीप्तिभिरर्चयन्स्वागतमपृच्छत्॥ क॥

असावपि प्रणयप्रणतशिराः शुचिरोचिषां चयेन पाण्डुपुष्पप्रकरप्रकारेण प्रतिपूजयन्निव "देव, भवदवलोकनेनाह्लादितमनसो ममाद्य स्वागतम्" इति ब्रुवाणो राजानं रञ्जयांचकार॥ ख॥

अत्रान्तरे त्रा[7]सतरलतरत्तारकमकाण्डाडम्बरितबाष्पप्लवप्लवमानमिव वहन्ती चक्षुः, उत्क्षिप्तपक्ष[8]पत्त्रपल्लवव्याजेन संगृहीते सहचरे शाखोद्धारमिव दर्शयन्ती, हंसी दूरादवनिपालमवाप्य रौ[9]प्यमयघण्टाटंकारकोमलया गिरा श्लोकद्वयमपठत्॥ ग॥

"एकान्ते सेवते योगं मुक्ताहारपरिच्छदः।
हंसः समोक्षयोग्योऽपि देव किं बध्यते त्व[10]या॥ १८॥

त्वं न विटान्पासीति विटपः। अपात्रभर्ता नेत्यर्थः। तथापि कथमिति विरोधोद्भावने विटपशब्दस्य वीरुदर्थत्वात्॥ १७॥

राजेति॥ कामचारी विद्याधरादिः॥ क॥

अत्रेति॥ शाखोद्धारमन्यायपूत्कारचिह्नं शाखाग्रहणम्॥ ग॥

एकेति॥ अस्यापत्यमिः। इरिव इः कंदर्पप्रतिमः। ततः संबुद्धौ ए इति देव इति

---

१ राजापि. २ संनिधावपि. ३ विहंगमव्यञ्जनः. ४ यतः कर्मतः शापतो वा. ५ प्रच्छन्न. ६ भुवि भूतानि. ७ त्रासतरलतरतारकाण्डा; त्रासतरलतारमकाकाण्डा. ८ पक्षपल्लव. ९ रौप्यघण्टा. १० क्वचित्

नीरञ्जनपदे तिष्ठन्विश्वसंसारसङ्गतः।
हंसः किं बध्यते क्वापि यस्य नालम्बनं प्रियम् ॥ १९ ॥

अन्यच्च।

राजन्, जलपक्षिणो मुनय इव येमीनाहारं वाञ्छन्ति, बहुधावनव्यसनिनः, बिसाधाराः। तदलमाग्रहेण[1]" ॥ क ॥

चोपच्छन्दयितुं संबोध्य मुमोचयिषुः पतिं, हंसी नृपमाह॥ मुक्तहारो मौक्तिकहारस्तद्वत्परिच्छदौ पक्षती यस्य शुभ्रत्वात्। स तथोक्तः। कस्य जलस्यान्ते वर्तमानमगं द्रुमं यः सेवते। मोक्षस्य मोचनस्य योग्योऽपि स हंसो वाचेस्त्वया भवता किं किमर्थं बध्यते इत्येकोऽर्थः। अथवा एकान्त इति समस्तं विजनार्थम्। अथ च हंस आत्मा पुरुषः स मोक्षयोग्योऽपि निर्वाणार्होऽपि किं बध्यते। न बध्यत एवेत्यर्थः। कया। त्वया। त्वशब्दः सर्वादिगणेऽन्यार्थः। अतः पुरुषापेक्षयान्यया प्रकृत्येत्यर्थः। कस्मान्न बध्यत इत्याह—कान्ते कमनीये परमानन्दस्वरूपे ए कृष्णे त्यक्ताहारपरिवारः सन्योगमध्यात्मं यः सेवते॥ अत्र पक्षे अ इत्यस्माद्विष्णुवाचकात्सप्तम्येकवचने ए इति रूपम्। यदि वा समोक्षयोग्योऽपीति समः समदर्शनः। अक्षयोग्योऽपि इन्द्रियसंबद्धोऽपि ॥ १८ ॥

नीरेति॥ जनानां पदे स्थाने पुरग्रामादावतिष्ठन्यः सरस इदं सारसम्। तथा श्वसन्तीति श्वसाः प्राणिनः, वयः पक्षिणः श्वसा यत्र तथाभूतं नीरं जलम्, गतः स हंसः किं क्वापि बध्यते, न बध्यत एव। यस्य नलस्येदं नालं तृणसंबन्धि, वनं काननं प्रियम्॥ अथवा नीरञ्जनपदे नीरागपदे तिष्ठन्हंस आत्मा किं क्वापि बध्यते, न बध्यत एव। यस्य विश्वेभ्यः संसारसङ्गेभ्य आलम्बनमासक्तिर्न प्रियम्। विश्वसंसारसङ्गत इति तसिलन्तम् ॥ १९ ॥

राजन्निति॥ मीनो मत्स्यः। बह्विति भिन्नम्। बिसं पद्मिनीकन्द आधारो जीवनं येषाम्॥ मुनिपक्षे अमी इति नेति च पदद्वयम्। बहुधा, अनेकधा वनव्यसनिनो वनस्थाः। तथा व्यपेतः साधारः साधारणतिथिपर्वोत्सवादिर्येभ्यः। लोकोत्तरवृत्तत्वात्। "बिसादनाः" इति पाठे तु बिसमदनं येषाम्। पक्षे विगतं सादनं येभ्यः। अपीडाकरा इत्यर्थः॥ क॥

---

[1] आग्रहेणेति.

राजा तु तेन तस्याः श्लेषश्लाघिना श्लोकोक्तिरसेनाह्लाद्यमानो नर्मालापलीलया तां बभाषे ॥ क ॥

"अनेकधा यः किल पक्षपातं
सदा सदम्भोजगतः करोति ।
स हंसिकेदारविहारशीलो
न बध्यते किं बहुनाशकुन्तः" ॥ २० ॥

किं चान्यदपि श्रूयतां बन्धस्य कारणम् ॥ ख ॥

अस्ति मत्परिग्रहे मृणालिकानामवननायिका, सापरागस्थगितमुखकमलापि बलादनेन विनाशिता, विनिपत्योपरि जर्जरिता

राजेति ॥ श्लेषश्लाघिना श्लेषप्रकाशनशीलेन । एतेन एकान्त इत्यादिवचसां श्लिष्टार्थत्वमभिहितम् ॥ क ॥

अनेकेति ॥ हे हंसिके, यः सदा जगतोऽपि सर्वस्यापि सदम्भो दाम्भिकः । तथानेकधोक्तोऽपि प्रणतिप्रत्युपकारादिना पक्षपातं ममत्वं करोति । तथा दारक्रीडारतोऽब्रह्मचारी । तथा बह्वन्नाशयत्येवंविधः कुन्तः प्रासो यस्येति हिंसापापरतः । स कथं न बध्यते । संसारकारायामिति शेषः ॥ इति हंसीवचनप्रतिवचनौचित्येन समपक्षे व्याख्या ॥ अथवा यो दाम्भिकः सदा जगतोऽपि पक्षस्य मित्रवर्गस्य पातं नाशं करोति । तथा जगतोऽपि दारेषु क्रीडापरः । तथा बहुघातिकुन्तास्त्रः । स महापराधी बध्यत एव । नर्मणैव हंसीवचसोऽन्यथात्वम् ॥ तत्त्वतस्तु प्रामाण्यम् । तद्यथा । हे हंसि किं बहुना किं बहूक्तया । सदम्भोजं सत्पद्मं, गतः प्राप्तः, सन्यः पक्षतिपातं करोति केदारविहारं च शीलयति स शकुन्तः पक्षी न बध्यते । किं तर्हि मुच्यत एव । तस्माद्युक्तमुक्तं त्वयेति वास्तवोऽर्थः । एवमुत्तरत्रापि ॥ २० ॥

अपरपरिभोगप्रतिपादनेर्ष्ययोत्कृष्टदोषदर्शनेन च हंसं प्रति हंसीं कलहयन्नाह—**किंचेति** ॥ चकारः पराभिप्रायाक्षेपपूर्वके विशेषे । एवं नामासौ दुरात्मा निःशङ्को निर्मर्यादश्च ॥ ख ॥

अस्तीति ॥ येन । आसतां लोकदाराः । मम राज्ञोऽपि परिग्रहे स्थितायां नायिकायां प्रवृत्तम् । मृणालिकानां पद्मिनीनामवने रक्षणे, नायिका स्वामिनी, सा ततोऽपरागाद्रागा-

---

१ श्लोकोक्तिद्वयेन.

नखैः, खण्डितमधरदलम्, दलितमलिकालकमण्डनम्, अपनीतः सुकुमारभावः ॥ क ॥

किं वापीवरेणानेन न कृतम् ॥ ख ॥

तदेष यावन्मध्यं बहुधापाञ्जरन्नावगाहते तावन्मे कुतः संतोषः। नच नदीक्षितेद्विजन्मनि निगृहीतेऽपि गरीयः पातकमस्ति॥ग॥

अयि मुग्धे कलहंसिके, त्वं पुनः मानसंगतापि विमाननां

भावात्, संवृत्तवक्त्रकमलापि बलात्कारादनेन त्वद्भर्त्रा विनाशिता॥ विनाशोऽत्र शीलखण्डनम् तदाह—विनिपत्येति। अधर ओष्ठः, अलिकं ललाटं तस्य, तथा अलकानां केशानां च मण्डनम्। लुप्तम्॥ उदस्तः सुकुमारभावः। अर्थात्कन्यात्वम्॥ वास्तवे तु। मृणालिका पद्मिनी। नामेति संबोधने। वनस्य नायिकेव। परागो मकरन्दस्तेन छन्नमुखानि कमलानि यस्याम्। बलादपि अनेन विना पक्षिणा सा अशिता भक्षिता। अशेर्भोजनार्थात्कर्मणि क्तः॥ अधरदलमधःपत्रम्॥ अलय एव कालं कृष्णं कस्य शिरस उपरिभागस्य मण्डनम्॥ अपनीतो मृदुभावः। नखैर्जर्जरितत्वात्॥ क॥

किमिति॥ अथवानेन पीवरेण स्थूलेन किं न कृतं सर्वं कृतमेव तदित्युपसंहारे॥ वास्तवे तु वाप्यां वरेण प्रधानेनानेन॥ ख॥

तदिति॥ तस्मादेषोऽपराधी, पञ्जरस्येदं पाञ्जरं मध्यं यावन्नावगाहते। मे मम। तावत्कुतः संतोषः॥ अथायं द्विजन्मत्वादनिग्राह्य इत्यत आह—न चेति॥ द्वाभ्यां सकाशाज्जन्म यस्य स द्विजन्मा न द्विजन्मा तथोक्ते। अर्थात्त्रिजाते निगृहीतेऽपि गरीयोऽत्यर्थं पातकं नच नैवास्ति। तस्मिन्कीदृशे। नदीक्षिते दीक्षा शैवादिमतपरिग्रहः संजातोऽस्येति। एतेन दीक्षितो लिङ्गी त्रिजातोऽप्यबध्य एव॥ अथवा अपिः समुच्चयार्थो भिन्नक्रमो द्विजन्मनीत्यनेन संयोज्यः। तद्यथा दीक्षिते व्रतिनि द्विजन्मनि ब्राह्मणे निगृहीते नच न पातकम्। पातकमेवेत्यर्थः॥ वास्तवे तु तस्मादेष त्वत्पतिः। अपां जलानां मध्यं जरन्यावद्वार्धकावधि नावगाहते तावन्मे कुतः संतोषः॥ नद्यां क्षित उषिते द्विजन्मनि विहंगे नितरां गृहीते स्नेहात्स्वीकृते गरीयोऽत्यर्थं न च पातकमस्ति। श्रेय एवास्तीत्यर्थः। गरीय इति क्रियाविशेषणम्। अपिर्विरोधोद्भावने गृहीतशब्दस्य दण्डितार्थत्वात्॥ ग॥

अयीति॥ मानेन संगता। विमानना अवगणना। पक्षे मानसं सरः। विषु

---

१ अपि तु कलहंसिके.

सहसे, विपरीतः खल्वेषः। यतः सद्वंशकान्तारागविमुखो मधुपश्रेणिश्रयणीयां सुराजीविनीं कान्तां कामयते। तदलमनेन। गच्छ वत्से, यथाप्रियम्" इत्यभिहितवति वसुंधरेश्वरे॥ क॥

सापि सपरिहासं हंसी "हंहो विहंगभुजंग, मृणालिकां तामरसान्तरसानुरागरञ्जितमनाः कामयसे किं वापीनदेहे नीरसेवके त्वयि न संभाव्यते" इत्याकलितकलहं कलहंसमवादीत्॥ ख॥

सोऽपि "वैदग्ध्यधुरंधर, धूर्तालापपण्डित, प्रज्ञाप्राग्भारगुरो, चातुर्याचार्य, मा मे प्रियां प्रकोपय। सदृशा एव यूयं वयं च राजहं-

पक्षिषु मानना पूजा॥ विपरीतो विरुद्धवृत्तः। पक्षे विभिः पक्षिभिः परिवृतः। कादम्बककदम्बकेश्वरत्वात्॥ सदन्वयकान्तानुरागपराङ्मुखे। मद्यपश्रेणिसेव्याम्। सुरया जीवति या ताम्। इच्छति॥ पक्षे शोभना वंशा मस्करा येषु तेषु कान्तारेषु नगेभ्यो विमुखो भृङ्गपङ्क्तिश्रितां सुष्ठु शोभनां राजीविनीं नलिनीम्॥ प्रियस्यानतिक्रमेण यथाप्रियम्। प्रियो भर्ता इष्टप्रदेशश्च॥ इत्युक्तवति नृपे॥ क॥

सापीति॥ हंस्यपि हंसमवादीत्। हंहो इति प्रश्नपूर्वामन्त्रणे। विहंगविलासिन्। तां राजनिवेदिताम्। मृणालिकानां पालननायिकाम्। अरसां निःस्नेहाम्। तरसा बलेन। अनुरागेण स्त्रासक्त्या रञ्जितचित्त इच्छसि। नुः किमर्थे॥ न चायं विलासिधर्मः॥ वस्तुतस्तु मृणालिकां पद्मिनीम्। तामरसान्ते अम्भोजे रसो निर्यासस्तत्रानुरागो यस्येति संबोधनम्। अन्तशब्दः स्वरूपार्थः। अथवा तामरसस्यान्तरे मध्ये सानुरागेति संबोधनं॥ अथवा पीने स्थूलाङ्गे। नीरसे निःस्नेहे। निर्वीर्ये वा। बकप्राये त्वयि किं न संभाव्यते। अन्यत्र। त्वयि किंभूते वाप्यश्च नदाश्च तेष्वीहा यस्य। तथा नीरं जलं सेवते यः। किं न संभाव्यत इति। संभावना प्रशंसाविषया॥ एकमेव हि वाक्यं प्रकरणादौचित्याच्च प्रशंसां निन्दां च प्रतिपादयति। यथा "त्वमस्माकं किं किं न करिष्यसि" इति प्रसन्नेनोक्तं प्रशंसां गमयति, रुष्टेन च निन्दाम्॥ ख॥

सोऽपीति॥ राजहंसा राजमुख्या यूयं सरसां जनानुरागकरीं लक्ष्मीमनुभवथ। तथा पात्रेषु धर्मपात्रादिषु दीनां स्थितिं व्यवस्थां न कुरुथ॥ तथा रणविधौ न न श्लाघ्य-

१ सुराजीविनीं कामयते. २ निषधेश्वरे.

साः। सरसां श्रियमनुभवामः । नदीनां पात्रेष्ववस्थितिं कुर्मः । न चरणचर्यायां न श्लाघ्यामहे[2]। तत्सपक्षेषु विपक्षो माभूः ॥ क ॥

एषा मे हृदयं जीव उच्छ्वासः प्राण एव च।
संसारसुखसर्वस्वं प्राणिनां हि प्रियो[3] जनः ॥ २१ ॥
[4]रूपसंपन्नमग्राम्यं प्रेमप्रायं प्रियंवदम्[5]।
कुलीनमनुकूलं च कलत्रं कुत्र लभ्यते ॥ २२ ॥

तदलमलीककलहारम्भेण भवानप्येवं[6] प्रेमप्रपञ्चनाटकनायको नातिचिरादेव यथा भवति तथा कमप्युपकारं करिष्यामि" इति राजानमवादीत् ॥ ख ॥

अत्रान्तरेऽन्तरिक्षमण्डलादतिस्पष्टवर्णव्यक्तिर्मनोहारिणी[7] वागश्रूयत ॥ ग ॥

"राजन्राजीवपत्राक्ष क्षिप्रं हंसो विमुच्यताम्।
भविष्यत्येष ते दूतो दमयन्त्याः प्रलोभने" ॥ २३ ॥

राजा तु तस्याः सोष्मबलातैलपूरेणेवाङ्गमुत्पुलकयता, कर्णान्तरमवतीर्णेन, दमयन्तीति नाम्ना कोमलतैत्तिर[9]पिच्छस्पर्शसुखमिवानुभवन्मनाङ्निमीलिताक्षश्चिन्तयांचकार ॥ घ ॥

ध्वे। चः समुच्चये ॥ वयं पक्षे सरसां तडागानाम् । नदीनां सरितां कूलमध्येषु ॥ चरणं चर्या गतिविशेषः ॥ तत्तस्मादुक्तप्रकारेण समानपक्षेषु पक्षतिसहितेषु च । विरुद्धपक्षो माभूः ॥ क ॥

एषेति ॥ एषैव मे हृदयं मनः । अभिन्नभावात् ॥ जीवो जीवितम् । तत्सद्भावे जीवनात् ॥ उच्छ्वासः श्वासरोधकचिन्तादिदुःखभरापगमहेतुत्वात् । प्राणः प्रधानभूतो वायुः । देहाधारत्वात् ॥ प्राणो बलमपि । जीवितार्थो बलार्थो नतु वाय्वर्थः । यत्प्रशस्तपादः—"प्राणोऽन्तःशरीरे रसमलधातूनां प्रेरणादिहेतुः" इति ॥ २१ ॥

रूपेति ॥ प्रेम्णा तुल्यं प्रेमप्रायम् ॥ सस्नेहमित्यर्थः ॥ २२ ॥

राजा त्विति । बला गन्धद्रव्यविशेषस्तस्य तैलम् ॥ घ ॥

---

१ पात्रे स्थितिम्; पात्रेषु स्थितिम्. २ श्लाघामहे. ३ प्रियाजनः; ४ अपि च. ५ प्रियंवद. ६ तवाप्येवंविधप्रेम. ७ मनोहरा. ८ तु तेन तस्याः. ९ तित्तिर.

"आह्लादयन्ति सौख्याम्भः शातकुम्भीयकुम्भिकाः।
काञ्चीकलापसं[1]श्रीकाः श्रोणीबिम्बाः श्रुता अपि ॥२४॥

[2]तत्केयं दमयन्ती, कश्चायमाश्चर्यभूतो विहंगः, का चेयं नभोभारती, सर्वमेतद्विस्तरेण वेदितव्यम्" इत्यवधारयन्नेकस्यामुत्फुल्लपल्लवितलतामण्डपच्छायायामुन्निद्रकुसुममकरन्दशीकरासारशिशिरे शिलातले निषद्य तं हंसमवादीत् ॥ क ॥

"भद्र, साप्तपदीनं सख्यम्, [3]उत्पन्नकतिपयप्रियालापा प्रीतिः, प्रयोजननिरपेक्षं दाक्षिण्यम्, अकारणप्रगुणं वात्सल्यम्, अनिमित्तसुन्दरो मैत्रीभावः, सतां लक्षणम् ॥ ख ॥

[4]अस्ति च तत्सर्वं भवन्मूर्तावतो निःशङ्कमभिधीयसे। कथय केयं दमयन्ती, कस्य [5]सुता, कीदृग्रूपम्, कुत्र सा वसति, [6]कश्च भवानस्माकमुपकर्तुमिच्छति, का चेयं [7]दिव्यवाणी" इत्येवमुक्तः [8]स कथयितुमारेभे ॥ ग ॥

"शृङ्गाररसभृङ्गार तस्याः सौन्दर्यवीरुधः।
कर्णमारोप्यतां देव वार्ताविस्मयपल्लवः ॥ २५ ॥

अस्ति विस्तीर्णमेदिनीमण्डलमण्डनायमानो नगनगरपुरविहा-

आह्लादेति ॥ सौख्यजलसौवर्णकलश्यः। आसतां दृष्टाः स्पृष्टा वा। श्रुता अप्याह्लादयन्ति। यतः सौख्यस्य सर्वात्मना आधारभूताः ॥ २४ ॥

भद्रेति ॥ सप्त पदानि गम्यन्त उच्यन्ते वा यत्र सख्ये तत्साप्तपदीनम्। मैत्र्याः प्रीतेर्भावोऽभिप्रायः ॥ ख ॥

शृङ्गारेति ॥ रसेन सिच्यमाना वीरुद्वर्धते। शृङ्गारोऽपि कर्णकण्ठे निहितेन पल्लवेन शोभत इत्युभयसमागमौचित्यात्। सौन्दर्येण वीरुदिव सौकुमार्यात्। वार्ताया विस्मयो वार्ताविस्मयः स एव पल्लवः ॥ २५ ॥

अस्तीति ॥ देशानामुत्तरो मुख्यो दक्षिणदेशोऽस्ति ॥ अपिर्विरोधे। उत्तरशब्दस्य

१ सश्रीक. २ तत्का नाम सा दमयन्ती. ३ उपपन्नकतिपय. ४ अस्ति तत्सर्वम्. ५ तनया. ६ कश्च भवान्कस्मादस्माकम्. ७ दिव्या वाणी. ८ सोऽथ कथयितुम्.

रारामरमणीयः सीतासहायसंचरितरघुपतिपादपद्मप[1]वित्रारण्यः पुण्यतरतरङ्गगङ्गागोदावरीवारिवारितदुरितदावानलप्रसरः, मन्दर इव बलिराजजनितपरिवर्तनः, कैलास इव महेश्वरलोककृतवसतिः, मेरुरिव सुवर्णप्रकृतिकमनीयो, यदुवंश इव दृष्टशूरपुरुषावतारः, सोमान्वय इव बुधप्रधानः, वेदपाठ इवानेकैः सवनैरुपेतः, पर्वते पर्वते स्थाणुभिः, पुरे पुरे पु[2]राणपुरुषैः, जले जले कमलोद्भवैः, पदे पदे देवकुलैः, वने वने वरुणैः, स्थाने स्थाने नन्दनोद्यानैः, अर्गलः स्वर्गस्य, तापीप्रायोऽप्य[3]नुपतापी जनस्य, विन्ध्याद्रिमुद्रितायां दिशि देशानामुत्तरोऽपि दक्षिणो देशः ॥ क ॥

यत्र। शास्त्रे शस्त्रे च वेदे वैद्ये च भरते भारते च कल्पे शिल्पे च प्रधानो, धनी, धन्यो, धान्यवान्, विदग्धो वाचि, मुग्धो मुखे, स्निग्धो मनसि, वसति निरन्तरमशोको लोकः॥ ख ॥

दिग्देशार्थत्वात् ॥ बलिना बलवता, राज्ञा भीमलक्षणेन जनितं परि समन्ताद्वर्तनं परिपालनं यस्य। पक्षे बलिराजो दैत्यः। परिवर्तनं भ्रमणम् ॥ महानीश्वरोऽतिसमृद्धः शिवश्च ॥ सुष्ठु वर्णा द्विजातयः। प्रकृतयोऽमात्याद्याः। पक्षे सुवर्णप्रकृत्या स्वर्णस्वभावेन काम्यः ॥ शूरो विक्रमी वसुदेवपिता च ॥ बुधो विद्वान्ग्रहविशेषश्च ॥ स इति भिन्नम्। वनैः काननैः। पक्षे सवनैर्यज्ञैर्युक्तः ॥ स्थाणुः कीलः स्थिरपदार्थश्च ॥ पुराणपुरुषो वृद्धो विष्णुश्च ॥ कमलोद्भवैः कमलोत्पत्तिभिर्ब्रह्मभिश्च ॥ कुलं गृहं वृन्दं च ॥ वरुणो वृक्षो जलं वा। पक्षे प्रचेताः सूर्यो वा ॥ नन्दन इति क्रियावचन इन्द्रवनसंज्ञा च ॥ तैस्तैर्बहुत्वविशिष्टैर्दिवोऽर्गलोऽधिकः ॥ स्वर्गे ह्येकैक एव स्थाणुप्रभृतिः। अस्मिंस्तु बहव इत्यर्थः ॥ तापी नदी प्रायेण यत्र। विरोधे तु तापयत्यवश्यमिति तापी ॥ क ॥

यत्रेति ॥ कल्पे शिल्पे चेति। कल्पो यज्ञकर्मणामुपदेशकः ॥ प्रधान इति ॥ प्रकृष्टं धानं धारणं यस्य। शस्त्रशास्त्रादीनि प्रकर्षेण धारयतीत्यर्थः ॥ एवं सर्वत्र वाच्यलिङ्गता। मुख्यार्थस्य हि प्रधानशब्दस्यात्रिष्टनपुंसकलिङ्गत्वम् ॥ ख ॥

---

१ पवित्रारामः. २ पुरुषैः. ३ अनुतापी.

यत्र क्रुद्धधूर्जटिललाटलोचनानलज्वालाकवलनाकुलः, त्रासादपाङ्गावलोकनमात्रनिर्जितपरमेश्वरमनसां विलासिनीनामुच्चकुचकुम्भयोः शृङ्गारसर्वस्वम्, अधरपल्लवेषु मधु, भ्रूभङ्गेषु धनुः, कटाक्षेषु पुष्पबाणान्निधाय निलीनोऽङ्गेषु जघनस्थलस्थापितरतिर्मकरकेतनः ॥ क ॥

यासां तारुण्यमेव सर्वाङ्गेषु शोभार्थमाभरणम्, उत्तुङ्गस्तनमण्डललावण्यमेव मुखकमलावलोकनाय दर्पणः, तारतरनयनकान्तिरेव मुखमण्डलमण्डनाय चन्दनललाटिका, भ्रूभङ्गा एव विभ्रमाय मृगमदपत्रभङ्गाः, कटाक्षा एव युवजनजयाय परमास्त्राणि, बन्धूककुसुमकान्तिदन्तच्छद एव लोकलोचनमनोमोहनाय माहेन्द्रमणिः, मुखकमलपरिमलागतमधुकरमधुरझंकार एव विनोदाय वीणाध्वनिः ॥ ख ॥

किं बहुना।

ता एव निर्वृतिस्थानमहं मन्ये मृगेक्षणाः।
मुक्तानामास्पदं येन तासामेव स्तनान्तरम् ॥ २६ ॥

मन्ये च। ताभिरेव विविधनिधुवननिधानकुम्भीभिः कुम्भो-

यत्रेति ॥ देशे विलासिनीनां कुचादिष्ववयवेषु स्वोपकरणानि शृङ्गारादीनि स्थापयित्वा त्रासान्निलीनो मन्मथः ॥ यतः। किंविशिष्टानां तासाम्। निर्जितं परमेश्वराणां धनिनां मनो याभिः ॥ अथ च परमेश्वरो धूर्जटिः। सोऽपि ताभिर्निर्जित इत्युक्तिलेशः ॥ एतेन शरणागतत्राणवैभवम् ॥ क ॥

यासामिति ॥ माहेन्द्रमिन्द्रजालं तन्त्रबलेनाविद्यमानवस्तुप्रकाशनमिति यावत्। तदर्थो मणिर्माहेन्द्रमणिः ॥ ख ॥

ता एवेति ॥ निर्वृतिर्मुक्तिः शर्म च। मुक्ता मुक्तात्मानो मौक्तिकानि च ॥ २६ ॥

---

१ यत्र च. २ पल्लवे.

द्भवोऽपि भगवान्प्रलोभितो भविष्यति, येनाद्यापि न मुञ्चति दक्षिणां दिशमेव ॥ क ॥

अथवा।

देशो भवेत्कस्य न वल्लभोऽसौ
स्त्रीसंकुलः सुस्थितकामकोटिः।
दग्धैककामं त्रिदिवं विहाय
यस्मिन्कुमारोऽपि रतिं चकार ॥ २७ ॥

तस्यान्तर्भूतवैदर्भमण्डलस्यालंकारभूतमनाकुलममरपतिपुरप्रतिस्पर्धि परितःपरिखाप्रान्तरूढप्रौढहृद्योद्यानमालावलयितमदभ्रशुभ्राभ्रंलिहप्रासादशिखरशिखाभोगभग्नरविरथतुरंगवेगम् । एकत्राग्निहोत्रमन्त्रपवित्राहुतिहतसमस्तदिव्यान्तरिक्षभौमोत्पातसंघातैः, कृतमन्युभिरपि मन्युशून्यैः,उक्तसूक्तैरपि निरुक्तपरैः,सन्मा-

देश इति ॥ कामकोटिर्देवी कंदर्पकोट्यश्च । कुमारः कार्तिकेयो डिम्भश्च । रतिरास्थार्थः । सुरतार्थेन च विरोधोद्भावना ॥ २७ ॥

तस्येति ॥ तस्य दक्षिणदेशस्यान्तर्भूतं वैदर्भं मण्डलं तदलंकारभूतम् । एवं विशेषणोपेतम् । निरुपद्रवम् । तुङ्गतरङ्गेषु रङ्गन्ति तरुणानि नवान्यर्जुनानि धवलानि यानि राजीवानि तद्वद्राजमाना ये राजहंसास्तैर्विराजितं वारि यस्यास्तस्या वरदायास्तीरे कुण्डिनं पुरं वर्तत इति शेषः । एकत्र ब्राह्मणैरध्यासितम् । कीदृग्भिः । आहुतिहतोपद्रवसंघैः । तथा कृतक्रतुभिः । तथा कोपशून्यैः । निरुक्तं ग्रन्थविशेषो वचनाभावश्च । सन्मार्गः सदाचारः श्रेष्ठाध्वा च । सकलं सर्वं त्रायन्त इति सकलत्राः । ब्रह्म वेदं चरन्ति जानन्त्यवश्यम् ॥ "ब्रह्मचारिभिरपि सकलत्रैः" इति पाठे ब्रह्मचारिभिर्निषिद्धकामैः । अतिथीनागन्तून्, कुशांश्च लान्ति स्वीकुर्वन्ति ॥ साम वेदः सान्त्वं च ॥ दण्ड आषाढो दमनं च ॥ शतपथो यजुर्वेदभागः शतसंख्यः पन्थाश्च । एकमार्गैर्ऋजुभिः । सर्वत्रापिर्विरोधार्थे । स तु प्रतीयमानव्याख्यया ॥ पुनरप्येकत्र वणिग्भिरधिष्ठितम् । द्रोणो मानं कौरवगुरुश्च ॥ सूत्रादिमानं गृहादीनां तिर्यग्धारणस्तम्भश्च तुला । अनुमेयं कणादि

१ दिशम्. २ अनाकूत. ३ पुरप्रतिस्पर्धि. ४ प्रान्तमारूढ. ५ शरदभ्रादभ्र.

गेस्थैरपि गृहस्थैः, सकलत्रैरपि ब्रह्मचारिभिः, अभ्यस्ततिथिभिरप्यतिथिकुशलैः, सामप्रयोगप्रधानैरपि दण्डावलम्बिभिः, शतपथानुसारिभिरप्येकमार्गैः, ब्राह्मणैरध्यासितम् । एकत्र कुरुभिरिव द्रोणपुरःसरैः, प्रासादैरिव तुलाधारिभिः, नैयायिकैरिवानुमेयानुमाननिपुणैः, वैशेषिकैरिव द्रव्यानु[1]गुणकर्मविशेषपण्डितैः, वैयाकरणैरिव रूपसिद्धिप्रधानैः, रुद्रैरिवानेकग्रन्थिबद्धकपर्दकैः, विपणिवणिग्जनैरधिष्ठितम् । एकत्र विटकौलदम्भदीक्षाभिरिव कुचरूपलोभितलोकाभिः, कुकविकाव्यपद्धतिभिरिव भग्नयतिगणवृत्ताभिः, निशाचरीभिरिव रजनीरागिणीभिः, सर्वतोमुखजघनचपलाभिरप्यनार्याभिः, कर्णाटचेटीभिर्भरितम् । एकत्र बालकमिव कुलालाकीर्णम् । एकत्र वृद्धमिव कुजराजितम् । एकत्र चित्रविद्येव प्रवर्धमानसकलशिशुशोभितया विन्यस्तस्वस्तिकया सर्वतो-

तस्यानुमानमुद्देशज्ञानम् । पक्षे अनुमीयते तदनुमेयम् । अनुमीयतेऽनेन तदनुमानम् । यथाऽयं वह्निमान्धूमवत्त्वादित्यत्र धूमोऽनुमानम् । वह्निरनुमेयः ॥ द्रव्यस्य रूप्यकादेरनुगुणः संकलना तत्कर्मविशेषविज्ञाः । पक्षे द्रव्यानुगता गुणकर्मविशेषाः पदार्थाः ॥ रूपं टङ्करूपकादिनाणकं शब्दश्च ॥ कपर्दो वराटो जटाबन्धश्च ॥ एकत्र । कर्णाटदासीभिर्भरितम् ॥ कुचयो रूपेण लोभितलोकाः । शाक्तदम्भदीक्षासु कुत्सितेन चरुणा मांसादिनोपलोभितलोकाः ॥ भग्नमुनिवृन्दशीलाभिः । पक्षे भग्नयतिगणानि वृत्तानि यासु । यतिर्विरतिः । गणा मगणादयोऽष्टौ । वृत्तं पद्यम् ॥ रजनी हरिद्रा निशा च । रागो वर्णान्तरारोपणमासक्तिश्च ॥ कर्णाटे हि हरिद्रैवाङ्गरागः ॥ मुखे जघने च चपलाः । आर्या साध्वी मात्रावृत्तभेदश्च ॥ ततो नञ्योगः । अपिर्विरोधे । मुखजघनचपलाशब्दस्यार्याख्याद्वयवाचित्वात् ॥ एकत्र । कुलालैः कुम्भकारैः कुत्सितलालया चाकीर्णम् ॥ कुजैस्तरुभी राजितम् । पक्षे कुत्सितजरया जितम् ॥ एकत्र । गृहश्रेण्या भूषितम् । प्रवर्धमानैः । सकलैः कलावद्भिः । शिशुभिर्डिम्भैः शोभितया । तथा विन्यस्ताः स्वस्तिका मौक्तिकादिक्षोदरचिताश्चतुष्का यस्याम् । सर्वत इति

---

1 द्रव्यगुणकर्मसामान्यसमवायविशेषपण्डितैः.

भद्रभूषणया भवनमालयालंकृतम् । एकत्र नाटकैरिव पताकाङ्क-संधिसंगतैः, दुष्टकिरातैरिव दृष्टकूटकर्मभिः, शस्त्रैरिव सुधारैः, विचित्रैरपि संचित्रैः, संतुलैरप्यतुलैर्देवकुलैः संकुलम् । विशालमपि शालासंपन्नम्, चतुश्चरणसंयुक्तमपि चरणरहितम्, विट्संभृतमपि शुचिमार्गम्, सर्वत्र चत्वराधिकमपि स्थिरप्रकृति, मज्जन्महाराष्ट्र-कुटुम्बिनीमुखमण्डलविधीयमानोत्फुल्लकमलशोभायास्तुङ्गतरङ्ग-रङ्गत्तरुणार्जुनराजीवराजमानराजहंसविराजितवारेर्वरदायास्तीरे रमणीयकरसकुण्डं कुण्डिनं नाम नगरम् ॥ क ॥

यस्य नातिदूरे दर्शनदूरीकृतदुरितोपप्लवाप्लवनजनितपातकभङ्गां गङ्गामुपहसन्ती स्वर्गमार्गाश्रयणनिश्रेणी पुण्यपयाः पयोष्णी वहति ॥ ख ॥

यस्य च पश्चिमदेशे प्रणतसुरासुरमौलिनीलमणिमरीचिच-

भिन्नम् । भद्राणि वास्तुशास्त्रख्यातानि भूषणं यस्याम् । यदिवा स्वस्तिकवर्धमानौ गृहावयवविशेषौ । पक्षे शिशुः सकलः स्वस्तिको वर्धमानः सर्वतोभद्र इत्याख्यानि पञ्च पत्राणि ॥ एकत्र देवकुलैः संकुलम् । पताका ध्वजवासः सैवाङ्को येषाम् । तथा संधिषु संगतानि । अविभाव्यसंधीनीत्यर्थः । नाटकेषु तु मुख्यनायकोपरि उपनायकचरितं पताका । अङ्कः प्रबन्धविभागः । मुख-प्रतिमुख-गर्भ-अवमर्श-निबर्हणाख्याः पञ्च संधयः ॥ कूटं शिखरं कपटं च ॥ सुधां लेपविशेषमियूति प्राप्नुवन्ति । पक्षे शोभना धारा येषाम् । विचित्रैरनेकप्रकारैः । न विगतचित्रैः ॥ न तुला साम्यं येषाम् । तथा तुलया धारणस्तम्भेन सह ॥ उभयत्रापि विरोधे ॥ विशालं विस्तीर्णम् । व्यपेतशालम् । शाला गजाद्यालयः ॥ चत्वारश्चरणा ऋग्वेदादयः । अपिचेति विरोधे । तदा रणेन युद्धेन रहितम् ॥ विड्भिर्वैश्यैः संवृतम् । न विष्ठाभिः ॥ चत्वरं चतुष्पथम् । प्रकृतिरमात्यादिः । विरोधस्तु चत्वरेति चकारस्य समुच्चयार्थस्य पूर्वपदेन योगे ॥ क ॥

यस्येति ॥ यस्य (पुरस्य) । नातिदूरे (निकटे) । गङ्गा स्नानात्पुण्यहेतुः पयोष्णी तु दर्शनादपीत्यस्या विशेषः ॥ ख ॥

यस्य चेति ॥ भार्गवः शुक्रः । भोजकटकूपेति अधिष्ठाननाम । तत्र जन्मा-

१ सुचित्रैः. २ अतुलैरपि सतुलैः. ३ कमलखण्ड. ४ रामणीयक. ५ प्रदेशे.

श्वरीकचक्रचुम्बितचरणाम्भोजस्य भोजकटकूपजन्मनो जरापातितययातेः प्रचण्डदण्डदाण्डिक्यदण्डनाडम्बरितगण्डपाषाणविदलितवैदर्भमण्डलस्य भगवतो भार्गवस्याश्रमः ॥ क ॥

यत्र च विपत्त्राः सन्ति साधवो न तु तरवः, विजृम्भमाणकमलानि सरांसि न जनमनांसि, कुवलयालंकाराः क्रीडादीर्घिका न सीमन्तिन्यः, विपदाक्रान्तानि सरित्कूलानि न कुलानि ॥ ख ॥

किं बहुना ।

देशानां दक्षिणो देशस्तत्र वैदर्भमण्डलम् ।
तत्रापि वरदातीरमण्डनं कुण्डिनं पुरम् ॥ २८ ॥

तत्रास्ति समस्तरिपुपक्षक्षोददक्षदक्षिणक्षोणीपालमौलिमाणिक्यनिकषनिर्मलितचरणनखदर्पणश्चतुरुदधिपुलिनचक्रवालवालुका-

स्येति ॥ तथा च श्रुतिः—"शुक्रो भोजकटेऽभवत्" ॥ कूपादिप्रसिद्ध्या हि अधिष्ठाननामानि दृश्यन्ते । तथा च मरुदेशे शिवकूपः किराटकूपो जाङ्गलकूप इत्याद्यधिष्ठाननामानि ॥ वृषपर्वदैत्यसुतां शर्मिष्ठां शुक्रसुतां देवयानीं च ययातिनृपतिरुपयेमे । ततोऽसौ शर्मिष्ठाप्रीत्या देवयानीमवजानन् "तवाङ्गे जरा पततु" इति शुक्रेण शप्तः ॥ तथा दाण्डक्यो नाम भोजकटदेशाधिपः शुक्रसुतामरजःसंज्ञां क्षत्रियः किल हठाद्विजकन्यां परिणीतवान् । इति परिभूतंमन्येन शुक्रेण मन्युना पातालशैलगण्डवृष्टिना स वैदर्भमण्डलो हतः ॥ क ॥

यत्रेति ॥ विपदस्त्रायन्त इति विपत्त्राः सन्तः न वृक्षा विपर्णाः ॥ एवं विकसत्कमलानि । न तु कुत्सितो विजृम्भमाणः प्रसरन्मलः पापं येष्विति ॥ यद्विश्वः—"मलं किट्टे पुरीषे च पापे च कृपणे मलः" ॥ कुवलयं सरोजं कुत्सितवलयं च ॥ वीनां पदैराक्रान्तानि कूलानि । कुलानि तु न विपदा विपत्त्या ॥ ख ॥

तत्रेति ॥ तत्र कुण्डिने रिपुपक्षक्षोदप्रवीणानामप्यनुकूलानां राज्ञां मौलिमणिनिकषनिर्मार्जितनखादर्शः । तथा चतुरुदधिद्वीपपुञ्जवालुकावदसंख्यसंख्येष्वनेकरणेषु विख्याततकीर्त्यैव सुधया शुभ्रितभूमण्डलः । तथा जयश्रीः सारिकोपमा यस्य । एवंविधो भीमो

१ प्रचण्डदाण्डिक्य. २ न तरवः. ३ उदधिवेलापुलिन.

संख्यसंख्यविख्यातकीर्तनीयकीर्तिसुधाधवलितवसुंधरावलयो निजभुजपञ्जरान्तरनिरुद्धशारिकायमाणरणरङ्गाङ्गणार्जितोर्जितजयश्रीः, यौवनमदमत्तकान्तकुन्तलविलासिनीनयननीलोत्पलदलमालार्च्यमानलावण्यपुण्यप्रतिमः, रविरिव नासत्यजनकः, पुरंदर इव नाकविख्यातः, गरुत्मानिव नागमाधिक्षेपी, पद्मखण्ड इव नालसहितः, व्याकरणप्रबन्ध इव नामसंपन्नः, धाम धाम्नाम्, आधारो धीरतायाः, पुरं पुरुषकारस्य, आश्रयः श्रेयसां श्रियां श्रुतीनां च, राजा रणाङ्गणेष्वगणितभीर्भीमो नाम ॥ क ॥

यस्यानवरतमुत्कृष्टालयः क्रीडावनपादपाः पौरलोकश्च, अपरुषो दायादा वाग्विभवश्च, विमत्सराः सभासदो देशश्च, विकसद्रुचयोऽङ्गावयवाः क्रीडापर्वतश्च, अपराजयो मण्डनमणयः सेनासमूहश्च, अगतरुजो वने विनाशमन्वभवन्नितान्तं रिपवः पुष्पप्रकरश्च ॥ ख ॥

नाम राजास्ति ॥ कुन्तलस्य देशविशेषस्य विलासिन्यः। लावण्यमेव पुण्यप्रतिमा। रविरिवेति। सर्वत्र नेति भिन्नम्। असत्यवक्ता न॥अकविषु कुकविषु न प्रतीतः॥ आगमाञ्शास्त्राणि न तिरस्करोति। अलसेभ्यो हितः।आलेनानर्थेन सहितो वा न॥ आमेन रोगेण न युक्तः॥ पक्षे नासत्ययोर्देववैद्ययोर्जनकः पिता। नाकः स्वर्गः। नागानां सर्पाणां मां लक्ष्मीमधिक्षिपति लुम्पति॥ नालं काण्डम्। नाम प्रातिपदिकम्॥ क॥

यस्येति ॥ अत्र बहुत्वैकत्वश्लेषः ॥ उत्प्राबल्येन। अर्थात्सौरभजनितेन कृष्टा आ नीता अलयो यैः। तथोक्तास्तस्य राज्ञः संबन्धिनः क्रीडार्थं वनवृक्षाः। जनस्तु उत्कृष्ट आलयो गृहं यस्य॥ अपगता रुट् येभ्यः। पक्षे परुषशब्दस्य नञ्तत्पुरुषे अरूक्षः स्निग्ध इत्यर्थः॥ विगतो मत्सरो येभ्यः। एकत्वे तु विमन्ति पक्षियुक्तानि सरांसि यस्मिन्॥ विकसन्ती रुचिः कान्तिर्येषु। अन्यत्र द्रुर्वृक्षस्तस्य चयः॥ अपगता राजिः संधिर्येभ्यः। पक्षे न पराजीयत इत्यच्॥ अगतरुजोऽगतपीडाः शत्रवः।

१ नितान्तरिपवः.

तस्य च कंदर्पकमनीयकान्तेर्मत्ताः करिणः सदामानो न मानिनीलोकः, कृतविटपानमनाः क्रीडोद्यानतरवो नावरोधजनः, कटकालंकृतदोषः सीमन्तिन्यो न परिपन्थिकः ॥ क ॥

यस्य च चरणाम्भोज[1]युगलं विमलीक्रियते नमज्जनेन न मज्जनेन ॥ ख ॥

यः शृङ्गारं जनयति नारीणां नारीणाम् ॥ ग ॥

यः करोत्याश्रितस्य नवं धनं न बन्धनम् ॥ घ ॥

यो गुणेषु रज्यते नरमणीनां न रमणीनाम् ॥ ङ ॥

यस्य च नमस्याग्रहारेषु श्रूयते नलोपाख्यानं न लोपाख्यानम् ॥ च ॥

यस्य च राज्ये साक्षरस्य पुस्तकस्य[2] बन्धः, सगुणस्य कार्मुकस्या[3]कर्षणम्[4], सुवंशप्रभवस्य छत्रस्य[5] दण्डः, सुजातेरुद्यानविशेषस्यो[6]-

इतः प्राप्तोऽन्तो मरणं यत्र तथाभूतं विशिष्टं नाशं नशनं भयादर्शनं वनेऽनुभूतवन्तः। इणः क्ते "इतः" इति रूपम् । पुष्पप्रकरस्तु पर्वतवृक्षजो वने नितान्तं भृशं प्रध्वंसमनुबभूव ॥ अनुभवन्नितान्तमिति ह्यस्तन्या बहुत्वैकत्वयोः ॥ ख ॥

तस्य चेति ॥ सह दाम्ना अर्गलनेन । पक्षे सदा मानो गर्वो यस्य ॥ विटपानां विस्ताराणामानमनं कृतं तद्यैः । अन्यत्र कृतं विटानां पाने चुम्बने मनो येन । कटकैर्वलयैरलंकृतौ दोषौ बाहू यासाम् । परिपन्थी तु स्कन्धावारेऽलमत्यर्थं कृतोपद्रवः ॥ क ॥

यस्य चेति ॥ नमता जनेन न क्षालनेन । एतेन जनानुरागसंपत्तिः ॥ एवमग्रेऽप्युत्तरपदेषु नञ्संबन्धः ॥ ख ॥

यस्य चेति ॥ नलस्योपाख्यानं भारतप्रतीतम् । नमस्यानां पूज्यानां देवद्विजादीनां ग्रामेषु लोपकथा नैव ॥ च ॥

यस्य चेति ॥ साक्षरं लिखिताक्षरः अधीताक्षरश्च ॥ गुणो ज्या शौर्यादिश्च । आकर्षणं कर्णान्तप्रापणम् आक्षेपश्च ॥ वंशो वेणुरन्वयश्च ॥ दण्डो यष्टिर्दमनं च ॥ जातिर्मालती विप्रादिश्च । उत्खननं वृक्षपुष्टय आलवालमार्दवायोत्कृष्टं खननं गोर्द-

१ चरणाम्भोजम्. २ पुस्तकस्यैव. ३ कार्मुकस्यैव. ४ कर्षणम्. ५ छत्रस्यैव. ६ विशेषस्यैव.

त्खननम्, कुलीनस्य कन्दस्योन्मूलनारम्भः, सन्मार्गलग्नस्य पुनर्वसुभाजश्चन्द्रस्यैव ग्रहणालोकनमभूत् ॥ क ॥

किं बहुना।

देवो दक्षिणदिङ्मुख[2]स्य तिलकः कर्णाटकान्ताकुच-
क्रीडाशैलमृगः प्र[3]तापकदलीकन्दः स किं वर्ण्यते।
यस्यारातिकरीन्द्रकुम्भरुधिरक्लिन्नासिदंष्ट्राङ्कुरा
शौर्यश्रीर्भुजदण्डमण्डपतले सिंहीव विश्राम्यति ॥ २९ ॥

तस्य च महामहीपतेरात्मरूपो[4]पहसितसमस्तसुरसुन्दरीसौन्दर्यसारसंपत्तिकलङ्ककुलकन्दकन्दलीकंदर्पदर्पगजेन्द्रावष्टम्भस्तम्भयष्टिरखिलजननयनकुरङ्गवागुरा राभणीयकपताकायमानोद्भिन्ननवयौवनश्रीः, शृङ्गारस्यागारम्, अवनिर्वनिताविभ्रमाङ्कुराणाम्, आभोगः सौभाग्यभो[5]गस्य, रङ्गशाला रागवृत्तनृत्तस्य, सर्वान्तःपुरपुरं[6]ध्रिकाप्रधानभूताऽस्ति प्रिया प्रियंगुमञ्जरी नाम ॥ ख ॥

यस्याः पद्मानुकारिणी कान्तिर्लोचने च, रम्भाप्रतिस्पर्धिनी रूपसंपत्तिरूरुमण्डले च, सुमनोहारिणी केश[7]कबरी भ्रूभङ्गचक्रे च,

नमिति प्रतीतम् । पक्ष उच्छेदनम् ॥ कुलीनः कौ क्षितौ लीनोऽभिजातश्च ॥ सद्विद्यमानं मृगस्येदं मार्गम् । लग्नं सक्तं संयोगो यस्य । पुनर्वसू नक्षत्रम् । ग्रहणं राहुयोगः । पक्षे सन्मार्गः सदाचारः । पुनरिति भिन्नम् । वसुभाग्धनी । ग्रहणं धारणम् । सन्नित्यतान्वितो मार्गः । अर्थान्नभ इति वा ॥ व्याख्यानगतिर्यथा । साक्षरस्य वर्णोपेतस्य पुस्तकस्यैव बन्धनं न जनस्येति ॥ क ॥

तस्येति ॥ भीमस्य प्रिया प्रियंगुमञ्जरी नामास्ति ॥ ख ॥

यस्या इति ॥ अत्र प्रथमैकत्वद्वित्वयोः स्त्रीक्लीबयोश्च श्लेषः ॥ सर्वत्र नान्तत्वात् ॥ पद्मा श्रीः पद्ममब्जम् ॥ रम्भा अप्सरोन्तरं कदली च ॥ सुमनसः पुष्पाणि । पक्षे

---

१ कन्दस्यैव. २ दिङ्मुखैकतिलकः. ३ मतापहुतभुक्पुञ्जः. ४ उपहसित. ५ भाग्यस्य. ६ पुरंध्रि.
७ केशपाशवल्लरी; केशपाशकबरी.

भ्रमरकोद्भासिनी ललाटपट्टिका कर्णोत्पले च, प्रवालानुकारिणी दन्तच्छदच्छाया करचरणयुगले च ॥ क ॥

यस्याः सुवर्णमयं वचनं नूपुरं च पदे पदे मनो हरति ॥ ख ॥

यस्याः सुमधुरया वाचा सदृशी शोभते कण्ठे कुसुममालिका। अलिकालयाऽप्यलकवल्लरीमालया सह विराजते तिलकमञ्जरी ॥ ग ॥

किं बहुना।

तस्याः कान्तिनिरुद्धमुग्धहरिणीलीलाचलच्चक्षुष-
स्तारुण्यस्य भरादनालसलसल्लावण्यलक्ष्मीरसः।
लुभ्यल्लोकविलोचनाञ्जलिपुटैः पेपीयमानोऽपि स-
न्नङ्गेष्वेव न माति सुन्दरतरो रङ्गंस्तरङ्गैरिव ॥ ३० ॥

एवमनयोः सकलसंसारसुखरसास्वादमुदितमनसोर्यान्ति दिवसाः ॥ घ ॥

कदाचिच्चटुलतरतरुणषट्चरणचक्रचुम्बनाक्रमणभरभज्यमानमञ्जरीजालगलदमन्दमकरन्दबिन्दुकर्दमिलेषु विविधाङ्गविहंगविहा-

सुशब्देन समासः ॥ भ्रमरकं ललाटस्थमलकं भृङ्गश्च ॥ प्रवालो विद्रुमः पल्लवश्च ॥ क ॥

यस्या इति ॥ सुष्ठु वर्णोऽकारादिः सुवर्णं च। तेन निर्वृत्तं पदं प्रकृतिविभक्तिसमुदायः पादन्यासश्च ॥ ख ॥

यस्या इति ॥ अत्र तृतीयाप्रथमयोः श्लेषः। सुष्ठु मधुनो मकरन्दस्य रयः प्रसरो यत्र ॥ अलिकं ललाटमालयः स्थानमस्याः सा। तिलकमेव मञ्जरीति रूपकम् ॥ तृतीयापक्षे अलिवत्कालो वर्णो यस्याः। यदा त्वलिवत्कालेति क्रियते तदा ङीष्प्रसज्येत ॥ ग ॥

तस्या इति ॥ आ समन्तादलस आलसः। पश्चान्नञ्योगः। तस्या लावण्यलक्ष्मीरसः सुन्दरतरश्चारुतरः। तरङ्गै रङ्गन्विलसन्निव। रसो हि भरादजिह्मो लसति तरङ्गैश्च रङ्गति ॥ ३० ॥

कदेति ॥ मधुबिन्दुकर्दमवत्सु। पर्णदन्तुरमध्येषु। स्मरबन्धुः सुगन्धिगन्धवाह एव

रविदलितदलदन्तुरान्तरालेषु स्मरबन्धुसुगन्धिगन्धवाहवा[1]जिवाह्या- लीषु वरदायाः पुण्यपुलिनपालिपादपतलेषु रममाणयोः परिण- तेन्द्रवारुणारुणकपोलकान्तिरुद्धुषितदेहपिण्डकण्डूयनाकूततरलि- तकरकिसलया बालकमेकमुदरदेशलग्नमपरमपि पृष्ठप्रतिष्ठितमुद्व- हन्ती कापि कपिकुटुम्बिनी दृष्टिपथमवातरत् ॥ क ॥

तां चाव[2]लोक्य चेतस्यास्पदमकरोत्तयोरनपत्ययोर्विषमविषाद- वेदनाव्यतिकरः ॥ ख ॥

करपत्रधाराकं[3]र्तनदुःसहदुःखदूनमनसोर्वैं[4]मनस्यमभून्मूर्ध्नि[5] राज्ये जने जीविते च। किमनेनाधिपत्येनापत्यशून्येन ॥ ग ॥

सर्वथा सकलसुरासुरकिरीटकोटिकोणं[6]शोणमणिमरीचिचञ्चरी- कचुम्बितचरणाम्बुजमम्बिकाप्रि[7]यं प्रतिपद्यामहे महेश्वरमित्यन्यो- न्यमालोचयांचक्रतुः ॥ घ ॥

अथ विपुलवियद्विलङ्[8]घनश्रमप्रशमनार्थमरुणेन वारुणीं प्रति- पानार्थमिवावतार्यमाणेषु रविरथतुरंगमेषु, अपरासक्ते दिवसभर्तरि शोकभरादिव तमःपटलेनापूर्यमाणामाश्वासयितुमिव पूर्वां दि- शमभिधावमानासु पादपच्छायासु, हारीतहरितहरिहारिणस्तरणे-

वाजी तस्य वाह्यालीप्रायेषु। वरदातरुतलेषु क्रीडतोरमुयोः कपिपत्नी इन्द्रवारुणीफ- लपिङ्गगल्लकान्तिर्वानरी नयनपथं गता दृष्टेत्यर्थः ॥ क ॥

तामिति ॥ तां च वीक्ष्य विषादव्यथासंपर्कौ हृदि पदमकरोत् ॥ ख ॥

अथेति ॥ अथानन्तरं श्रमशान्त्यर्थं वारुणीं पश्चिमां प्रति लक्ष्यीकृत्य नीयमानेषु रविरथाश्वेषु। प्रतिपानपक्षे वारुणी सुरा ॥ अपरा दिग् अङ्गनान्तरं च। तमो मोहो ऽवान्तं च ॥ तथा गोमण्डलेषु किरणौघेषु धेनुवृन्देषु च ॥ यथासंख्यं रवेर्वनान्तराच्च मन्दं चलमानेषु। द्वयादपि कीदृग्रूपात्। हारीताः शुकाभाः पक्षिणस्तद्वद्धरिता नीला

१ वाह. २ विलोक्य. ३ विकर्तन. ४ वैरस्यम्. ५ निजराज्यजने. ६ कोणमणि. ७ पतिम्. ८ घनश्रम.

ररण्यान्तराच्च मन्दमपवर्तमानेषु गोमण्डलेषु, अस्ताचलवनदेवतादत्तरक्तचन्दनार्घसलिलप्लवप्लाव्यमान इव लोहितायति पश्चिमाशामुखे, वारविलासिनीभिः कपोलमण्डलीमण्डनाय क्रियमाणेषु पत्त्रभङ्गेषु। भयेनेव पादपैः प्रारब्धे पत्त्रसंकोचकर्मणि, विघटिष्यमाणचक्रवाककामिनीकरुणकूजितव्याजेन दिवसभर्तुरस्ताचलगमनं निवारयन्तीभिरिव विरहविधुराभिः कमलिनीभिर्विधीयमानेषु प्रार्थनाप्रणामाञ्जलिपुटेष्विव कमलमुकुलेषु, क्रमेण पश्चिमाम्भोधित[1]रङ्गान्तरतस्तरुणतरताम्रतामरसानुकारिकेसरायमाणरश्मिमञ्जरीजाल[2]जटिलमवलोक्य तरणिमण्डलमतिसंभ्रमभ्रमद्भ्रमरनिकुरम्ब इव प्रधावमाने दूरं तिमिरपटले, कृष्णागुरुपङ्कपत्त्रभङ्गभूष्यमाणेष्विव दिगङ्गनामुखेषु, कोकि[3]लकलापैराक्रम्यमाणेष्विव वनान्तरेषु, विकचकुवलय[4]बहलमेचकरुचिनिचयश्यामलीक्रियमाणेष्विव सलिलाशयेषु, तापिच्छगुच्छच्छदच्छाद्यमानास्विव वनवृतिषु, नृत्यत्कलापिकुलक[5]लापैः कालीक्रियमाणेष्विव शैलशिरःशि[6]लातलेषु, कज्जलालेख्यचित्रचर्च्यमानास्विव भवनभित्तिषु, विरहिणीनिःश्वासधूमश्यामलीक्रियमाणेष्विव पान्थावसथेषु, कस्तूरिकासलिलसिच्यमानास्विव कामुक-

ये हरयोऽश्वास्तैर्गच्छति। तस्मात्। वनाच्च हारीतैः शुकाभपक्षिभिर्हरितैः शाद्वलैर्हरिभिर्वानरैश्च हारिणो मनोज्ञात्॥ रक्तचन्दनार्घः प्रस्तावाद्रवेरेव॥ पत्त्रभङ्गो विलेपनचित्रं पत्त्रवल्लीसंज्ञं पर्णानां भञ्जनं च॥ तथा कांचिदपि श्रियं शोभां नारायणवक्षसि तु श्रियमब्धिपुत्रीं प्राप्नुवति नक्षत्रालंकृते नभसि। कालिन्दीपरिस्यन्दो नारायणवक्षश्च वियत उपमानम्। पाण्डुपुण्डरीकाणि क्षीररसबिन्दवश्च ताराणाम्। परिस्यन्दः प्रस्रवणं प्रवाह इति यावत्॥ विटो भुजंगः। कान्तः पतिः। पक्षे पक्षिणामावासयष्टेरुन्न-

---

१ तरङ्गरङ्गान्तरेषूत्तरत्तरुणताम्र. २ जटिलमपि. ३ कोकिला. ४ बहललमषट्पदमेचक. ५ कलापकाली. ६ शिलातलेषु, उदेष्यमाणनिजनायकालोकप्रेष्यमाणसंध्यावधूकटाक्षमेचकीकृतेष्विव गगनवर्त्मसु, कज्जलालेख्य.

विलासवासवेश्मवाटीषु, मदान्धसिन्धुरनिरुध्यमानेष्विव नृपभवनाङ्गणेषु, कलितकालकञ्चुकायामिव गगनलक्ष्म्याम्, मदनशरनिकरविद्रुतदरिद्रविटविषादानलस्फुलिङ्गेष्विव रङ्गत्सु ज्योतिरिङ्गणेषु, काञ्चनीषु तिमिरकरिकुम्भभेदभल्लीष्विव निशितासु प्रदीप्यमानासु प्रदीपकलिकासु, प्लवमानपाण्डुपुण्डरीककल्माषितकालिन्दीपरिस्यन्दसुन्दरेऽमृतमथनक्षणक्षुब्धक्षीरसागररसबिन्दुस्तबकितनारायणवक्षःस्थल इव कांचिदपि श्रियं कलयति ताराविराजिते वियति, विटक्कान्तमनुसरन्तीषु वेश्यासु वेश्मपारापतपतत्रिपङ्क्तिषु च, भ्रमरसंगतासु कुलटासु कुमुदिनीषु च, नदीपालिविरहितेषु चत्वरेषु चक्रवाकमिथुनेषु च, जाते जरद्गवयकायकालकान्तिकाशिनि निशावतारे, तरुणतमालकाननमिवाञ्जनगिरिगुहागर्भमिवेन्द्रनीलमणिमहामन्दिरोदरमिव विशति सकलजीवलोके स लोकेश्वरः "प्रिये प्रियंगुमञ्जरि, प्रसादय प्रणतप्रियकारिणमभङ्गानङ्गदर्पहरं हरम्। अहं च तदाराधनावधानमनुविधास्यामि" इत्यभिधाय यथावासमयासीत्॥ क॥

ततश्च।

अखण्डितप्रभावोऽथ प्रदोषेणान्धकारिणा।
तस्याश्चित्ते स्थितः शंभुरुदयाद्रौ च चन्द्रमाः॥ ३१॥

तोंऽशो विटङ्कस्तस्यान्तः॥ भ्रमो भ्रमणं तत्र रसस्तात्पर्यम्। अन्यत्र भ्रमरा भृङ्गाः॥ नेति भिन्नम्। पक्षे नदीनां पालिः सेतुः॥ इतीति सति स राजा यथावासमयासीत्॥ किं कृत्वा हे प्रिये प्रसादय हरमहमपि तदाराधनमनुपृष्ठलग्नः करिष्यामीत्यभिधाय॥क॥

अखण्डितेति॥ शंभुशशिनोः श्लेषः। प्रकृष्टदोषेण। अन्धकनाम्ना प्रतिपक्षेण। अव्याहतवैभवः। शशी च प्रदोषेण रजनीमुखेन। अन्धत्वविधायिना अन्धकारयुक्तेन वा। न खण्डितः प्रभाया आयो वृद्धिर्यस्य। अत्र अव वृद्ध्यर्थः॥ ३१॥

१ विलासवेश्मवेदिकासु. २ तिमिरकरिकुम्भभेदकाञ्चनभल्लीष्विव. ३ भविशति.

बिभ्रते हारिणीं छायां चन्द्राय च शिवाय च।
नभोगरुचये तस्मै नमस्कारं चकार सा ॥ ३२ ॥
नित्यमुद्वहते तुभ्यमन्तः सारङ्गरञ्जितम् ॥
भूतिपाण्डुर गोवाह सोम स्वामिन्नमो नमः ॥ ३३ ॥

एवं च नातिचिरात्

क्षुभ्यत्क्षीरसमुद्रसान्द्रसलिलोल्लोलैरिव प्लावयँ-
ल्लोकं लोचनलोभनः स्मरसुहृज्जातः स चन्द्रोदयः।
यस्मिन्संभृतवैरदारुणरणप्रारम्भिणो भ्राम्यतः
क्रुद्धोलूककदम्बकस्य पुरतः काकोऽपि हंसायते ॥ ३४॥

अपिच।

श्च्योतच्चन्दनचारुचन्द्ररुचिभिर्विस्तारिणीभिर्भरा-
ज्जातेयं जगती तथा कथमपि श्वेतायमानद्युतिः।

बिभ्रत इति ॥ चन्द्रपक्षे हरिणस्येयं हारिणी छाया कलङ्क इत्यर्थः। नभोगा वियद्व्यापिनी रुचिर्यस्य ॥ शिवस्तु हारिणीं छायां कान्तिम्। तथा भोगे विलासे रुचिरभिलाषो यस्य पश्चान्नञ्योगः ॥ ३२ ॥

नित्यमिति ॥ सहोमया वर्तत इति सोमः। तस्य संबोधनम्। तद्विशेषणं स्वामिन्निति। तथा भूत्या भस्मना पाण्डुरः शुभ्रः। तथा गौर्वृषो वाहनं यस्य। एवंभूत उमापते। अन्तर्मध्ये। सारमुत्कृष्टम्। गरं कालकूटम्। जितं महिम्ना स्तम्भितशक्ति। नित्यमुद्वहते बिभ्राणाय तुभ्यं नमो नमः ॥ अत्र प्रकर्षे द्विवचनम् ॥ सोमश्चन्द्रोऽपि। तदा भवनं भूतिर्जन्म। जन्मना पाण्डुरः स्वभावश्वेतः। तथा गाः किरणान् वहतीत्यण् ॥ पाण्डुराश्च ता गावश्चेति समासे कृते समासान्तो दुर्वारः। अन्तरिति कर्मपदम्। सारङ्गो मृगस्तेन रञ्जितं लाञ्छितमिति तद्विशेषणम् ॥ ३३ ॥

क्षुभ्यदिति ॥ स धवलिताशेषभुवनतलश्चन्द्रोदय उत्प्रेक्ष्यते। क्षुभ्यत्क्षीरसमुद्रसान्द्रसलिलोल्लोलैर्लोकं प्लावयन्निव जातः ॥ क्षीरसमुद्रक्षोभस्य तत्सहचरितत्वात् ॥ ३४॥

श्च्योतदिति ॥ सातत्यभ्रमणेन कुलालप्रेषितचक्रवद्भ्रमो यत्रेति भ्रमणक्रिया-

१ संस्मृत.

उन्निद्रो दिनशङ्कया कृतरुतः[1] काको वराकः प्रिया-
मन्विष्यन्पुरतः स्थितामपि यथा चक्रभ्रमं भ्राम्यति॥ ३५॥

अपिच ।

मुग्धा दुग्धधिया गवां विदधते कुम्भानधो बल्लवाः
कर्णे कैरवशङ्कया कुवलयं कुर्वन्ति कान्ता अपि ।
कर्कन्धूफलमुच्चिनोति शबरी मुक्ताफलाकाङ्क्षया
सान्द्रा चन्द्रमसो न कस्य कुरुते चित्तभ्रमं चन्द्रिका॥ ३६॥

यत्र च

मुक्तादाममनोरथेन वनिता गृह्णन्ति वातायने
गोष्ठे गोपवधूर्दधीति मथितुं कुम्भीगतान्वाञ्छति ।
उच्चिन्वन्ति च मालतीषु कुसुमश्रद्धालवो मालिकाः
शुभ्रान्विभ्रमकारिणः शशिकरान्पश्यन्न को मुह्यति॥ ३७॥

अपिच ।

किं कर्पूरकणाः स्रवन्ति वियतः किं वा मनोनन्दिनो
मन्दाश्चन्दनबिन्दवः किमु सुधानिष्यन्दधारा इमाः ॥
इत्थं भ्रान्तिममी जनस्य जनयन्त्यङ्गे लगन्तः परा-
मिन्दोः कुन्दविकासिकुड्मलदलस्रक्सुन्दरा रश्मयः ॥ ३८॥[2]

विशेषणम् ॥ अथवा चक्रः कोकस्तस्येव भ्रमो यस्य। सोऽपि रात्रौ समीपवर्तिनीमपि प्रियामन्विष्यन् भ्रमति ॥ ३५ ॥

मुग्धेति ॥ बल्लवा बालगोपालाः। शबर्योऽप्यारण्यकस्त्रियो विपर्यस्ता भवन्तु सततपरिचितोत्तंसरचनाः कान्ता उत्तमस्त्रियोऽपि विपर्यस्ता इति' अपिर्विस्मये ॥३६॥

किमिति ॥ कुन्दस्य विकासिनां कुड्मलदलानां स्रक्। तद्वत्सुन्दरा इति शौक्ल्यसौकुमार्यातिशयार्थः ॥ जरठकन्दस्य हि दलाग्राणि परुषाण्यरुणानि च भवन्तीति ॥ ३८ ॥

---

१ कृतरवः. २ अपिच । रूप्यस्थाने बिडालः कलयति च करान्दुग्धबुध्या सुधांशोः पार्श्वस्थां राजहंसः परिहरति वधूं चन्द्रिकाविप्रलब्धः । प्रेङ्खन्त्या हर्म्यदोलाध्वजपटशिखरच्छायया कुट्टिमाङ्के वलगत्कूणाहितृष्णातरलितनयनो भ्राम्यते बभ्रुपोतः ॥

इति जनितमुदिन्दोः सिन्दुवारस्रगाभं
किरति किरणजालं मण्डले दिङ्मुखेषु ॥
हरचरणसरोजद्वन्द्वमाराधयन्ती
शुचिकुशशयनीये साथ निद्रां जगाम ॥ ३१ ॥

इति श्रीत्रिविक्रमभट्टविरचितायां दमयन्तीकथायां हरचणसरोजाङ्कायां द्वितीय उछ्वासः ॥

इतीति ॥ इत्यमुना प्रकारेण । जनितहर्षम् । निर्गुण्डीकुसुममालाप्रतिमं करनिकरं दिङ्मुखेषु किरति वितन्वति सतीन्दोर्मण्डले हरं ध्यायन्ती सा दर्भशय्यायामस्वपत् । समाधिलयं गतेति भावः ॥ २९ ॥

इति विषमपदप्रकाशमेतं दमयन्त्यास्तनुते स्म चण्डपालः ।
शिशुमतिलतिकाविकासचैत्रं चतुरमतिस्फुटभित्तिचारुचित्रम् ॥

इति चण्डपालविरचिते दमयन्तीकथाविवरणे द्वितीय उच्छ्वासः समाप्तः ॥

अथ तृतीय उच्छ्वासः।

[1]अथ क्रमेण रजतकुम्भमम्भोभरणार्थमिवेन्दुमण्डलमादाय पश्चिमाम्भोनिधिपुलिनमनुसरन्त्यां तरुणकपोतकंधरारोमराजिराजिन्यां रजन्याम्, अखिलकमलखण्डकमलिनीनां विनिद्रायमाणकमलकुड्मलविलोचनेषु कज्जलरेखास्विवोल्लसन्तीषु भ्रमरराजिषु, राजीवराजिपुञ्जनिकुञ्जे शिञ्जानमञ्जीर[2]मञ्जुलमुन्नदत्सु शरद्वलाहकवलक्षपक्षविक्षेपपवनतरलिततरुणतामरसेषु दीर्घिकावतंसेषु हंसेषु, क्रें[3]कारयति च चक्रवाकमिथुनमेलकमङ्गलमृदङ्ग इव

अथेति ॥ अनन्तरं किरणसंस्पृष्टमेघे । रागवत्यारक्ते रवौ सुप्ता सती स्वप्नं

१ अथ च. २ मञ्जीररव. ३ क्रेङ्कारयत्सु मधुररवभरितभुवनेषु चक्रवाकमिथुनमेलकमङ्गलमृदङ्गेष्विव रौप्यघर्घरीझर्झररवसरसं सारसकुलेषु; क्रेङ्कारयति चक्रवाकमिथुनमेलकमङ्गलमृदङ्ग इव भरितभुवने रौप्यघर्घरीघर्घररवसरसं सारसकुले.

रौप्यघर्घररवसरसं सारसकुले, अवश्यायजलशिशिरशीकरिणि मन्दान्दोलितविनिद्रद्रुममञ्जरीरजःकणकषायिते तमःसर्पसंदष्टोज्जीवितजगन्निश्वासायमाने प्रस्खलति प्रभातसुरतश्रमखिन्नसुन्दरीकुचमण्डले मरुति, मनोहारिहारीतहरितहये हरति तिमिरपटलपटीं गगनलक्ष्म्याः करपरामृष्टपयोधरे रागवति सवितरि, मृगमदमिलितबहल[1]कुङ्कुममण्डनमञ्जरीभिरिव पिञ्जरिते पुरंदरदिङ्मुखे सुखप्रसुप्ता सा स्वप्नमद्राक्षीत् ॥ क ॥

किल सकलसुरासुरशिरःशेखरीकृत[2]चरणकमलः, कमलाधि[3]वासेन ब्रह्मणा नारायणेन च रचित[4]रुचिरस्तुतिः, कृशानुरूपेण ललाटलोचनेन[5] चन्द्रमसा च भासमानः, विकचं कर्णे कुवलयं करे कपालं च कलयन्, अहिंसाटोपं मनसा शिरसा च बिभ्राणः, प्रोज्ज्वलन्नयनार्चिश्चिताभस्म च समुद्वहन्, अधिकङ्कालेन स्कन्धेन कंधरार्धेन च विराजमानः, सालसदृशं भुजवनं भवानीं च

ददर्श ॥ अन्योऽपि रागवानासक्तः किल पटीमुत्सार्य कराभ्यां पाणिभ्यां स्तनौ स्पृशति ॥ शरद्बलाहकवलक्षाः शरदभ्रधवलाः । कैंकारो वाद्यविशेषः ॥ क ॥

स्वप्नमाह—**किलेति** । वार्तोक्तौ । हरः शशिमण्डलादुत्तीर्य पुत्रीत्यभिधाय ईदृशीं पारिजातमञ्जरीमदात् ॥ कीदृशो हरः । ब्रह्मणा विष्णुना च कृतस्तुतिः । द्वयेनापि कीदृशेन । कमलेऽधिवासोऽस्य पद्मासनत्वात् । विष्णुस्तु कमलायाः श्रिया अधिवासस्तेन ॥ तथा वह्निस्वरूपेण नेत्रेण चन्द्रमसा च कृशेन क्षामेण अनुगतरूपेणाविनाभावसंबद्धमूर्तिना लसन् ॥ तथा विकचं सविकासम् । कपालं तु विगताः कचाः केशा अस्मादिति विकचम् ॥ तथा अहिंसाया आटोपमावेशम् । अहिं च साटोपं सस्पन्दम् ॥ प्रोज्ज्वलद्दीप्यमानम् । भस्म तु प्रकर्षेणोज्ज्वलम् ॥ अधिगतं कङ्कालं शरीरास्थि अर्थात्खट्वाङ्गं येन । कंधरार्धेन तु कालेन सह कालकूटत्वात् । अधिकमिति क्रियाविशेषणम् ॥ सालद्रुमतुल्यं प्रांशुत्वात् । पक्षे सालसे लीलामन्थरे दृशौ यस्याः ॥

१ बहुल. २ भूत. ३ कमलाधिवासिना. ४ विरचित. ५ लोचनचन्द्रमसा.

दधानः, सर्वदानववारं त्रिशूलं मन्दाकिनीं च धारयन्, देवो दर्पितदनुजेन्द्रनिद्राहरो हरश्चन्द्रमण्डलादवतीर्य "पुत्रि प्रियंगुमञ्जरि, मञ्जरीमिमां गृहाण। मा भैषीः । [1]प्रत्युषसि मन्नियोगाद्दमनकनामा महामुनिरेष्यति स तेऽनुग्रहं करिष्यति" इत्यभिधाय स्वश्रवणशिखरान्तरादमन्दमकरन्द[2]स्यन्दसुन्दरामोदमाद्यन्मधुकररवरमणीयां पारिजातमञ्जरीमदात् ॥ क ॥

सापि "प्रसादोऽयम्" इत्यभिधाय स्वप्न एव [3]प्रणामपर्यस्तमस्तका स्तुतिमकरोत् ॥ ख ॥

तुभ्यं नमो नमल्लोकशोकसंतापहारिणे ।
व्यर्थीकृतान्धकारातिदम्भारम्भाय शंभवे ॥ १ ॥
विभो विभूतिसंपन्न पन्नगेन्द्रविभूषण ।
[4]नमो नमोघसंकल्प तुभ्यमभ्यन्तरात्मने ॥ २ ॥
अत्रान्तरे तरणिकोमलकान्तिभिन्न-
भास्वत्सरोजदलदीर्घविलोचनायाः ।
तस्याः प्रबोधमकरोद्रजनीवि[5]राम-
यामावसानमृदुमङ्गलतूर्यनादः ॥ ३ ॥

सर्वान्दानवान्वारयति । गङ्गा तु सर्वदा नित्यं नवा अविच्छाया वाः पाथो यस्याः । अथवा सर्वं ददातीति सर्वदाः । आनूयन्त इत्यानवाः तथोक्ता वारोऽस्याः । एतेन कामुकत्वेन नर्मवचनादात्मजलानां स्तुत्यत्वोक्तिः ॥ क ॥

तुभ्यमिति ॥ अन्धकारातीति कर्मधारयः ॥ १ ॥

विभो इति ॥ विभुः सर्वव्यापी ॥ विशेषेण भूत्या भस्मना संपन्नः समृद्धः । यद्वा विभूत्या चतुर्दशभुवनाधिपत्यलक्षणया ॥ तथा वासुकिभूषणः ॥ मोघो निष्फलः संकल्पो ध्यानं यस्य । पश्चान्नञ्योगः ॥ एतानि शिवसंबोधनानि ॥ २ ॥

---

१ मन्नियोगाद्दमनकनामा महामुनिः प्रातरेष्यति. २ बिन्दुनिस्यन्द. ३ प्रणामावनमितमस्तका. ४ नमोऽस्त्वमोघ. ५ तुरीययामा.

क्रमेण[1] च प्राच्यां सिच्यमानायामिव बहल[2]कुसुम्भाम्भःकुम्भैः ककुभि, प्रभवति तारकोच्छेदनाय सुकुमारे रश्मिजाले, पूर्वाचलस्थलीमधिरोहति जगत्प्रबोधप्रारम्भमङ्गलकलशेंऽशुमालिमण्डले, ताण्डवाडम्बरिणि पुण्डरीकखण्डे, हिण्डमानासु दीर्घिकामण्डनमुण्डमालासु कारण्डवमण्डलीषु, विश्राम्यति श्रवणपुटेषु हृदयानन्दिनि बन्दिवृन्दारकवृन्दवन्दनारम्भरवे, रणयत्सु वीणावेणुकोणान्वैणिकवैणविकेषु, कण्ठकुहरप्रेङ्खोलनालंकारकुशले तारतरं गायति ग्रामरागं गायनजने, जाते जरज्जपाप्रसूनभिन्नस्फुट[3]स्फाटिककान्तिसम[4]प्रभे प्रभातसमये, सा समुत्थाय भूत्वा शुचिर्विकचनवनलिनगर्भमर्घाञ्जलिमवकीर्य भगवतः सवितुः स्तुतिमकरोत् ॥ क ॥

वासरश्रीमहावल्ली[5]पल्लवाकारधारिणः ।
जयन्ति प्रथमारम्भसंभवा भास्वदंशवः ॥ ४ ॥

जयत्यम्भोजिनीखण्डखण्डितालस्यसंचयम् ।
कौङ्कुमं पूर्वदिग्[6]गण्डमण्डनं मण्डलं रवेः ॥ ५ ॥

राजापि प्रथमप्रबुद्धप्रगीतगीत[7]ध्वनिनिरस्त[8]निद्रः, सान्द्रविद्रुमप्रभा[9]भासि संध्यावसरे, विधाय सांध्यं विधिम्, अधिकृतेन[10] धर्मकर्मणि तत्कालपुरःसरेण पुरोधसा सह[11] तामेवान्वेष्टुमन्तःपुरमाजगाम ॥ ख

क्रमेणेति ॥ यथा महेन्द्र इन्द्रः, तथा सुकुमारः कुमारः । स हि तारकासुरोच्छेदनायं प्राभवत् । सुकुमारं मृदु रश्मिजालं तु तारकाणां नक्षत्राणामुच्छित्तये ॥ वैणिकवैणविकौ वीणावेणुवादकौ ॥ अलंकाराश्च मुद्रितविवृतानुनासिकादयः । तारोऽत्युच्चध्वनिः । ग्रामरागः पञ्चमः । यद्वा षड्जमध्यमगान्धारांस्त्रींस्त्रीन्ग्रामान्रागं च भरतोक्तं षड्विधं गाथके गायति सति ॥ क ॥

राजापीति ॥ प्रथमप्रबुद्धा ये प्रकृष्टगीतास्तद्गीतध्वनिना ध्वस्तनिद्रः ॥ ख ॥

---

१ क्रमेण प्राच्याम्. २ बहुलकुङ्कुमाम्भः. ३ स्फटिक. ४ समभे. ५ वल्लि. ६ पूर्वदिक्तुण्ड. ७ गायनगीत. ८ ध्वस्त. ९ प्रभासि प्रभातसमये संध्या. १० कृतेऽधिकधर्मकर्मणि. ११ समम्.

दृष्ट्वा च विस्मयमानः[1] स्फुरदरविन्दसुन्दराननाम् "अनुगृहीतेयमिन्दुमौलिना" इत्यवधारयन्, अतिहर्षोत्कर्षमन्थरगिरा[2] तां बभाषे ॥ क ॥

"मुग्धस्निग्धनिरुद्धशब्दहसितस्फारीभवल्लोचनं
तिर्यक्क्रान्ति[3]कपोलपालिपुलकस्पष्टीकृतान्तर्धृति।
एतत्ते करभोरु पङ्कजसदृग्दृष्ट्वा मुखं मे बला-
दुच्चैः किंचिदचिन्त्यचर्चि[4]तचमत्कारं मनो हृष्यति॥६॥

तत्कथय शप्तासि ममाज्ञया हर्षवृत्तान्तम्" इत्यभिहिता सा स्मितसुधानुविद्धमुग्ध[5]मुखवीणाक्कणकोमलालापेन सर्वमादितः स्वप्नदर्शनमाचचक्षे ॥ ख ॥

क्षितिपतिस्तु तदाकर्ण्य "प्रिये, मयापि स भगवान्। आत्मानुहारिणा[6] विनायकेन स्वामिना च शक्तिमता पुत्रेणानुगम्यमानो, दग्धकामः पूरितकामश्च, एककपर्दक ईश्वरश्च, ससोमश्चासोमः[7], सविभवश्चाविभूतिश्च, पिनाकी चापिनाकी। दृष्टः स्वप्नान्तरे तरुणार्कमण्डलमध्यवर्ती प्रणतप्रियंकरः शंकरः। तदेष ब्राह्मणः करोतु

मुग्धस्निग्धेति ॥ मणिबन्धकनिष्ठिकयोर्मध्यं करभस्तद्वदूरू यस्याः ॥ तत ऊङ् तस्याः संबोधनम् ॥ ईदृशं ते मुखं दृष्ट्वा सहसाचिन्त्याधिगतचमत्कारं मे मनो हृष्यति ॥ ६ ॥

क्षितिपतिस्त्विति ॥ अग्रे स्थितं पुरोहितमित्यमुना प्रकारेण राज्ञीकथनलक्षणेनावोचत् ॥ यत् प्रिये स भगवाञ्छंकरो मयापि स्वप्नान्तरे दृष्टः ॥ कीदृशः। सामर्थ्यवता हेरम्बेण, शक्तिशस्त्रभृता षण्मुखेन चात्मप्रतिमेनानुगम्यमानः। शिवोऽपि विगतनायकः सकललोकस्वामी शक्तिमांश्च शिवशक्त्योरविनाभावसंबन्धादित्यात्मसादृश्यम् ॥ कामः स्मर इच्छा च ॥ कपर्दो जटाबन्धः। विरोधपक्षे वराटः। ईश्वरो धनवान् ॥ ससोमः सेन्दुः। सह उमया वर्तत इति सोमः। ततो नञ्योगः ॥ विगतो भवो येभ्यस्ते विभवा मुक्तात्मानः। तैः सह। भगवत्सायुज्यं हि मुक्तिरिति वृद्धाः। तथा विशिष्टा भूतिर्यस्य। भस्म च ॥ पिनाकं धनुरस्यास्ति। अपीति भिन्नम्।

१ सविस्मयमनाः. २ मन्थरया गिरा. ३ निर्यत्कान्ति. ४ वर्धित. ५ मुग्धवीणा. ६ आत्मानुकारिणा. ७ असोमश्च.

संवादिनोरनयोः स्वप्नयोरर्थपरामर्शम्" इत्यभिधाय तां, तमवस्थितं पुरः पुरोहितम[2]भाषयत् ॥ क ॥

सोऽपि "देव, दिष्ट्या वर्धसे। अनल्पपुण्यप्राप्यमेतत्तरुणेन्दुमौलेरालोकनम्, [3]अवश्यमवाप्स्यति देवी सकलराजचक्रचूडामणिकल्पमशेषभुवनभ्रान्तशुभ्रयशःपिण्डडिण्डिममपत्यम्" इत्यनेकधा तयो[4]राशंसयांचकार ॥ ख ॥

एवंविधे च व्यतिकरे कोऽपि कान्तकार्तस्वर[5]स्वरूपमुत्फुल्लपाण्डुपुष्पमालया मेरुशिखरमिव प्रदक्षिणाक्षीणलग्नया नक्षत्रराज्याजनितशोभं जटाभारमुद्वहन्, अतिबहलमलयजरसरचितविचि[6]त्रपुण्ड्रकमण्डनाममरशैलशिलामिव रङ्गत्त्रिस्रोतसं ललाटपट्टिकां कलयन्, प्लवमान इवोज्जृम्भपङ्कजकिंजल्ककपिलकायकान्तिककल्लोलेषु, करुणारसपूर्णवक्षःस्थल[7]दीर्घिकायामन्तस्तरन्तीं बालकलहंसपक्षिपङ्क्तिमिव स्फारस्[8]फाटिकाक्षमालिकां बिभ्राणः, कुश[9]कौपीनवासाः, करकलितकुशकाण्डकमण्डलुमण्डलैः, तरुभिरिव विविधशाखैर्विधृतजटावल्कलैश्च, पर्वतैरिव समेखलैः [10]संरुद्राक्षाक्षमा-

नाकी स्वर्गी। यद्वा "चप सान्त्वने"। चपयन्ति सान्त्वयन्त्यनुनयन्त्यवश्यं चापिनः प्रसादका नाकिनो यस्य ॥ क ॥

एवंविध इति ॥ कोऽपि मुनिः सूर्यमण्डलादवातरत् ॥ कनकपिङ्गजटाभारस्य मेरुशिखरं पुष्पमालायाश्च नक्षत्रराजिरुपमानम्। लग्नं संबद्धं ज्योतिषप्रणीतं च ॥ ललाटस्य शिला तिलकानां च गङ्गोपमानम् ॥ परिवृतो मुनिभिः। कीदृशैर्विविधशाखैः। शाखा कठबह्वृचादिर्लता च। जटा केशरचना मूलं च। वल्कलं वृक्षत्वक्। तदेव तरूणां सहजं मुनीनां चाहार्यम् ॥ मेखला मौञ्जी नगान्तदेशश्च। रुद्राक्षजपमालान्वितैः। पक्षे रुद्राक्षा अक्षाश्च तरुविशेषाः ॥ मृगकृत्तिकायाः मृगत्वचः श्लेषैः सहितैः। ज्येष्ठाषाढेन प्रशस्यव्रतदण्डेन सहितैः। पक्षे मृगो मृगशिरः कृत्तिका अ-

---

१ अभिधाय तमवस्थितं पुरः; अवस्थितं पुरः. २ अभाषत. ३ अचिरात्. ४ आशंसां चकार. ५ भासुरस्वरूप; भास्वरस्वरूप. ६ त्रिपुण्ड्रक. ७ कमलदीर्घिकायाम्. ८ स्फटिकाक्षमालाम्. ९ कौपीन. १० सरुद्राक्षमालैश्च.

लैश्च, नक्षत्रैरिव समृगकृत्तिकाश्लेषैः सज्येष्ठाषाढैश्च, ससंमदैरपि नमदाकारमाकलयद्भिः, अक्रीडैरपि चक्रीडापरैः, रोमशैरपि विप्रवालकैः मुनिभिः परिवृतः, सेवितपुराणपुरुषोऽप्यजमार्दनप्रियः, प्रपन्नशंकरोऽप्यनाश्रितभवः, प्रबुद्धोऽप्यबन्दीकृतजनः, श्रमणो[1]ऽप्यजिनपरिग्रहः, ग्रहगण इव नवधात्मको लोकानाम्, धनुर्धर इव नालीकसंधः, हंस इव नदाम्भस्स्थान[2]कप्रियः, पन्नग इव नाकुलीनः, सरस्वतीसंनिवासस्य मुखमन्दिरस्य वन्दनमालयेव प्रथमोद्भेदभासिन्या दंष्ट्रिकारोमराजिरेखया श्यामलितोत्तरोष्ठपृष्ठः, कलिकालकलङ्कशङ्का[3]शरणागतैस्त्रिभिः पुण्ययुगैरिव सुसूत्रीभूय देहलग्नैः, त्रिपुष्करस्नानावसरविलग्नसरसबिसकाण्डकुण्डलै[4]रिव भक्त्याराधितत्रिपुरुषरचितरक्षासूक्ष्मरेखानुकारिभिः सितयज्ञोपवीततन्तुभिर्भूषितदेहः, शमी विद्रुमाभाधरश्च, प्रजापो विप्रजापश्च, सुतपाः कृतपश्श्लाघी च, विकलत्रः सकलत्रश्च, यमान्तानुसारी सकुशलश्च, विकचनवनलिनशङ्कया मिलन्[5]मुक्तमुग्धमधुपमण्डलेनेव रुद्रा-

श्लेषा ज्येष्ठा आषाढाश्च नक्षत्राणि ॥ ससंमदैस्तृष्णाक्षयात्सानन्दैः। तथा मदस्य गर्वस्याकारं नाकलयद्भिः। अपिर्विरोधे। स तु तुल्यार्थव्याख्यया ॥ क्रीडा विषयासक्तिः। तथा चक्रिणो विष्णोरीडा स्तुतिस्तत्परैः। विरोधे तु चः पृथक् ॥ भूमरोमयुक्तैः। विप्राणां बालकैर्डिम्भैः। विरोधे विशेषेण प्रगतकेशैः ॥ पुराणपुरुषा वृद्धाः। जनानामर्दनं पीडा ॥ प्रपन्नानामाश्रितानां शंकरः सुखंकरः । भवः संसारः ॥ प्रबुद्धो विद्वान्। बन्दीकृतो हठेन गृहीतः ॥ श्रमणस्तपस्वी। अजिनं मृगादित्वक् ॥ विरोधे तु पुराणपुरुषो जनार्दनश्च विष्णुः॥ शंकरो भवश्च शिवः॥ प्रबुद्धः सुगतः। बन्दा बन्दका बौद्धव्रतस्थाः ॥ श्रमणः क्षपणः। जिनोऽर्हन् । परिग्रहः ॥ सर्वत्र नेति भिन्नम्। वधो हिंसा ॥ अलीकसंधो मिथ्याप्रतिज्ञः ॥ दम्भवेदिनो दाम्भा मायिकाः ॥ अकुलीनो नाभिजातः ॥ ग्रहगणस्तु नवसंख्यस्वरूपः । धन्वी च नालीके शरे संधानं यस्य। हंसस्तु नदस्याम्भ एव स्थानकं तत्प्रियः। नाकुर्वल्मीकस्तत्र लीनः ॥ भक्त्याराधितत्रि-

---

१ सुश्रमणोऽपि. २ स्थानप्रियः. ३ शङ्कया शरणा. ४ कन्दलैरिव. ५ मिलन्मुग्धमधुप.

क्षवलयेन विराजित[1]वामपाणिपल्लवः, न स्मृतः स्मरापस्मारेण, नाङ्गीकृतः कृतघ्नतया, नालोकितः कितववृत्तेन, नाकलितः कलिना, न[2] निरुद्धो विरुद्धक्रियाभिः, अतितेजस्तया द्वितीय इव परब्रह्मणः, तृतीय इव सूर्याचन्द्रमसोः, चतुर्थ इव गार्हपत्याहवनीयदक्षिणाग्नीनाम्, पञ्चम इव दिक्पतीनाम्, षष्ठ इव महाभूताधिदेवतानाम्, सप्तम इव मूर्तर्तूनाम्, अष्टम इव सप्तर्षीणाम्, नवम इव वसूनाम्, दशम इव ग्रहाणाम्, अनवरतहृदयकमलकर्णिकान्तःस्फुरज्ज्योतीरूपपरमब्रह्मकान्तिकलापेनेव बहिर्निर्गच्छताच्छभस्मानुलेपेन कनकगिरिरिव विरलचन्द्रातपेना[3]पाण्डुरितदेहः, दीर्घसरसबिसकाण्डपाण्डुना प्रचण्डपवनेनोर्ध्वमुल्लासितेन जटाजूट[4]बन्धनपटप्रान्तपल्लवेन शिरः[5]पतद्गगनगलद्गङ्गाम्बुधाराहारिणो हरस्य स्वामिभक्त्या कृतानुकरणव्रतचर्यामिव [6]कलयन्, कोमले महसि त[7]रुणे वयसि वृद्धे तपसि पृथुनि यशसि गुरुणि श्रेयसि वर्तमानः, सदः सदाचाराणाम्, आश्रयः श्रुतीनाम्, मही महिम्नः, प्रपा कृपारसस्य, क्षेत्रं क्षमाङ्कुराणाम्, पात्रं मैत्रीसुधायाः, प्रासादः प्रसादस्य, सिन्धुः साधुता-

पुरुषैरिति। त्रयः पुरुषा यत्रेति समुदायिन एव समुदाय इति दर्शने बहुवचनम्। व्यतिरिक्तसमुदायपक्षस्तु नेहाश्रित इति सेवितहरिहरब्रह्मभी रक्षार्थं रचितरेखातुल्यैर्यज्ञोपवीततन्तुभिर्भूषितदेहः ॥ शमोऽस्यास्तीति शमी शान्तः। तथा विद्रुमं प्रवालं तत्तुल्योष्ठः ॥ प्रजां पाति क्रतुकृद्भ्यो हि प्रजात्राणम्। विप्राञ्ञापयति जपं प्रापयति। भट्टदर्शनान्वयत्वात् ॥ सुष्ठु तपो व्रतमस्य। तथा कौ भुवि तपसा लोकोत्तरेण धर्मेण श्लाघनशीलः। "तपश्चान्द्रायणादौ स्याद्धर्मे लोकोत्तरेऽपि च" इति विश्वः ॥ यदा कुतपो दर्भस्तदा कुतपश्लाघीत्यत्र विसर्गाभावेऽपि (शस्य द्वित्वेन) श्रुत्या विरोधप्र-

---

१ विराजितपाणिपल्लवः. २ न रुद्धः. ३ पाण्डुरित. ४ बन्धनप्रान्त. ५ गगनगलत्; गगने ललत्. ६ आकारयन्. ७ तरुणे च.

याः, तरुणार्कमण्डलमध्यान्मुनिरवातरत् ॥ क ॥

राजा तु दूरत एव तमायान्तमवलोक्य[1] विस्मयविस्फारितविलोचनो हर्षवश[2]विनिःसरद्बहलपुलकोत्तम्भितोत्तरीयवासाः ससंभ्रममासनादुत्थाय कियन्त्यपि पदान्यभिमुखं समेत्य क्षितितलमिलन्मौलिमण्डलः प्रणाममकरोत् ॥ ख ॥

मुनिरपि सदारुणान्तयापि सौम्यया दृशा विद्रुमप्रभाभिन्नया सुधासिन्धुतरङ्गमालयेव प्लावयन्नाशिषमवादीत् ॥ ग ॥

"सिन्दूरस्पृहया स्पृशन्ति करिणां कुम्भस्थमाधोरणा
भिल्ली पल्लवशङ्कया विचिनुते सान्द्रद्रुमद्रोणिषु।
कान्ताः कुङ्कुमकाङ्क्षया करतले मृद्नन्ति लग्नं च य-
त्तत्तेजः प्रथमोद्भवं भ्रमकरं सौरं चिरं पातु वः" ॥७॥

दत्ताशीश्च प्रणामपर्यस्तकर्णपूरपल्लवपरामृष्टपादपांसुरवनिपालेन स्वयमादरेणोपनीतमुच्चकाञ्चनासनमध्यतिष्ठत् ॥ घ ॥

अथ नरपतिदत्ते प्राप्तसौन्दर्यनिर्य-

तीतिः ॥ विगतकलत्रः । सकलं त्रायते ॥ अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमास्तेषामन्तःपारम् । कुशान्दर्भाँल्लान्ति गृह्णन्ति ये ते कुशला दक्षास्तैः सह । चः सर्वत्र विरोधे । तद्यथा शमीनामा तरुः । तथा द्रुमाभां धरति । विर्नञर्थे ॥ वि प्रजापवान् ॥ कुतपः कुत्सितं तपः ॥ सह कलत्रेण ॥ यमस्यान्तकस्य समीपमनुसरत्यवश्यम् । सह कुशलेन क्षेमेण ॥ क ॥

मुनिरिति ॥ राजप्रणामानन्तरम् । सर्वदा रक्तप्रान्तया दृशा प्रवालच्छुरितक्षीरोदवीच्येव प्लावयन्मुनिरप्याशिषमुवाच ॥ रक्तान्तनेत्रत्वं शुभलक्षणम् । विरोधे स इति मुनिविशेषणम् । दारुणं रौद्रम् ॥ ग ॥

सिन्दूरेति ॥ भ्रमकरं भ्रान्तिजनकम् । तच्च सिन्दूरस्पृहयेत्यादिनाभिहितम् ॥ ७ ॥

अथेति ॥ प्राप्तसौन्दर्यं रम्यं निर्यन्निःसरन्मणीनां महस्तेजो यस्मात् । तत्रासने

१ आलोक्य. २ हर्षवशात्.

न्मणिमहसि स तस्मिन्नासने संनिविष्टः।
रुचिररुचि सुमेरोः संगतः शृङ्गभागे
कमलज इव कान्तिं कांचिदुच्चैर्बभार ॥ ८ ॥
दत्त्वार्घमर्हणीयाय तस्मै सोऽपि महीपतिः।
स्वहस्तधौतयोर्भक्त्या ववन्दे पादयोर्जलम् ॥ ९ ॥
कृत्वातिथ्यक्रियां सम्यग्विनयं च प्रकाशयन्।
तस्याग्रे भूतलं भेजे नोपविष्टः स विष्टरे ॥ १० ॥
ललाटपट्टविन्यस्तपाणिसंपुटकुड्मलः।
नीचैरुवाच वाचं च चञ्चद्दशनदीधितिः ॥ ११ ॥
"अद्य मे सुबहोः कालाच्छ्लाघनीयमभूदिदम्।
त्वत्पादपद्मसंस्पर्शसंपन्नानुग्रहं गृहम् ॥ १२ ॥

यतः समस्तमुनिमनुजवृन्दारकवृन्दवन्दनीयपादारविन्दाः, परमानन्दपरिस्पन्दभाजः पांसूनिव पार्थिवान्, तृणमिव स्त्रैणम्, निधनमिव धनम्, रोगानिव भोगान्, राजयक्ष्माणमिव लक्ष्मीम्, आकलयन्तः सकलसंसारसुखविमुखाः कस्य भवादृशा भवनमवतरन्ति ॥ क ॥

तदहमद्यानवद्यस्य भगवन्नभूवं भूम्नो यशोराशेर्भाजनम्, आरूढः पदं श्लाघार्हम्, आगतो गुणिषु गौरवम्, उपलब्धवान्धन्यताम्, संपन्नः पुण्यवतामग्रणीः, जातो जनस्य वन्दनीयः ॥ख॥

तदित्थमनेकप्रकारोपकारिणां किं ब्रवीमि, किंकरोऽस्मीति पौनरुक्त्यं सर्वस्वामिनाम्। केनार्थित्वमित्यनुचितादरो निःस्पृहाणा-

आसीनः मुनिः कांचिदपूर्वां शोभां बभार ॥ रुचिरकान्तौ सुमेरोः शृङ्गभागे स्थितो ब्रह्मेव ॥ ८ ॥

---

१ प्रशस्त. २ मनुजवृन्दवृन्दारक.

म् । इदं मे सर्वस्वमात्मीक्रियतामिति स्वल्पोपचारः स्वाधीनाष्टगुणैश्वर्याणां भवताम् । तथापि प्रणयेन भक्त्या च मुखरितः किंचिद्विज्ञापयामि ॥ क ॥

"इदं राज्यमियं लक्ष्मीरिमे दारा इमे गृहाः ।
एते वयं विधेया वः कथ्यतां यदिहेप्सितम्" ॥ १३ ॥

मुनिरप्यवनीशस्य विनयमभिनन्द्य स्निग्धमुग्धस्मितसुधाधवलिताधरपल्लवमब्रवीत्—"उचितमेतद्भवादृशां वक्तुं कर्तुं वा ॥ ख ॥

उपकर्तुं प्रियं वक्तुं कर्तुं स्नेहमकृत्रिमम् ।
सज्जनानां स्वभावोऽयं केनेन्दुः शिशिरीकृतः ॥ १४ ॥

अपिच ।

यथा चित्तं तथा वाचो यथा वाचस्तथा क्रिया ।
चित्ते वाचि क्रियायां च साधूनामेकरूपता ॥ १५ ॥

अपिच ।

विवेकः सह संपत्त्या विनयो विद्यया सह ।
प्रभुत्वं प्रश्रयोपेतं चिह्नमेतन्महात्मनाम् ॥ १६ ॥

तदेतत्समस्तमस्ति त्वयि दीर्घायुषि, श्रूयतामिदानीं प्रस्तुतम् । अनवरतसुरासुरचक्रचूडामणीकृतचरणरजसश्चन्द्रचूडामणेर्देवस्यादेशेनागता वयम् । अवाप्स्यसि सकलजलधिजलकल्लोलमालालंकारभाजो भुवो भर्तुरुचितमतिमान्यं धन्यमसामान्यं कन्यारत्नम्" इति ॥ ग ॥

उपेति ॥ इन्दुः केन शिशिरीकृतः । स्वभावादेष शिशिर इत्यर्थः ॥ १४ ॥
यथेति ॥ वाचीत्येकत्वेऽपि जात्या बहुत्वप्रतीतिः ॥ १५ ॥
विवेक इति ॥ प्रश्रयः प्रणयः ॥ १६ ॥

१ स्निग्धस्मित. २ पल्लवस्तमब्रवीत्. ३ उपकर्तुं च. ४ क्रियाः. ५ सतां मतम्. ६ तदिदं सर्वमस्ति दीर्घायुषि त्वयि. ७ जलनिधि.

एवमुक्तवति तस्मिंस्तपस्विनि पुत्रार्थिनी कन्यालाभं मन्यमाना विप्रियं प्रियंगुमञ्जरी जरन्मञ्जीररवजर्जरविलक्षाक्षरया गिरा कुर्वाणेव क्रोधपरिस्पन्दं निन्दास्तुतिधर्मेण नर्मलीलाकलहमकरोत् ॥ क ॥

"नयशोभाजन, कृतकुटीककुशास्त्रग्राहिन्नवेदनोद्गारं कृतवानसि क्वापि। सर्वदानादेयेषु प्रतिकूलवर्तिषु जलेषु रतिं कुर्वाणः पाठीनाहिंसको धीवर इवोपलक्ष्यसे। कुरङ्गेषु प्रीतिं बध्नासि। कदम्बैः कुरबकैर्बहुकदलीकैः पलाशप्रायैः कुजन्मभिः सह संवससि ॥ ख ॥

एवमिति ॥ क्रोधस्य परिस्पन्दं चेष्टां कुर्वाणेव ॥ क ॥

नयेति ॥ यशो भाजनेत्यामन्त्र्यस्य नञ्योगः । तथा कृतानि कृत्रिमाणि, नतु वेदवदपौरुषेयाणि । कुत्सितटीकानि कुशास्त्राणि गृह्णासीत्येवंशीलः । यस्मादवेदो वेदपाठरहितः। इदमपि द्वयमामन्त्र्यम्। क्वापि न उद्गारमुच्चारणं कृतवानसि । वक्तुमपि न वेत्सीत्यर्थः ॥ स्तुतिपक्षे नयश्च शोभा च ते जनयसि। यद्गृहमागतोऽसि तस्येति शेषः। तथा कृता कौ पृथिव्यां टीका गमनं येन। स्वर्गिणाप्यस्मदनुजिघृक्षयेति शेषः॥ कुशो दर्भ एवास्त्रं गृह्णास्यवश्यम्। एतेनादृश्यशत्रूणामपि विघातोक्तिः॥ वेदना दुःखं तदर्थमुद्गारमुच्चारणं क्वापि नाकरोः। एतेन प्रियंवदत्वोक्तिः ॥ निन्दायां अनादेयेष्वश्रद्धेयेषु जडेषु रतिं विदधद्धिंसको धीवर इवावबुध्यसे। धीवरोऽपि किल नादेयपयःसु कूलं कच्छं प्रति वर्तमानेषु रतिं कुरुते। पाठीनाहारत्वात् ॥ पक्षे सर्वकालमेव नदीभवेषु कूलं कूलं प्रति वर्तमानेषु वारिषु रागमासक्तिं कुर्वाणः पाठवान् 'न हिंसाशीलो' धिया बुद्ध्या वर एवावगम्यसे। एतेन तीर्थस्थास्नुर्दयालुर्ज्ञानी च ॥ कुत्सितो रङ्गो वासना येषां तेषु विषयेषु प्रीतिमान् ॥ पक्षे कुरङ्गा मृगास्तेषु प्रीतः ॥ कदम्बैः कुमातृकैः । कुत्सिता अम्बाः कदम्बाः ताश्च दुश्चेष्टितैः कुर्वन्ति आचक्षते वा इति णिजन्तादचि सिद्धम्। बहुव्रीहौ तु कोः कन्न भवति। कुत्सितो रवो येषां

---

१ कन्यालाभमलाभं मन्यमाना ; कन्यालाभं विप्रियं मन्यमानाः. २ जर्जरिताक्षरविलक्षया. ३ वाचा.

किमन्यद्ब्रूमो वयम्

यस्य ते सदाचारविरुद्धः पुष्पवत्कान्ताराग एव प्रियः ॥ क ॥

तदलमनेन तापसहितेन कन्यावरप्रदानेन" इति ॥ ख ॥

एवमभिहितः सोऽपि तां बभाषे ॥ ग ॥

"दोषाकरमुखि, किं मामुपालभसे। प्रायः प्राणिनामीशः शंभुरेव शुभाशुभं कर्मालोक्य तुलाधर इव तुलितं फलमुपकल्पयति॥घ॥

तथाहि ।

यद्यावद्यादृशं येन कृतं कर्म शुभाशुभम् ।
तत्तावत्तादृशं तस्य फलमीशः प्रयच्छति ॥ १७ ॥

अथवा ।

मत्तमातङ्गगामिनि, यस्यास्तवाप्रमाणालोचनश्रीः सा त्वं बलि-

तैः । कुत्सितमलीकं कदलीकम् । कोः कत् । बहु कदलीकं येषाम् । तथा पलं पिशितमश्नन्ति ये तेषां प्रायैः सदृशैः । तथा कुत्सितं जन्म येषां तथाविधैः सह वासं विधत्से ॥ पक्षे कदम्ब-कुरबक-कदली-पलाशा ये कुजन्मानः कौ पृथिव्यां जन्म येषामिति कृत्वा भूरुहस्तैः सह संवससि। मुनयो हि मृगनगप्रियाः । वनवासित्वात् ॥

यस्येति ॥ पुष्पवतीषु हि कान्तासु रागः आसक्तिः । आचारविरुद्धः कुलधर्मानुचितः । पक्षे सदाचारेत्यामन्त्रणम् । विभिः पक्षिभी रुद्धः पुष्पवान्कान्तारस्यागस्तरुरेव प्रियः ॥ क ॥

तदिति ॥ तस्मात् तापस तपस्विन् हि स्फुटं ते तव संबन्धिना कन्यावरप्रदानेन नालं न पर्याप्तं नेष्टं पूर्यत इति यावत् । यतोऽहं पुत्रार्थिनीति । अथवा तापः संतापस्तत्सहितेन । पक्षे तापसेत्यामन्त्रणम् । तेनानेन कन्यावरप्रदानेनालं नान्यत्प्रार्थनीयमित्यर्थः ॥

दोषेति ॥ दोषाणामाकरो मुखं यस्यास्तत्संबोधनम् ॥ पक्षे दोषाकरश्चन्द्रः ॥घ॥

मत्तेति ॥ मत्तः क्षीबो मातङ्गः शबरस्तद्वद्गच्छसि चेष्टसेऽवश्यम् ॥ स ह्यनुचितचेष्टः त्वमपि तथा क्षीबा ॥ म्लेच्छाभिगमस्त्वनुचितत्वान्न व्याख्येयः ॥ पक्षे मातङ्गो हस्ती ॥ यस्या भवत्या आलोचनश्रीर्विवेकसंपदप्रमाणा प्रत्यक्षादिप्रमाणापेता सा

१ उक्तः. २ आलोच्य. ३ तुलाधार. ४ अनुकल्पयति.

संश्रयावलग्ना कस्य नाधिक्षेपं जनयसि ॥ क ॥

तदलमनेनालापालसत्प्रपञ्चेन । गतो भूयिष्ठो दिवसः । समासन्नोऽस्माकमाह्निकसमयः । सीदत्येषा ब्रह्मपरिषद् । गगनमण्डलमध्यमारोहति भगवानशेषकल्याणचिन्तामणिस्तरणिः । अरविन्दारुणवदने न नक्तं समयमनुपालयन्त्यमी मुनयः । अनुमन्यस्व । यामो वयम्" ॥ ख ॥

इत्यभिहिता सा प्रियंगुमञ्जरी "महर्षे, मर्षणीयोऽयमेकस्त्यक्तकुलवधूधर्मो नर्मापराधः । स्वीक्रियन्तामेतानि विविधान्युल्लस-

त्वं बलिनो बलवतो राज्ञः संश्रयेऽवलग्नावष्टब्धा कस्य पूज्यस्यापूज्यस्य वा अधिक्षेपं तिरस्कारं न करोषि । सर्वस्यापि करोष्येव ॥ पक्षे लोचनश्रियः प्रसृत्यादिप्रमाणातिरिक्तत्वम् । बलिरुदररेखा । अवलग्नं मध्यम् । एवंविधा सा त्वं शुभलक्षणा कस्य आधिक्षेपं मनःपीडाया अपनोदं न करोषि ॥ क ॥

तदिति ॥ तस्माद् । अलं पूर्यतामनेन । आलापे संभाषे आलस्याभव्यस्य सतो भव्यस्य च प्रपञ्चेन विस्तारेण । प्रकृतं प्रक्रियत इति भावः ॥ उक्तयो हि सप्रतिपक्षा भवन्तीत्यालप्रतिषेधे सतोऽपि प्रतिषेधः ॥ तथाहि—"सन्तः सच्चरितोदयव्यसनिनः प्रादुर्भवद्यन्त्रणाः सर्वत्रैव जनापवादचकिता जीवन्ति दुःखं सदा । अव्युत्पन्नमतिः कृतेन न सता नैवासता व्याकुलो युक्तायुक्तविवेकशून्यहृदयो धन्यो जनः प्राकृतः" ॥ अथवा । आलापस्य आलेनावस्तुरूपेण सन् न परमार्थेन सन् योऽसौ प्रपञ्चस्तेनालं निरर्थकत्वात् ॥ यदुक्तम्—"यदेवार्थक्रियाकारि तदेव परमार्थसत्" ॥ दारुणं नयशोभाजनपाठीनहिंसकेत्यादिकस्य मुनीनां प्रतिपादनाद्रौद्रं वदनं यस्यास्तस्याः संबोधनम् । न अरविं नक्तं समयम् । अपितु सरविं संध्यासमयं मुनयोऽप्यनुपालयन्ति ॥ नक्तमित्यनेन संध्या लक्ष्यते ॥ वयमपि मुनयस्ततोऽस्माकं संध्यावसर इत्यभिप्रायः ॥ स्तुतौ अरविन्दवदरुणं वदनं यस्यास्तस्याः संबोधनम् । नैते मुनयः संध्याकालमनु पश्चात्पालयन्ति ॥ अवश्यविधेयत्वात्तत्कालमेवेत्यर्थः ॥ तस्मादनुजानीहि यामो वयम् ॥ ख ॥

इतीति ॥ इत्युक्ता सा राज्ञी महर्षे इत्याद्यभिधायातिथ्यसत्क्रियायोग्यमुपादाय

१ माध्याह्निकसमयः. २ ब्राह्मी परिषद्. ३ गगनमध्यम्. ४ भगवानेष. ५ लोचने. ६ मर्षणीयोऽस्माकमयम्. ७ एतान्युल्लसन्.

न्मयूखमञ्जरीरचितेन्द्रचापचक्राण्याभरणानि। गृह्यतामिदमिन्दुद्युतिधवलमनलशौचं चीनांशुकपट्टपरिधानयुगलमियं च कुसुममालिका" इत्यभिधायास्यान्यदप्यतिथिसत्कारोचितमुपढौक्य प्रसादनाय प्रणाममकरोत् ॥ क ॥

मुनिस्तु "गौरमुखि, वृत्तमुक्तोऽयं हारः, दोषालयमङ्गदम्, जघन्यपदाश्रयं काञ्चीदाम, सदापदाधिष्ठानं नूपुरम्, अलंकारो भवद्विधानामेव राजते। नास्माकम्। इयं च परिमलवाहिनी माला निबद्धमधुकरालापाचीनं वासश्च तवैवोचितम्" इत्यनेकधा श्लिष्टालापलीलयातिवाह्य काश्चित्कालकलाः करकलितकमण्डलुर्मण्डलेश्वरमापृच्छ्य तां च प्रियंगुमञ्जरीं जरठतमालनीलमम्बरतलमुदपतत् ॥ ख ॥

हर्षयितुं प्रणतिं चक्रे ॥ क ॥

मुनिस्त्विति ॥ वृत्तमुक्तो वर्तुलमौक्तिकः शीलरहितश्च ॥ दोषाशब्दो भुजपर्याय इति दोषा बाहू आलयो यस्य। दोषा अवद्यानि च ॥ यद्विश्वः—"दोषा रात्रौ भुजेऽपि च" ॥ जघने भवं जघन्यं गर्हितं च। तादृक् पदमाश्रयो यस्य ॥ सदा शश्वत् पदे पादावधिष्ठानमाश्रयो यस्य। पक्षे सतामप्यापदामासमन्तादधिष्ठानं नगरम्। आपदामाधेश्च स्थानमिति वाक्ये तु सुषामादित्वात्षत्वम् ॥ इति प्रकृतेऽलंकारस्य वर्णनं गौणवृत्त्या दूषणम्। तस्मादेवं दोषयुक्तोऽलंकारो युष्मादृशीनामेव भाति, नास्माकं यतीनाम्। यतो हि चारित्रमण्डनाः। नर्मणस्तु अलमत्यर्थं कारो राजग्राह्यभागस्त्वादृशीनां राजपत्नीनां संगच्छते, नास्माकं वनवृत्तीनाम्। लोकस्योपकुर्म एव वयं, न कुतोऽपि किंचित्प्रतिगृह्णीम इति भावः ॥ इयं च सुगन्धिः सभृङ्गालापा स्रक् चीनमंशुकं च तवैव युक्तं, नास्माकम्। यस्मात् परितो मलं वहति। तथा निबद्धमधुना समवेतसुरया कराला। एवंभूतासौ स्रक् ॥ अपाचीनं निकृष्टं च वासः ॥ इति समयं कंचिच्छ्लेषोक्तिभिर्निर्गम्य गगनमुदगात् ॥ ख ॥

---

1 च मणताम्.

वियति विशदविद्युल्लोललीलायमाने[1]
स्फुरदुरुपरिवेषाकारकान्तौ मुनीन्द्रे ।
अथ गतवति तस्मिन्विस्मयोत्तानिताक्षः
क्षितिपतिरवतस्थे स्थाणुसंस्थां दधानः ॥ १८ ॥

स्थित्वा च तत्कथावस्थया काश्चित्कालकलाः कलापिकुलोत्कण्ठाकारिणि[2] रणति नवजलधररवरमणीये मध्याह्नगम्भीरभेरीरवे[3] शङ्खयुगलके, विशति बिसकाण्डकवलनमपहाय तीव्रतरतपनतापताम्यत्तनुनि[4] नवनलिनीछदच्छायामण्डलमुपवनदीर्घिकावतंसे हंसकुले, कुमुदकुवलयाम्भोजपत्रपुञ्जपञ्जरान्तरमनुसरति परिहृतोष्णमधुनि मुकुलितपक्षपुटे षट्चरणचक्रवाले, चटुलाग्रिमखुरशिखरोल्लिखितधरणिमण्डलेषु खण्डितखर्वदूर्वानालनील[5][6]घुरघुरायमाणघोणाकोणेषु विमुच्यमानेषु पिपासातुरतुरंगेषु, घर्म[7]विघूर्णितेषु ससूत्कारकरविमुक्तसीकरासारवर्षणार्द्रिताङ्गणेषु मज्जनाय सज्जितेषु सेवागतराजकुञ्जरेषु, क्रीडागिरिसरितमवतार्यमाणेषु लीलामृगमिथुनेषु, पयोभिः पूर्यमाणासु पञ्जरपक्षिपयःपानपात्रीषु, उद्यानारघट्टतटीं टीकमानासु कोयष्टिमयूरमण्डलीषु, क्रीडासरः सरत्सु संगीतश्रमस्विन्नखिन्नकिंनरेषु,[8] कूपकूलकुलायकोणकूणितेष्वातपातङ्काकुलकलविङ्केषु, भवनवनवापीपुलिनपालिपांसुपटलमुत्तप्तमपहाय शीतलशैवलावलिं श्रयति तरलितनक्रे, क्रेंकारयति क्रौञ्चचकोरचक्रवाकचक्रे,[9] क्रीडाप्ररोपितप्राङ्गणप्रान्ततरु-

वियतीति ॥ विस्मयान्निश्चलाकृतिर्नृपः स्थाणुनोपमितः ॥ १८ ॥

स्थित्वा चेति ॥ राजापि निश्चलनेत्रस्तथा तमवलोक्य कंचिच्च समयं तत्कथा-

१ लीलायमान. २ कारिणी नव. ३ सखशङ्खः. ४ तापार्तं प्रततनलिनी. ५ खण्डिताखर्व. ६ दूर्वाङ्कुर; दूर्वाचय. ७ महाघर्म. ८ श्रमखिन्न. ९ क्रौञ्चचक्रवाक.

शिखरमध्ये मध्याह्नबलिपिण्डाय पिण्डिते ऋेंकारयति काकवयसां कर्णकटु कुटुम्बके, बकवलयवलक्षान्क्षिपति दिक्षु दीप्रान्दीप्तिदण्डांश्चण्डरोचिषि, विसर्ज्य परिजनं राजा मज्जनभवनायोदचलत् ॥क॥

गत्वा च पृथ्वीवलयमिव पयःपूर्णसमुद्रद्रोणीकम्, केदारोदरमिव सकलशालिस्थानम्, श्रोत्रियद्विजजनभवनमिव सकलधौतपट्टम्, अतिरमणीयं मज्जनभवनमवतारिताभरणः स्नानपीठे निषसाद ॥ ख ॥

आसन्नस्थितश्चास्यावसरपाठकः पपाठ ॥

"वररजनीकरकान्ते चित्राभरणे निशानभःसदृशे ।
तव नृप मज्जनभवने सवितानाभाति परमश्रीः ॥ १९ ॥

भिरेवातिह्य मध्याह्नस्नानसद्मने प्रतस्थे ॥ क ॥

गत्वा चेति ॥ मज्जनगृहं गत्वा स्नानपीठे निषण्णः ॥ गृहं विशिष्यते । पयसा पूर्णा समुद्रा मुद्राङ्किता द्रोणी जलपात्री कुण्डिका यत्र ॥ स्नानीयजलादिषु मुद्रा दीयत इति राजधर्मः ॥ तथा कलशाः कुम्भास्तेषामालिः पङ्क्तिस्तया सह युक्तानि स्थानानि प्रदेशा यत्र ॥ तथा कलधौतस्य हेम्नः पट्ट आसनं तेन सह ॥ अन्यत्र पयःपूर्णः समुद्रो द्रोणी च यत्र ॥ द्रोणी देशविशेषः ॥ यद्विश्वः—"द्रोणी स्यान्नीवृदन्तरे" ॥ केदारोदरं तु समग्रशालिस्थानम् ॥ तथा सकलाः सर्वे धौताः क्षालिताः पट्टा आसनानि यत्र ॥ ख ॥

वरेति ॥ नृप इति संबोधने । अधुना तद्विशेषणानि ॥ वर श्रेष्ठ ॥ रजनीकरस्य चन्द्रस्येव कान्तिरस्येति चन्द्रद्युते ॥ रणे युद्धे चित्रो व्याघ्रस्तद्वदाभा अस्येति तथोक्त ॥ तथा निशानैस्तेजस्विभिर्बभस्तीति कृत्वा सुभटरम्य । अथवा निशानं निर्मलं बभस्ति शोभते ॥ तथा सदृश इः कामो यस्येति कृत्वा कंदर्पप्रतिम ॥ मज्जनसदने सवितानाः सोल्लोचा उत्कृष्टश्रीर्द्योतते ॥ अथ च मज्जनसवने सविता रविर्नाभाति ॥. परं केवलम् । अश्रीर्निष्प्रभ एवेत्युक्तिलेशः ॥ यतो निशायां यन्नभस्तत्सदृशे । प्रद्योतनानुद्योते हेतुरयम् ॥ तथा चित्राण्याभरणानि यत्र । नभःपक्षे चित्रा नक्षत्रम् ॥ तथा वरा श्रेष्ठा रजनी हरिद्रा तां कुर्वन्ति सत्कुर्वन्तीति

१ द्विजभवनम्.

अनन्तरमुत्तुङ्गकनककुम्भशोभास्पर्धिकुचमण्डलार्धबद्धोत्तरीयांशुकपरिकराः, [1]सस्मरस्मितविकारकारिण्यः, [2]दर्शितसीत्काराङ्ग[3]मलनविन्यासाः, काश्चित्समुद्रवेला इव समकरोत्क्षिप्तामलकाः, काश्चि[4]त्तरुणतरुमञ्जरीराजय इव भृङ्गारंभरभुग्नदेहाः, काश्चिदन्यायकारिण्य इव सभाजनोद्धूलनकराः, काश्चिन्मलयाचलभूमय इवोत्कृष्टगन्धधारितैलाः, काश्चिद्देवलोकवसतय इव चामरधारिण्यः, काश्चित्पुरंदरपुरंध्रिका इव सविभ्रमकङ्कतिकोपान्तेनाकेशप्रसादनमाचरन्त्यः, काश्चिद्विन्ध्याटव्य इव दर्शितविविधपादपालिकाः, काश्चिद्राघवसेना इव कृतप्रहस्तमलनाः, काश्चिद्व्याकरणवृत्तय इव बाहुलतां संवाहयन्त्यः, मज्जननियुक्ताः कामिन्यो राजानं स्नपयामासुः॥

कृत्वा रजनीकरां गन्धकारकास्तैः कान्ते। नभस्तु वरो दीप्तिमान् सूर्यभावाद्यो रजनीकरः शशी तेन कान्तम्॥ १९॥

अनन्तरमिति॥ परिकरमाबध्येति जघने पटीवेष्टिं कृत्वा कामिन्यो राजानमस्नपयन्॥ समेनाविषमेण करेणोत्क्षिप्तान्यामलकानि यकाभिः। आमलकचूर्णं हि स्नानीयम्॥ भृङ्गारः कनकालुका॥ भाजनं पात्रम्। तत्रोद्धूलनं चूर्णविशेषः। तेन सह करः पाणिर्यासाम्। सभाजनोद्धुलनपाठे तूद्धलनमुद्वर्तनम्॥ उत्कृष्टानि उद्धृतानि गन्धधारीणि तैलानि याभिः॥ चामरं प्रकीर्णकम्॥ विशिष्टो भ्रमश्चलनं तेन सह या कङ्कतिका केशमार्जनी तस्या उपान्तेनासमन्तात्केशानां विरलीकरणमाचरन्त्यः॥ पालिः पर्यायावसरः॥ यदजयः—“पालिः कर्णलतायां स्यात्प्रदेशे पङ्क्तिचिह्नयोः। दृष्टश्मश्रुस्त्रियामश्रौ पर्यायावसरे क्रमे”॥ ततश्च दर्शिता विविधा पादपालिः पादमर्दनावसरो याभिः॥ कृतं प्रकर्षेण हस्तमलनं याभिः॥ बाहुलतामिति बाहुर्लतेवेति॥ पक्षे मकरैः सह उत्क्षिप्तममलं कं जलं याभिः॥ भृङ्गाणामार आगमनं तस्माद्यो भरः॥ तथा अवाच्यवचनैः सभाजनस्योद्धूलनं मालिन्यं कुर्वन्त॥ उद्धलनपाठे तु सभाजनादुद्धलनमपसरणम्॥ उत्कृष्टगन्धधारिता एला ओषधिविशेषो याभिः॥ च पृथक्। अमरा देवाः॥ सविभ्रमं सविलासं कं सुखं यत्र। कंतिकोपान्ते कियत्कोपविगमे

१ सस्मेर. २ दर्शितससीत्कार. ३ वलन. ४ तरुणमञ्जरी.

किं बहुना।

तास्तास्तं स्नपयामासुरङ्गनाः कुम्भवारिणा।
एत्य याः स्युः प्रसन्नेन द्युलोकात्कुं भवारिणा ॥ २० ॥

अथ विमलदुकूलप्रान्तनिर्नीरिताङ्गः
परिहितसितवासाः स्वल्पमाङ्गल्यभूषः।
शुचिरुचितविधिज्ञः स स्वयं स्वस्थचित्तः[1]
कुशकुसुमकरः[2] सन्कर्म धर्म्यं चकार ॥ २१ ॥

अनन्तरमावर्तितानेकस्वर्णवल्लभो वल्लभो जनस्य भोजनस्य समये स मयेन निर्मितया तया सधर्माणं धर्मसुतसभया सभयागतजनजनितारम्भोऽरं[3] भोजनस्थानवेदीं जनस्थानवेदी गतवान् ॥क॥

तस्यां च बहुविस्तीर्णस्वर्णभोजनपात्रपत्रशङ्खशुक्तिसनाथायामुपविष्टस्यास्य क्रमेण परिकरमाबध्य गाढमाढौकन्त स्वस्य स्वस्यानुहारिणोऽन्नविशेषानादाय सूपकाराः सूपकाराङ्गनाश्च ॥ ख ॥

नाकेशस्य दिवस्पतेः प्रसादनं कुर्वन्ति ॥ कतीति पुरंध्रिकाविशेषणं वा ॥ दर्शिता विविधाः पादपानामालयो याभिः ॥ प्रहस्तो रावणप्रतिहारस्तस्य मलनमभिभवः ॥ बाहुलता बाहुलकम् ॥

ता इति ॥ भवस्य संसारस्यारिः शिवस्तेन। प्रसन्नेन हेतुना। द्युलोकात्स्वर्गलोकात्। कुं पृथ्वीम्। एत्यागत्य। याः। स्युर्भवेयुः। तास्ताः स्त्रियः। तं कुम्भवारिणा कलशोदकेन स्नपितवत्यः ॥ २० ॥

अथेति ॥ निर्नीरितं निर्जलीकृतमुद्गमितमित्यर्थः ॥ २१ ॥

अनन्तरमिति ॥ आवर्तिता येऽनेके स्वर्णस्य वल्लास्तौल्यमानविशेषास्तद्वल्लभा यस्य ॥ तथा वल्लभो दयितो लोकस्य भोजनस्य काले स राजा मयेन दैत्यवर्द्धकिना कृतया तया प्रतीतया युधिष्ठिरस्य सभया सधर्माणं सदृशीं भोजनस्थानवेदीम्। सभयानामागतानां शरणं प्रपन्नानां जनानां जनितरक्षोपक्रमः। अरमत्यर्थं जनानां स्थानवेदी लोकस्योचितासनज्ञः प्राप्तवान् ॥ क ॥

तस्यां चेति ॥ सूपकारा औदनिकाः सुष्ठूपकारकाश्च ॥ ख ॥

---

1 स्वस्थचेताः. 2 कुसुमकुशः. 3 जनितरक्षारम्भोऽरम्.

तथाहि ।

भक्तास्तस्य भक्तम्, मुद्रा मुद्रान्, मोदका मोदकान्, अशोकवर्तिन्योऽशोकवर्तीः, समांसा मांसम्, नानाशाकाः शाकानि, व्यञ्जना व्यञ्जनम्, अपरास्तु काश्चिदक्षीरा अपि क्षीरम्, अघारिका अपि घारिकाः परिवेषयामासुः ॥ क ॥

सोऽप्यधीशो भूभुजां भुञ्जानो भोज्यम्, लिहँल्लेह्यम्, आस्वादयन्स्वादु, चूषयञ्चूष्याणि, पिबन्पेयानि, आहारमकरोत् ॥ ख ॥

अनन्तरमाचम्य चन्दनेनोद्वर्तितपाणिपल्लवः[1] शीघ्रमाघ्राय धूपधूमम्, आस्ये निक्षिप्य[2] कस्तूरिकाकुङ्कुमकर्पूरकर्बुराणि[3] क्रमुकफलशकलानि, आदाय च वित्रस्तमृगतर्णकर्णकप्राणि शुक्तिशुक्लानि ताम्बूलीदलानि, तस्मात्प्रदेशादपरमवकीर्णकुसुमहारि विस्तीर्णास्तीर्णस्वर्णमयवैदूर्यपर्यन्तपर्यङ्काङ्कमाप्तैः सह विनोदास्थायिकास्थानमगात्[4] ॥ ग ॥

तत्र च सकामकामिनीकमलकोमलकरपुटपीड्यमानपादपल्लवः नर्तयन्नाट्यपरिपाटीपटून्नटान्, भावयन्नमृतस्रुतः कविवाचः, वाचयंश्चिरंतनकविकथाः, शृण्वन्वीणाप्रवीणकिंनरमिथुनगीतानि,

भक्ता इति ॥ भक्ताः प्रसादकाः ॥ मुदं गच्छन्तीति मुद्राः ॥ मोदयन्तीति मोदकाः ॥ न शोके वर्ततेऽभीक्ष्णमशोकवर्ती नीर्नायको येषां यासां च ॥ समोंऽसो यासाम् ॥ नाना अनेकप्रकारा आशा येषां यासां च ॥ शेषाद्विभाषेति कप् ॥ विशिष्टाञ्जनाः ॥ अक्षीणि ईरयन्ति विभ्रमात्कम्पयन्ति ॥ अघस्य पापस्य अरिकाः शत्रुरूपाः ॥ भक्तमित्यादि कर्मपदानि भक्ष्यार्थानि ॥ परिवेषणमत्र भोजनस्य भाजने क्षेपणम् ॥क॥

अनन्तरमिति ॥ त्रस्तस्य हि मृगशावस्य कर्णौ स्तब्धौ भवतः । ताम्बूलीदलान्यपि तादृशीति भावः ॥ ग ॥

---

१ चन्दनोद्वर्तित. २ विक्षिप्य. ३ कस्तूरिकाकर्पूर. ४ विनोदस्थानम्.

आलोकयँल्लोचनोत्सवकरान्विलासिनीलास्यविलासान्, वादयन्मृदुवाद्यविशेषान्, अवधारयन्[1]वांशिकवाद्यवेणु[2]निक्काणान्, कलगिरः पाठयन्पञ्जरशुकान्, कान्ताकुचकुम्भमण्डलावष्टम्भलीलयापराण्हसमयमतिवाहितवान् ॥ क ॥

क्रमेण च चषकायमाणविकचकमलमध्यमधुपानमत्त इव पुनर्वारुण्याशयाऽभिभूतभासि मदादिव लोहितायमाने [3]निपतति मुक्तांशुकेंऽशुमालिनि, वनान्तर[4]तरुशिरःश्रित[5]शाखाशिखरेषु गलद्वहलकिञ्जल्कपुञ्जपिञ्जरासु मञ्जरीष्विव विलम्बमानासु दिनकरदीधितिषु, विस्तीर्णशिलावकाशजघनायामुल्लसल्लोहिताधरपल्लवायामस्ताचलवनराजिरेखायामुपरि पतितमवलोक्य रागिणमहर्पतिमीर्ष्यारोषभरादिव जाते जपापुष्पनिचय[6]रुचि पश्चिमाशामुखे, मुखरयति नभो निजनीड[7]निलयनाकूत[8]कूजितजरदण्डजव्रजे, व्रजति सरः संध्याविधिविधित्सया द्विजन्मजनमुनिनिकाये, कालागुरु[9]रसाञ्जनराग इव श्यामलयति गगनलक्ष्मीमभिसारिकाबन्धावन्धकारे, राज्ञः संध्यावसर[10]मावेदयन्किंनरमिथुनमिदमगायत् ॥ ख ॥

"भोगान्भो गाङ्गवीचीविमलितशिरसः प्राप्य शंभोः प्रसादा-

क्रमेणेति ॥ अन्योऽपि मधुपानेन माद्यति। पुनः पुनर्मधुवाञ्छया निष्प्रभः स्यात्। तथा क्षीबतया आरक्तः सन्निर्वस्त्रो भूमौ पतति ॥ विस्तीर्णशिलावकाश एव जघनं श्रोणी यस्याः ॥ तथा उल्लसन्तो रक्ता अधरा अधःस्थिताः प्रवाला यस्याः। ईदृश्यामस्ताचलारण्यराजौ उपरिष्टात्प्राप्तं रागिणं रक्तं द्युमणिं वीक्ष्य रोषादिव पश्चिमदिगानने रक्ते जाते ॥ अन्यस्या अपि मुखमीदृग्गुणायामपरकान्तायामनुरागिणमुपरि पतितं पतिमवलोक्येर्ष्यावशाद्रक्तं स्यात् ॥ ख ॥

भोगानिति ॥ भोगानित्यनन्तरो भोःशब्द आमन्त्रणे। गाङ्गोर्मिनिर्मलीकृता-

---

१ वाद्यमानवेणु. २ निक्कणान्. ३ पतति. ४ तरूच्छ्रित. ५ शिखरमगलत्. ६ रुचिरुचिरे. ७ निलयनाकुल. ८ कूजितैर्जरद्; कूजितवति जरद्. ९ रसाङ्गरागः. १० आवेदयितुम्.

न्मोहान्मोहानभिज्ञाः क्वचिदपि भवत प्राणिनो दर्पभाजः।
यस्माद्यः स्मार्तविप्रप्रणतिनुतपदः सर्वसंपन्नभोगो
भास्वान्भाः स्वाङ्गभूता अपि स परिहरन्नस्तमेष प्रयाति" २२

एतदाकर्ण्य नरपतिः सांध्यं विधिमन्वतिष्ठत् ॥ क ॥

क्रमेण[1] प्रचुरचलच्चाष[2]कुलकालकान्तिकाशिभिर्बहल[3]तमः कल्लोलैरालोडिते लोके लोकेश्वरो विहितविकालवेलाव्यापारः पारसीकोपनीतपारावारपारीणपारावतपतत्रिपञ्जरसनाथे विकीर्णवासधूलिनि धूपधूममुचि विचित्रचित्रशालिनि प्रान्तप्रदीपित[4]दीपदीप्तिदण्डखण्डिततमसि सज्जितशय्ये शय्यागृहे गृहीतस्पृहणीयाङ्गरागो रागसागरकल्लोल[5]लोचनयानया प्रियया प्रियंगुमञ्जर्या अलीककलहकोपकुटिलभ्रमद्भ्रूकोणतर्जनजनितस्मितः स्मरविकारकारिकरिकलभकुम्भविभ्रमायमाणोत्तुङ्ग[6]पीवरकुच[7]कुम्भपीठमारो[8]पितो रजनीमनैषीत् ॥ ख ॥

एवमस्य सकलसंसारसुखपरम्परामनुभवतो यान्ति दिवसाः॥ग॥

कदाचिच्चारुचामीकराचलचलद्देहाधिदेवतेव बहुधानन्दने सु-

ङ्गस्य शंभोः शिवस्य प्रसादाद् भोगान् प्राप्य 'भो दर्पभाजः प्राणिनः' मोहात्सकाशाद् ऊहानभिज्ञा अविमर्शकाः क्वचिदपि विषये मा भवतेति। मायोगेऽपि सानुबन्धकत्वाद्विधौ पञ्चमी ॥ यस्माद्धेतोः स्मार्तविप्रैः प्रणामसमये स्तुतपादपद्मः। तथा सर्वसंपत् सकलश्रीको। नभोगो वियद्गामी च यो भास्वान् रविः। सोऽपि स्वाङ्गभूता भा दीप्तीः परिहरन् एष भवतां प्रत्यक्षोऽस्तं प्रयाति सर्वे सुलभा दुर्लभाश्च संपन्ना भोगा अस्येत्युक्ताभिहितम्। तस्मादेवंविधस्य महात्मनोऽपि रवेरस्तं विलोक्य शंभोराराधनादिकार्ये न प्रमदितव्यमित्यर्थः ॥ २२ ॥

कदाचिदिति ॥ बहुधा नन्दयति हर्षयति यस्तस्मिन्। यौवनारम्भे। सुष्ठु रुचिरिच्छा रवः स्वरो यस्याः। शोभनाभिलाषा कलभाषिणी च। सुरतं मोहनमेवोत्सव-

१ क्रमेण च. २ चाषकुलकान्ति. ३ बहलतमतमः. ४ दीप्रप्रदीप. ५ कल्लोललोललोचनया. ६ पीवर. ७ कुलकुम्भकण्ठपीठं. ८ आरोपितकरः.

रुचिरवायौवनारम्भे सुरतोत्सवमनुभवन्ती पत्युः प्राणप्रिया प्रियंगुमञ्जरी गर्भं बभार ॥ क ॥

तेन च विकचचूतमञ्जरीव कोमलफलबन्धेन बन्धुररमणीयाकृतिः, चन्द्रकलेव कलाप्रवेशेनोपचीयमानप्रभा, प्रभातवेलेवोन्मीलदंशुमालिमण्डलेनानन्द्यमाना, रत्नाकरतरङ्गमालेवान्तःस्फुरन्माणिक्यकान्तिकलापेनोद्भासमाना, गर्भसंदर्भितेन लावण्यपरमाणुपुञ्जेन व्यराजत राजमहिषी ॥ ख ॥

गच्छत्सु च केषुचिद्दिवसेषु सुवृत्ततुहिनाचलगण्डशैलयुगलमिव बालमयूरिकाक्रान्तम्, अनङ्गसौधशिखरद्वयमिव शेखरीकृतेन्द्रनीलकलशम्, उज्ज्वलरौप्यनिधानकुम्भयुग्ममिव भुजंगसंगतमुखम्, उल्लासिहंसमिथुनमिव चञ्चूत्खातपङ्किलकमलकन्दम्, ऐरावतमस्तकपिण्डपाण्डुरमुच्चचूचुकश्यामलिम्नाऽलंकृतमापूर्यमाणमन्तःक्षीरेण क्षणं क्षणमखिद्यत पयोधरद्वन्द्वमुद्वहन्ती ॥ ग ॥

बबन्ध च चन्द्रकलाङ्कुरकवलने स्पृहाम् ॥ घ ॥

अभिलाषमकरोच्च चञ्चलचञ्चरीककुलकलरवरमणीयविकचचूतवनविहारेषु ॥ ङ ॥

स्पर्शममन्यत बहु बहलमभ्यर्णविकीर्णविकसितकमलवननि-

मनुभवन्ती प्रियंगुमञ्जरी गर्भं दधे ॥ चामीकराचलो मेरुस्तस्य चलद्देहा अधिष्ठातृदेवतेव ॥ सोऽपि बहुधानेकधा नन्दनाख्ये वनारम्भे सुष्ठु अतिशयेन रुचिरवायौ सुरतांया देवत्वस्योत्सवमनुभवति ॥ आरम्भणमारम्भः आदिरित्यर्थः ॥ नन्दनं हि वनानामादिरग्र्यं प्रधानमित्यर्थः ॥ यदिवा वनान्यारभ्यन्तेऽनेनेति कृत्वा वनारम्भः । शतानन्देन हि प्रथमं नन्दनं सृष्ट्वा तद्वृक्षावयवैर्बीजशाखादिभिरितरवनानि जगति सृष्टानि॥क॥

तेनेति ॥ कुसुमान्तर्गूढः फलारम्भकरसकणिकारूपो बन्धः कोमलफलबन्धः॥ख॥

---

१ बन्धुरा. २ अंशुनांशुमाली. ३ लावण्यपुण्यपरमाणु. ४ बालमयूर. ५ संगतम्. ६ कमलकोमलकन्दम्. ७ पिण्डमिवोपरि मदलुभ्यद्भ्रमदलिकुलालंकृतं पाण्डुरम्. ८ क्षीरेण क्षणमखिद्यत. ९ बहुलम्.

ष्यन्दिमकरन्दबिन्दोर्मन्दतरतं[1]रङ्गसङ्गशीतलमलयमारुतस्य ॥ क ॥

चिन्तयांचकार च चतुरुदधिलावण्यरसमास्वादयितुम् ॥ ख ॥

अ[2]भ्यवाञ्छदतुच्छमच्छमशेषममन्दमन्दरमन्थानम[3]न्थोत्पन्नममृतमातृप्ति पातुम् ॥ ग ॥

इत्यनेकधोत्पन्नगर्भप्रभावादनुरूपदोहदसंपत्तिसंपन्नाधिककमनीयकान्तिरुल्लसद्बहलमृगमदजललिखितविचित्रपत्रभङ्गभव्यविपुलकपोलमण्डलेन मुखेन श[4]शाङ्कमन्तःस्फुरत्कलङ्कमुपहसन्ती द्विगुणमवनिपतें[5]स्तस्य प्रिया प्रियंगुमञ्जरी बभूव ॥ घ ॥

तथाहि ।

सा समीपस्थितज्येष्ठा पयःपूर्णपयोधरा ।
अग्रप्रावृडिवाह्लादमकरोत्तस्य भूप[5]तेः ॥ २३ ॥

एवमविरतविविधवाञ्छोत्सवाविच्छेदकर्तरि भर्तरि, संज्ञयैवाज्ञाकारिण्यपारे प[6]रिवारे, ब[7]हुभङ्गिभाग्योपभोगक्रमेणातिक्रामति कुत्रचित्काले, कालकलाकुशलश्लाघनीये पूर्णप्राये प्रसवसमये, विलीनजात्यशातकुम्भभासि भास्वत्युदयमारोहति, हततिमिरासु दिक्षु क्ष[8]णमेकं सा प्रसववेदनाव्यतिकरमन्वभूत् ॥ ङ ॥

ततश्च

प्रभासंयोगिविख्यातं योग्यं नालस्यकर्मणः ।

सा समीपेति ॥ समीपे स्थिता ज्येष्ठा वृद्धस्त्रियो ज्ञातप्रसवस्वरूपा यस्याः ॥ तथा पयसा क्षीरेण पूर्णौ पयोधरौ स्तनौ यस्याः ॥ सा प्रियंगुमञ्जरी तस्य राज्ञो मुदमकरोत् । अग्रं प्रावृषोऽग्रप्रावृट् आषाढवर्षाः ॥ तत्पक्षे समीपे स्थितो ज्येष्ठः शुक्रो मासो यस्याः ॥ तथा पयसा जलेन पूर्णः पयोधरो मेघो यस्याः ॥ भुवो हि प्रावृट् परमोपकारिणीति भुवः पत्युराह्लादं करोति ॥ २३ ॥

प्रभेति ॥ कान्तिसंयोगि । विख्यातं प्रसिद्धम् । नलस्य नृपतेरिदं नालम् । कर्म

---

१ तरङ्गशीतलमारुतस्य. २ अभ्यवाञ्छदच्छ. ३ मथनोत्पन्न. ४ शशाङ्कमङ्क. ५ भूभृतः. ६ परिजने. ७ अङ्गभोग्योपभोग. ८ क्षणमिव सा.

पृथ्वीव पुण्यतीर्थे सा कन्यारत्नमजीजनत् ॥ २४ ॥

तत्र च दिवसे 'विकसितकुमुदकुन्दकान्तकीर्तनीयकीर्तिसुधया धवलानि करिष्यत्येषा प्रवर्धमानास्मन्मुखानि' इति प्रियादिव प्रसन्नाः समपद्यन्त दश दिशः। 'मा स्म पुनरस्मद्गुणानेषापहार्षीत्' इत्यपहृतैकैकसारगुणाः सभया नमस्यन्त इव तस्यै कुसुमाञ्जलिममुञ्चन्निन्द्रादयो देवाः। स्वकान्तिसर्वस्वापहारभयादिव दिवि ननृतुरप्सरसः। 'किमस्याः समं समुत्पन्नमन्यदपि कन्यारत्नम्' इत्यन्विष्यन्त इव परितः परिबभ्रमुः सुरभयः समाः समीरणाः ॥क॥

किं बहुना।

अमन्दानन्दनिष्यन्दमपास्तान्यक्रियाक्रमम्।
जगज्जन्मोत्सवे तस्याः पीतामृतमिवाभवत् ॥ २५ ॥

अथ बहोः कालादनुरूपप्रौढप्रहरणप्राप्तिप्रीतहृदयेनास्फोटितमिव सकलजगद्विजयव्यवसायसाहसिकेन कुसुमसायकेन, चिरादुचिताश्रयलाभमुदितमनसा स्फूर्जितमिव शृङ्गाररसेन, शुचिकाशकुसुमहास्येन योग्यसहकारिकारणोपलम्भपूर्णमनोरथेन वल्गितमिव वसन्तमासेन, निजकर्मणः सफलतां मन्यमानेनोच्छ्वसितमिव मलयानिलेन, चिरकालोपलब्धश्लाघ्याधारतया हसित-

अगण्यपुण्यात्मकं तस्य। योग्यमुचितम्। कन्यारत्नम्। सा। अजीजनदुत्पादयामास॥ पृथ्वी पुण्यतीर्थमिव। तदपि प्रभासाख्यम्। योगिभिर्योगमार्गरतैर्विख्यातम्। आलस्य असारस्य कर्मणो न योग्यम् ॥ अथ च आलस्यकर्मणो न योग्यम्। किं तर्हि उद्यमक्रियायोग्यम्। ततस्तदर्थं केनापि न प्रमदितव्यमिति भावः ॥ २४ ॥

तत्र चेति ॥ कन्यारत्नान्वेषिणो हि। सुरभयः सौरभ्यवन्तः। समा सश्रीकाश्च भवन्ति ॥ क ॥

---

१ कान्ति. २ प्रवर्धमाना शश्वदस्मत्. ३ इन्द्रादयः. ४ स्वविकासहासयोग्य. ५ आधारया.

मिव रूपसंपदा, विकसित[1]मिव लावण्यलक्ष्म्या, प्रनृत्तमिव समस्तस्त्रीलक्षणाधिदेवतया, कलकलितमिव कान्तिकलापश्रिया ॥क॥

किं बहुना ।

सर्गव्यापारखिन्नस्य बहोः कालाद्विधेरपि ।
आसीदिमां विनिर्माय श्लाघ्यः शिल्पपरिश्रमः ॥ २६ ॥

एवमस्याः सततविस्तीर्णस्वर्णपूर्णपात्रपूजितपूज्यद्विजन्मनि संपन्ने नामकर्मसमये संमान्य[2] मान्यजनं जनेश्वरो वरप्रदानमनुस्मृत्य दमनकमुनेः 'दमयन्ती' इति नाम प्रतिष्ठितवान् ॥ ख ॥

क्रमेण च प्रचुरा[3]मृतसंसिक्ता इव सुकुमाराः प्रसर्तुमारभन्ताङ्गावयवपल्लवाः, चकार च चञ्चच्चामीकररुचिरुचिराङ्गणमणिवेदिकासु कैश्चिद्दिवसैरनुच्चचरणप्रचारचारुचापल्यलीलाः, सहासमकरोत्परिजनं जनयन्ती बाल[4]केलीः, स्वच्छन्दमानन्दयांचकार पितरं त[5]रङ्गभङ्गि[6]रिङ्गितेन, जननीमजीजनज्जातविस्मयां स्मितमु[7]ग्धदर्शितदन्तका[8]न्तिकुन्दपुष्पमनिष्पन्नाक्षरमल्पाल्पं जल्पन्ती ॥ ग ॥

किं बहुना ।

अपि रेणुकृतक्रीडं नरेणुक्रीडयान्वितम् ॥
तस्याः प्रौढं शिशुत्वेऽपि वयो वैचित्र्यमावहत् ॥ २७ ॥

एव[9]मियमनवरतस्वैरविहा[10]राहारिणि क्रमेणातिक्रामति शैशवे वयसि पितुर्नियोगाद्गुरूपदेशात्साधुवृद्धसंवासाद्बुद्धिविकासाच्च ना-

अपीति ॥ रेणुना कृता क्रीडा यत्र ॥ तथा 'कस्त्वां परिणेष्यति, त्वं कस्मै दातव्या' इत्याद्युक्तिभिर्नरे पुंसि विषये अणुक्रीडान्वितमल्पक्रीडाकरम् । तस्याः संबन्धि । वयः । शैशवेऽपि प्रौढं वैचित्र्यं दधौ ॥ अपिर्विरोधार्थः । स च तुल्यार्थव्याख्यया ॥२७॥

---

१ विलसितमिव. २ सामात्यजनो जनेश्वरः. ३ अमृतरससंसिक्ताः. ४ बालकेलिम्. ५ तरत्तरङ्ग. ६ रिङ्खितेन. ७ स्मितमुग्धदुग्धस्निग्धदर्शित. ८ कान्तिजितकुन्द. ९ एवमस्या अनवरत. १० विहार.

तिश्चिरेण, प्राप्ता नैपुण्यं पुण्यकर्मारम्भेषु, जाता प्रवीणा वीणासु, निराकुला कुलाचारेषु, कुशला शलाकालेख्येषु, विशारदा शारिदायेषु, प्रबुद्धा[1] प्रबन्धालोचनेषु, चतुरा चातुरा[2]नाथजनचिकित्सासु॥क॥

किं चान्यत् ।

अकरोदनालस्यं लास्ये, प्राप प्राधान्यं धन्योचितव्यवहारेषु, वैचित्र्यं चित्रेषु[3], चातुर्यं तौर्यत्रिके, कौशलं शैल्योद्धारे[4], पाटवं पटहवादने, वैमल्यं नवमाल्यग्रथने, प्रागीत्यं गीत्याम्, प्राकाम्यं कामकथासु[5] ॥ ख ॥

किं बहुना ।

न तत्काव्यं न तन्नाट्यं न सा विद्या न सा कला ।
यत्र तस्याः प्रबुद्धाया बुद्धिर्नैव व्यजृम्भत[6] ॥ २८ ॥

एवमस्याः शैशव एव निजजरठप्रज्ञाप्रज्ञातज्ञातव्य[7]वस्तुविस्तरायाः क्रमेण तिलकभूतं नूतनचूतवनमिव वसन्तप्रवेशप्रथमपल्लवोल्लासेन, प्रत्यग्रघनसमयमहीमण्डलमिवामन्दविदलत्[8]कन्दलकलापेन, केसरिकिशोरकण्ठपीठमिव नवकेसराङ्कुरोद्गारेण, करिकलभकपोलस्थलमिव प्रथममदोद्भेदेन, निशावसाननभस्तलमिव प्रभात[9]प्रारम्भप्रभाप्रभावेण[10], सरःसलिलमिव विदलित[11]कोमलकमलकान्तिसंतानेन, मनोहारिणा संसारसारभूतेनाभूष्यत वपुः[12] कान्ततरतारुण्यावतारप्राक्प्रारम्भेण ॥ ग ॥

ततश्च ।

परिहरति वयो यथा यथाऽस्याः

अकरोदिति ॥ प्रगीता प्रसिद्धा तस्या भावः प्रागीत्यम् ॥ ख ॥

---

१ समबन्धा. २ चतुरातुरा. ३ चित्रे. ४ शल्योद्धारेषु. ५ कथायाम्. ६ विजृम्भते. ७ प्रज्ञातव्य. ८ विगलत्. ९ प्रभातप्रभा. १० प्रसरेण. ११ विदलत्. १२ वयः.

स्फुरदुरुकन्दलशालि बालभावम् ।
द्रढयति धनुषस्तथा तथा ज्यां
स्पृशति शरानपि सज्जयन्मनोभूः ॥ २९ ॥

अपि च ।

मुञ्चन्त्याः शिशुतां भरादवतरत्तारुण्यमुद्राङ्कित-[1]
स्फारीभूतनितान्तकान्तवपुषस्तस्याः कुरङ्गीदृशः ।
उन्मीलत्कुचकाञ्चनाब्जमुकुलं यूनां मुहुः पश्यतां
बाह्वोरन्तरमन्तरायसदृशा मन्ये निमेषा अपि ॥ ३० ॥

तं[2]तश्च

तत्तस्याः कमनीयकान्तविजितत्रैलोक्यनारीवपुः
शृङ्गारस्य निकेतनं समभवत्संसारसारं वयः[3] ।
यस्मिन्विस्मृतपक्ष्मपालिचलनाः[4] कामालसा दृष्टयो
नो यूनां पुनरुत्पतन्ति पतिताः पाशे शकुन्ता इव॥ ३१॥

अपि च ।

आबध्नत्परिवेषमण्डलमलं वक्त्रेन्दुबिम्बाद्बहिः
कुर्वंश्चम्पकजृम्भमाणकलिकाकर्णावतंसक्रियाम् ।
तन्वङ्ग्याः परिनृत्यतीव हसतीवोत्सर्पतीवोल्बणं[5]
लावण्यं ललतीव काञ्चनशिलाकान्ते कपोलस्थले ३२"

ए[6]तदाकर्ण्य राजा रञ्जितस्तत्कथया पुनरुदञ्चद्दुञ्चरोमाञ्चक-[7]ञ्चुकितकायस्तत्कालमेवान्तः स्फुरन्मन्मथमनोरथभरभज्यमानमानसस्तं हंसमपृच्छत् ॥

"पक्षिराज राजीववनावतंस हंस, पुनः कथ्यतां तस्याः संप्रति वयोवृत्तवृत्तान्तव्यतिकरः " ॥

---

१ मुद्राङ्कितम्. २ अपि च. ३ वपुः. ४ वलनाः. ५ उज्ज्वलम्. ६ तदाकर्ण्य. ७ उदञ्चद्रोमाञ्च.

इत्युक्तः पुनरेष[1] तं बभाषे।

"देव, किमेकोऽस्मद्विधः पक्षी क्षीरतरङ्गधवललोचनां तां वर्णयेत्। यस्याः सर्वदेवमय इवाकारो लक्ष्यते[2] ॥ क ॥

तथा हि।

सुतारा दृष्टिः, सकामाः कटाक्षाः, सुकुमाराश्चरणपाणिपल्लवाः[3], सुधाकान्ति स्मितम्, अरुणो दन्तच्छदः[4], भास्वन्तो दन्ताः, सुकृष्णाः केशाः, प्रबुद्धा वाणी, गौरी कान्तिः, गुरुः स्तनाभोगः, पृथ्वी जघनस्थली, सुरभिर्निःश्वासः, सुगन्धवाहः प्रस्वेदः, सश्रीकः सकलाङ्गभोगः ॥ ख ॥

किं चान्यत्।

नक्षत्रमयीव निर्मिता[5] विधिना ॥ ग ॥

तथाहि।

भद्रपदा ज्येष्ठा सुहस्ता पूर्वोत्तरा सार्द्रहृदया मूलं कंदर्पस्य॥घ॥

सुतारेति ॥ तारा कनीनिका देवी च॥ कामः अभिलाषः स्मरश्च। सम्यक् कामो येभ्यः। तुमः समश्च काममनसोर्मलोपः॥ सुकुमाराः कोमलाः। तथा महेन्द्रवत्कार्तिकेयोऽपि सुकुमारः॥ सुधावत्कान्तिरस्येति सुधाकान्ति शुभ्रं चन्द्रश्च॥ अरुण आरक्तो रविसारथिश्च॥ भास्वान् दीप्यमानः सूर्यश्च॥ कृष्णो मेचको विष्णुश्च॥ प्रबुद्धा व्युत्पन्ना। बुद्धः सुगतः॥ गुरुर्विशालो बृहस्पतिश्च॥ पृथ्वी पृथुला भूश्च॥ सुरभिः सुगन्धिर्वसन्तश्च॥ गन्धवाहः परिमलवाही वायुश्च॥ श्रीः कान्तिर्लक्ष्मीश्च॥ख॥

भद्रेति ॥ भद्रं पदं पादन्यासो यस्याः॥ ज्येष्ठा प्रथमापत्यम्॥ शोभनौ हस्तौ यस्याः॥ पूर्वमुत्कृष्टमुत्तरं वचो यस्याः॥ सार्द्रमनिष्ठुरं हृदयमस्याः॥ कामस्य मूलं कारणम्॥ पक्षे भद्रपदा ज्येष्ठा हस्तः पूर्वा उत्तरा आर्द्रा मूलं नक्षत्राणि॥ घ॥

---

१ एवं तं बभाषे; एष बभाषे. २ विभाव्यते. ३ सुकुमारश्चरणपल्लवः. ४ अधरपल्लवः. ५ सा विनिर्मिता.

किं बहुना ।

लावण्यातिशयः स कोऽपि मधुरस्ते केऽपि दृग्विभ्रमाः
सा काचिन्नवकन्दलीमृदुतनोस्तारुण्यलक्ष्मीरपि ।
सौभाग्यस्य च विश्वविस्मयकृतः सा कापि संपद्यया
लग्नानङ्गमहाग्रहा इव कृताः सर्वे युवानो जनाः"॥३३॥

राजा—"ततस्ततः"।

हंसः—"ततस्तस्याः पुनरिदानीं

दूराभोगभरेण भुग्नगतिना श्लिष्टा नितम्बस्थली
धत्ते स्वर्णसरोजकुड्मलकलां मुग्धं स्तनद्वन्द्वकम् ।
आलापाः स्मितसुन्दराः परिचितभ्रूविभ्रमा दृष्टय-
स्तस्यास्तर्जितशैशवव्यतिकरं रम्यं वयो वर्तते ॥३४॥

तदेष तस्याः सकलयुवजनमनोमयूरवासयष्टेः समस्तसंसार-सारसौन्दर्याधिदेवतायाः कथितो वृत्तान्तः ॥ क ॥

किमन्यत् ।

हरचरणसरोजाराधनावाप्तपुण्यः
परमसुकृतकन्दो वन्दनीयः स कोऽपि ।
अपि जयतु स यस्तां दुर्लभां लप्स्यतेऽस्मि-
न्निति कथितकथः सन्सोऽपि हंसो व्यरंसीत् ॥ ३५ ॥

इति श्रीत्रिविक्रमभट्टस्य कृतौ दमयन्तीकथायां हर-चरणसरोजाङ्कायां तृतीय उच्छ्वासः समाप्तः ॥

लावण्येति ॥ नवकन्दलीवन्मृद्वी तनुर्वपुर्यस्याः ॥ ३३ ॥

इति विषमपदप्रकाशमेतं दमयन्त्यां तनुते स्म चण्डपालः ।
शिशुमतिलतिकाविकासचैत्रं चतुरमतिस्फुटभित्तिचारुचित्रम् ॥ १ ॥

इति श्रीचण्डपालविरचिते दमयन्तीकथाविवरणे तृतीय उच्छ्वासः समाप्तः ॥

---

१ दृष्टिभ्रमाः. २ स्पृष्टा. ३ तुलाम्. ४ जयति. ५ सोऽथ; योऽथ.

अथ चतुर्थ उच्छ्वासः ।

एवमेतदाकर्ण्य राजा तत्कालमाघूर्णितमाश्चर्येण, आकुलितमौत्सुक्येन, आमन्त्रितमुत्कण्ठया, कटाक्षितं कंदर्पेण, अभिवादितं रणरणकेन, ज्योत्कारितमाग्रहग्रहेण, पृष्टकुशलमकालतरलतया, स्वीकृतमस्वास्थ्येन, अवलोकितं चिन्तया चेतः स्वं स्वयमेव स्वस्थीकृत्य वितर्कितवान् ॥ क ॥

"प्रायः सैव भवेदेषा पान्थादश्रावि या मया ।
युगायितं विनिद्रस्य यत्कृते मे त्रियामया ॥ १ ॥

तदेतन्मे

तद्वार्तामृतपानार्थि भूयोऽपि श्रवणेन्द्रियम् ।
तृप्यते केनवानन्दकन्दे कान्ताकथानके ॥ २ ॥

तत्किमेनं पुनः पृच्छामि ॥ ख ॥

नेदं नायकस्थानम् ॥ ग ॥

अतः संप्रति

मण्डलीकृतकोदण्डः कामः कामं विचेष्टताम् ।
न व्यथिष्ये स्थितः स्थैर्ये धैर्यं धामवतां धनम्" ॥ ३ ॥

एवमेतदिति ॥ क ॥

प्राय इति ॥ यदर्थं मे मम विगतनिद्रस्य त्रियामया रात्र्या युगेनेवाचरितम् ॥ या च पथिकान्मया श्रुता । सैवेयं हंसेनापि कथिता प्रायो भवेत् ॥ युगं कृतयुगादि । त्रियामयेति त्रिसंख्यामितप्रहररात्रिवाचकत्वेन साभिप्रायम् । प्रायःशब्दो वितर्के ॥१॥

नेदमिति ॥ नायकस्य ईदृशं स्थानं स्थितिरौचित्यं न भवतीत्यर्थः ॥ यतो धैर्यं हि नायकपदं परमं वदन्ति ॥ ग ॥

---

१ आकाङ्क्षितम्. २ झात्कारित. ३ आग्रहेण. ४ आपृष्ट. ५ आलोचितम्; आलोकितम्. ६ धैर्यं हि महतां धनम्.

इति वितर्क्य विहसन्हंसमाबभाषे—"साधु भोः सुभाषितामृतमहोदधे, साधु । श्रुतं श्रोतव्यम् । इदानीं भद्र[1] भूयिष्ठो दिवसः । तद्वयं वयस्य, समासन्नाह्निकस[2]मयाः समुचितव्यापारं साधयामः ॥ क ॥

भवतापि

एताः सान्द्रद्रुमतलचलच्चक्रवाकीचकोराः
क्रीडावापीपरिसरभुवः स्थीयतां स्वेच्छ[3]येति ।
यत्रोन्मीलत्कमलमुकुलान्याश्रयन्त्याः कुरङ्ग्यो
भृङ्गश्रेण्याः श्रवणसुभगं गीतमाकर्णयन्ति ॥ ४ ॥

अपिच ।

अतिललिततरं तरङ्गभङ्गै-
रिदमपि तृड्भरवारि वारि वाप्याः ।
भ्रमदलिनिवहं वहन्ति यस्मि-
न्महिमकरं मकरन्दमम्बुजानि ॥ ५ ॥

त्वमपि भद्रे वनपालिके, कृतकमलमालानितम्बकक्रीडमिममादाय भुक्तावसानास्थानगोष्ठीस्थितस्य मम समीपमेष्यसि" इत्यभिधाय राजा राजभवनमयासीत् ॥ ख ॥

गते च राजनि राजीविनीनां जीवितसमाः समास्वादयन्स्वादुकोमलमृणालकन्दलीः, दलयन्दलानि, कवलयन्ब[4]हलम[5]धुरस्नि[6]ग्धमुकुलानि, अनुशीलयञ्शीतलशैवलावलीः, विलासेन स हंस[7]स्तरंस्तरङ्गान्तरेषु चिरं चिक्रीड ॥ ग ॥

अतीति ॥ यस्मिन्वारिणि महिमकरं माहात्म्यकरं भ्रमद्भृङ्गगणं मकरन्दं पद्मानि वहन्ति ॥ तदिदं वाप्या वारि तरङ्गभङ्गैरतिचारुतरं वर्तते ॥ किंविशिष्टम् । तृष्णातिशयं वारयति छिनत्ति । पूर्ववृत्तक्रीडावापीभूकथनापेक्षयापिशब्दोऽत्र समुच्चये ॥ ५ ॥

---

१ गतः. २ समयसमुचितम्. ३ स्वेच्छयैव. ४ बहुल. ५ मधु. ६ स्निग्धमुग्ध. ७ हंसस्तरङ्गभङ्गान्तरेषु; हंसस्तरङ्गान्तरेषु.

चिन्तितवांश्च "तेन राज्ञा 'कृतकमलमालानितम्बकक्रीडमिममादाय मत्समीपमेष्यसि' इति श्लि[1]ष्टार्थमिवादिष्टा वनपालिका। तन्न युक्तमिह चिरं स्थातुमिति"॥ क॥

इत्य[2]स्थान एवाशङ्कमानः सह तेन राजहंसकदम्बकेना[3]म्बरतलमुदपतत्॥ ख॥

तत्र च व्यतिकरे दिवापि स्फारस्फुरत्तारामण्डलमिव, वि[4]कचनवकुवलयवनगहनमिव, अन्तरान्तरोन्निद्रकुमुदखण्डमुड्डीना[5]स्ते क्षणमशोभयन्त नभस्तलम्॥ ग॥

अविलम्बिताश्च न चिराद[6]वापुर्वैदर्भमण्डलमण्डनं कु[7]ण्डिनपुरम्॥ घ॥

अवतेरुश्च चकितचलच्चक्रवाकालोक्यमानकृतान्धकारविभ्रमभ्रमद्भ्रमरभरभज्यमा[8]नाम्भोजभाजि राजभवनासन्नकन्यान्तःपुरोद्यानक्रीडासरसि॥ ङ॥

सं[9]रभसप्रधावितेन सरस्तीरविहारव्यसनिना कन्यकाजनेन निवेदितांस्तानवलोकयितुमतिकौतुकेन दमयन्ती कन्यान्तःपुरात्पुराणमदिरारुणायताक्षी क्षिप्रमाजगाम॥ च॥

आगत्य च चटुलतरचरणचञ्चूप्रहारविदलितारविन्दक[10]न्दला-

चिन्तितेति॥ तेन राज्ञा इत्यमुना प्रकारेण श्लिष्टार्थमिव यथा भवति तथैव वनपालिकादिष्टा॥ इतीति किम्। यत् कृता कमलमालाया नितम्बके घनप्राये मध्यप्रदेशे क्रीडा येनेति राजाभिप्रायः॥ मालाशब्दगतस्त्रीत्वेन कमलमालायाः साक्षात्स्त्रीत्वाध्यवसायान्नितम्बशब्दः स्त्र्यवयवोऽपि तदर्थमात्रे प्रयुक्तः॥ हंसेन त्वेवं प्रतीतम्। यथा कृतकं कृत्रिमं कापटिकं वा॥ तथा अलमत्यर्थम्। आलानितं बद्धम्॥ तथा बकवत् क्रीडा यस्य॥ तादृशमिमं गृहीत्वा मत्समीपमायास्यसीति॥ क॥

१ श्लिष्टाक्षरम्. २ अस्थानम्. ३ अम्बरमुदपतत्. ४ विकचकुवलयगहनम्. ५ तत्क्षण. ६ एवायुः. ७ कुण्डिनं पुरम्. ८ नवाम्भोजराजिभाजि. ९ रभस. १० कन्दलानुनालनलिनी.

नुत्तालबालनलिनीवनविहारिणस्तान्ग्रहीतुमेकैकशः सखीजनमादिदेश ॥ क ॥

स्वयं च चं[1]लवलयचा[2]रुरववाचालितप्रकोष्ठेन सं[3]विलासं विस्मयकरं करपल्लवेन तं[4] राजपुत्री राजहंसमुच्चिक्षेप ॥ ख ॥

पाणिपङ्कजस्थित एव सोऽप्यभिमुखीभूय विभाव्य च चेतश्चमत्कारका[5]रिणमस्याः कान्तिविशे[6]षमाशिषमदात् ॥ ग ॥

"कंदर्पस्य जगज्जैत्रशस्त्रेणाश्चर्यकारिणा ।
रूपेणानेन रम्भोरु दीर्घायुः सुखिनी भव ॥ ६ ॥

अपिच ।

निर्माय स्वयमेव विस्मितमनाः सौन्दर्यसारेण यं
स्वव्यापारपरिश्रमस्य कलशं वेधाः स[7]मारोपयत् ।
कंदर्पं पुरुषाः स्त्रियो[8]ऽपि दधते दृष्टे च यस्मिन्सति
द्रष्टव्यावधिरूपमाप्नुहि पतिं तं दी[9]र्घनेत्रं नलम्" ॥ ७ ॥

दमयन्ती तु तस्मिन्क्षणे "कं[10] संस्कृतवाचः पक्षिणो विवक्षितवाचश्च" इति मनसि विस्मयं भयं च, "नामाप्याह्लादजं[11]ननं नलस्य" इति वपुषि वेपथुं रोमाञ्चं च, हृदयेऽनुरागमौत्सुक्यं च, समकालमुल्लोलायमानमुद्वहन्ती चिन्तयांचकार ॥ घ ॥

"सोऽयं यस्तेन पान्थेन यान्त्या गौरीमहोत्सवे ।
नलोऽप्यनल एवासीद्वर्णितो मे पुरः पुरा" ॥ ८ ॥

कंदर्पस्येति ॥ रूपेणेत्युपलक्षणे तृतीया ॥ रम्भावदूरू यस्याः ॥ "ऊरूत्तर—" इत्यूङि संबुद्धौ ह्रस्वत्वम् ॥ ६ ॥

निर्मायेति ॥ दर्पमहंकारं पुरुषाः कं दधते । न कमपीत्यर्थः ॥ स्त्रियः पुनः कंदर्पं मन्मथं दधते । सकामा भवन्तीत्यर्थः ॥ अपिः पुनरर्थे समुच्चये वा ॥ ७ ॥

सोऽयमिति ॥ यो नलः स कथमनलः ॥ परिहारे त्वनलो वह्निः । स्मरसंतापहेतुत्वात् ॥ ८ ॥

---

१ चलद्वलय. २ चारुवाचालित. ३ सविलासविस्मयकरम्. ४ तं राजहंसं राजपुत्री. समुच्चिक्षेप. ५ कारणम्. ६ सदृशम्. ७समारोपयन्. ८स्त्रियो विदधते. ९दीर्घनेत्रे. १०क पक्षिणः. ११जनकम्.

अथास्याः सखी परिहासशीला नाम नाम्नैव नलस्योद्भिन्नबहलपुलकाङ्कुरामिमामवलोक्य नर्मालापमकरोत् ॥ क ॥

कोष्णं किं नु निषिच्यते तव बलातैलं सखि श्रोत्रयो-
रन्तस्तित्तिरिपक्षिपत्रमथवा मन्दं मृदु भ्राम्यति।
येनाङ्गेषु निखातमन्मथशरप्रस्फारपिच्छच्छवि-
र्नीलीमेचकितोच्चकञ्चुकरुचं रोम्णां वहत्युद्गमः ॥ ९ ॥

दमयन्ती तु तस्याः सवैलक्ष्यस्मितमेवोत्तरं कल्पयन्ती शनैः शिरःकम्पतरलितावतंसोत्पला सलज्जा चलद्विलोचनान्तेन तामतर्जयत् ॥ ख ॥

अवादीच्च तं राजहंसम् "अहो महानुभाव, सर्वथाश्चर्यहेतुरसि॥ग तथाहि।

द्रष्टव्यानुरूपं रूपम्, महाश्चर्यगर्भाः प्रपञ्चितवाच्या वाचः, सूचितसंस्कारातिरेको विवेकः, सौजन्याश्रयः प्रश्रयः, निष्कारणोपकारधात्री मैत्री ॥ घ ॥

तत्त्वमनेकधा जनितविस्मयो बहु प्रष्टव्योऽसि ॥ ङ ॥

किं तु प्रस्तुतं पृच्छामः ॥ च ॥

कथय।कोऽयमात्मरूपसंभावितकंदर्पदर्पदावानलो नलो नाम॥छ

कोष्णमिति ॥ सखीत्यामन्त्रणे । न्विति वितर्के । तव कर्णयोर्मध्ये किं बलातैलं निषिच्यमानमस्ति। किं वा मृदुतित्तिरिपिच्छं मन्दं भ्रमदस्ति॥ येन हेतुना। अङ्गेषु शरीरावयवेषु । निमग्ना ये कामशराः । तेषां प्रस्फाराणि पिच्छानि तद्वच्छविर्यस्य स तथोक्तो रोम्णामुद्गमो रोमाञ्चो नीलया ओषधिविशेषेण मेचकितस्य श्यामलितस्य उच्चकञ्चुकस्य कान्तिं दधाति । प्रस्फारत्वं पिच्छानामप्रवेशे हेतुः । अन्यथा शरेषु प्रविष्टेषु पिच्छान्यपि कथं न प्रविष्टानि । तेन पिच्छच्छविरिति कविराचष्टे ॥ ९ ॥

---

१ परिहासशीला नाम सखी. २ बलात्तैलम्. ३ शरप्रासार. ४ रुचिम्.

यस्यैतानि मन्दर[1]मथनक्षणक्षुभितक्षीरसागरतरङ्ग[2]भ्रमभ्रान्तिभा[3]ञ्जि भ्रमन्ति यशांसि" ॥ क ॥

इत्येवमुक्तः सोऽपि "सुन्दरि, यद्येवमुपविश्यताम्। अवधीयतां मनः। श्रू[4]यतां सं[5]विश्रब्धम्" इत्यभिधाय कथयितुमा[6]रब्धवान् ॥ख॥

" अस्ति समस्तसुरासुरलोककर्णपूरीकृतकान्तकीर्तिकुन्दकुसुमः, कुसुमायुधरूपरमणीयदेहप्रभः, प्रभावयुक्तो विप्रभावश्च, शुचिरनुपतापकारी च, घनागमसमयो न वारिबहुलश्च, शिशिरस्वभावो न जाड्ययुक्तश्च, रामः कुशलवयोरामणीयकेन, जनको वैदेहभागेन, नैषधः प्र[7]जानां पतिः, विर[8]ञ्च इव नाभिभूतः समरे, वीरो वीरसेनो नाम ॥ ग ॥

यस्य च बहुशोभयाङ्गप्रभया सह स्फुरत्युदारा मनोवृत्तिः,

अस्तीति ॥ प्रभावो माहात्म्यम् । विप्राणां भां तेजोऽवतीति ॥ विरोधे विर्व्यपेतार्थः ॥ शुचिः पुण्यम् । विरोधे तु ग्रीष्मः ॥ यद्विश्वप्रकाशः—" शुचिः शुद्धेऽनुपहते शृङ्गाराषाढयोः" इति । "ग्रीष्मे हुतवहेऽपि" इति ॥ घनः प्रचुर आगमः सिद्धान्तो यस्य । वा समुच्चये । अरिः शत्रुः । विरोधे घनागमसमयो वर्षाकालः । स च वारिबहुलो भवति ॥ शिशिरः शीतो माघफाल्गुनौ च । जाड्यं मौर्ख्यं हिमं च ॥ इत्युष्णवर्षाशीतकालव्यतिरेकः ॥ तथा कुशलेन चतुरेण वयोवस्थासौन्दर्येण रामश्चारुः । तथा विदेहा देशास्तेषामयं वैदेहो भागस्तेन जनकाख्यनृपतिप्रतिमः । अन्यत्र रामो दाशरथिः । वै वितर्के । देहस्य भां कान्तिं गच्छति व्याप्नोति इति कृत्वा डप्रत्यये देहप्रभागेन शरीरकान्त्यनुहारिणा रामणीयकेन सौन्दर्येण ! कुशस्य लवस्य च जनको जनयिता ॥ नैषधो निषधदेशीयः । प्रजापती राजा । समरे युद्धे न कदाचिदभिभूतः । विरञ्चस्तु विष्णुनाभेर्भूतो जातः ॥ ग ॥

यस्य चेति ॥ अत्र प्रथमातृतीययोः श्लेषः । बहुश इति भिन्नम् । अभया भयरहिता । तृतीयान्ते बह्वी शोभा यस्यां तया ॥ तथा अखण्डो नयः षाड्गुण्यं यस्या-

१ मन्थान. २ विभ्रम. ३ मन्ति; कृन्ति. ४ श्रोतव्यं श्रूयतामिति. ५ विश्रब्धम्. ६ आरभत. ७ पतिः प्रजानाम्. ८ विरञ्चिरिव; विरिञ्च इव.

अखण्डनयाज्ञया सदृशी राजते राज्यस्थितिः, सज्जया सेनया सह श्लाघनीया कृपाणयष्टिः ॥ क ॥

यश्च सशृङ्गारो नारीषु, वीरो वैरिषु, बीभत्सः परदारेषु, रौद्रो द्रोहिषु[1], सहास्यो नर्मालापेषु, भयानकः सङ्ग्रामाङ्गणेषु, सकरुणः शरणागतेषु ॥ ख ॥

यस्य[2] च चतुरुदधितटीटीकमानशरच्चन्द्रविशदयशोराशिराजहंसस्य, निस्त्रिंशता कृपाणेषु, कुचातुर्यं कलत्रेषु, कूपदेशसेवा[3] पापर्धिकेषु, लुब्धकपर्यायः कैवर्तकेषु, तीक्ष्णता शस्त्रेषु, धर्मच्छेदो धनुर्विद्यायाम् ॥ ग ॥

एवमस्य[4] हरस्येव करस्थं कृत्वाशेषमण्डलमनवरतविख्यातविजयाभिनन्दिनः[5], सुन्दरकैलासनाभिरम्यवनान्तरेषु विहरतः, मदननिरुद्धनैषधीपीनोच्चकुचकुम्भावष्टम्भमसृणितवक्षःस्थलस्य सुखेनातिक्रामन्ति दिवसाः ॥ घ ॥

म् । तृतीयायां न खण्डनमस्याः ॥ तथा सञ्शोभनो जयो यस्याः । सेनापक्षे सज्जया प्रवणया ॥ क ॥

यस्य चेति ॥ निस्त्रिंशता खड्गत्वम् ॥ कुचाभ्यामातुर्यं दुर्वहभरत्वात् ॥ कूपप्रदेशस्य सेवामृगयाभ्यासेषु तथा लुब्धक इति 'पर्यायः एकार्थ शब्दान्तरम्' ॥ तथा धर्मनामा द्रुमो यन्मयं धनुर्विधीयते । तस्य छेदः कर्तनम् ॥ कृपाणादिष्वेव निस्त्रिंशतादीनीति परिसंख्योक्तया न तस्येति शेषः । तस्य राज्ञो न । निस्त्रिंशता क्रूरकर्मत्वम् ॥ कुत्सितं चातुर्यम् ॥ तथा कुत्सित उपदेशो येषां तेषां दाम्भिकानां सेवा ॥ तथा कुत्सितो लुब्धो लुब्धकः । तस्य पर्यायः परिणामः ॥ तीक्ष्णता आयःशूलिकत्वम् ॥ धर्मस्य पुण्यस्य च्छेदः ॥ ग ॥

एवमस्येति ॥ करे राजभागे स्थितमशेषं मण्डलं देशम् । अनवरतप्रथितविजयैर्हृष्टस्य । कं जलम् । एला लता । असनः पीतमालः । तैः सुन्दरैरभिरम्येषु काननविशेषेषु । विचरतस्तस्य सकामनिषधस्त्रीपीनोच्चकुचकुम्भयोरवष्टम्भेन मसृणितं वक्षःस्थलं यस्य

१ द्रोहेषु. २ यस्य चतुरुदधि. ३ कूपसेवा. ४ एवं तस्य. ५ विजयानन्दिनः.

क[1]दाचिच्चतुरुदधिवेलावलयितवसुंधराविख्यातमपत्यमभिलषन्ननादरचरणाङ्गुष्ठनिष्ठ्यूतकैलासोन्मूलनागतपतद्दशवदनविरसविरु[2]तविहसितामरमण्डलीमहितमहिमानम[3]नवरतविरि[4]ञ्चिर[5]चितविचित्रनामसामवस्तुस्तुतिम[6]नवरतसकललोककल्याणकामधेनुमनुपमवर्चसमर्चयांचकार भगवन्तमम्बिकापतिम् ॥ क ॥

अतिभक्तितोषितहरलब्धवरश्च निरुपमरूपयानुरू[7]पया रूपवत्यभिधानया प्रधानया प्रियया सह मकरकेतनकेलिफलमनुभवन्नतिचिरमासांचक्रे ॥ ख ॥

अतिक्रामति तु कियत्यपि समये संपन्नसत्वा समपद्यत रूपवती ॥ ग ॥

तेन च स[8]मस्तसंसारसारवस्तूद्धृतकान्तिक[9]णकलितगर्भारम्भेण, नारायणनाभिरिव विरि[10]ञ्चोत्पत्तिकमलकन्दबन्धेन, कल्पपादपलतेव पल्लवारम्भोच्छ्वासेन, मनाङ्मेदुरितोदरा रराज राजीवनयना राजपत्नी ॥ घ ॥

क्रमेण च मेचकोच्चचूचुककुचकुम्भकपोलपालिपाण्डिम्ना निम्नयन्ती मृगलाञ्छनच्छायमवाञ्छदच्छामृतपयःपिष्टमूर्तिमन्मधुसमयमदनमृगाङ्कमण्डलरसेनात्मानमा[11]लेप्तुम् ॥ ङ ॥

तथोक्तस्य सतः सुखेन यान्ति दिवसाः ॥ विहरणकृतमिह हरेण सहौपम्यम् । तदा । करः पाणिः ॥ शेषाख्यो नागः । तस्य मण्डलं कुण्डलाकारं वपुः ॥ विजया गौरीसखी ॥ नन्दी हरप्रतीहारः ॥ कैलासो गिरिः ॥ नाभिर्मुख्यार्थः ॥ घ ॥

कदेति ॥ निष्ठ्यूतं निरसनम् । "निष्ठापितम्" इति पाठे तु निःशेषेण स्थापनम् । अविरतम् । विचित्रनामभिर्भर्ग-भगवत्त्रिनेत्रादिभिः । सामवेदार्थैश्च । विरञ्चेन विरचितस्तुतिम् ॥ क ॥

क्रमेणेति ॥ कुचकुम्भस्य चन्द्रमाः । मेचकचूचुकस्य लाञ्छनमुपमानम् ॥ अ-

---

१ कदाचिदपि २ विरुति. ३ अविरत. ४ विरिञ्चि. ५ विरचित. ६ अनवरतमवनत. ७रूपया च. ८ सकल. ९ कणकलाप. १० विरिञ्च. ११ अनुलेप्तुम्.

अग्रतः सखीजनविधृतमपास्य मणिमयमुकुरमण्डलमनवरतनिशातनिर्मलकरवालतलेष्वात्ममुख[1]कमलमवलोकयांचकार ॥क

निरस्य नीलोत्पलमजरठकण्ठीरवकण्ठकेसरस्तबकमकरोत्कर्णावतंसम् ॥ ख ॥

अतिबहलकुङ्कुमाङ्कस्तूरिकापङ्कमपहाय मत्तमातङ्गमदकर्दमेन निजभुजशिखरयोर्विरचयांचकार विचित्रपत्रभङ्गान् ॥ ग ॥

एवमन्तःस्फुरद्गर्भानुरूपदोहदसुखमनुभवन्ती कदाचिदुच्चस्थानस्थिते सौम्यग्रहग्रामे, महाराजजन्मोचितेऽह्नि शुभसंभार[2]कारणायां कालवेलायां जातप्राये प्रभाते प्रभाप्रतानजनितपरिवेषमशेषतेजस्वितेजःपुञ्जापहारिणमालोहितपादपल्लवो[3]ल्लसितपङ्कजच्छायम्, द्यौरिव रविमण्डलम्, उन्नमन्मेघमालेव विद्युल्लोलम्, अरणिरिव वितानवैश्वानरम्, नरपालप्रिया प्रीणितगोत्रं पुत्रमजीजनत् ॥ घ ॥

तत्र च दिवसे

> सांशुकोन्नतवंशस्य तस्य राज्ञः पुरस्य च।
> बभूव लक्ष्मीः सा कापि यया स्वर्गोऽपि निर्जितः ॥१०॥

च्छममृतमेव यत्पयो नीरं तेन पिष्टो घृष्टो योऽसौ मूर्तिमतां मधुसमयमदनमृगाङ्कमण्डलानां रसः। तेनालेप्तुमात्मानमियेष ॥ ङ ॥

एवमन्तरिति ॥ द्यौरपि प्रगे रविमण्डलं जनयति। तमपि दीप्तिततिकृतवेष्टनम् ॥ तथा समस्तदीपप्रभृतितेजस्वितेजोमुषम्। पादाः किरणाः। पुत्रपक्षे आ ईषत् लोहितौ पादपल्लवौ तयोरुल्लसितपङ्कजवच्छाया यस्य ॥ तथा विद्युतां लोलनं लोलो विलासः ॥ मण्डलः पुंस्यपि ॥ घ ॥

सांशुकेति ॥ राज्ञः पुरस्य च सा काचिदजनि शोभा। यया स्वर्गच्छतीति कृत्वा स्वर्गो देवः स्वर्गलक्षणो लोकश्च जितः। अंशुना रविणा सह सांशुक उन्नतो

---

१ मुखम्. २ संसार. ३ पल्लवोपहसित.

अपि च।

सवृद्धबालाः कालेऽस्मिन्मुक्ताहारविभूषणाः।
प्राप्ताः प्रीतिं पुरे पौरा वनेषु च तपस्विनः ॥ ११ ॥

सूतीगृहे[1] च

अलंकृतनिशान्तेन तरुणारुणरोचिषा।
प्रदीपानां प्रभा तेन प्रभातेन यथा जिता ॥ १२ ॥

चिरात्पल्लवितं राजवंशेन, समुच्छ्वसितं राज्यश्रिया, प्रीतं प्रणयिभिः, प्रनृत्तं पौरैः, प्रमुदितं बान्धवैः, विद्राणं द्रोहिजनैः, उन्नदितं वियत्यदृष्टमङ्गलवादित्रैः, चित्रायितमतिबहलपरिमलपतत्पुष्पवृष्ट्या,[2] विकसितं दिग्वधूवदनारविन्दैः,विलसितमतिसुरभिसुखस्पर्शसमीरणेन, स्वच्छन्दायितं बन्दीकृताराातिरमणीभिः, आढ्यायितमर्थिलोकेन[3] ॥ क ॥

वंशो यस्य। रवेर्वंशस्य च तुल्यमुदयनमिष्टम्। प्रगे तस्याप्युदितत्वात्। पुरं च सपताकोच्छ्रितवेणुकम् ॥ १० ॥

सवृद्धेति ॥ वृद्धः पितामहादिः। बालः पुत्रादिः। ताभ्यां सह ॥ मौक्तिकहारालंकरणाः। पौराः ॥ मुनयस्तु सवृद्धकेशाः कूर्चादेरसंस्कारात् ॥ तथा मुक्ता आहारायैः ॥ तथा व्यपेतभूषाश्च ॥ ११ ॥

अलमिति ॥ तेन प्रभातेनेव प्रदीपानां प्रभा जिग्ये ॥ अलंकृतं निशान्तं गृहं येन ॥ तथा तरुणारुणो मध्याह्नार्कस्तद्वद्रोचिर्यस्य ॥ अत एव दीपप्रभा निष्प्रभा। महात्मनां हि भूयिष्ठेन तेजसा दीपप्रभाप्यभिभूयते ॥ प्रभातेन तु अलमत्यर्थम्। तरुणया नूतनया अरुणस्य रविसारथे रोचिषा। कृतो निशाया रात्रेरन्तो येन ॥ यद्वा अरुणरोचिषा लोहितकान्तिना तरुणोपलक्षितेन प्रभातेन ॥ तत्समये हि दिनकरकरस्पर्शतस्तरवो रक्तीभवन्ति ॥ १२ ॥

चिरादिति ॥ चित्रायितं भक्तिविशेषविन्यासायितम् ॥ कुमारजन्मोत्सवे गुप्तीनां मोक्षणाद्बन्दीनां स्वाच्छन्द्यम् ॥ आढ्यत्वे त्यागातिशयो हेतुः ॥ क ॥

---

१ सूतिकागृहे च. २ चित्रीयितम्. ३ अर्थिलोकैः.

किं बहुना।

अवृष्टिनष्टधूलीकमशरन्निर्मलाम्बरम्।
अपीतमत्तलोकं च जगज्जन्मोत्सवेऽभवत्॥ १३॥

भूते च विभवभूयिष्ठे षष्ठीजागरणव्यतिकरे, अतिक्रान्तेषु च सूतकदिवसेषु नामकरणोचितेऽह्नि "न लं[1]स्यति धर्मधनान्येष साधुभ्यः" इति [2]ब्राह्मणाः प्रविश्य तस्य "नलः" इति नाम प्रतिष्ठापयामासुः॥ क॥

क्रमेण च चतुरुदधिवेलावनविकासोचितकीर्तिकु[3]न्दकन्दलैर्विश्ववि[4]श्वंभराभिलम्भलम्पाकैः कुमारसेवकै[5]रिव सकलचक्रवर्तिचिह्नैरलंकृतावयवो वि[6]स्तरजटालवालः कल्पपादपाङ्कुर इव वर्धितुमारभत॥ ख॥

विरचितचूडाकरणादिसंस्कारक्रमश्च प्राप्ते विद्याग्रहणका[7]ले निमित्तमात्रीकृतोपाध्यायः स्वयमेव समस्तानवद्यविद्याम्भोनिधेः परं पारमवाप॥ ग॥

तथाहि।

प्रबुद्धबुद्धिर्बौद्धे[8], सविशेषशेमुषीको वैशेषिके, विख्यातः सां-

अवृष्टीति॥ वृष्ट्या हि धूली नश्यति। शरदा घोरमलता। पानेनोन्मादः। यच्चेदृशं तदन्तरेणापि जगदजायत स तदुत्पत्तिप्रभावः॥ १३॥

भूते चेति॥ प्रविश्येति। निमित्तात्सामुद्रिकलक्षणाज्जन्मलग्नाद्वा साधूनां धनाग्रहणे अन्तर्मुखमभिप्रायमाश्रित्येत्यर्थः॥

क्रमेणेति॥ कुमारसेवका युवराजानुचराः। तदुपमैः राजचिह्नैः रेखाकृतैश्चक्रचापकुलिशादिभिर्भूषिताङ्गः॥ तथा विस्तरन्तो जटालाः स्वभावजटाबन्धा वालाः कचा यस्य॥ वृत्तचूडाकरणस्य हि केशा विजटीभवन्ति॥ कल्पवृक्षस्तु प्रसरन्मूलालवालः॥ख

प्रबुद्धेति॥ चित्रवृत्तलक्षणं छन्दः॥ कल्पः पितृदेवताद्याराधनविधिशास्त्रम्॥ अ-

---

१ लात्येष धर्मधनानि. २ शुश्रुवाणः. ३ कन्द. ४ विश्वंभरालम्भ. ५ अलंकृताङ्गावयवः. ६ विस्तरत्. ७ समये. ८ अकलङ्कोऽकलङ्के.

ख्ये, रञ्जितलोको लोकायते, प्राप्तप्र[1]भः प्राभाकरे, प्रतिच्छन्दक[2]छन्दसि, अनल्पविकल्पः क[3]ल्पज्ञाने, शिक्षाक्षमः शिक्षायाम्, अकृतापशब्दः शब्दशास्त्रे, अभियुक्तो निरुक्ते, सज्ज्ञो ज्योतिषि, तत्त्ववेदी वेदान्ते, प्रसिद्धः सि[4]द्धान्तेषु, स्वतन्त्रस्तन्त्रीवाद्येषु, पटुः पटहे, अप्रतिमल्लो झल्लरीषु, निपुणः पणवेषु, प्रवीणो वे[5]णुषु, चित्रकृच्चित्रविद्यायाम्, उद्दामः कामतन्त्रे, कुशलः शा[6]लिहोत्रे, श्रेष्ठः काष्ठकर्मणि, सावलेपो लेप्ये, पण्डितः कोदण्डे, शौण्डः शा[7]रिषु, गुणवान्[8]गणिते, ब[9]हुलो बा[10]हुयुद्धेषु, चतुरश्चतु[11]रङ्गद्यूतक्रीडायाम्, उपदेशको दे[12]शभाषासु, अलौकिको लोकज्ञाने ॥ क ॥

किं बहुना ।

रसे रसायने ग्रन्थे शस्त्रे शास्त्रे कलास्वपि ।
नले न लेभिरे लोकाः प्रमाणं निपुणा अपि ॥ १४ ॥

[13]क्रमेण शैशवमतिक्रामतोऽस्य सेवकैरिवाङ्गावयवैरप्यनुवृत्तिः कृता ॥ ख ॥

तथाहि ।

श्रवणासक्तस्य लोचनद्वयमपि श्रवणसंगतिमकरोत् ॥ ग ॥

कारादिवर्णजन्मस्थानानां बोधिका शिक्षा ॥ अन्वयस्य प्रकाशकं निरुक्तम् ॥ अतीन्द्रियशुभाशुभकर्मणां प्रकाशकं ज्यौतिषम् ॥ क ॥

रस इति ॥ रसः पारदः । रसायनं जरामरणापह औषधयोगः । ग्रन्थः काव्यशास्त्रादिरचना । शस्त्रं खड्गादि । शास्त्रं व्याकरणतर्कादि । कला गीतनृत्यादयः । एतेषु निपुणा अपि सन्तो लोका नले राज्ञि प्रमाणमियत्तां न प्रापुः ॥ १४ ॥

श्रवणेति ॥ श्रवणे शास्त्राकर्णने आसक्तः । श्रवणसंगतिः कर्णसंगतिः ॥ ग ॥

---

१ प्रतिभः. २ छन्दःशास्त्रे. ३ कल्पजाते. ४ सिद्धान्ते. ५ वीणावेणुषु. ६ शालिहोत्रेषु, अमुद्रः सामुद्रिके. ७ शरेषु; शारेषु. ८ गुणिनि. ९ बहुगुणो. १० बाहुयुद्धे. ११ तुरङ्गमक्रीडा; तुरङ्गव्यूहक्रीडा. १२ भाषासु. १३ क्रमेण च.

उन्नतस्वभावस्य नासावंशोऽप्युन्नतिं जगाम ॥ क ॥
वक्रोक्तिकुशलस्य केशकलापोऽपि वक्रतां भेजे ॥ ख ॥
शङ्खनिर्मलगुणस्य कण्ठोऽपि शङ्खाकारमधारयत् ॥ ग ॥
पृथुलमतेरंसकूटद्वयमपि पृथुलमभूत् ॥ घ ॥
प्रमाणवेदिनो[1] वक्षःस्थलमपि सुप्रमाणमजायत ॥ ङ ॥
मध्यस्थस्य तस्य रोमराजिरपि मध्ये[2] स्थिता शुशुभे ॥ च ॥
सुवृत्तस्य बाहूरुयुगलमपि सुवृत्तमभवत् ॥ छ ॥
गम्भीरप्रकृतेर्नाभिरपि गम्भीरा व्यराजत ॥ ज ॥
पल्लवसुकुमारहृदयस्य हस्त[3]चरणैरपि पल्लवसौकुमार्यमङ्गीकृतम् ॥ झ ॥

अथ[4] किं बहुना ।

सोष्णीषमूर्धा ध्वजचक्र[5]पाणि-
रूर्णाङ्कविस्तीर्णललाटपट्टः ।
सुस्निग्धमूर्तिः ककुदुन्नतांसः
कस्यैष न स्यान्नयनाभिरामः ॥ १५ ॥

अपि च ।

आस्यश्रीः संनिभेन्दोः समदवृषककुद्बन्धुरः स्कन्धसंधिः
स्निग्धा रुक्कुन्तलानामनुहरति दृशोर्द्वन्द्वमिन्दीवरस्य ।

पृथुलेति ॥ अंसकूटेति कूटशब्दः शिखरार्थः ॥ घ ॥
प्रमाणेति ॥ प्रमाणं तर्कशास्त्रं मानं च ॥ ङ ॥
मध्येति ॥ मध्यस्थोऽकृतपक्षपातः । अन्यत्र मध्ये उदरे तिष्ठतीति ॥ च ॥
सुवृत्तेति ॥ वृत्तं शीलं वर्तुलं च ॥ छ ॥
गम्भीरेति ॥ गम्भीरप्रकृतिरलक्ष्यकोपप्रसादः । निम्ना च गम्भीरा ॥ ज ॥
सोष्णीषेति ॥ उष्णीषाकारं शारीरिकं लक्षणमुष्णीषम् ॥ ऊर्णा भ्रूमध्ये शुभरोमावर्तः ॥ १५ ॥

1 वादिनो. २ मध्यस्था. ३ कर. ४ किं बहुना. ५ चिह्न.

स्थानं वक्षोऽपि लक्ष्म्याः, स्पृशति भुजयुगं जानुनी, वृत्तरम्ये
जङ्घे, क्षामोऽवलग्नः, किमु निषधपतेः श्लाघनीयं न तस्य॥ १६॥

अस्ति च तस्य नरपतिसूनोः समानशीलवयोविद्यालंकारकान्तिकलापपरिपूर्णदेहः, शरीरमात्रद्वितीयोऽप्यद्वितीयहृदयमेकं जीवितमपर उच्छ्वासः, सालङ्कायनसूनुः श्रुतशीलो नाम मन्त्री मित्रं च ॥ क ॥

एकदा तु पूर्वदिग्वधूकुङ्कुमपङ्कपल्लवितवदनायमाने निरुद्धान्धतमसे सौगन्धिकबन्धुनि बन्धूककुसुमारुणे वियति तरतीव तरुणतरे तरणिमण्डले, मण्डयति कुसुम्भकुसुमकेसरप्रकरायमाणे गगनाङ्गणमम्भोजमुकुलनिद्रामुषि रोचिषां चये, चलिते च विचरितुमुपवनतरुराजिकर्णोत्पले निद्राविरामविधुतपक्षे पक्षिकुले, कृतप्राभातिककर्मणः सभाङ्गणमण्डपमध्यवर्तिनो दत्तसेवावसरस्य राज्ञः प्रविष्टे मन्त्रिणि सालङ्कायने, प्रणामपर्यस्तकर्णोत्पलधवलितसभाङ्गणे यथासनमुपविष्टे प्रस्तुतसेवालापरञ्जितराजनि राजन्यचक्रे, प्रक्रान्ते शास्त्रीयविनोदे, श्रुतशीलेन सममन्यैश्च क्रीडासहायैरनुचरैरनुगम्यमानो नलः सेवासुखमनुभवितुमागतवान्॥

आगत्य च क्षितितलमिलन्मौलिमण्डलः प्रणम्य पितुः पादारविन्दद्वयमदूरदत्तमासनं भेजे ॥ ख ॥

उपविष्टे च तस्मिन्ननभिवादनादुत्पन्नमन्युरीषत्कोपकम्पितकरपरामृष्टकूर्चाग्रिमग्रन्थिरग्रणीर्मन्त्रिमण्डलस्य भ्रूभङ्गभीषण-

अस्तीति ॥ अपर उच्छ्वास इति ॥ न परोऽस्मादित्यपर उत्कृष्टः ॥ क ॥
उपविष्ट इति ॥ आत्मनोऽप्रणामाद्विदितविनयाकौशलं नलं प्रीतिभाक् पैतृको म-

१ कलाकलाप. २ अद्वितीयम्. ३ नाम मित्रम्. ४ कुङ्कुम. ५ करायमाणे. ६ मुद्रा. ७ चरितुम्. ८ अवभूत. ९ सभामण्डप; सभामणिमण्डपः. १० मकरन्दशबलित; शबलित. ११ अन्यैरपि. १२ आसनम्; अदूरदत्तासनम्. १३ सकम्प.

या शोणकोणान्तरतरत्तरलतारया दृशाऽभिमुखमस्य सालङ्कायनः प्रणयपरुषाक्षरमभाषत ॥ क ॥

"कुमार, राजहंसोऽपि 'अहंसरूपः' इति मा स्म मोहवान्भूः ॥ख॥

अनुभवति चमूढः शस्त्रसंघात इव कोशशून्यताम् ॥ ग ॥

अविभवः पुरुषो मेष इव कम्बलस्योपयोगं गच्छति ॥ घ ॥

प्रद्युम्नजातोऽपि बाणयुद्धव्यतिकरकारिण्या सदोषया यौवनावस्थया निरुद्धोऽनिरुद्ध इव को नाम न क्लेशमनुभवति ॥ ङ ॥

न्वी शिक्षाबुद्ध्या परुषवर्णमवादीत् ॥ क ॥

कुमारेति ॥ कुमारेत्यामन्त्रणे । राजमुख्योऽपि सन्त्वं सरूपो रूपवानहमित्यमुना प्रकारेण । मोहवान् मा स्म भूः मोहं मागाः ॥ रूपमदो हि नीचचिह्नम् ॥ यश्च राजहंसः स कथमहंसस्वरूप इति विरोधद्योतकोऽपिशब्दः ॥ ख ॥

ननु यदि रूपादहंकाराद्वा नृपो मूढः स्यात्तत्को दोष इत्याशङ्क्याह—**अनुभवतीति** ॥ चकारो यौगपद्ये । यदैव कुतो मुह्यति तदैव कोशेन गञ्जेन शून्यतां व्यतिरेकमनुभवति ॥ यथा चम्वा स्वसेनया ऊढो धृतः शस्त्रनिचयः प्रत्याकारशून्यतामायाति ॥ ग ॥

भ्रष्टकोशस्यापि किं तदाह—**अविभेति**॥ निर्धनः पुमान् अज इव बलस्य सैन्यस्य शक्तेर्वा कमुपयोगं साफल्यं याति न कमपीत्यर्थः ॥ एतेन निष्कोशस्याबलत्वमिति ख्यापितम् ॥ अजस्तु अवेर्मेण्ढाद्भवति स्म ॥ तथा कम्बलस्याच्छादनविशेषस्योपयोगं याति ॥ घ ॥

तस्मादबलस्य का कथेत्याह ॥ **प्रद्युम्नेति** ॥ यतः॥ प्रद्युम्नजातोऽपि प्रकृष्टौजःपुञ्जोऽपि। बाणैः शाब्दैर्यद्युद्धं कोलाहलस्तत्संपर्ककारिण्या। सह दोषैरिति दोषान्वितया । तारुण्यावस्थया । निरुद्ध आत्मवशीकृतः । को नाम क्लेशं दुःखं नानुभवति । सर्वोऽप्यनुभवत्येवेत्यर्थः ॥ नामाभ्युपगमे । द्युम्नं द्रव्यमपि ॥ वणधातुः शब्दार्थो घञन्तः ॥ प्रद्युम्नः कामः । तस्माज्जातोऽनिरुद्धाभिधो बाणाख्येन दैत्येन समं युद्धसंबन्धविधायिन्या यौवनेऽवतिष्ठत इति कृत्वा तारुण्ये स्थितया उषया उषाख्यया पत्न्या सदा निरुद्ध आत्मीकृतो दुःखमनुभूतवानित्यागमः । युद्धव्यतिकरोऽनङ्गसूनोः क्लेशानुभवहेतुः ॥ ङ ॥

१ अस्यावलोक्य.

तत्तात, सुविषमेघवर्तिनि विद्युद्विलास इवास्थिरे स्थितस्तारुण्ये मा स्म विस्मरः स्मयेन विनयम् ॥ क ॥

अविनीतोऽग्निरिव दहति ॥ ख ॥

अजातनयश्छाग इव नाभिनन्द्यते जनेन ॥ ग ॥

किं च ब्रूमः ।

सुसहायशून्यस्य भवतो यस्यामीमांसाभियोगा राक्षसा इव, अन्यायाः पारदारिका इव, अयोगक्रिया लोहकारा इव, अश्रुतागमाः शोकवेगा इव सहायाः ॥ घ ॥

तत्तातेति ॥ तदित्युपसंहारे । तातेति प्रणयपूर्वामन्त्रणे । तस्माद्वत्स । सुष्ठ्वतिशयेन । विषमे ॥ तथाऽघवर्तिनि पापं कारयितरि । अस्थिरे चञ्चले ॥ तथा विशेषेण द्योतन्त इति विद्युतो रोचमाना विलासाः शृङ्गारादयो यस्मिन् ॥ तथाविधे तारुण्ये स्थितः सन्स्मयेन गर्वेण विनयं मा स्म विस्मार्षीः ॥ विद्युद्विलासोऽपि सुष्ठु विषं जलं यत्रेति कृत्वा सुजले मेघे वर्तते ॥ तथा अस्थिरो लोलः तथाविधे ॥ क ॥

विनयविस्मृतौ दूषणमाह—**अविनीतेति** ॥ अविनयी पुमानग्निरिव दाहमुत्पादयत्यात्मनः परस्य वा ॥ अविरूर्णायुस्तेन नीतो यथाग्निस्तन्नेतारं दहति ॥ ज्वलन्ती हि गड्डरिका स्वीकृता दहतीति लोकोक्तिः ॥ अथवा अविरग्निवाहनम् ॥ ख ॥

नन्वात्मदाहकाः पतिविपत्तौ स्त्र्यादयः परदाहकाः कामत्रिपुरान्तकप्रभृतयश्च श्रूयन्ते । ततश्चाविनयाद्दाहात्मकमपि मां जनः स्तोष्यतीति निरस्यन्नाह—**अजातेति** ॥ न जातो नयो यस्य स छाग इव न स्तूयते जनेन । स्तुतिमपि न प्राप्नोतीत्यर्थः ॥ छागस्त्वजायास्तनयः सुतः ॥ ग ॥

नन्वात्मनः स्वामी यादृक्तादृग्वा भवतु चेत्सुसहायः । तदपि त्वयि नास्तीत्याविष्कुर्वन्नाह—**सुसहायेति** ॥ यस्य ते ईदृशाः सहायाः । न मीमांसाभियोगो विचारोत्साहो येषाम् ॥ राक्षसास्तु मांसेऽभियोगो येषां ते । अमी । इति तद्विशेषणम् ॥ न विद्यते न्यायो येषामित्यन्याया न्यायरहिताः ॥ उपमाने तु अन्यामन्यसंबद्धामयन्ते गच्छन्तीत्यन्यायाः । परस्त्रीरता इत्यर्थः ॥ अलब्धलाभो लब्धपरिरक्षणं रक्षितविवर्धन-

---

१ इवात्मानं परं च.

न च ते दुःशिक्षितनृपकलभव्याकरणमार्गेषु निपुणा नर्तकीव मित्रमण्डली ॥ क ॥

तदायुष्मन्नहिततया प्रकृत्या[1] भुजंग इव भयाय लोकस्य ॥ ख ॥

उग्रसेनः[2] कंसानुरागं जनयेत् ॥ ग ॥

अमृतमथनो[3]द्यतहरिबाहुपञ्जर इव मन्दरसानुगतः को न घृष्यते ॥ घ ॥

नं च योगः । तस्य क्रिया नास्ति येषां ते तथोक्ताः असंबद्धकर्माणो वा ॥ पक्षे अयो गच्छतीत्ययोगा लोहगता क्रिया येषाम् ॥ तथा न श्रुत आगमः शास्त्रं यैस्ते ॥ शोकप्रसरस्तु अश्रुताया नयनजलत्वस्यागमो येषु ॥ घ ॥

एवं सहायसंपदं निषिध्य मित्रमण्डलीमवद्ययन्नाह—**न चेति** ॥ दुःशिक्षितेति नृपकलभेति चामन्त्रणम् ॥ ते तव मित्रमण्डली नच व्याकरणमार्गेषु कुशला । शब्दतत्त्वावबोधे हि नीतिशास्त्राधिगमः । नीत्यवगमे हि कृत्याकृत्यविमर्शनम् । तस्मात्संपदः । न च तन्नैपुण्यं भवन्मित्रमण्डल्यामस्तीति भावः ॥ नर्तकीपक्षे दुःशिक्षितनृपकलेति संबोधनम् । सा च भरतोक्तेषु करणमार्गेषु भव्या प्रशस्ता ॥ क ॥

तदेति ॥ तदित्युपसंहारे । आयुष्मन्नित्यामन्त्रणे । अहितया हितेतरया । प्रकृत्या अविनयादिस्वभावेन । अयुक्तसहायमित्रलक्षणया चामात्यादिकया युक्तः संबद्धो भवाँल्लोकस्य भयहेतुः ॥ भुजंगस्तु अहेर्भावोऽहिता तया दशनलक्षणया प्रकृत्या युक्तः ॥ ख ॥

दुष्टप्रकृतिर्नृपश्चेल्लोकस्य भयाय ततः किमित्याशङ्क्याह—**उग्रेति** ॥ उग्रा सेना यस्य स कं प्राणिनं सानुरागं कुर्यात् । न कमपीत्यर्थः । विरागहेतुरेवेति भावः ॥ उचितपरिवारो हि जनानुरागाय । परिवारो हि लोकस्योपद्रवं रक्षणं वा कुरुते ॥ उग्रसेनो दैत्यः स कंसासुरस्यानुरागं जनयतीत्यागमोक्तोल्लिङ्गनम् ॥ ग ॥

चेदमी विरुद्धबुद्धयः सहायादयः । पृथ्वी वा मयि मन्दानुरागा । ततः किं ममेति निरस्यन्नाह—**अमृतेति** ॥ मन्दो रसः प्रीतिर्येषां तैर्मन्दानुरागया पृथ्व्या चानुगतः को न घृष्यते ॥ उपमाने तु पुरा दैवैर्दैत्यैरमृतायाम्भोधिर्ममन्थे ॥ तत्र च मुख्यो बलिष्ठश्च विष्णुः । तस्य भुजपञ्जरो मन्दरनाम्नो गिरेर्मन्थानभूतस्य सानूनि तटानि गतः प्राप्तः सन्घृष्टः ॥ घ ॥

---

1 प्रकृत्या युक्तो. २ उग्रसेन इव. ३ मन्थन.

शुनीमिवास्थिरतां परिहर ॥ क ॥
कुशीलताग्राही मा स्म तैलिक इव केवलं खलोपभोगाय भूः॥ख॥
आवर्जय गुणान् ॥ ग ॥
निर्गुणे धनुषीव सुवंशयेऽपि कस्याग्रहो भवति ॥ घ ॥
अभ्यस्य कलाः ॥ ङ ॥
निष्कलो वीणाध्वनिरिव प्रशस्यते न पुरुषः ॥ च ॥
त्यज जाड्यम् ॥ छ ॥
जाड्ययोगेन हिमानी दूष्यतां याति ॥ ज ॥
मा स्म मुखरो भूः ॥ झ ॥

शुनीमिति ॥ तस्मादस्थिरतां चञ्चलत्वं त्यज ॥ शुनी त्वस्थिर रता ॥ क ॥

कुशीलतेति ॥ कुत्सितं शीलं लौल्यादिलक्षणं यस्य । स कुशीलः । तस्य भावः कुशीलता । तां गृह्णातीत्येवंशीलस्तथोक्तस्त्वं केवलं दुर्जनानामुपभोगाय मा स्म भूः ॥ कुशीलो हि दुर्जनानामेवोपयोगी न साधूनाम् ॥ तैलिकस्तु कुशीलक्षणां लतां गृह्णाति ॥ खलः पिण्याकः स एवोपयोगस्तस्य ॥ अयोविकारः कुशी ॥ ख ॥

अकृत्यानि परिहार्य कृत्यमुपदिशन्नाह—**आवर्जयेति** ॥ ग ॥

सुवंशत्वादेवास्माकं लोकाग्रहो भविष्यतीति न विमृश्यं यतः ॥ **निर्गुण इति** ॥ गुणानामेवाग्रह आदरो जनस्य न केवलं कुलीनानाम् ॥ वेणुसंभूतस्य धनुषोऽपि गुणेन ज्यया आ आभिमुख्येन बाणाकर्षणाय ग्रह आग्रहः ॥ घ ॥

अभ्यस्येति ॥ कला विद्वत्तादिका तामप्यभ्यस्य ॥ अस् दैवादिको लुप्तहिप्रत्ययः॥ङ॥

निष्कल इति ॥ वीणाध्वनिस्तु निष्कलः कलयितुमशक्यः ॥ च ॥

आवर्जितशौर्यादिगुणोऽभ्यस्तसप्ततिकलः पुरुषो यस्तब्धः स नश्यते इत्याह—**त्यजेति** ॥ छ ॥

जाड्येति ॥ हि यस्माज्जाड्ययोगेन मानी स्तब्धः पुमान्दूष्यत्वमाप्नोति ॥ हिमानी हिमसंहतिः । सापि जाड्यतोऽतिशैत्याद्दूष्येत्यर्थान्तरम् ॥ ज ॥

जाड्यपरित्यागे किं पितृमन्त्रिमुखरस्तर्हि स्यामित्येतदपि निषिध्यन्नाह—**मास्मेति** ॥ मुखरो वाचालोऽपि माभूः ॥ झ ॥

---

१ सुवंशेऽपि.

कर्णाटचेटीमिव मुखरतां न शंसन्ति साधवः[1]॥ क ॥

भज माधुर्यम् ॥ ख॥

धवलबलीवर्दपङ्क्तिरिव समाधुर्या वाणीमनो हरति ॥ ग॥

वर्जय वैपरीत्यम् ॥ घ ॥

विपरीतं शे[2]वमिव को न परिहरति ॥ ङ॥

क[3]मलदीर्घाक्ष, शिक्षाक्र[4]मेऽस्मि[5]न्नपरमप्यभिधीयसे ॥ च ॥

मा गाः स्त्रि[6]याः श्रियो वा विश्वासम् ॥ छ ॥

कर्णाटेति ॥ यस्मान्मुखरस्य भावं मुखरतां वाचालतां साधवो न स्तुवन्ति ॥ कर्णाटचेटी तु मुखे रतं सुरतं यस्याः॥ क ॥

धवलेति ॥ यस्माद्या वाणी सह माधुर्येण सा मनोहारिणी ॥ न च वाचालतायां वाचो माधुर्यम् ॥ वृषश्रेणी तु समा अविषमा। धुर्या धूर्वाहिनी । धुरं वहतीत्यर्थे "धुरो यड्ढकौ " इति यत् ॥ अनः शकटम् । अर्णो वा। अक्षाग्रकीलिकामिव हरति वहतीत्यर्थः ॥ वा अथवार्थे ॥ ग ॥

वर्जयेति ॥ पूर्वोक्तादस्मदुपदेशाद्वैपरीत्यमन्यथाभावं त्यज ॥ घ ॥

यतः—**विपरीतेति** ॥ विपरीताचारं को न परिहरति ॥ शवं तु विभिः पक्षिभिः परीतं व्याप्तम् ॥ ङ ॥

सुविनीतानामावर्जितगुणानामभ्यस्तकलानामपि प्रायः प्रभवन्ति व्यसनानि, रक्षितव्यप्रमादाश्च । व्यसनेषु स्त्रीष्वत्यासक्तिर्महद्व्यसनम् । द्रव्यशरीरयोः क्षयहेतुत्वात् । स्त्रीव्यसने हि राजयक्ष्मोद्भवः। ततः स्त्रीव्यसनं लक्ष्मीप्रमादं च परिहारयन्नाह—**कमलेति** ॥ रूपवान्भवान् सर्वस्त्रीप्रियः स्यादतस्तासु विश्वासकारणं तव ॥ तत्कमलदलेत्यामन्त्रणेनाभिहितम् ॥ च ॥

मागाइति ॥ स्तृणाति दुर्विनीता सती आत्मनः परस्य वा गुणगणं प्रच्छादयतीति स्त्री। यस्यां तु सतीधर्मयोगादस्यार्थस्यान्यथात्वम्। तत्रावृणोति कल्याणपरंपराभिः स्वकुलं पतिकुलं चेत्यर्थः । तस्या दुर्विनीतायाः स्त्रिया अबलाया विश्वासं विश्रम्भं माव्राजीः ॥ स्वलोभात्स्वभावाद्वा ता अतीवानुरागं दर्शयन्ति। परं परिणामे विरुद्धा एवेति भावः ॥ तथा विश्वस्मिन्सर्वत्र निक्षेपस्य योग्येऽयोग्ये वा आस उपवेशनं स्थापनं विश्वासः । तं श्रिया लक्ष्म्या मा गाः ॥ धनार्थे हि पितरः पुत्रेभ्यः पुत्राश्च । पितृभ्यो द्रुह्यन्तीति ॥ तस्माद्य एवाद्रोहण उपधाशुद्धश्च तत्रैवासौ निक्षेपणीयेति भावः ॥ छ ॥

---

१ साधवः धवल २ शिवम्. ३ कमलदलदीर्घाक्ष. ४ मक्रमे. ५ धीमन्; अस्मिन्. ६ स्त्रियः.

अधिकमलवसतिरनार्यसंगता स्त्री श्रीश्च कं न प्रतारयति ॥क॥

याकालकूटद्वितीया नीरोषितापि नार्द्रहृदया भवति । स्वीकृतापि विवाहेन कंसानलङ्घनचापलेनोद्वेजयति ॥ ख ॥

अस्याः कारणोद्भ्रान्तः समस्तोमन्दरागः सदालोकः, लोलनेत्रीकृता घृष्टा भुजंगमण्डली, प्राप्तो जलधी राजकुमारपराभवम् ॥ग॥

किमिति स्त्रिया न विश्रम्भणीयम् । श्रीश्च सर्वत्राप्यनिधेयेत्याह—**अधीति** ॥ अधिको योऽसौ मलः पापं तस्य वसतिरास्पदम् ॥ तथा अनार्यैरसाधुभिः कृतमैत्रीका स्त्री कं पुरुषं न वञ्चयति ॥ सर्वमपि प्रलम्भयतीत्यर्थः ॥ श्रीस्तु अधिकमलं पद्मे वसतिर्यस्याः । कमलं हि तरणशीलम् । सा च तेनाविनाभावसंबद्धा । ततः पद्मासना श्री कं पुरुषं न प्रकर्षेण तारयति ॥ किंविशिष्टा । न नारी अनारी अमानुषी ॥ तथा ओ विष्णुः । तत्संगता असंगता ॥ क ॥

याकालेति ॥ या स्त्री अकालेऽकस्माद्यत्कूटं कपटं द्वितीयं यस्याः ॥ तथा नीरोष्यते स्मेति नीरोषिता प्रसादिताप्यार्द्रहृदया स्निग्धहृदया न भवति ॥ तथा विवाहेनोपयामेन सानलमग्निसाक्षिकं स्वीकृतापि सा स्त्री कं पुरुषं घनेन लौल्येन नोद्वेजयति ॥ श्रीपक्षे कालकूटं विषं द्वितीयमस्याः । तदनन्तरमुत्पन्नत्वात् ॥ तथा नीरे जले उषिता । जलधिपुत्रीत्वात् । परं नार्द्रहृदया । किं तु निर्जलवक्षाः ॥ दैवतानुभावाज्जलेन तद्वक्षो वैसदृश्यं न नीतमिति भावः ॥ तथा आप्नोत्यवश्यमित्यापी स्मृतमात्रागामुको यो विः पक्षी गरुडलक्षणः स वाहो वाहनं यस्य ॥ तथा कंसासुरस्य न अलङ्घनमनलङ्घनम् । अर्थात्कंसस्य लङ्घनं मारणात्मकम् । तथाभूतं चापलं यस्य । अर्थाद्विष्णुस्तेन स्वीकृता ॥ तथा उश्च अश्च वौ शिवविष्णू उत्कृष्टौ वौ यस्य स उद्वः (ईश्वरो विष्णुश्च यस्य प्रसन्नः) तस्मिन् जयति ॥ अथवा या श्रीर्विष्णुना स्वीकृतापि सती नीरे उषिता । कालकूटद्वितीयापि सती घनस्य मेघस्य चापलेन विलसितेन कंसमेव जगत्संतापकारित्वादनलमुद्वेजयति पीडयति अर्थाच्छमयितरि विवाहे गरुडवाहने आर्द्रहृदया न न भवति । भवत्येवेत्यर्थः ॥ या किल कालकूटद्वितीया सा कथमिवार्द्रहृदयेति विरोधोद्भावनयापिशब्दो भिन्नक्रमे । आर्द्रशब्दोऽत्र स्निग्धार्थः ॥ यदिवा विवाहो विष्णुस्तेनापि श्रीः स्वीकृता । तत उपादेयेत्यर्थः । अपिरत्रापि भिन्नक्रमे ॥ ख ॥

अस्या इति ॥ अस्याः स्त्रिया हेतोर्लोकः समस्तोऽप्यमन्दरागो दृढानुरागः स-

१ विप्रतारयति. २ भुजंगावली.

अनयावष्टब्धः को न गुरुर्वारणयोग्यो भवति, को न वाजिपृष्ठमारोहति, कः कंकणन्नवञ्चनातः प्रकटयति, कः कण्ठे हारावमोचनं न कुरुते, को न काञ्चनशृङ्खलामनुभवति। कुरङ्ग इवान्धीभूतः को वागुरावञ्चनं करोति, कः कार्मुकनिर्मुक्तशिलीमुख इव न वैलक्षमागच्छति ॥ क ॥

न्सदा भ्रान्तः ॥ तथा भुजंगानां विटानां मण्डली चपलाक्षीकृता सती घृष्टा विप्रलब्धा ॥ तथा जडा धीरस्येति जडधीर्जडबुद्धिः राज्ञः सकाशात् कुत्सितो योऽसौ मारः पञ्चबिल्वादिबन्धने न विगोप्यहिंसा स एव पराभवस्तं प्राप्तः ॥ अथवा राज्ञस्तथा कुत्सिताच्च मारात् स्मरात्पराभवं प्राप्नोति कुबुद्धिः ॥ "अपि भ्राता सुतोऽर्घ्यो वा श्वशुरो मातुलोऽपि वा। नादण्ड्यो नाम राज्ञोऽस्ति धर्माद्धि चलितः स्वकात्" इति स्मार्ताः। ततः स्वपितुरपि राज्ञः सकाशाद्राजकुमारस्यान्यायवतः परिभवो युज्यत एव ॥ पक्षे अस्याः श्रियो निमित्ते। मन्दरोऽगः पर्वतः। अभ्रमाकाशमन्तोऽस्येत्यभ्रान्तो व्योमावसानः। सन् शोभन आलोकोऽस्येति सदालोकः। सम्यगस्तः क्षिप्त इत्यर्थः। संपूर्वादस्यतेः क्तः ॥ यद्वा सम्यगस्तः सन्नप्सु भ्रान्तः क्षुब्धोऽब्भ्रान्तः (अर्थान्तरे भङ्गित्वेन न दोषः) ॥ तथा अलोलनेत्रं लोलनेत्रं कृता भुजंगमण्डली वासुकिप्रभृतिनागमण्डली ॥ नेत्रं मन्थानरज्जुः ॥ तथा जलधिरब्धिः पराभवं मन्थनलक्षणं प्राप्तः। राजकुमारेत्यामन्त्रणे ॥ ग ॥

अनयेति ॥ अनया स्त्रिया आश्रितः कः पुरुषो गुरूणां वारणे निषेधे ॥ वा अथवार्थः। आजिः कलहः ॥ वञ्चनाया वञ्चनातः (पञ्चम्यास्तसिल्) प्रतारणात्। कं सुखं वञ्चनाकृतं सुखमित्यर्थः। कणन् शब्दायमानः। को न प्रकटयति ॥ कण्ठे गलान्तः हा इति य आरावस्तस्य मोचनम् ॥ कांचनेति कांचिदर्थे। शृङ्खलां बन्धनम् ॥ गुरौ गुरुविषये अञ्चना पूजा। कुरङ्गपक्षे वागुराया मृगजालिकाया वञ्चना ॥ पराभवादेः प्रागवस्थाया विसदृशो लक्ष्यत इति विलक्षः। तस्य भावो वैलक्षम् ॥ धनुर्मुक्तबाणस्तु वै स्फुटं लक्षं वेध्यमायाति ॥ पक्षे अनया लक्ष्म्या। गुरुर्महान्। वारणो गजः ॥ वाजिपृष्ठं तुरंगपृष्ठम् ॥ कंकणं हस्तसूत्रम्। नवमविच्छायम्। चः समुच्चये। नेति निषेधे। अतोऽस्या इत्यर्थः ॥ हारस्य मुक्तासरस्य। अवमोचनं बन्धनम् ॥ काञ्चनस्य

---

१ वारुण. २ अधिरोहति. ३ वञ्चनां न.

कस्य न पराभूतिर्भवति । कस्य नापूर्वं यशः समुच्छलति॥क॥

किमतोऽप्यस्याः परमुच्यते ॥ ख ॥

यादवप्रियं शार्दूलमिव शूरं महत्तरं भयान्नोपसर्पति । सुनय-नादेवरं सिंहमिव बलभद्रं[1] दृष्ट्वा[2] प्रपलायते[3] । न वसुदेवेऽपि चक्षुः पातयति ॥ ग ॥

केवलमनवरतशिक्षितवैदग्ध्यकलापराधात्मिकात्रपापरा परि-

शृङ्खलामाभरणविशेषम् ॥ अगौरवार्हे नीचे । अन्धीभूतो निर्विवेकः ! अपितु सविवेकः सन्गुरूनेव पूजयति ॥ वै स्फुटम् । लक्षं शतसहस्रं नाप्नोति ॥ क ॥

कस्येति ॥ स्त्रीवशगस्य पराभूतिः पराभवः ॥ प्रतिषेधवाची अ पूर्वो यस्माद्य-शःशब्दस्वरूपात्तदपूर्वं यशोऽयश इत्यर्थः ॥ पक्षे परा प्रकृष्टा भूतिरुन्नतिः ॥ अ-पूर्वमुत्कृष्टं यशः ॥ क ॥

स्वस्थावस्थायां स्त्रैणानि वञ्चनाकूटराजपराभवादीन्यभिधाय संप्रति परं परिणामे यत्स्यात्तदाह ॥ **याद्वेति** ॥ दवमुपतापं प्रीणाति दवप्रियं रागिणम् । अथवा दु-नोतीति दवः कुतश्चिद्वैगुण्यादुपतापजनको यः प्रियः कान्तस्तं शूरं विक्रान्तं महत्तरं वृद्धं भयान्न समीपे व्रजति । अगमने वार्द्धकं भये च शूरत्वं हेतुः । शार्दूलपक्षे दवः काननम् ॥ सुनयेति नयप्रवर्तनप्रोत्साहनायामामन्त्रणम् । नादे शब्दे, वरं प्रियंवदं, बलेन शक्त्या भद्रं, दृष्ट्वापि प्रणश्यति । प्रियमिति शेषः ॥ सिंहस्तु नादे शब्दे वरः सिंहनादस्य प्रतीतत्वात् ॥ तथा वसुदे धनप्रदे । अवे रक्षकेऽपि चक्षुर्नयनं न पातय-ति । संमुखमपि नालोकत इत्यर्थः ॥ यदिवा वेपतेऽवश्यमिति वेपीति चक्षुर्विशेषण-म् ॥ पक्षे यादवा यदुवंश्यास्तेषां प्रियः शूरनामाद्यपुरुषस्तं भयात्स्थितिलङ्घनलक्षणात् नोपसर्पति न तत्समीपे व्रजति । एतेन श्वशुरो वध्वा न स्पृश्यते इति स्थितिरुक्ता ॥ शोभने नयने यस्याः सा देवरं गदनामानं कृष्णस्य गदाग्रजत्वात् ॥ बलभद्रमपि ज्ये-ष्ठसंबन्धेन प्रतीतं वीक्ष्य प्रकर्षेण पलायते स्पर्शभयात् ॥ तथा वसुदेवः कृष्णस्य पिता ॥ ग ॥

यदीदृशे परमोपकारिणि न प्रेमवती स्त्री, तदान्यत्र कस्मिन्नपि गुणिनि प्रेमब-न्धं विधास्यतीति निरस्यन्नाह—**केवलेति** ॥ नूयते इति नवं प्रशस्यं न नवमनवमप्र-

१ गदमिव. २ दृष्ट्वापि. ३ पलायते.

हृत्य गुणिनो गुरून्परपुरुषे मायाविनि कृतकेशिवधे धृतमन्दरा-
गे रागं बध्नाति ॥ क ॥

तदायुष्मन्नतिगम्भीरगुहा गिरीन्द्रभूरिव हृदयहराश्रेयोऽर्थिनां
शरणं न स्त्री श्रीर्वा[1] ॥ ख ॥

शस्यं रतं यस्याः । केवलं बीजक्षयहेतुत्वात् । नहि तस्याः संततिः । रतं च संतत्या स-
फलम् । तथा विशेषेण दग्धो विदग्धः । तस्य भावो वैदध्यं संतापस्तस्य कला वैदग्ध्य-
कला शिक्षिता यया । पश्चात्कर्मधारयः । अपराधा एवात्मा स्वरूपं यस्याः ॥ तथा न-
त्रायते नरकाद् अत्रं तथाभूतं यत्पापं कमप्युपसर्गं राति ददातीत्यत्रपापरा । गुरून्
पित्रादीन् गुणिनः सगुणांश्च ग्राह्यपुरुषान् परिहृत्य परस्याः पुरुषेऽन्यनारीकान्ते मा-
याविनि कापटिके कृतके कृत्रिमे अशिवमकल्याणं दधातीत्यशिवधे मन्दरागे क्षणप्रे-
मण्यनुरज्यते ॥ परपुरुष इत्यत्र सर्वनामत्वाद्वृत्तौ पूर्वपदस्य पुंवत्त्वम् ॥ पक्षे अनव-
रतं शश्वच्छिक्षितो वैदग्ध्यकलापो दक्षतातिशयो यया सा चासौ राधात्मिका । राधा
च कृष्णपत्नी । सापि श्रिया एव भेदः । त्रपापरा सलज्जा सती । गुणिनो गुरूञ्छूरा-
दीन्यदूनामादिपुरुषान् परिहृत्य परपुरुषे मुरारौ रागं प्रीतिं बध्नाति ॥ किंभूते माया त्रि-
लोकीनिर्माणलक्षणा वामननृसिंहमहिलात्वादिलक्षणा वा विद्यते अस्य ॥ तथा कृतः
केशिनोऽश्वरूपस्य दैत्यस्य वधो येन ॥ तथा धृतो मन्दरनामाऽगोऽद्रिर्येन ॥ क ॥

एवमुक्तकपटानामनार्द्रहृदयत्वादिदोषान्वितानां स्त्रीणां विश्वासं विश्रम्भं श्रीणां च
विश्वासं यत्र तत्र निक्षेपं सर्वथा परिहरन्सर्वोऽप्यायुष्मानित्यायुष्मन्निति संबोधनेनाभि-
हितम् ॥ तदित्युपसंहारे । श्रेयोर्थिनां पुण्यार्थिनां स्त्री न रक्षित्री ॥ कीदृशी हृदयं चेतो
हरति मोहकारिणी । एतेन क्षयहेतुत्वमुक्तम् ॥ तथा अतिगमतिशयेन बिभेतीति भीर्भीरुः
स्त्रीस्वभावत्वात् । अथवा भीर्भयहेतुत्वाम् । दुष्टाशयत्वात् ॥ तथा न गौर्वाग्यस्य सो-
ऽगुस्तं जहाति अगुहा । य एव मायामयं वक्तुं वेत्ति क्षणमपि तमेव श्रयतीत्यर्थः ।
अथवा गौर्धेन्वर्थः । तच्चोपलक्षणम् । तेन निर्धनं विहाय धनिनमेवाश्रयतीति ॥ य-
दिवा नतौ नम्रतायां गम्भीरा गौर्वाग्यस्य तमपि जहातीत्यर्थः । नच भवादृशाश्चाटूनि
कुत्रापि वक्तुं प्रभविष्णवः । सर्वोन्नतत्वात् । यदिवा अतिगमतिशयम् । भियं राति ददा-
तीति भीरा गौर्यस्य तमतिगंभीरगुं जहाति ॥ हिमाचलभूरपि अतिगम्भीरा गुहाः पा-
षाणसन्धयो यस्याम् ॥ श्रीश्चाश्रेयोऽर्थिनां न शरणम् । किंतु श्रेयोऽर्थिनाम् ॥ कीदृशी

[1] न पुनः स्त्री श्रीश्च; न लक्ष्मीः स्त्री च.

शृङ्गारप्रधानास्तात, गाव इव विचारिताः सरसा भवन्ति न[2] स्त्रियः ॥ क ॥

तदेताः कंदर्पकण्डूकषणविनोदमात्रोपकारिण्यो नात्यन्तविश्वासयोग्याः सर्वथा विश्वस्तं विश्वासमेव नरं कुर्वन्ति स्त्रियः[3]॥ख॥

श्रियो[4]ऽपि दानोपभोगाभ्यामुपयोगं नयेत् ॥ न लोभं कुर्यात् । बहुलोभानुगतः किरणकलापोऽपि संतापयति जन-

हृत्स्वान्तं तथाऽयं शुभकर्म हरति ॥ तत्प्राप्त्या शुभकर्मणो भुक्तत्वात् । यदुक्तं नैषधे—"पूर्वजन्मविभवव्ययसृष्टाः संपदोऽथ विपदश्च विमृष्टाः" इति ॥ गौरी अपि हृदये हरो यस्याः॥तथा नतिगम्भीरः प्रणामप्रगल्भो गुहः कार्तिकेयो यस्याः॥तत्पुत्रत्वात् ॥ख॥

अधुना दुःस्त्रियः सर्वथा परिहार्यं साध्व्या अप्यत्यन्तविश्वासप्रतिषेधद्वारेण "सेवेत विषयान्काले मुक्त्वा तत्परतां वशी । सुखं हि फलमर्थस्य तन्निरोधे वृथा श्रियः" इति पूर्वकविकथितमनुगामुकोऽत्यासक्तिमनासक्तिं च निषेधयन्नाह—**शृङ्गारेति** ॥ रूक्षशिक्षावचोभिरास्माकीनैरसौ विमनस्को भविष्यतीति चित्ते धारयन् कृत्यं चोपदिशन् तातेति कोमलमामन्त्रयति ॥ शृङ्गारो रसः प्रधानं यासु ॥ तथा विचारिता विवेचिता गावो गिर एव सरसाः प्रीतिहेतवो भवन्ति ॥ अथवा गावो विशेषेण चारिता दत्तास्वादवत्तृणकवलाः । तथा शृङ्गस्यारमग्रं प्रधानं यासु । तास्तथोक्ताः ॥ तथा सरसाः सदुग्धाः ॥ स्त्रियस्तु शृङ्गारो मण्डनं प्रधानं यासाम् ॥ विचारिताः स्तृणन्ति दुःशीलाः सत्यो गुणगणं छादयन्तीति तत्त्वतो विमृष्टाः सत्यो न सरसाः। किंतु वैराग्यहेतवः॥क॥

तदेता इति ॥ तत्तस्माद्धेतोरेताः स्त्रियो नात्यन्तं विश्रम्भार्हाः । कियदेवेत्यर्थः ॥ तत्र हेतुमाह ॥ कंदर्पेत्यादि ॥ सर्वथा विश्रब्धं नरं स्त्रियो विगतश्वासमिव कुर्वन्ति॥ तत् साध्व्योऽपि नात्यन्तं विश्रम्भार्हाः॥ तथाच चाणक्यः—"अन्तर्गृहगतः स्थविरस्त्री—परिशुद्धां देवीं पश्येत् । अपरिशुद्धां न कांचिदभिगच्छेत्"॥ श्रूयते हि—"देवीगृहगतो भ्राता भद्रसेनं जघान मातुः शय्यान्तर्गतश्च पुत्रः कारूपम्" इत्यादि ॥ ख ॥

स्त्रीणां दोषान्कण्डूविनोदमात्रफलं चाभिधाय संप्रति श्रीणां फलमाह— **श्रियोऽपीत्यादि** ॥ लोभे दूषणमाह— बह्विति ॥ बहुना लोभेनानुगतः ॥ करौघस्तु ।

१ एव. २ श्रियः स्त्रियश्च. ३ श्रियः स्त्रियोऽपि. ४ दानोप.

म् ॥ क ॥

अतः पुत्र, प्राप्स्यसि नचिरान्निजकुलकमलराजहंसीं राज्यश्रियम् ॥ अनवरतं कृतयशोदानन्देहि नारायण इव त्वयि चिरं रंस्यते खल्वियं लक्ष्मीः ॥ ख ॥

पाहि प्रजाः ॥ प्रजापो ब्राह्मण इव क्षत्रियोऽपि न लिप्यते पातकैः[1] ॥ ग ॥

मा च वृद्धिं प्राप्य गुणेषु द्वेषं[2] कार्षीः ॥ व्याकरणे हि वृद्धिर्गुणं बाधते, न सत्पुरुषेषु[3] ॥ घ ॥

वत्स मा चैवं चेतसि कृथाश्छान्दसोऽयम् । छान्दसश्च गुरुर्वक्रस्वभाव एव भवति तत्किमनेनेति ॥ यस्माच्चतुरानन्दिपदः पु-

बहुलः प्राज्यः । तथा भानुं रविं गतो भानवीय इत्यर्थः ॥ क ॥

यदि लोभवता मया संतप्यते जनस्तत्किमित्याशङ्क्याह— **अत इति** ॥ अत एतस्माज्जनाच्छ्रियमाप्स्यसि ॥ जनानुरागप्रभवा हि संपदः ॥ अथवा एतस्मात्पूर्वोक्तादस्मदुपदेशात् ॥ प्राप्य च श्रियं निरन्तरं कृतं यशो येन तद्दानं देहि धर्मादिपात्रेषु श्रियं नियुङ्क्ष्वेति भावः ॥ खलु निश्चितमियं लक्ष्मीः पात्रेषु व्यवकलयति त्वयि विष्णाविव बहुकालं सहर्षं स्थास्यति ॥ विष्णौ कीदृशि कृतो यशोदाख्याया जनन्या आनन्दो येन तस्मिन् ॥ हि स्फुटम् ॥ ख ॥

बलादपि प्रजाभ्यो वित्तमादाय पात्रेषु मयोपकरणीयमिति मा कृथा हृदि तदाह— **पाहीति** ॥ पालय प्रजाः ॥ यस्मात्प्रजां पाति यः क्षत्रियः स न पापी ॥ ब्राह्मणस्तु प्रकृष्टो जपो यस्य स प्रजापः । जपनं जापः ॥ ग ॥

मा चेति ॥ वृद्धिं राज्यादिसमृद्धिम् । गुणेषु पाण्डित्यादिषु ॥ हि यस्माद्गुणबाधिका वृद्धिरिति वैयाकरणसमयः ॥ घ ॥

इदानीं शिक्षामभिधायात्मनोपदिष्टे आदरपरं कुमारं कुर्वन्मृदुवचोभिः प्रोत्साहयन्नाह— **वत्सेत्यादि** ॥ छन्दो वेदः छन्दःशास्त्रं च ॥ गुरुस्तत्त्वोपदेष्टा छन्दोदृष्टलघुद्वितीय आकारादिश्च ॥ यस्मात्कारणाद्भवान्पुण्यश्लोकः पवित्रयशाः । तथा चतु-

१ पापैः. २ मद्वेषम्. ३ सत्पुरुषे.

ण्यश्लोको भवान्। अतोऽङ्गभावं यान्ति ते वक्रोक्तयोऽपि गुरवः। सरलतया लघवोऽप्यन्तरङ्गा भवन्ति। किंतु ते ह्यवसाने कुटिलतामपि दर्शयन्ति ॥ क ॥

तत्किं बहुना।

तथा भव यथा तात त्रैलोक्योदरदर्पणे।
विशेषैर्भूषितस्तैस्तैर्नित्यमात्मानमीक्षसे ॥ १७ ॥

किं चान्यत्।

बिभर्ति यो ह्यर्जुनवारि पौरुषं
करोति नम्रे च न वा रिपौ रुषम्।
न तेन राज्ञा सहसागराजिता
भवेन्मही किं सहसागरा जिता ॥ १८ ॥

रानानन्दयति। तथाविधं पदं राज्यलक्षणं यस्य। अतो वक्रवचसोऽपि गुरवः। तेन च अङ्ग तव भावं भावनां यान्ति ॥ त्वयि भावितात्मानो भवन्तीत्यर्थः॥ अङ्गेति कोमलामन्त्रणे। सरलतया एकमार्गतया लघवो लघुवृत्ता अप्यन्तरङ्गाश्चेतोभिप्रेताः स्युः॥ परं तेऽन्ते कौटिल्यमपि प्रकाशयन्ति॥ अथ च पुण्यः श्रेयान् श्लोकः पद्यम्॥ तदा चत्वारि आनन्दीनि पदानि पादा यस्य ते प्रसिद्धा गुरवो वक्राकृतयोऽङ्गभावमवयवत्वं यान्ति। श्लोकस्येति शेषः। सरलतया ऋजुतया लघवो लेखाकृतयोऽन्तरङ्गा मध्यगताः स्युः। परमन्ते पादान्ते कुटिला अपि स्युः॥"वा पादान्ते त्वसौ ग्वक्र" इति वचनात्॥क॥

तथेति॥ तातेति कोमलामन्त्रणे। तथा तेन प्रकारेण भव यथा तैस्तैरस्मदुपदिष्टैः प्रजात्राणादिभिर्विशेषैरुपलक्षितमात्मानं भुव्युषितः पृथ्वीस्थित एव त्रैलोक्यमेव योऽसौ दर्पणस्तत्र नित्यमविनश्वरं पश्यसि॥ अन्योऽपि तैस्तैराकल्पविशेषैर्मण्डितमात्मानं दर्पणे पश्यतीति॥ यशोऽर्थमेव प्रयतितव्यमिति भावः॥ १७॥

बिभर्तीति॥ अर्जुनमेव वृणोत्याच्छादयति वारयति वेत्येवंशीलं निजप्रकर्षेण तच्चरित्रापह्नवकारि पौरुषं यो राजा धत्ते॥ अथवा नम्रे रिपौ शत्रावपि रुषं कोपं नच नैव करोति। धर्मविजयत्वात्॥ तेन राज्ञा अगराजिता अष्टसंख्यकुलाचलालंकृता। तथा सहसागरा ससमुद्रा सहसा बलेन किं मही न जिता भवेत्। जितैवेति भावः॥१८॥

१ सरलतया युक्ताः. २ अवमाने.

अपि च।

किं तेन जातु जातेन मातुर्यौवनहारिणा

आरोहति न यः स्वस्य वंशस्याग्रे[1] ध्वजो यथा"॥ १९॥

एवमुक्त्वा विश्रान्तवाचि वाचस्पतिसमे मन्त्रिणि राजापि प्रे- मा[2]र्द्रया दृशा नलमवलोक्य वक्तुमारभत ॥ क ॥

"तात, युक्तमुक्तोऽसि सालङ्कायनेन। कस्यान्यस्य निर्यान्ति वदनारविन्दादेवंविधाः पदे पदेऽर्थसमर्था मृद्व्यो मृष्टाः श्लिष्टाश्च वाचः ॥ ख ॥

तद्दर्शितस्तवानेन निर्वापितदेहः स्नेहः। स्वीकृ[3]तस्त्वं मनसा समस्तसाम्राज्यभारोद्वहनधुर्यतां प्रति। तेना[4]यमनुशास्ति ॥ ग ॥

युज्यते चैतत् ॥

तथाहि।

संग्रहं नाकुलीनस्य सर्पस्येव करोति यः।

स एव श्लाघ्यते मन्त्री सम्यग्गारुडिको यथा ॥ २० ॥

किं च।

न पश्यसि सांप्र[5]तमिदमस्माकमतिभीरुभूपालमण्डलमिव व-

किं तेनेति ॥ मातुर्जनन्यास्तारुण्यमुषा तेन जातेन किम्। किमपि नेत्यर्थः ॥ यो जातु कदाचिदपि स्वस्यान्वयस्याग्रं नारोहति। अग्रेगण्यतां न यातीत्यर्थः ॥ ध्वजपक्षे वंशो वेणुः ॥ १९ ॥

संग्रहमिति ॥ न निषेधे। अकुलीनस्यानभिजातस्य। सर्पस्य तु नाकुर्वल्मीकस्तत्र लीनस्य ॥ कर्मणामारम्भोपायः पुरुषद्रव्यसंपत्। देशकालविभागो विनिपातप्रतीकारः, कार्यसिद्धिश्चेति पञ्चाङ्गो मन्त्रः गारुडादिविषयश्चेति योगान्मन्त्रिणावमात्याहितुण्डिकौ ॥ २० ॥

नेति ॥ वलयस्त्वक्शैथिल्यानि। बलिनो बलवन्तश्च ॥ आवरणं संव्यानम्। अ-

१ अग्रम्. २ प्रेमद्रवार्द्रया. ३ स्वीकृतश्चासि. ४ तेनायमेवमनुशास्ति; तेनेयमेवमनुशास्ति. ५ सांप्रतमस्माकम्.

लिभिराक्रान्तम् अशेषमङ्गम् अतिजीर्णशीर्णकर्पटमिवावरोतुं न शक्यते। क्वाप्युपरिपतितभ्रूचक्रा भीरुभटपेटीव नष्टा दृष्टिः ॥क॥

ये हितवर्गोपदेशिनो मुख्यास्तेऽपि सालङ्कायनप्रभृतयो मन्त्रिण इव विरलीभूता दन्ताः। शब्दशास्त्रे हि राजादीनामदन्तता श्लाघ्यते। नान्यत्र ॥ख॥

तदिदानीं मम वन्यश्वापदमिव विषयविमुखं मनो वनाय धावति। कृतं च यन्मनुष्यजन्मनि क्रियते ॥ ग ॥

तथाहि।

एताः प्राप्य परोपकारविधिना नीताः श्रियः श्लाघ्यता-
मापूर्वापरसिन्धुसीम्नि च नृपाः स्वाज्ञां चिरं ग्राहिताः।
भूभारक्षमदोर्युगेन भवता जाता वयं पुत्रिण-
स्तत्संप्रत्युचितं यदस्य वयसस्तत्कर्म कुर्मो वने"॥ २१॥

इत्यभिधाय तत्कालमेव मौहूर्तिकानाहूयादिदेश—"कथ्यतां यौवराज्याभिषेकोत्सवाय दिवसः" इति ॥ घ ॥

ङ्गपक्षे संवरणम्। निःसौष्ठवादशक्यम् ॥ उपरिपतितं शैथिल्यात्स्रस्तं भ्रूचक्रं यस्याम् ॥ भीरुनाहलमण्डलीपक्षे तु प्रतिभटानामिति शेषः। भीरवो हि वैरिणि विलोकयति पलायन्ते ॥ पेटशब्दः संघाते त्रिलिङ्गः ॥ क ॥

य इति ॥ हितवर्गं हितसमूहमुपदिशन्ति मुख्याश्च प्रधानभूताः सालङ्कायनप्रभृतयोऽमात्या यथा विरलीभूता विरला एव केचित्। न सर्वे तथाविधाः ॥ तथा ये दन्ताः हि स्फुटं तवर्गमुपदिशन्त्युच्चारयन्ति। तवर्गस्य दन्त्यत्वात्। तथा मुखे भवा मुख्याः। तेऽप्यविरला विरलाः संपन्ना विरलीभूताः। बलिग्रस्तानां हि मांसमुक्ता दन्ता विरलाः स्युः। मुख्याश्चतुःसंख्या राजदन्ताः ॥ "राजाह—" इति सूत्रोक्ता राजादयः ॥ ख ॥

तदिति ॥ विषया इन्द्रियार्था देशाश्च ॥ ग ॥

एता इति ॥ यथाक्रमं धर्मार्थकाममोक्षाणामुपन्यासः ॥ २१ ॥

१ अतिशीर्णकुथत्कर्पटम्. २ वयम्. ३ अभिषेकाय.

अथ कथयामासुस्तेऽपि—“देव, श्रूयतामनवद्यमद्यतनमेव राज्याभिषेकयोग्यमहः। केन्द्रस्थानवर्तिनः सर्वेऽप्युच्चग्रहाः, पुण्यो मासः, पूर्णा तिथिः, श्लाघ्यो योगः, प्रशस्तो वारः, शुभं नक्षत्रम्, कल्याणी वेला, विधीयतां यद्विधेयम्” इत्यभिधाय स्थितेषु[1] तेष्वनन्तरमेव “सुश्रोणि, श्रूयतां यदस्माभिः श्रुतमाश्चर्यम्॥ क॥

उचितमुचितमेतद्धैर्यधाम्नां नृपाणां
वयसि कटुनि कान्तालोचनानां तृतीये।
इति रभसमिवास्य प्रस्तुतं श्लाघमानो[2]
वियति पटुरकस्माद्दुत्थितस्तूर्यनादः॥ २२॥

अपि च।

उपरि परिमलान्धैः सस्वनं संचरद्भि-
र्मधुकरनिकुरम्बैश्चुम्ब्यमाना भरेण[3]।
अविरलमधुधारासारसंसिक्तभूमिः
सदसि सुरविमुक्ता प्रापतत्पुष्पवृष्टिः॥ २३॥

अवतेरुश्च तत्कालमेवाम्बरतलादुल्लसद्ब्रह्मकान्तिकलापपवित्रीकृताष्टदिग्भागभूमयः सकलसागरसरित्तीर्थाम्बुपूर्णकमण्डलुर्मृत्कुशकुसुमौषधिरुद्धपाणयो[4] दर्शनादेवापनीतसमस्तकलिकल्मषाः केऽपि कुतोऽपि ब्रह्मर्षयः॥ ख॥

सहर्षेण सविनयेन सपरिवारेण च चलत्कर्णोत्पलगलद्बहलरजःपुञ्जपिञ्जरितकपोलपालिना पृथ्वीपालेन प्रणम्य[5] कृतातिथेयाः

अथेति॥ केन्द्रस्थानं शुभस्थानम्॥ क॥
उचितेति॥ कटुत्वमत्राप्रियत्वमेव॥ २२॥

---

१ मस्थितेषु. २ श्लाघ्यमानः ३ दरेण. ४ मृत्कुसुम. ५ मणय.

समुंचितान्यलंचक्रुरासनानि ॥ क ॥

कृतकुशलप्रश्नालापाश्च प्रस्तुतकुमाराभिषेकस्य नरपतेः स्वस्वकमण्डलुवारीणि दर्शयामासुः ॥ ख ॥

इदं मन्दाकिन्याः सलिलमवगाह्यागतमरु-
त्पुरंध्रीणां पीनस्तनशिखरभुंग्नोर्मिवलयम् ।
इदं कालिन्द्याश्च प्रविकसिततीरद्रुमलता-
पतत्पुष्पैरन्तः सुरभिततरङ्गं नृप पयः ॥ २४ ॥
इदं गोदावर्यास्त्रिनयनजटा[2]खण्डगलितं
महाराष्ट्रीनेत्रैः कृतकुवलयं मज्जनविधौ ।
इदं चापि प्रेङ्खन्मुनिजनविकीर्णार्घकमलं
पयो[3] विन्ध्यस्कन्धस्थलविलुलितं नार्मदमपि॥२५॥(युग्मम्)

इतश्च

तदेतत्पुण्यानां परममवधिं प्राप्तमुदधेः
पयः प्रक्षाल्यां[4]ङ्घ्री शयनसमये शार्ङ्गधनुषः ।
विहारायोन्मज्जद्वरुणवनितावृन्दवदनैः
क्षणं यत्रो[5]त्फुल्लन्नवकमलखण्डश्रियमधात् ॥ २६ ॥

राजा तु तत्कालमुन्मीलद्बहलपुलकाङ्कुरकोरकितदे[6]हः किमप्यद्भुतरसेनावेशित इव विधूय शिरश्चि[7]न्तयांचकार ॥ ग ॥

नू[8]नमयमस्मद्गृहे हरिहरब्रह्मणाम[9]न्यतमः कोऽप्यवतीर्णो भवि-

तदेतदिति ॥ शयनसमये युगान्ते शार्ङ्गधनुषो विष्णोः संबन्धिनौ चरणौ प्रक्षाल्य पुण्यानां परमसीमानं गतमुदधेः समुद्रस्य तदेतत्पयो वर्तते ॥ यत्र विहाराय क्रीडार्थमुन्मज्जन्ति यानि वरुणवधूवृन्दवक्त्राणि तैः कृत्वा विकसदम्भोजखण्डशोभां क्षणं दधौ ॥ २६ ॥

१ भग्न. २ जटाजूट. ३ जनम्. ४ अङ्घ्रीन्. ५ यत्मोत्फुल्लत्. ६ कायः. ७ शिरश्चिरं चिन्त. ८ नूनमस्मत्. ९ एकतमः.

ष्यति। यतः। क्वार्यं शिक्षाक्रमः[1], क्वेयमस्माकमाकस्मिकी यूनो[2]ऽस्याभिषेकाय बुद्धिः, क्व चानुकूलकालसंपत्तिः[3], क्व चामी समस्ताभिषेकोपकरणपाणयो महामुनयः ॥ क ॥

सर्वथा नमोऽस्तु घटितदुर्घटाय वेधसे। यस्यायमेवमद्भुतो व्यापारः" इत्यवधारयन्नुत्थाय गृहीत्वा तानि तीर्थोदकानि कृत्वा कनककुम्भेषु तात्कालिकास्फालितमृदङ्गझल्लरीरवरभसोल्लास्य[4]विलासिनीवृन्दैरानन्द्यमानो मङ्गलोद्गारमुखरपरिजनपरिवृतः सह सालङ्कायनेन "सहस्रं समास्तात एवानुपालयतु राज्यम्" इत्यभिदधानमनिच्छन्तमपि नलं बलान्निवेश्याभिषेकपट्टे स्वयमेवाभिषेकमकरोत् ॥ ख ॥

परिधाप्य च मङ्गलाभरणवाससी सिंहासनमारोप्य पुत्रप्रेम्णा पुरः स्थित्वा कनकदण्डपाणिः क्षणं प्रातिहार्यमन्वतिष्ठत् ॥ ग ॥

सालङ्कायनोऽप्यतिस्नेहेनास्योपरि लम्बितमुक्ताकलापमास्रवत्सुधाधारं[5]मिन्दुमण्डलमिव कनकदण्डमापाण्डुरमातपत्रमधारयत् ॥

सामन्तचक्रं[6] च चलच्चामाकरचारुचामरकलापव्याप्टतकरपल्लवमस्याग्रे विनयमदर्शयत् ॥ घ ॥

मुनयोऽप्युच्चारयांचक्रुश्चतुर्वेदप्रशस्तमन्त्रान्। उत्थाय च गृहीत्वाक्षताञ्शिरसि विकिरन्तोऽस्य पुनरिदमवोचन् ॥ ङ ॥

"याः स्कन्दस्य जगाद तारकजये देवः स्वयंभूः स्वयं
स्वःसाम्राज्यमहोत्सवेऽपि च शचीकान्तस्य वाचस्पतिः।
ताभिस्तेऽद्य[7] विरिञ्चि[8]वक्त्रसरसीहंसीभिराशास्महे
वैदीभिर्वसुधाविवाहसमये मन्त्रोक्तिभिर्मङ्गलम् ॥ २७॥

सर्वथेति ॥ घटितं योजितं दुर्घटं शिक्षाप्रक्रमादिलक्षणं येन तस्मै वेधसे नमः ॥ख॥

---

१ प्रक्रमः. २ यूनोऽप्यस्य. ३ क्व चाविलम्बितानुकूल. ४ उल्लासि. ५ धारं कनकगिरिशिखरस्थितमिन्दुः. ६ सकलसामन्तचक्रम्. ७ ताभिस्तस्य. ८ विरिञ्चि.

अन्यदपि तत्र दिवसे सुभ्रु[1] समाकर्ण्यतां यदद्भुतमभूत् ॥ क ॥

दिशः प्रसेदुः, सुरभिर्ववौ मरु-
दिवो निपेतुः सुरपुष्पवृष्टयः ।
कृताभिषेकस्य नलस्य[2] निस्वना-
ननाहता दुन्दुभयोऽपि चक्रिरे ॥ २८ ॥

अन्तरिक्षे च कोऽप्यदृश्यमान एवाशीःश्लोकद्वयमपठत् ॥

"अहीनां मालिकां बिभ्रत्तथापीताम्बरं वपुः ।
हरो हरिश्च भूपेन्द्र[3] करोतु तव मङ्गलम् ॥ २९ ॥

अपि च ।

लीलया मण्डलीकृत्य भुजंगान्धारयन्हरः ।
देयाद्देवो वराहश्च तुभ्यमभ्यधिकां श्रियम् ॥ ३० ॥

इत्याशास्य विश्रान्तायां वियद्वाचि स्थित्वा च किंचित्कृतोचि[4]तापचितिषु गतेषु क्षणादन्तर्धानं मुनिषु "समुच्छ्रीयन्तां वैजयन्त्यः, बध्यन्तां तोरणानि, सिच्यन्तां चन्दनाम्भोभिः पन्थानः,

अहीति ॥ शिवोऽहीनां सर्पाणां स्रजं तथा तेन प्रकारेण इताम्बरं ताण्डवादिष्वतिविततमूर्त्तित्वाद्व्याप्ताकाशम् ॥ अथ च पराचीनावस्थायां दिगम्बरत्वादिताम्बरं गतवस्त्रम् ॥ यदिवा आ समन्तात्पीतं ग्रस्तमतिविततत्तया छन्नमम्बरमाकाशं येन ॥ तथाविधं वपुर्नित्यं बिभ्रत् ॥ हरिश्च विष्णुर्वनमालीति ख्यातत्वात् । अहीनां पूर्णामेव मालिकाम् । तथा पीताम्बरं हारिद्रवसनं वपुर्बिभ्रत् । राजेन्द्र तव मङ्गलं करोत्वित्यर्थः॥ न केवलं व्याप्तपृथ्वीकम् । इताम्बरमपीत्यपिशब्दार्थः ॥ अष्टमूर्तिर्हि भगवान् ॥ यदाह मह्लणः "उर्वीसमीरयजमानजलानलार्कसोमाम्बरादिभिः" इति ॥ २९ ॥

लीलयेति ॥ लीलयावज्ञया भुजंगान्सर्पान् मण्डलीकृत्य हरः । भुजं मण्डलीकृत्य गां वसुधां धारयन् वराहश्च तुभ्यं समधिकां श्रियं देयात् ॥ अत्र वराह इति नरवराहमूर्तिर्नरसिंहवद्भुजमण्डलीकरणानुरोधाज्ज्ञेयः ॥ ३० ॥

---

१ शुभम्. २ च तस्य. ३ भूपाल. ४ मकृतोचितोपचितिषु.

मण्डयन्तां मसृणमुक्ताफलक्षोदरङ्गावलीभिः प्राङ्गणानि, क्रियन्तां कुसुमप्रकरभाञ्जि चत्वराणि, पूज्यन्तां द्विजन्मानो देवताश्च[1], दीयन्तां दानानि, गीयन्तां मङ्गलानि, विसृज्यन्तां वैरिबन्द्यः, मुच्यन्तां पक्षिणोऽपि पञ्जरेभ्यः" इति श्रूयमाणेषुपरितः परिजनालापेषु लास्योन्मादिनि मृदुमङ्गलोद्गारमुखरे संचरति पुरपथेषु पौरनारीजने स दिवसः संप्राप्तस्वर्गसुखस्येव भुक्ताशेषभुवनस्येवास्वादितामृतरसस्येवानुभूत[2]परमानन्दस्येव राज्ञः कृतकृत्यतां मन्यमानस्यातिक्रान्तवान् ॥ क ॥

एवमतिक्रामत्सु केषुचिद्दिवसेषु, जरठीभूते महोत्सवव्यतिकरे, गतवति यथायथ[3]मामन्त्रितायाते समस्तसामन्तलोके, यौवराज्यरञ्जिते च परितः परिजने जनेश्वरो रिपुपयोधिवडवानलं नलमाबभाषे[4] ॥ ख ॥

"तात, किमपि ब्रूमो यदि न खिद्यसे। संप्रति[5] प्रियं सख्यं श्रेयस्करमस्माकमैणम्, न स्त्रैणम्। आभरणाय योग्या जटाभाराः, न हाराः[6]। साहाय्याय साधवो बुधाः, न बान्धवाः। शयनायोचिता कुशपूलिका, न तूलिका। क्रीडायै[7] वरा वेगवन्तो निर्झरप्रवाहाः, न वाहाः। प्रार्थनीयाश्च हरप्रसादाः, न प्रासादाः॥ ग॥

तदायुष्मन्नेष दृष्टोऽस्यापृष्टोऽस्याश्लिष्टोऽसि क्षमितोऽसि दुरुक्तमुक्तः[8]" इत्यभिधायोत्सङ्गमारोप्य च तत्कालगलद्बहलबाष्पाम्बुप्लवप्लाविते[9] वक्षसि निधाय परिष्वज्य च पुनः पुनः पुलककोर[10]-

तातेति ॥ स्त्रीणामिदं स्त्रैणम् ॥ "स्त्रीपुंसाभ्यां नञ्स्नञौ" इति नञ् ॥ क ॥
तदेति ॥ अन्तर्मध्ये मन्युभरेण दैन्यातिशयेन निरुध्यमानमुत्तरं यस्य ॥ ख ॥

---

१ देवाश्च. २ भुक्त. ३ यथागतम्. ४ बभाषे. ५ संमति सख्यम्. ६ आहरणाय योग्या नीवाराः; नाहाराः. ७ क्रीडार्हा. ८ उक्तम्. ९ स्नपिते च. १० कोरकिताभ्याम्.

कितभुजलताभ्यामन्तर्मन्युभरनिरुध्यमानोत्तरमजस्रमास्रवदश्रुक्लिन्नकपोलमाविर्भवन्मोहमूर्छान्धकारकुञ्चित[1]लोचनमिममाघ्राय मूर्ध्नि वनाय वनितासहायः प्रतस्थे ॥ क ॥

प्रस्थिते च तस्मिन्परिहृतराज्ये राजनि, रजनीवियुज्यमानचलच्चक्रवाकीष्विव कृतकरुणाक्रन्दासु प्रजासु, प्रतिभवनमुच्चलितेषु जरत्पौरजनेषु, "कल्याणिन्, एष पितृप्रणयप्रणामाञ्जलिरस्य क्रमागतकर्मकारिणः श्रुतशीलस्य कृतापराधस्यापि त्वया सहनीयाः कतिपयेऽप्यस्मदनुकम्पयाऽपराधाः। पश्य[2]। पयोराशेर्नोद्वेगाय मृगाङ्कस्य मीलयन्तोऽपि कमलाकरान्कराः। किं न सहन्ते सुमनसोऽपि भ्रमरभरभञ्जनानि" इत्यभिधाय समर्प्य च स्वसुतमुच्चलिते च प्रेम्णानुगतभूभुजि भुजायामनिर्जितसाले[3] सालङ्कायने, बालमत्स्य इव शुष्यत्सरःसलिलसंतापवेपिताङ्गः, करिकलभ इव वियुज्यमानयूथपतिः[4], पतद्[5]बहलबाष्पबिन्दुसंदोहैर्वक्षसि विधीयमानहारः "हा तात" इति ब्रुवन्नलो न लोचने तं दिवसं समुदमीलयत् ॥ख॥

केवलममन्दमन्यू[6]द्गारगद्गदया गिरा पुनः पुनरिमं[7] श्लोकमपठत् ॥ ग ॥

> "तत्तातस्य कृतादरस्य रभसादाह्वाननं[8] दूरत-
> स्तच्चाङ्के विनिवेश्य बाहुयुगलेनाश्लिष्य संभाषणम्।
> ताम्बूलं च तदर्धचर्वितमतिप्रेम्णा मुखेनार्पितं
> पाषाणोपम हा कृतघ्न हृदय स्मृत्वा न किं दीर्यसे"॥ ३१॥

एतच्चाकर्ण्य[9] दमयन्ती चिन्तितवती–"अहो, स्नेहवानार्द्रहृदयः खल्वसौ महानुभावः। तत्सर्वथास्मत्प्रीतिपात्रं भवितुमर्हति" इत्यवधारयन्ती पुनः पप्रच्छ[10] ॥ घ ॥

---

१ आकुञ्चित. २ यतः. ३ भुजाभ्यां निर्जित. ४ मृगशावक इव मार्गच्युतः. ५ गलद्. ६ दैन्य. ७ इदम्. ८ आवाहनम्; अवेहितम्. ९ एतदाकर्ण्य. १० पप्रच्छ हंसं ततस्ततः.

"हुं हंस, ततस्ततः" ॥ क ॥

सोऽपि राजहंसः कथामुपसंहर्तुमिच्छन्निमं श्लोकमुच्चारयांचकार ॥ ख ॥

"सुन्दरोदरि, ततश्च

किमपि परिजनेन स्वेन तैस्तैर्विनोदैः
पितृविरहविषादं सोऽथ विस्मार्यमाणः ।
गमयति परिवर्तं वासराणामिदानीं
हरचरणसरोजद्वन्द्वदत्तावधानः ॥ ३२ ॥

इति श्रीत्रिविक्रमभट्टविरचितायां दमयन्तीकथायां हरचरणसरोजाङ्कायां चतुर्थ उच्छ्वासः समाप्तः ॥

हुं हंसेति ॥ हुमित्यव्ययं प्रश्ने ॥ क ॥

इति विषमपदप्रकाशमेतं दमयन्त्यां तनुते स्म चण्डपालः ।
शिशुमतिलतिकाविकासचैत्रं चतुरमतिस्फुटभित्तिचारुचित्रम् ॥

इति चण्डपालविरचिते दमयन्तीकथाविवरणे चतुर्थ उच्छ्वासः समाप्तः ॥

अथ पञ्चम उच्छ्वासः ।

अथ विश्रान्तवाचि वाचस्पताविवोच्चारितानष्टविस्पष्टवर्णे वर्णितनिषधराजे राजहंसे "अहं सेवार्थी" इत्यभिधायोपरुध्य-

अथेति ॥ अनन्तरं । स्तुतनले हंसे । सेवितुकामोऽहमित्युक्त्वैव कृत उत्पादित उत्तरस्यां दिशि विषये आसङ्ग आसक्तिर्येन । नलाधारत्वादुत्तरस्याः ॥ तथा द्वाभ्यां (तस्मिन्स्मितमुखे यूनि यूपदीर्घभुजद्वये॥ १ उ. ५८ श्लो.) येनोदीच्याध्वगेनोक्तं तस्मादेकस्मात् द्वितीयाद्धंसाज्जन्मोत्पत्तिर्यस्य स तथाभूतः । श्रुतादाकर्णनाद्योऽनुरागः

१ उपसंहरन्. २ तदस्तु. ३ वचसि. ४ अभिधायैवोपरुध्यमाना; अभिधायोपसृत्य निरुध्यमाना.

माना कृतोत्तरासङ्गेन [1]द्विजन्मना श्रुतानुरागेण । "वत्से, चिरान्मिलितासि" इत्युक्त्वै[2]वाश्लिष्टा हृदये प्रवृद्धया चिन्तया । "पुत्रि, [3]कथंकथमपि दृष्टासि" इति संभाष्येवालिङ्गिता सर्वाङ्गेषूत्कम्पजनन्या रोमाञ्चावस्थया । "तरुणि, त्यज्यतामिदानीं शैशवव्यवहारः" [4]इत्यभिधायेव स्पृष्टा प्रमुखेण मुखे वैवर्ण्येन । "मुग्धे, मुच्यतां स्वच्छन्दभावः" इत्यनुशास्ये[5]व ग्राहिता निजाज्ञां गुरुणा मकरध्वजेन दमयन्ती । तथापि क्षणमिव महानुभावतामवलम्ब्यानुपलक्षितावस्थमतवस्थे ॥ क ॥

तां च तथा बलात्सरलीभवन्निश्वाससूचितान्तर्मन्मथव्यथावे[6]गाम्, अकाण्डकुण्ठितधैर्यासिधारां, हृत्पुण्डरीके [7]मनोरथानीतर्[8]नलावलोकनार्थमिवान्तर्मुखीभूतचक्षुर्व्यापाराम्, आकस्मिकस्मरापस्मारेण दाम्यन्तीं दमयन्तीमवलोक्य तदिङ्गिताकारकुशला परिहासव्यसनिनी परिहासशीला नाम सखी "महानुभाव, नास्माकमद्यापि तद्गुणश्रवणाय श्राम्यति[9]श्रोत्रेन्द्रियम् । न तृप्यति [10]प्रश्नरसायनाय जिह्वा । न संतुष्यति विशेषज्ञानाय शेमुषी । [11]नानुरागायोपरमते मनः । [12]तत्कथं कृतवानसि गीतस्येव विस्वरम्, वाद्यस्येव वितालम्, लास्यस्येवान्यथापदप्रचारम्, अत्यन्तरसविच्छेद[13]कारिणं

प्रेमबन्धः । तेनोपरुध्यमाना व्याप्यमाना ॥ कृतवैकक्षकेणाध्ययनानुरागेण विप्रेण दाक्षिण्यं नीयमानेत्यर्थान्तरम् ॥ एवंभूता दमयन्ती प्रकर्षेण वृद्धिं गतया चिन्तया पुत्रि चिरान्मिलिता त्वमित्युक्त्वेव चित्तेऽवष्टब्धा ॥ तथा उत्कम्पं जनयतीति उत्कम्पजनन्या ॥ प्रमुखेण प्रधानेन ॥ गुरुणा दुर्वहभारेण ॥ अर्थान्तरे तु प्रवृद्धया जरत्या ॥ उद्गतकम्पया जनन्या मात्रा ॥ प्रकृष्टं मुखं यस्य तेन प्रमुखेन ॥ गुरुणा आचार्येण ॥ क ॥

तां चेति ॥ दाम्यन्तीं गृह्यमाणां स्मरणपरवशामित्यर्थः तदिङ्गिताकारेत्यत्रेङ्गितं

---

१ द्विजन्मनेव. २ इव. ३ कथमपि. ४ इत्यालप्येव. ५ एव. ६ अवस्थाम्. ७ मनोरथपथानीत. ८ नललावण्यावलोकनार्थम्. ९ श्रवणेन्द्रियम्. १० प्रश्नरसायने. ११ न विरमत्यनुरागाय मनः. १२ तत्कथय कथम्. १३ कारिणः.

कथाप्रक्रमस्य विरामम् । एतत्परमपि पिपासया पयः पातुमुद्यतस्येवां[1]विरतायां तृषिवारिधारानिवारणम् । इयं सा भुञ्जानस्यार्धतृप्तिः । सोऽयमप्राप्तरतस्य[2] रिरंसाव्याघातः । तन्न युक्तमिवान्तरे[3] विरन्तुम् । निष्कारणोपकारिन्[4], प्रवर्त्यतां पुण्यराशेस्तस्य[5] स्वरूपाख्यानामृतप्रपामण्डपो[6], निर्वान्तु[7] च चिरकालमनङ्गग्रीष्मोपतप्ता एवंविधकन्यकाः प्रसारितश्रवणाञ्जलयः" इति [8]दमयन्तीमर्धेक्षणेन कटाक्षयन्ती तं राजहंसमालापयांचकार[9] ॥ क ॥

सोऽपि "सुन्दरि, किमन्यत्तस्य समस्तस्त्रीहृदयप्रासादप्रतिष्ठापितप्रतिमस्याद्यापि प्रशस्यते[10] ॥ ख ॥

यत्र श्रूयमाणे न मधुरो वेणुवीणाक्वणः[11], दृष्टे नाभिरामः कामः, संभाषिते न सारा सरस्वती, परिचिते न श्लाघ्यममृतम्, अभ्यस्ते नानन्दीन्दुः, प्रसादिते[12] न प्रशंसास्पदं धनदः[13] ॥ ग ॥

किं बहुना ।

भवति यदि सहस्रं वाक्पटूनां मुखानां
निरुपममवधानं जीवितं चापि दीर्घम् ।
कमलमुखि तथापि क्ष्मापतेस्तस्य कर्तुं
सकलगुणविचारः शक्यते वा न वेति ॥ १ ॥

चेष्टितम् । आकारो मुखरागादिः ॥ वारिधाराया विधारणं विच्छेदः ॥ "निवारणम्" इति वा पाठः ॥ रिरंसायां सत्यां व्याघातोऽन्तरायः । "रतिव्याघातः" इति पाठे तु स्पष्टमेव ॥ क ॥

यत्रेति ॥ श्रूयमाणे नेत्यादौ सप्तम्यन्तान्नञ् ॥ अभ्यस्ते परिशीलिते ॥ ग ॥

---

१ अर्धगतायाम्. २ असमाप्तरतस्य; असमाप्तरसस्य. ३ अवान्तरे; अत्रान्तरे. ४ अकारणो. ५ पुनः पुण्य. ६ मण्डपे. ७ निर्वातु चिर. ८ दमयन्ती तामर्धेन ; दमयन्तीमर्धेक्षितेन. ९ समालपयां. १० किं प्रशस्यते. ११ वीणाकलाक्वाणः; वीणाक्वाणः. १२ अनुप्रसादिते. १३ धनद इत्यभाषत.

अपि च ।

संसाराम्बुनिधौ तदेतदजनि स्त्रीपुंसरत्नद्वयं
नारीणां भवती नृणां पुनरसौ सौभाग्यसीमा नलः ।
सा त्वं तस्य कुरङ्गशावनयने योग्याऽसि पृथ्वीपते-
रेतत्ते कथितं किमन्यदधुना यामो वयं स्वस्ति ते ॥ २ ॥

अन्यच्च ।

चन्द्रमुखि, महानाम्नि सुसंधिकृति सुसमासाख्याततद्धिते सत्कारके परिभाषाकुशले बलाबलविचारिणि विचार्यमाणे व्याकरणे प्रेष्यमाणे च दूते नापशब्दसंबन्धो भवति । तत्प्रेषयतां तथाविधस्तस्यान्तिकं कोऽपि दूतः ॥ क ॥

नच बृहत्यासंपदान्विते जगत्याख्याते संस्कृतगुरुगणे शार्दूलविक्रीडिताडम्बरिणि पुण्यश्लोके पर्यालोच्यमाने छन्दसि प्रा-

संसारेति ॥ स्वस्तियोगे त इति चतुर्थ्यन्तम् ॥ २ ॥

चन्द्रेति ॥ चन्द्रमुखीति संबोधनम् ॥ नाम प्रातिपदिकं तद्विषयं प्रकरणमपि नामेत्युपचारे सति महदिति विशेषणस्य सफलत्वम् । नाममात्रस्य महच्छब्देन व्यवच्छेद्याभावात् ॥ सुष्ठु संधिर्वर्णसंश्लेषः कृत्संज्ञकप्रत्ययश्च यत्र । समासस्तत्पुरुषादिः । आख्यातं क्रिया । तद्धितोऽणादिः ॥ कारकमपादानादि ॥ परिभाषा न्यायसूत्राणि ॥ बलाबलं पूर्वापरविधीनां बाधस्थितिः ॥ अपशब्दोऽसाधुशब्दः ॥ दूतपक्षे । नाम संज्ञा ॥ सुष्ठु संधिं पणबन्धं करोतीति क्वौ सप्तमी ॥ सुष्ठु समासेन संक्षेपेणाख्यातं कथितं तस्मै हितं येन तस्मिन् ॥ सत्कारके सत्क्रियाजनके ॥ परितो भाषाः संस्कृतप्राकृताद्याः कर्णाटादिदेशभाषा वा तासु दक्षे । बलाबलं शक्त्यशक्ती ॥ अपशब्दोऽपवादः ॥ क ॥

ननु यद्यहं दूतं प्रेषयिष्यामि । तदा "स्वच्छन्दचारिणीयम्" इति किंवदन्ती भविष्यतीत्याशङ्क्याह—न चेति ॥ बृहतीजगतीशब्दौ छन्दोजातिवचनौ तृतीयान्तौ ख्यातपदेन प्रसिद्धार्थेन योज्यौ ॥ तथा संगतैः पदैरन्विते ॥ अथवा छन्दसि कथंभूते पदा-

---

१ संबाधो; संबोधो. २ सुष्ठूक्तेऽतिसुप्रतिष्ठिते जगति. ३ सात्कृति. ४ स्वार्थे सद्वंशस्थे विलसत्करकङ्कणे पुण्यश्लोके. ५विचार्यमाणे.

र्थ्यमाने च तस्मिन्निषधेश्वरे वृत्तभङ्गो[1] भवति" इत्यभिधाय गन्तुमुदचलत् ॥ क ॥

उच्चलितं च तं परिहासशीला[2] पुनर्बभाषे ॥ ख ॥

"महानुभाव, यथेयमनुरागकन्दलैरालापैस्त्वयोक्ता, तथा सोऽपि स्पृहणीयोक्तिभिरभिधातव्यः। यतो नह्येकहस्ततलेन[3] तालिका वाद्यते, नचैकं तप्तमतप्तेनापरेण लोहं लोहेन संधीयते, नाप्येकं रक्तमरक्तेनान्येन[4] वस्त्रमपि वाससा संयोजितं शोभां लभते। केवलं विगुगलमेव[5] भवति" इति ॥ ग ॥

एवंवादिनीं दमयन्ती परिहासशीलामलपत्[6] ॥ घ ॥

"सखि, किमस्य निष्कारणवत्सलस्यैवमभ्यर्थ्यते ॥ ङ ॥

यस्यास्मासु[7] निरपेक्षः पक्षपातः, स्वभावजं सौजन्यम्[8], अकृत्रिमः स्नेहभावः, अनुपचरितमुपकारित्वम्, अपरिचया प्रीतिः, अनभ्यासं[9] सौहार्दम्, अदृष्टपूर्वा मैत्री ॥ च ॥

तदेवंविधो निर्निमित्तबन्धुः किमभ्यर्थ्यते। केन याच्यन्ते चन्द्रचन्दनसज्जनाः परोपकाराय[10]। किंतु कतिपयमुहूर्तमैत्रीर[11]रञ्जितास्मन्मनसो दुस्त्यजस्याकाण्ड एवास्य गन्तुमुत्सहमानस्य किं ब्रूमः।

न्विते कथं यथा भवति बृहत्यासं बृहत्यां जातौ आसोऽवस्थानं यस्येति पदान्वयक्रियाविशेषणम् ॥ यदिवा बृहत्या जात्या हेतुभूतया याऽसौ संपच्छोभा तयान्विते। पक्षे बृहत्या गुर्व्या संपदा श्रियान्विते। जगति लोके आख्याते कीर्तिते ॥ गुरवो विपरीतलकारादयः। आचार्याश्च ॥ शार्दूलविक्रीडितं छन्दोनाम, सिंहविलसितं च ॥ श्लोकः पद्यं यशश्च ॥ वृत्तं पद्यं शीलं च ॥ इह यद्यपि श्लोकोऽनुष्टुप्छन्दो लोके प्रसिद्धम्। तथापि केचित्सर्वमपि पद्यं श्लोकमाहुः ॥ क ॥

यस्येति ॥ पक्षो मित्राद्यवष्टम्भः पक्षती च ॥ अभ्यासः सामीप्यम् ॥ च ॥

---

१ न वृत्तभङ्ग. २ लीला. ३ नह्येकहस्तेन. ४ अपरेण. ५ विफलमेतद्भवति. ६ लीलाम्. ७ यदस्य. ८ सौन्दर्यम्. ९ अनायासम्. १० परोपकारकरणाय. ११ मैत्रीरस.

मा गा इत्य[1]शकुनम्, गच्छेति निष्ठुरता, यदिष्टं तद्विधीयतामित्यौदासीन्यम्, आदर्शनात्प्रियोऽसीति क्रियाशून्यालापः, कस्त्वमेवंविधो दिव्यवाक्पक्षिरत्नमित्य[2]प्रस्तुतप्रश्नः, केनार्थीत्यप्रक्रान्तम्, किं ते प्रिय[3]माचरामीत्यु[4]पचारवचनम्, कृतोपकारोऽसीति प्रत्यक्षस्तुतिः ॥ क ॥

तन्न जानीमः कल्याणबन्धो, किमुच्यसे। वरमदर्शनमेव भ[5]वादृशाम्, नतु लूयमानाङ्गावयवदुःसहो दर्शनव्याघातः। वरमनास्वादितमेवामृतम्, नतु सकृत्पीत्वा पुनर[6]लाभदुःखम् ॥ ख ॥

[7]अतः प्रार्थ्यसे भूयो दर्शनार्थम्, [8]इयं भविष्यति भवत्प्रियस्य कस्याप्युपायनमात्रमस्मदनुस्मरणनाटकसूत्रधारी हारलता" इत्यभिधाय नलमुररीकृत्य "महानुभाव, द्वा[9]भ्यां श्रुतोऽसि पान्था[10]दस्माद्राजहंसाच्च, द्वाभ्यामुह्यसे वाचा हृदयेन च, द्वि[11]कालं स्मर्यसे दिवा नक्तं च, द्वयी गतिरस्माकमिदानीं [12]त्वं वा मृत्युर्वा" इति द्विसं[13]ख्यसंदे[14]शार्थमिव द्विगुणीकृत्योन्मुच्य च स्वकण्ठकन्दला[15]दुत्कण्ठितामिव स्वां मूर्तिमतीं तस्य मुक्तावलीं गले व्यलम्बयत् ॥ ग ॥

सोऽपि "सुन्दरि, सोऽयं स्कन्धीकृतो मया मुक्तावलीछलेन तस्य पुरो भवद्वर्णनाभारः" इत्यभिधाय सह तेन विहंगमगणेनोत्पपात ॥ घ ॥

उत्पतिते च नभस्तलम् "आगच्छत, सं[16]पद्यन्तां सफललो[17]चनाः, पश्यतापूर्वं स्त्रीरत्नम्" इति चलत्पक्षपल्लवव्याजेन दूरादिक्पाला-

सोऽपीति ॥ स्कन्धीकृतोऽङ्गीकृतः ॥ घ ॥

उत्पतिते च नभस्तलमिति ॥ दिक्पालानाह्वयतीत्यनेन भाविदिक्पालागमनं

---

१ अशकुनः. २ अप्रस्तुतम्; अप्रस्तुतः. ३ आचरामः. ४ उपचारः. ५ भवादृशानाम्. ६ अलाभरतदुःखमेव. ७ एष प्रार्थ्यसे. ८ इयं च. ९ द्विधा. १० अस्माच्च राजहंसात्. ११ द्विःकालम्. १२ त्वं मृत्युश्चेति. १३ संख्या. १४ संदेशनार्थम्. १५ उत्कण्ठामिव मूर्तिमतीम्. १६ संपद्यताम्. १७ लोचनानि; लोचनता.

निवाहयति, तीव्रब्रध्नमयूखसंतप्तां दिवमिवोपवीजयति, दिक्कुञ्जरनिरुद्धावकाशा आशा इवाश्वासयति, पक्षिमण्डले तस्मिन्विस्मयोन्मुखी सा भूपालपुत्री निर्निमेषं निक्षिप्य चक्षुश्चिरमूर्ध्वैवावतस्थे ॥ क ॥

चिन्तितवती च ॥

"तात तावन्ममाप्येवं न विधत्से प्रजापते ।
पक्षौ पक्षिवदुड्डीय येन पश्यामि तन्मुखम् ॥ ३ ॥

अपि च ।

उड्डीय वाञ्छितं यान्तो वरमेते विहंगमाः ।
न पुनः पक्षहीनत्वात्पङ्गुप्रायं कुमानुषम्" ॥ ४ ॥

इति चिन्तयन्ती गतेष्वपि तेषून्मुखी तां दिशमनुविस्मयविस्फारलोचना निस्पन्दतया काष्ठकल्पामवस्थां दधाना चिरात्सखीभिः संबोध्य स्वगृहमनीयत ॥ ख ॥

ततः प्रभृति च तस्याः सरलीभवन्ति निश्वासा न हासाः, स्खलन्ति वाचो न शुचः, वर्धते तन्द्रा न निद्रा, द्रवति स्वेदाम्भो न स्तम्भः, मन्दायते स्वरो न स्मरः, वाञ्छा चन्दनाय न स्पन्दनाय, संतापशान्तये तद्गुणादानं न स्नानम्, प्रीतये हारो नाहारः, सुखायाङ्के लगन्नुद्यानप्रभञ्जनो न जनः ॥ ग ॥

सूच्यते ॥ क ॥

उड्डीयेति ॥ यद्यपि मनोरपत्यं स्त्री मानुषी पुमान्मानुष इति "स्त्रीपुंसयोरपत्यान्ता द्विचतुःषट्पदोरगाः" इति लिङ्गवचनान्मानुषशब्दस्य स्त्रीपुंसस्य वृत्तिता, तथापि नपुंसकत्वमपि । लिङ्गस्य लोकाश्रयत्वात् ॥ तथाच भवभूतिः– "अद्वैतं सुखदुःखयोरनुगतं सर्वास्ववस्थासु यद्विश्रामो हृदयस्य यत्र जरसा यस्मिन्नहार्यो रसः । कालेनावरणात्ययात्परिणते यत्स्नेहसारस्थितं भद्रं तस्य सुमानुषस्य कथमप्येकं हि तद्दुर्लभम्" ॥ ४ ॥

तत इति ॥ प्रभञ्जनो वात एवाङ्के लगन्सुखाय न परिजनः ॥ ग ॥

१ पटले. २ निक्षिप्तचक्षु. ३ उर्ध्वमुखैव. ४ संचिन्तयन्ती. ५ विस्मयेन. ६ विस्फारितविलोचना; विस्तारितलोचना; विस्फारितलोचना. ७ स्वगृहान्. ८ सुखायालमुद्यान.

पठति च मुहुर्मुहुरिमं श्लोकम् ॥ क ॥

विश्राम्यन्ति न कुत्रचिन्न[1] च पुनर्मुह्यन्ति मार्गेष्वपि
प्रोत्तुङ्गे विलगन्ति[2] नान्तरतरुश्रेणीशिखापञ्जरे ।
खिद्यन्ते न मनोरथाः कथममी तं देशमुत्कण्ठया
धावन्तः पथि न स्खलन्ति विषमेऽप्यास्ते स यस्मिन्प्रियः ५

तेऽपि राजहंसाः शशाङ्कधरेषु, सप्रपञ्चपञ्चाननेषु, शिवरूपेषु, वनेषु, सुशोभां कौमुदीं दधत्सु, शश्वदनुकृतसामुद्र[3]वृद्धिषु, चन्द्रमण्डलरूपे[4]ष्विव सरःसलिलेषु विहरन्त[5]स्तुहिनाद्रिकुञ्जा[6]निव सत्रिपथगान्नगनगरग्रामाग्रहारपत्तन[7]प्रदेशानुल्लङ्घयन्तः कतिपयदिवसैरासेदुरुद्यानं निषधायाः ॥ ख ॥

क्रीडितुमारभन्त च स्वच्छन्दम् ॥ ग ॥

अथ तेषा[8]मन्यतमामवलोक्य क्रीडातडागपङ्क[9]जपञ्जरे राजहं-

विश्राम्यन्तीति ॥ मनसि रथा इव मनोरथाः संकल्पाः । विश्रामादयो रथधर्माः ॥ ५ ॥

तेऽपीति ॥ हंसा वनेषु सरोजलेषु च विहरन्तो नगादिप्रदेशान् व्यतिक्रामन्तो निषधोद्यानमापुः ॥ कीदृक्षु वनेषु । शशा अङ्के यस्यास्तथाभूता धरा भूमिर्येषु । तथा सच्छद्मानः पञ्चाननाः सिंहा येषु ॥ शिवस्तु शशाङ्कं चन्द्रं धरति । तथा सह प्रपञ्चैः पृथग्मार्गागमोपदेशलक्षणैर्वर्तन्ते तथाभूतानि पञ्चसंख्यानि आननानि वक्त्राणि यस्य ॥ सरोजलेषु कीदृक्षु कुमुदानामियं कौमुदी शोभा ताम् ॥ चन्द्रमण्डले तु कौमुदी चन्द्रिका ताम् । तद्विशेषणं सुशोभामिति । अनुकरणमनुहरणम् । चन्द्रपक्षे अनु पश्चात्कृता सामुद्री वृद्धिर्येन । चन्द्रोदयो हि जलधिविवृद्धये । न विद्यन्ते नावो यत्र तदनु, अनु यथा भवति एवं कृतवृद्धिषु । पूरोत्पीडे हि न केऽपि नावं क्षिपन्तीति ॥ नगनगरप्रदेशान् कीदृशः । सत्राणि ब्राह्मणादीनां भोजनानि यज्ञा वा विद्यन्ते येषु । ते च ते पन्थानश्च सत्रिपथास्तान्गच्छन्ति प्राप्नुवन्तीति सत्रिपथगास्तान् । हिमाद्रिनिकुञ्जांस्तु सह त्रिपथगया गङ्गया (तस्य द्वित्वम्) ॥ ख ॥

१ ननु. २ अपि गलन्ति. ३ समुद्र. ४ रूपेषु सरः; रूपेषु च सरः. ५ विहरन्तो बिसशकलानि कवलयन्तः कूजन्तः. ६ निकुञ्जानिव. ७ पुरपत्तन. ८ तेषां मध्येऽन्य. ९ पङ्कजपुञ्जपञ्जरे.

सीमागत्य त्वरया हंस[1]दर्शनोत्सुकं सरोरक्षिका राजानं व्यजिज्ञपत् ॥ क ॥

"देव, हंसवार्तामनुदि[2]नं पृच्छति देवस्तदद्य काचित् ॥ ख ॥

कुरुते नालकवलनं दूरं विक्षिपति गर्भजम्बालम् ।
त्वदरिवधूरिव राजन्नुद्यानसरोगता हंसी ॥ ६ ॥

अपि च ।

अभिलषति नालमशनं स्वपिति नवाम्भोजपत्रशयनेऽपि ।
नीरागमना नृप[3]ते तव रिपुवनितायते हंसी ॥ ७ ॥

राजापि तस्याः श्लिष्टार्थमिदमार्यायुगलम[4]वधारयन्स्तोकस्मितसुधाधवलिताधरपल्लवः "लवङ्गिके, यथा कथयसि तथा तेऽप्यागता हंसा[5]ः कथमन्यथा तस्याः खल्वेकाकिन्याः संभवः" इति तद्वार्तया यावदास्ते ॥ ग ॥

तावन्नीलोत्पलदलदीर्घलोचना चन्द्रमुखी बन्धूककुसुमकान्तदन्तच्छदा नीलांशुकपटीं परिदधाना पक्वकलममञ्जरीगौराङ्गी प्रकाशहासा हंसैरनुगम्यमाना मूर्तिमती शरदिव वनपालिका प्र-

कुरुत इति ॥ राजन् नृप उद्यानतडागगता हंसी नालस्य बिसकाण्डस्य कवलनं ग्रासं कुरुते । तथा गर्भे मध्ये यो जम्बालः कर्दमस्तं च दूरं परिक्षिपति ॥ वधूस्तु उद्यानेन पलायनेन सरोगता रोगवत्ता यस्याः । तथा अलकस्य वलनं न कुरुते । गर्भजातं बालं दूरे क्षिपति । भीत्या हि गर्भः पतति ॥ ६ ॥

अभिलषतीति ॥ नालं कमलकाण्डमशनमाहारं वाञ्छति । स्वपित्यपि नूतनाब्जपत्रशय्यायाम् । नीरे आगमनं यस्याः । रिपुवनिता तु नीरागं वैराग्योपेतं मनो यस्याः । अतएवालमत्यर्थमशनं नाभिलषति । नापि कमलदलतल्पे शेते । वा अथवार्थे ७

तावदिति ॥ यावत्तद्वार्तयास्ते नृपस्तावत् । शरदुपमा वनपालिका प्रविश्य देवेत्यभिधाय तं राजहंसं राज्ञः पादयोर्निधाय प्रणामं चकार ॥ नीलोत्पलदलादीनि लोचना-

---

१ राजहंस. २ दिवसम्. ३ यतते. ४ अवधार्य सावसरं प्रशस्य स्तोक. ५ राजहंसाः.

विश्य "देव, सोऽयं। कथमप्यागतो रणरणककारणमपराधी विहंग
इत्यभिधाय तं राजहंसमुभयकरकमलाञ्जलिगतमुत्फुल्लपाण्डुप
जार्घमिव पुरः पादारविन्दयोर्निधाय राज्ञः प्रणाममकरोत् ॥ क

राजापि "सारसिके, साधु कृतम्। तत्क्रियतामशून्यः स्वाधिका
गम्यतामिदानीं यथास्थानम्" इत्यभिधाय तुष्टिप्रदानपरितोषि
तां लवङ्गिकासहितां विसृज्य, विरलीकृतपरिजनः प्रत्युज्जीवनौष
मिव प्राणरक्षाक्षरमिव स्वस्थीकरणमणिमिवाश्वासनाभेषजमिव
ह्लादनकन्दमिव तमग्रेस्थितमानन्दनिःस्पन्दपक्ष्मपालिना चिरं
क्षुषाऽवलोक्य बहु मानयन्मुग्धस्मितेन स्वागतमपृच्छत् ॥ ख ॥

सोऽपि "देव, दर्शनामृतमनुभवतो ममाद्य स्वागतम्" इत्य
भिधायोपश्लोकयांचकार ॥ ग ॥

"देव,

प्रसृतकमलगन्धं नीरसंसक्तकण्ठं
धृतकुवलयमालं जातभङ्गोर्मिकं च।
त्वयि कृतरुषि भीतास्तावदास्तां तडागं
निजमपि च कलत्रं शत्रवो नाद्रियन्ते ॥ ८ ॥

दीनामुपमानानि। दन्तच्छद ओष्ठः। नीलमंशुकं वासस्तस्य पटी उत्तरीयम्। परिप
हि शालिगौरः स्यादतस्तन्मञ्जरीवद्गौरमङ्गं यस्याः। प्रवृद्धाः काशाः काशपुष्पाण
हासो यस्याः ॥ क ॥

प्रसृतेति ॥ प्रसृतः कमलानामब्जानां गन्धो यत्र। तथा नीरेण संसक्तो यु
कण्ठः पालिप्रान्तो यस्य। तथा धृता कुवलयानां नीलोत्पलानां माला येन। तथा जा
उत्पन्ना भङ्गास्तरङ्गा ऊर्मयः कल्लोला यत्र। एतच्चतुष्टयमपि तडागादरहेतुः। देव त्व
रुष्टे यद्भीताः शत्रवस्तडागमेवंविधं नाद्रियन्ते। यावत्कलत्रमपि। तत्किंविशिष्ट
प्रसृतः के मूर्ध्नि मलगन्धो यस्य। स्नानाभावात्। तथा निर्गतो रसो वक्त्रामृतकला

१ अकथयन्गतः. २ यथावस्थानम्; यथास्वस्थानम्. ३ आश्वासन. ४ विलोक्य. ५ त्वद्दर्शन

किं चान्यत्।

असमहरिततीरं विस्रजम्बालशेषं
स्फुटकुमुदपरागोल्लाससंपद्वियुक्तम्[1]।
वयमिह बहुशोकं दृष्टवन्तो वनान्ते
त्वदरियुवतिलोकं ग्रीष्ममासे सरश्च" ॥ ९ ॥

राजापि "श्लेषोक्तिनिधे, तथा गृहीत्वास्मन्मनो गतवानसि, यथा सुखसंवित्ति[2]शून्याः संतापारम्भिणो रणरणकाङ्कुरप्ररोहकाः कथमप्यस्माकमेते[3]ऽतिक्रान्ता दिवसाः ॥ क ॥

तत्कथय। का नामाभिनन्दनीया सा दिक्, यस्यां विहारमकरोः। के ते सफलचक्षुषो जनाः, यैश्चिरमालोकितोऽसि। के लब्ध-

ङ्गारादिर्वा यत्र। तथा सक्तोऽन्तर्लग्नः कण्ठो यस्य। तथा धृता कुत्सितवलयानां सुवर्णाद्यभावात्काचादिवलयानां माला येन। तथा जातभङ्गा भग्ना ऊर्मिका अङ्गुलीयकं यस्य ॥ ८ ॥

असमेति ॥ हरितते: सिंहपद्धतेः सकाशादीरः क्षेपस्त्रासो हरिततीरः, असमो हरिततीरो यस्य। अथवा मा लक्ष्मीस्तया सह समं, न सममसममश्रीकम्। तथा हरिततीर्वानरपङ्क्तीरीरयति क्षिपति। पश्चात्कर्मधारयः। तथा विगतस्रजं विगतमालम्। तथा बालशेषं हतभर्त्रादित्वात्। तथा स्फुटं कु कुत्सा यस्य तं स्फुटकुम्। तथा उद्गतोपरागस्य रागाभावस्योल्लासो यस्य। स चासौ संपद्वियुक्तश्च। अथवा स्फुटा कुत्सितोदरभरणादिमात्रजा मुद्यस्य स स्फुटकुमुत्। तथापगतो रागोल्लासो यस्य। स्फुटकुमुच्चासावपरागोल्लासश्च स्फुटकुमुदपरागोल्लासः, स चासौ संपद्वियुक्तश्च। बहुः शोको यस्य। ईदृशं त्वदहितस्त्रीजनमपश्याम ॥ ग्रीष्मे सर इव। तदपि कीदृक्। समं हरितं तीरं यस्य तत्समहरिततीरं, न समहरिततीरमसमहरिततीरं, विषमं शुष्कं च तीरं यस्येत्यर्थः। तथा विस्रं आमगन्धिको जम्बालः कर्दम एव शेषो यत्र। तथा विकसितकुमुदरेणूल्लाससमृद्धिरहितम्। नास्ति कं जलं यत्रेत्यकम्। बहुश इति क्रियाविशेषणम् ॥ ९ ॥

---

१ विमुक्तम्. २ संपत्ति. ३ कथमप्येते.

सुभाषितामृतरसास्वादाः, यैः संभाषितोऽसि । के प्राप्तप्राणितव्य
फलाः, यैः सह गोष्ठीमनुष्ठितवानसि ॥ क ॥

स्पृहणीयसंगम, गते त्वयि तर्कशास्त्रमिव प्रस्तुतपरमोहम
व्याकरणमिव भूतनिष्ठमिदमस्माकमासीन्मनः ॥ ख ॥

तदेह्येहि" इत्यभिधाय स्वयं करकमलतलेनोत्क्षिप्य सस्नेहं प
रामृशत् ॥ ग ॥

सोऽपि "एष महान्प्रसादो यदेवमनुकम्पतेऽस्मान्देवः" इ
त्यभिधाय गमनादारभ्य दमयन्तीदर्शनालापव्यतिकरमशेषं हा
लतार्पणपर्यन्तमाचचक्षे ॥ घ ॥

आख्याय च चरणेनैकेन ग्रीवाग्रादाकृष्य तां तथास्थितामे
मुक्तावलीमिदमवादीत् ॥ ङ ॥

"उन्मादिनी मदनकार्मुकमण्डलज्या
सौभाग्यभाग्यपरवैभववैजयन्ती ।
मुक्तावली कुलधनं नरनाथ सैषा
कण्ठग्रहं तव करोतु भुजेव तस्याः ॥ १० ॥

अपि च ।

प्रेमप्रपञ्चनवनाटकसूत्रधारी
मूर्त्ता मनोभवनृपस्य नियन्त्रणाज्ञा ।
तस्याः स्वयंवरपरिग्रहहेतुरेषा
हारावली हृदि पदं भवतः करोतु" ॥ ११ ॥

स्पृहेति ॥ प्रकृतोत्कृष्टमोहं मनः, शास्त्रं तु प्रस्तुतः परम ऊहो वितर्को यत्र
भूता संजाता निष्ठा क्लेशो यत्र मनसि, व्याकरणे तु भूतेऽतीतकाले निष्ठासंज्ञः प्रत्य
यत्र ॥ ख ॥

१ समम्. २ मभूत. ३ तदेहि. ४ परामृशत. ५ एवम्. ६ भर. ७ दूति.

राजा तु तामादाय निरूप्य च चिरं चिन्तयांचकार ॥ क ॥

"आनन्दिसुन्दरगुणामलकोपमान-
मुक्ताफलप्रचयमद्भुतम्[1]उद्वहन्ती[2] ।
एषा च सा च नयनोत्सवकारिकान्ति-
श्चेतोहरा हृदि पदं न करोति कस्य" ॥ १२ ॥

इति चिन्तयन्द्विगुणामेकगुणीकृत्य पुनः सस्पृहमैक्षत ॥ ख ॥

हंसस्तु विहस्य परिहासमकरोत् ॥ ग ॥

"तया दत्ता मयानीता स्वयमाह्लादिनी[3] त्वया ।
इत्यनेकगुणाप्येषा कथमेकगुणीकृता" ॥ १३ ॥

राजापि परिहासेनान्तःसूत्रं दर्शयन् "पक्षिपुंगव, किं न पश्यस्येकगुणैवेयम्[4] ॥ घ ॥

अथ वा ।

कः करोति गुणवान्गुणसंख्यां
श्लाघ्यजन्ममहसः स्फुटमस्याः ।
कुम्भिकुम्भपरिणाहिनि तस्याः
स्वैरमास्यत यया कुचयुग्मे" ॥ १४ ॥

आनन्दीति ॥ गुणस्तन्तुः शौर्यादिश्च । आमलकोपमानानां मुक्ताफलानां मौक्तिकानां प्रचयं समवायम् । अद्भुतमाश्चर्यकारिणम् । वहन्ती । दमयन्ती तु मलात्पापान्मालिन्याद्वा, कोपात्क्रुधो, मानाद्गर्वात्सादृश्याद्वा, मुक्ता भ्रष्टा । तथाद्भुतं चित्रं फलानां प्रचयं वहन्ती परिणेतुरिति शेषः। चेतोहरा मनोज्ञा । अन्यत्र चेतसि हरोऽस्याः। एवंभूतेयं मुक्तावली सा च कस्य हृदि वक्षसि चेतसि च, पदमवस्थानं न करोति, सर्वस्यापि करोत्येवेत्यर्थः ॥ १२ ॥

तया दत्तेति ॥ गुणाश्चारुतादयस्तन्तुसरिका च ॥ १३ ॥

कः करोतीति ॥ परिणाहो विशालता ॥ १४ ॥

---

१ मुद्गतम्. २ आवहन्ती. ३ अह्लादिता; आसादिता. ४ गुणेयम्.

इत्यभिधाय नीत्वा च निजकण्ठकन्दलम्, "इहास्ते सा तव पूर्वप्रणयिनी" इत्यन्तःस्थितां दमयन्तीं दर्शयितुमिव हृन्मध्यवर्तिनीं तामकरोत् ॥ क ॥

कृत्वा च किंचिदनुच्चस्मितं मधुमधुरया वाचा "विहंगपुंगव, पुनः कथ्यतां कीदृशी सा, कीदृग्रूपा, किं[1] च वयः, कीदृ[2]शी लावण्यसंपत्, को विनोदः, कीदृशं वाग्वैदग्ध्यम्, किं प्रियम्, का गोष्ठी" इति श्रु[3]तामप्यपूर्वामिव तद्वार्तामादरेण पृ[4]च्छन्नागच्छंश्च चटुलकरकृतशरसंधानस्यानवरतविरचिताद्भुतभ्रमणकर्मकार्मुकवलयस्य लक्ष्यतां म[5]करकेतोरविदितापक्रमानतिबहून्वे[6]लालवानवतस्थे ॥ ख ॥

स्थिते च विभूष्य मध्य[7]मं नभोभागं भगवति भासु[8]रभासि भास्वति, श्रवणपुटपथमवतरति च प्रहरावसानप्रहारभांकारिभेरीरवे, "वयस्य, विश्र[9]म्यतामिदानीममन्दमन्दारतरुपरिकरितरोधसि मन्दिरोद्यानारविन्ददीर्घिकायामेवं[10] प्रार्थ्यसे च न गन्तव्यमविसर्जितेन त्वया पूर्ववत्" इति नियम्य तं राजहंसं स्वयमप्य[11]ह्निकायोदतिष्ठत् ॥ ग ॥

एवं च

शिथिलितसकलान्यव्यापृतेस्तस्य राज्ञः
परिहृतनिजबन्धोर्यान्ति हंसेन सार्धम् ।

शिथिलितेति ॥ दिनमनु दिनं लक्षीकृत्य । एतेन रात्रिनिषेधः । पक्षिणो हि निशि नीडे निलीयन्ते । तापहेतवोऽपि दिवसा हंसवार्तया अविदितपरिवर्ताः । शरदि भवं

१ कीदृग्वयाः; किंवयाः. २ कीदृश. ३ श्रुतां श्रुतामपि; अतिभूयाः श्रुतामपि. ४ अपृच्छत्. ५ च मकरः. ६ कालवेला. ७ मध्यम्. ८ भास्वर. ९ विश्राम्यताम्. १० एष. ११ अपि माध्याह्निकाय.

दिनमनु दमयन्तीवृत्तवार्ताविनोदै-
रविदितपरिवर्ता वासराः शारदीनाः ॥ १५ ॥

एकदा[1] प्रस्फुरत्प्रभातारम्भप्रभया प्रभिद्यमाने नवनीलाञ्जनिकाकुसुम[2]कान्तिनि तमसि, विलीनलाक्षाम्भोभिरिव सिच्यमानायां शनैः[3] शचीदयितदिशि, मन्द[4]मुन्मिषत्कमलमुकुलोच्छलच्चटुलालिचक्रवालकलकलेनोन्निद्रितेन तन्द्रामुद्रितोन्मिषच्चक्षुषा चलच्चञ्चूकोटिकण्डूयनविरामधुतपक्षरोमराजिना राजहंसक[5]दम्बकेनानुगम्यमानो विहाय विहंगमः सरस्तीरम्, उपसृत्य[6] किंनरम[7]धुरगीतध्वनिविनिद्रितमा[8]वश्यकावसाने राजानम्, इदमवादीत् ॥ क ॥

"देव, विज्ञापयामो देवस्य दर्शनम्, अनालेप्यं चन्दनम्, अस्पर्शं कर्पूरपांसुपटलोद्धूलनम्, अपातव्यममृतम्, अनास्वाद्यं रसायनम्, अलेह्यं[9] मधु । कुतः किलैतदनुभवतामस्माकमपि वर्षसहस्रेणापि परि[10]तोषः । किं तु तिरयति स्वातन्त्र्यं प्राणिनां परपरिग्रहो दुस्त्यजाश्च जल[11]जन्मनोऽपि जन्म[12]भूमयो भवन्ति । अवगमिष्यति च विश्रब्धमेतत्सर्वमपि देवो यादृशा येन[13] च जन्मान्तराराधनोप[14]रोधेन प्रेषिता वयम् । अनवसरः खल्वयमस्य कथाप्रक्रमस्य । तदादिशतु देवोऽस्मान्गमनाय । न च प्रस्तुतानुचरालापेषु वयं विस्मरणीयाः । किमन्यज्जन्म च जीवितं च तदेव श्लाघ्यं[15]

शारदं रूपमुष्णत्वातिशयादि तद्विद्यते यस्यासौ शारदी । शारदी इनो येषु ते शारदीनाः ॥ १५ ॥

एकदेति ॥ नीलाञ्जनिका तापिच्छः ॥ क ॥

देवेति ॥ आस्तां मनुष्याणाम्, अस्माकमपि पक्षिजातीयानामपीत्यपिशब्दार्थः ॥

१ एकदा तु. २ कुसुम्भ. ३ शनैः शनैः. ४ मन्दमन्दम्. ५ कदम्बेन. ६ उपगम्य. ७ मधुमधुर. ८ आवश्यकशौचावसाने. ९ अनालेह्यम्. १० परितः परितोषः. ११ जलजन्मानोऽपि; जलजनोऽपि. १२ निजजन्म. १३ येच येन. १४ राधनोपारोधिता. १५ वयं श्लाघ्यम्.

मन्यामहे, यत्र[1] प्रसङ्गेन भवादृशा अनुस्मृतिं कुर्वन्ति। तदेष प्रस्थानप्रार्थनाप्रणामः" इत्युक्तवन्तमिममवनिपालः कथमपि[2] विसर्जयामास[3] ॥ क ॥

गते च तस्मिन्नविस्मरणीयोपकारे[4] कादम्बकदम्बकेश्वरे, श्रवणप्रणालिकया प्रविश्य मानसं[5] सरस्तरलयन्त्यां विदर्भराजहंससुतायां, प्रहरति प्रत्यङ्गमनङ्गधानुष्के, समीपवनविकासिकुन्दमकरन्दास्वादमदमेदुरगिरां गच्छति श्रवणपथमतिमधुरे मधुलिहां झंकारे, आकर्णपूरीकृतकार्मुकगुणे रणरणकारम्भिणि तत्रावसरे, ॥ ख ॥

आविर्भूतविषादकन्दमसमव्यामोहमीलन्मन-
श्चिन्तोत्तानितनिर्निमेषनयनं[6] निःश्वासदग्धाधरम् ।
जातं स्थानकमुत्सुकस्य नृपतेस्तत्तस्य यस्मिन्नभू-
त्प्रेयान्पञ्चमराग एव रिपवः शेषास्तु सर्वे रसाः॥१६॥

ततश्च वृश्चिकदंशदुःसहव्यथामवस्थामनुभवन्निव, कण्टकैश्चरणमर्मणि विध्यमान इव, मुहुर्मुहुर्मुर्मुरपुञ्ज[7]राजीवाङ्गानि धार-

तिरयति तिरस्करोति ॥ क ॥

गते चेति ॥ तस्मिन्हंसवृन्दनेतरि-। श्रवणमाकर्णनमेव प्रणाली जलमार्गस्तया। कृत्वा मानसं चेत एव सरस्तडागम्। अथ च मानसाख्यं देवतडागं कर्मतापन्नम्। विदर्भराज एव हंसस्तस्य पुत्र्यां तरलयन्त्यां सत्याम्। तथा प्रवणीकृतधनुर्गुणे अनङ्गधनुर्धरे। तथा मधुलिहां मधुरगिरां झंकारे कर्णे गच्छति औत्सुक्यकारिणि वावसरे सति। "हंसो विहंगभेदे स्यान्निर्लोभनृपतावपि" ॥ ख ॥

आविरिति ॥ उत्कण्ठितस्य नृपतेस्तत्स्थानकमवस्थान्तरं जातम्। यत्र (स्थानके) पञ्चमे पञ्चमाख्ये रागविशेषे रागो रसवत्ता स एव प्रियः। शेषास्तु रसा विषयानुरागा रिपवः ॥ १६ ॥

ततश्चेति ॥ तापातिरेकात्प्रतिक्षणं क्षणमात्रशुष्कत्वान्मुर्मुरः पुञ्जो येषां तानि मु-

१ यत्र प्रस्तावेन भवन्तोऽस्मृतिं कुर्वन्ति; यत्र प्रसङ्गेन भवादृशा अनुस्मृतिं कुर्वन्ति. २ कथंकथमपि. ३ विसर्जयांचकार. ४ अस्मरणीय. ५ मानससरः. ६ भिन्न इव. ७ पुञ्जभाञ्जाव.

यन्नुग्रग्रीष्मानिलोल्लोलैरिवालिङ्ग्यमानो, [1]मनागपि न क्वापि शर्म लेभे ॥ क ॥

तथाहि ।

[2]श्चोतच्चन्द्रमणि[3]प्रणालशिशिराः सौगन्ध्यरुद्धाम्बरै-
र्निर्गच्छन्नवधूपधूमपटलैः संभिन्नवातायनाः ।
सौधोत्सङ्गभुवो विकीर्णकुसुमाः पूर्णेन्दुरश्मि[4]श्रियां
रम्यायां निशि नो हरन्ति हृदयं हृद्यं किमुद्वेगिनाम् ॥१७॥

अपि च ।

हृद्योद्यानसरस्तरङ्गशिखरप्रेङ्खोलनायासिताः
संभोगश्रमखिन्नकिंनरवधूस्वेदोदबिन्दुच्छिदः ।
सायं सान्द्रविनिद्रकैरववनान्यान्दोलयन्तः शनै-
रङ्गेऽङ्गारसमाः पतन्ति पवनाः प्रालेयशीता अपि ॥१८॥

तदाप्रभृति चास्य प्रायः प्रीतिरभूद्दाक्षिणात्यजनेष्वेव, पुलकमकरोन्नामापि विदर्भदेशस्य, श्रुतापि श्रवणयोः सुखमजीजनद्दक्षिणा दिक् ॥ ख ॥

र्मुरपुञ्जानि, तथाभूतानि राजीवानि येष्वङ्गेषु तानि ॥ मुर्मुरस्तुषवह्निः ॥ यद्विश्वप्रकाशः । “ मुर्मुरस्तुषवन्ह्नौ स्यान्मन्मथे रविवाजिनि ” ॥ क ॥

श्चोतदिति ॥ क्षरच्चन्द्रकान्तप्रणालशीताः । सुगन्धितनभोभिर्धूपधूमैर्मिश्रगवाक्षाकीर्णपुष्पाः । प्रासादभूमयः परिपूर्णचन्द्रेण रमणीयायामपि रात्रौ चेतो हरन्ति । उद्वेगायेत्यर्थः । राज्ञ इति शेषः । युक्तं चैतत् । दुःखितानां किं हृद्यं न किमपीति भावः ॥१७॥

हृद्योद्यानेति ॥ रम्यतडागोर्मितरलनेन खेदिताः । तथा किंनरीस्वेदजलबिन्दुमुषः । वनानि कम्पयन्तः । शनैरङ्गे लगन्तो हिमसमा अपि वायवोऽङ्गारा इव पतन्ति ॥१८॥

---

१ मनागपि क्वापि शयितो विप्रबुधो वा न शर्म. २ श्चोतत्. ३ मणालि. ४ श्रियो.

किं बहुना ।

लिप्तेवामृतपङ्केन [1]स्पृष्टेवानन्दकन्दलैः ।
आसीद्दिग्दक्षिणा तस्य कर्णयोर्मनसो दृशोः ॥ १९ ॥

दमयन्त्यपि हंसदर्शन[2]दिवसादारभ्य भ्रमद्भृङ्गकुलकलकलोन्नादितपर्यन्तेषु, प्रत्यग्रोल्लूनपुष्पपल्लवास्तरणेषु, विचलद्विनोदविहंगेषु विहरति नासन्नोद्यानलतामण्डपेषु, न च विकचकुवलयकह्लारकुशेशय[3]सारवारिणि रणच्चटुलचञ्चरीकचक्रवाकचक्रे क्रीडति क्रीडासरसि, न च [4]स्पृशति पाणिनापि माणिक्यमालामण्डनानि, न च रचयति [5]रुचिरालकवल्लरी[6]भङ्गान्तरालेषून्मिषत्कुसुमविन्यासान्, न च क्वचिदुच्चहंसतू[7]लिकातल्पेऽपि कोमलकपोलावष्टम्भभाजि निद्रासुखमनुभवति, केवलम[8]धिपाण्डुग[9]ण्डस्थलस्थापितपाणिपल्लवा प्रेषयन्ती प्रतिक्षणमुत्तरस्यां दिशि दृशं, तद्देशागतान्गगने पक्षिणोऽपि सस्पृहं पश्यन्ती, तत्रत्यानध्वगानपि बन्धुबुद्ध्यालापयन्ती, तन्मण्डलागताय मरुतेऽप्यपनीतोत्तरीयांशुका [10]हृदयमर्पयन्ती दिनं दिनमनङ्गेनाभ्यभूयत ॥ क ॥

तथाहि ।

लास्यं पांसुकणायते नयनयोः, शल्यं श्रुतेर्वल्लकी,
नाराचाः कुचयोः सचन्दनरसाः कर्पूरवारिच्छटाः ।
तस्याः काप्यरविन्दसुन्दरदृशः सा नाम जज्ञे दशा
प्राणत्राणनिबन्धनं प्रियकथा यस्यामभूत्केवलम् ॥ २० ॥

---

१ सृष्टेव. २ दिनात्. ३ कुशेशये सार; कुशेशयचारु. ४ स्पृहयति. ५ रुचिता. ६ भङ्गान्तरेषु. ७ तूली. ८ अधिकपाण्डु. ९ गण्डपालिनिहित. १० स्वयं हृदय.

एवमनयोरन्योन्यप्रेषितप्रच्छन्नदूतोक्तिवर्धितानुरागयोः चल-न्त्यङ्गानि न मनोरथाः, परिवर्तते चक्षुर्न हृदयम्, कृशतामेत्य-ङ्गयष्टिर्नोत्कण्ठा, मन्दतां यात्युत्साहो नाभिलाषः, स्फारीभवति निःसहता न निद्रा, वर्धते चिन्ता न रतिः, शुष्यत्यधरपल्लवो ना-ग्रहरसः ॥ क ॥

किं बहुना ।

कर्पूराम्बुनिषेकभाजि सरसैरम्भोजिनीनां दलै-
रास्तीर्णेऽपि विवर्तमानवपुषोः स्रस्तस्रजि स्रस्तरे ।
मन्दोन्मेषदृशोः किमन्यदभवत्सा काप्यवस्था तयो-
र्यस्यां चन्दनचन्द्रचम्पकदलश्रेण्यादि वह्नीयते ॥ २१ ॥

आसीच्च तयोः कृतान्योन्यगुणप्रश्नालापजपयोः पुनरुक्ताव-र्तितनामधेयस्वाध्याययोः संकल्पसमागमाबद्धध्यानयोः स्मरा-नले स्वं हृदयं जुह्वतोस्तप्यमानयोरङ्गीकृतमौनव्रतयोरपि वियोग एव, न योगः ॥ ख ॥

कदाचित्तु तरुणजननयनकुरङ्गवागुरामनङ्गगजेन्द्रमदप्रवाह-ढक्कामपहसितसुरासुरसुन्दरीरूपश्रियं शृङ्गाररसराजधानीमवलो-

एवमिति ॥ तां दिशं प्रति चलन्त्यभिमुखीभूय निवर्तन्ते । एवं चक्षुरपि ॥ क ॥
आसीच्चेति ॥ कृतोऽन्योन्यगुणप्रश्नालाप एव जपो जाप्यं यकाभ्याम् ॥ पुनरावर्तितं नामैव स्वाध्यायो ययोः ॥ संकल्पे चित्तकर्मणि यः समागमस्तत्राबद्धं ध्यानं यकाभ्याम् । कामाग्नौ स्वचेतो होमयतोः । तप्यमानयोः । मौनिनोरप्यनयोर्वियोगो विरह एवासीत् ॥ न योगः । योगः संबन्धोऽध्यात्मविषयश्च । अन्यस्य जपं स्वाध्यायं ध्यानं होमं तपो मौनं व्रतं च कुर्वतो योगलाभः स्यात् । तप्यमानेति संतापपक्षे कर्मकर्तरि, तपःपक्षे तु कर्तरि, तपेः कर्मविषयत्वात् ॥ ख ॥

---

१ स्खलन्ति; वलन्ति. २ आकीर्णे. ३ प्रस्तरे. ४ द्वयोः. ५ वन. ६ अवबद्ध. ७ स्वहृदयम्. ८ नियोगः ९ उपहसित. १० रसराजराजधानी.

क्य यौवनावस्थां दमयन्त्याः "कोऽस्याः किलानुरूपः पतिर्भवेत्" इति, चिरं चिन्ताकुलो विदर्भेश्वरः स्वयं स्वयंवर[1]धर्मप्रारम्भाय समं मन्त्रिभिर्मन्त्रनिश्चयं चकार ॥ क ॥

न चिराच्च प्रा[2]च्यप्रतीच्योदीच्यदाक्षिणात्यनरपतिनिमन्त्रणे[3] सप्राभृतान्प्रगल्भप्रायान्[4]प्रधानप्रेष्यान्प्रेषयामास ॥ ख ॥

प्रस्थितं च कंचिदुदीच्यनरपतिनिमन्त्रणाय प्रबुद्धवृद्धब्राह्मणमाप्तसखीमुखेन दमयन्ती श्लिष्टार्थमिदमवादीत् ॥ ग ॥

"भूपालामन्त्रणे तात तथा संचार्यतां[5] यथा ।
नलोप्यागमबुद्धिः स्यात्प्रार्थ्यसे किमतः परम्" ॥ २२ ॥

सोऽप्यवगतश्लोकार्थस्तथाविधमेव प्रत्युत्तर[6]मदात् ॥ घ ॥

"केनापि व्यवहारेण कयापि प्रौढलीलया ।
करिष्याम्यागमस्यार्थे रभसेन नलङ्घनम् ॥ २३ ॥

तदायुष्मति सुखमास्ताम्" इत्यभिधाय गतवान् ॥ ङ ॥

अथ नातिचिरेणागतस्तया रहः समाहूय स ब्राह्मणः सोमशर्मा नर्मालापलीलया दमयन्त्या बभाषे ॥ च ॥

"आहूतोदीच्यभूपेन ता[7]तादेशविधायिना ।
नालीकापि त्वया वार्ता विद्वन्नावेदिता मम ॥ २४ ॥

भूपेति ॥ तातेति संबोधने । नृपनिमन्त्रणे तथा संचार्यतां, यथा आगमावगतिः शास्त्रप्रतीतिर्लोप्या न स्यादिति बाह्यार्थः । इष्टार्थस्तु नलनामापि नृपो यथागमनबुद्धिर्भवेदिति ॥ २२ ॥

केनेति ॥ आगमस्य शास्त्रस्य । अर्थे लङ्घनं न करिष्यामीति बाह्यार्थः ॥ इष्टार्थस्तु आगमनस्यार्थे रभसेनौत्सुक्येन घनं निबिडं नलाख्यं नृपं करिष्यामि आनेष्याम्येवेत्यर्थः ॥ २३ ॥

आहूतेति ॥ आकारितोत्तरनृपेण त्वया विद्वन्नलीकापि वार्ता न कथितेति बाह्योऽर्थः । आन्तरस्तु नलस्येयं नाली वार्ता सा कापि त्वया नाभ्यधायि ॥ २४ ॥

---

१ स्वयंवरकर्म; स्वयंवरधर्मकर्म. २ प्राच्योदीच्यावाच्यदाक्षिणात्य. ३ निमन्त्रणाय. ४ प्रश्रयान्. ५ संचर्यताम्. ६ उत्तरम्. ७ गुर्वा.

सोऽपि "एष कथयामि श्लेषोक्तिकुशले, श्रूयताम्" इत्यभिधाय विहसन्नाख्यातुमारब्धवान् ॥ क ॥

इतो निर्गत्य मया मण्डलेश्वरामन्त्रणक्रमेण [1]परिभ्रमताऽभ्रंकषानेककूटकोटिस्थपुटितकटकस्य निषधनाम्नो महीध्रस्य दक्षिणारण्यस्थलीषु मृगयासक्तः ॥ ख ॥

माद्यन्मांसलतुङ्गपुंगवककुत्कूटोन्नतांसस्थलः
कालिन्दीजलकां[2]न्तिकुन्तलशिराः पूर्णेन्दुबिम्बाननः।
एकः कोऽपि मनोहरः पथि युवा दृष्टः स यस्मिन्सकृद्
दृष्टे नष्टनिमेषया मम दृशा लब्धं फलं जन्मनः॥२५॥

तेनापि 'दाक्षिणात्योऽयम्' इति निश्चित्य साभिलाषमाभाषितोऽस्मि ॥ग॥

म[3]यापि कृ[4]तोचितालापेनोक्तम् ॥ घ ॥

'यथेयमाकृतिर्लोकलोचनानन्ददायिनी।
तव भद्र तथा सत्यं सत्यागोऽसि नलोभवान्' ॥ २६ ॥

एवमुक्तः सोऽपि मनाङ्मुग्धस्मितमेवोत्तरं कल्पितवान् ॥ ङ ॥

अथ प्र[5]थमवयोविभूषिताङ्गस्तुङ्ग[6]तुरंगमारूढो गाढग्र[7]थितपरिकरः करेण कोदण्डमाकलयंस्तद्द्वितीयो युवा त[8]मेव देश[9]मागतवान् ॥च॥

आगत्य च बालनील[10]नलशाद्वलशालिनि शिलोच्चयस्थलीप्रदेशे कां-

यथेयमिति ॥ सन् शोभनस्त्यागो यस्य। तथा न त्वं लोभवान्। असीत्यव्ययं युष्मदर्थे। पक्षे सत्यागस्त्वम्। तथा नलाख्यो भवान् इति पृथग्वाक्यद्वयम्। एकवाक्यतायां तु भवानसीति मध्यमपुरुषो दुर्लभः ॥ २६ ॥

---

१ परिभ्रमता सताभ्र. २ कान्त. ३ततो मया; मया च. ४ कृतोचिताचारालापेन. ५ प्रथम वयोविशेषभूषि; प्रथमवयोभू. ६ तुरङ्ग. ७ ग्रन्थिग्रथितप; प्रथित. ८ तमेवोद्देशम्. ९ आयातवान् १० नलशाद्वलशालि.

चित्काञ्चनकुम्भकान्ति[1]कुचकण्ठ[2]लुठित[3]कुसुममालिका[4]मवलोकय-न्निदमवादीत् ॥ क ॥

'युवराज, पश्य ।

नद्यास्तीरे विदर्भायाः कापि गोपालबालिका ।
गाः समुच्चारयत्येषा क्षेत्रीकृत्य नलं वरम्' ॥ २७ ॥

एतदाकर्ण्य मयाप्युक्तम्–'महानुभाव, न केवलमियं[5]मन्यापि क्वा[6]पि कापि' इति ॥ ख ॥

इत्युक्तवन्तं मामवलोक्य भावितार्थः स पुनः[7] सस्मितम-वोचत् ॥ ग ॥

'इयं च सा च

अनुभवतु चिराय चञ्चलाक्षी-
रसपरिणामफलानि गोपपुत्री ।
अपसरति महोद्यमेन यस्याः
कथमपि संप्रति नैषधेनुरागः' ॥ २८ ॥

नद्या इति ॥ विशिष्टदर्भाया नद्यास्तीरे । काप्यनिर्दिष्टनामा । गोपी । वरं श्रेष्ठं । नलं(डं) तृणविशेषं । केदारीकृत्य । गा धेनूः । समुत् सहर्षा । चारयति ॥ श्लेषव-क्रोक्त्या तु विदर्भाभिधानाया नद्यास्तीरे, कापि महनीयमहिमा, गोपालस्य भूपस्य, बा-लिका सुता, नलं राजानं, वरं वरयितारं, क्षेत्रीकृत्याश्रयीकृत्य, गिरः समुच्चारयति ॥ वर ईप्सायाम्, वर्यत इति वरः । क्षेत्रं सद्भूमिः ॥ २७ ॥

अनुभवत्विति ॥ गोपालिका क्षीरस्य सपरिणामानि परिणतानि यानि फलानि क्षैरेयी दधिघृतप्रभृतीनि तान्यनुभवतु चिराय । चञ्चला लोला गोचारणवशात् । यस्याः संप्रत्येष धेनुरागो । महोद्यमेन हेतुना । कथमपि केनापि प्रकारेण । न निवर्तते ॥ श्लेषे

---

१ कान्त. २ कुचकुम्भ. ३ लुलित. ४ मालिकां बालिका; मालिकां गोपबालिकाम्. ५ इय-मेवान्यापि. ६ कापि क्वापि नद्यास्तीरे विदर्भायाः कापि गोपालबालिका । गाः समुच्चारयत्येषा क्षेत्रीकृत्य नलं वरमित्युक्तवन्तं. ७ पुनः पुनः.

आस्तां[1] तावदन्यत्। अध्वन्य, कथय कुतः प्रष्टव्योऽसि, किंच कियद्वाद्यापि[2] वर्त्मातिक्रमितव्यम्, इति ॥ क ॥

अथ कथितस्ववृत्तान्तेन मयापि 'कोऽयमशेषमनुष्यमस्तकमणिः, कश्च भवानपि स्वप्रज्ञाप्राग्भारपराङ्मुखीकृतपुरंदरगुरुः' इति पर्यनुयुक्तः स पुनरुक्तवान् ॥ ख ॥

'अयमसौ सौम्य[3], समस्तशस्त्र[4]शास्त्रकोविदो विदारितवैरी वैरसेनिर्नलः[5]। किमन्यदहमपि श्रुतशीलो[6] नामास्यैवाज्ञाकारी' इत्यभिधाय विश्रान्तवान् ॥ ग ॥

नलोऽपि कृत्वा त्वदाश्रयास्तास्ताः प्रकटितप्रेमकन्दलाः कथाः, समर्थ्य च[7] स्वयंवरामन्त्रणमुत्सुकतया तत्कालमेवोड्डीय[8] गन्तुमीहमानः संभाषितेन स्मितेन[9]ालोकितेन[10] च माममृतवर्षेणेवाह्लादयन्ननिच्छन्तमपि प्रतिग्राह्य च बलादनर्घ्याणि स्वाङ्गाभरणानि चिरादेव[11] व्यसर्जयत् ॥ घ ॥

स्वयं च मृगयाव्यसनितया मृगयालुभिः सह ॥ ङ ॥

धीरं रङ्गन्तमारुह्य सारं रंहसि वाजिनम्।
हारं रम्यं गले बिभ्रत्स्वैरं रन्तुमगात्पुनः ॥ २९ ॥

तु गोपपुत्री भूपपुत्री दमयन्तीलक्षणा। चञ्चलाक्षी लोलनेत्रा शृङ्गारादिरसपरिपाकफलान्युपभुङ्क्ताम् ॥ यस्याः संप्रति नैषधे नले महोद्यमेऽनुरागः प्रेमबन्धः। कथमपि नापसरति ॥ २८ ॥

धीरमिति ॥ धीरमत्रासं रङ्गन्तं वल्गन्तं रंहसि वेगे सारमुत्कृष्टं वाजिनमश्वमारुह्य कण्ठे हारं गुणं बिभ्राणः स्वच्छन्दं क्रीडितुं पुनरप्यगात् ॥ २९ ॥

---

१ आस्तां च. २ कियच्चाद्यापि. ३ सौम्यः. ४ शस्त्रास्त्रशास्त्र. ५ नलो नाम. ६ श्रुतशीलनाम. ७ च स्वयं स्वयं. ८ उड्डीयेवागन्तुम्. ९ सस्मितेन; कुत्रचित्पुस्तके स्मितेनेत्येतन्नास्ति. १० अवलोकितेन. ११ चिरादिव.

तदायुष्मति, स्वामिसुते यथा मया त[1]त्कथाप्रश्नानुराग उप-लक्षितस्तथा निश्चितम[2]चिरादयमेष्यति" इत्यभिधाय स ब्राह्मणः स्वगृ[3]हमगात् ॥ क ॥

गते च तस्मिन्दमयन्ती "श्लाघ्यः स कः कालः, धन्यः स क[4]तमो वासरः, स[5]लक्षणा सा का नाम वेला, यस्यामिदमिन्दुदर्शनेनेव कुमुदमस्मच्चक्षुस्तदालोकनेन क[6]मप्यानन्दमनुभविष्यति" इति चिन्तयन्ती कान्यपि दिनानि कयाप्यवस्थया व्यनैषीत् ॥ ख ॥

अथ नलोऽप्यामन्त्रितस्तेन ब्राह्मणेन रणरणकेन च, प्रेरितो मन्त्रिणा मदनेन च, परिवृतः सेनयोत्कण्ठया च, तत्कालमेव विदर्भमण्डलाभिमुखमुदचलत् ॥ ग ॥

चलिते च च[7]तुरङ्गब[8]लचलनचूर्णितशिलोच्चयचक्रवाले चक्रिचक्रचङ्क्रमणचीत्कारबधिरितककुभि विषमवैरिवृन्दवनवैद्युतानलेनले, चलन्तश्चटुलतरचरणप्रहाररणितधरणिमण्डलाः कान्तका[9]ञ्चनरचनारोचिष्णवश्चकासांचक्रुश्चक्रवर्तिवाहनोचिताः साश्चर्यमपर्यन्तपर्यायाः पर्याणितास्तुरङ्गाः, शृङ्गारिताश्च चलच्चारुचामरावे[10]धूलनालंकृतकपोलभित्तिभागसंलं[11]गितभृङ्गसंगीतमुखरितमुखमण्डलाः कथमप्याधोरणनिरुध्यमानशौर्यविकारस्फु[12]रणाः स्फुरत्कुम्भभित्तिसिन्दूरा दूरापसारितस्यन्दनाः स्यन्दमानामन्दमदकर्दमितमेदिनीकाः कम्पयांबभूवुर्भुवं भूरिभारभुग्नाङ्गपन्नगशि[13]रःशिथिलावष्टम्भामिभेन्द्राः ॥ घ ॥

---

१ त्वत्कथा. २ अचिरादेष्यति. ३ स्वगृहान्. ४ कः. ५ सुलक्षणा. ६ कथमपि. ७ चलच्चतुरङ्ग. ८ बलचमूचलन. ९ काञ्चनाभरणरचना. १० धूनना; चूला. ११ संकलित; संमिलितमदमिलित; संगलितमदजललुलित. १२ विस्फुरणाः. १३ शिरःसहस्रशि.

किं बहुना।

तत्रावसरे

पूर्वापरपयोराशिसीमासंक्रान्तसैनिके।
तस्मिन्सस्मार भूर्भाराद्वराहवपुषो हरेः॥ ३०॥

अपि च।

आसीत्पिण्डितपाण्डुपङ्कजवनं श्वेतातपत्रैः क्वचि-
न्मायूरातपवारणैः क्वचिदभूदुन्नालनीलोत्पलम्।
उन्मेघं क्वचिदूर्ध्वधूलिपटलैस्तस्य प्रयाणेऽभव-
त्प्रोद्वीचि क्वचिदम्बरं सर इव प्रेङ्खत्पताकापटैः॥ ३१॥

जाताश्च जङ्घाजघनस्पृशो, वक्षःस्थलीलोलनलम्पटा, ग्रीवाग्रहणाग्रहिण्यः, प्रसभं लगन्त्यो वस्त्रेषु, निस्त्रपा स्त्रिय इव, नखपदाभिघातोद्यताः, चुम्बन्त्यश्चिबुककपोलाधरचक्षूंषि सैनिकानाम्, अतिप्रसरेण शिरोऽवलग्नाः, प्रबला धूलयो, वियदावरणाश्च चक्रुरुच्चैरतिप्रसङ्गमासन्नवननिकुञ्जेषु॥ क॥

पूर्वेति॥ पूर्वापरसागरावधिसंक्रान्तचमूचरे तस्मिन्नले भूर्मेदिनी भाराद्धेतोर्हरेः सस्मार॥ "अधीगर्थ–" इति सूत्रेण कर्मणि षष्ठी॥ ३०॥

आसीदिति॥ सितच्छत्रैः पिण्डितपुण्डरीकवनं, श्रीकरीभिः सनीलोत्पलं, रेणुपटलैरुन्नतमेघं, क्वचिच्चलद्ध्वजाञ्चलैः प्रवृद्धोर्ध्वरङ्गं, तडागमिवाम्बरमाकाशं तत्प्रयाणेऽभूत्॥ प्राच्यदेशे महासरःसु मेघा अम्भो ग्रहीतुमुन्नमन्त इति प्रसिद्ध्योन्मेघत्वमुक्तम्॥ ३१॥

जाताश्चेति॥ धूलयो निर्लज्जा स्त्रिय इव। जङ्घेत्यादीन्युभयत्र समानानि। नखा अश्वादीनां खुराः, पदं पादविन्यासस्तेषामभिघातादुत्थिताः। पक्षे नखक्षतपदयोश्चाभिघाते उद्यताः सोद्यमाः॥ बलात्सैन्यात्प्रवृद्धाः, पक्षे प्रवृद्धवीर्याः। वियदावरणा नभश्छादिन्यो विगच्छद्वस्त्राश्च। वियन्नभः। विपूर्वस्येणः शतरि च वियदिति। अतिप्रसङ्गमतिव्याप्तिं, पक्षे रतिप्रसङ्गं सुरतप्रबन्धम्॥ क॥

कूजन्तश्च कोटिशः कोदण्डमण्डलाग्रव्यग्रपाणयः, पणिनीया इवाधिकरणकर्मकुशलाः समुल्लसन्तो विचेलुर्वल्गनपटवो लाम्पट्योल्लुण्ठितरिपुपुरः[1] पुरः पदातयः ॥ क ॥

तत्र च व्यतिकरे

मन्दं मन्दरमन्दिरेषु शयितानुन्निद्रयन्किंनरा-
न्मेरोर्मस्तककंदरे[2] प्रतिरवानुत्थापयन्नुल्वणः।
आध्वं धावत यात मुञ्चत पुरः पन्थानमेवंविध-
स्त्रैलोक्यं बधिरीचकार बहलः[3] सैन्यस्य कोलाहलः॥३२॥

एवमसौ क्रीडितानेकपामरान्गिरीन्[4] ग्रामांश्च बहुतरङ्गोपशोभिताः सरितः सीम्नश्च[5] व्यूढपत्त्ररथान्पथः पादपांश्च लङ्घयन्, सालसहिताः पुरीर्नारीश्च सेवमानः, पच्यमानगोधूमश्यामलाः क्षेत्रभुवो भिल्लपल्लीश्च परिहरन्, विधवाः शत्रुसीमन्तिनीरटवीश्चातिक्रामन्, परिवारोणि बन्धुकुलानि सरांसि च बहु। मानयन्, नातिचिरेण रविरथतुरंगपरिहृतविषमशिरःशिखरसहस्रमजस्रममरगणगन्धर्वसिद्धरुद्धस्कन्धमध्यं विन्ध्याचलमनुससार ॥ ख ॥

कूजन्तश्चेति ॥ पदातयो विचेलुः। किं कुर्वन्तः। कोटिशोऽनेकधा कूजन्तः शब्दायमानाः। तथा कोदण्डेन धनुषा मण्डलाग्रेण चासिना व्याकुलाः पाणयो येषां ते। तथाधिकं रणकर्मणि कुशलाः। पाणिनीयपक्षेऽधिकरणकर्मणी कारके। लाम्पट्येनोल्लुण्ठिता अरिपुरोऽरिनगर्यो यैः। पुरोऽग्रतः ॥ क ॥

एवमिति ॥ अमुना प्रकारेणासौ नल इदमिदं कुर्वन्तरणिरथाश्वत्यक्ताधित्यकामध्यं विन्ध्याद्रिमनु। लक्षीकृत्य ससार। किं कुर्वन्। लङ्घयन्। कान्। गिरीन्द्रान्ग्रामांश्च। संप्रत्युभयानपि विशिनष्टि। क्रीडिता अनेकपा गजा अमराश्च देवा येषु। पक्षे पामरा ग्राम्याः॥ सरितो बहुभिस्तरङ्गैरलंकृताः। सीमानश्च बहुतरं यथाभवत्येवं गोपैर्गोपालैः शोभिताः॥ विशेषेणोढानि पत्त्राणि वाहनानि रथाश्च यैः। पक्षे पत्त्ररथः

1 पुरः पदातयः; अरिपुरःपुरःपदा. 2 कन्दर. 3 वहतः. 4 गिरीन्द्रान्. 5 सीमाश्च.

ततश्च ।

दिशि दिशि किमिमानि प्रच्यवन्तेऽन्तरिक्षा-
दविरतमुत देवी भूतधात्री प्रसूते ।
इति शबरवधूभिस्तर्क्यमाणान्यवापुः
सपदि विपुलविन्ध्यस्कन्धमध्यं बलानि ॥ ३३ ॥

श्रुतशीलस्तु तुङ्गशृङ्गरङ्गत्सारङ्गाङ्गनासु नक्षत्रासन्नाकाशावकाशविंशद्वंशजालजटिलासु चलच्चित्रचित्रककरिकलभकदम्बकसंचारशबलासु हारिहरिताङ्कुररमणीयासु वनस्थलीषु निक्षिप्तचक्षुषमवलोक्य राजानमिदमवादीत् ॥ क ॥

"देव,

माद्यद्दन्तिकपोलपालिविगलद्दानाम्बुसिक्तद्रुमाः
क्रीडत्क्रोडकुलार्धचर्वितपतन्मुस्तारसामोदिताः ।
अन्तःसुस्थितपान्थमन्थरमरुल्लोलल्लतामण्डपाः
कस्यैता न हरन्ति हन्त हृदयं विन्ध्यस्थलीभूमयः ॥३४॥

पक्षी ॥ सालेन प्राकारेण सहिताः । नार्यः सालसा हिताश्च ॥ अलसशब्दो भावप्रधानो लक्षणादिवत् ॥ पचेलिमैर्गोधूमैः सस्यविशेषैः श्यामलाः । पक्षे तु गोर्भूमेर्धूमो गोधूमः । ततः पच्यमानः परिपाकं गच्छन् बहुलीभवन्योऽसौ गोधूमस्तेन श्यामलाः । न तु पच्यमाना चासौ गौश्चेति । टच्प्रसङ्गात् ॥ कृष्यावनी हि दग्धा समधिकं फलतीति ॥ तथा च (रघुवंशे नवमे सर्गे) "कृष्यां दहन्नपि खलु क्षितिमिन्धनेद्धो बीजप्रोहजननीं ज्वलनः करोति" ॥ गोशब्दो भूम्यर्थो न धेन्वर्थोऽनौचित्यात् ॥ विर्विशेषे विगमे च । धवो भर्ता तरुविशेषश्च ॥ परिवृण्वन्ति परिवारीभवन्ति परिवारीणि । अन्यत्र परि समन्ताद्वारि जलं येषु ॥ क ॥

माद्यदिति ॥ मुस्तायाः कन्दविशेषस्य रसेन निर्यासेनामोदिताः । अन्तर्मध्ये सुस्थिताः पान्था यासु । तथा मन्थरमरुता मन्दानिलेन लोलन्तश्चलन्तो लतामण्डपा यासु । पश्चात्कर्मधारयः ॥ ३४ ॥

---

१ विशदविकसत्.

इतश्च पश्यतु देवः ।

एषा सा विन्ध्यमध्यस्थलविपुलशिलोत्सङ्गरङ्गत्तरङ्गा[1]
संभोगश्रान्ततीराश्रयशबरवधूशर्मदा नर्मदा च ।
यस्याः सान्द्रद्रुमालीललिततलमिलत्सुन्दरीसंनिरुद्धैः
सिद्धैः सेव्यन्त एते मृगमृदितदलत्कन्दलाः कूलकच्छाः ३५

अपि च ।

अन्तरेऽप्यस्याः[2]

मज्जत्कुञ्जरकुम्भमण्डलगलद्दानाम्बुनः[3] सौरभा-
द्भ्राम्यद्भृङ्गकुलावलीः कुवलयश्रेणीः समाबिभ्रतः ।
कल्लोलाः कलिकालकल्मषमुषः प्रोल्लीलकीलाकृतः[4]
स्वःसोपानपरंपरा इव वियद्वीथीमलंकुर्वते ॥ ३६ ॥

इतश्चास्यास्तीरे[5]

अंसस्रंसिजलार्द्रजर्जरजटाजूटैर्मनाङ्मन्थरा-
स्तिम्यत्तारवतन्तुनिर्मितकुथत्कौपीनमात्रच्छदाः ।
शीतोत्कण्टकितास्थिशेषतनवः स्नात्वोत्तरन्तः शनै-
रेते पश्य पतन्ति पिच्छिलशिलाजाले जरत्तापसाः॥ ३७॥

इतोऽपि

पश्यैताः करिकुम्भसंनिभकुचद्वन्द्वोल्लसद्वीचयः
क्रीडन्त्यब्जविकासभासि[6] पयसि स्वैरं पुलिन्दस्त्रियः ।

मज्जदिति ॥ भृङ्गकुलानां कुवलयान्युपमानम् । बिभ्रत इति कल्लोलविशेषणं जसन्तम् । "नाभ्यस्ताद्–" इति नुमभावः ॥ ३६ ॥

अंसेति ॥ तरुषु जातास्तारवाः । ते च ते तन्तवश्च । पिच्छिलं मसृणं कर्दमिलम् ॥ ३७ ॥

---

1 विन्ध्यशैलस्थल. 2 यस्याः. 3 गण्ड. 4 भृतः. 5 तीरेषु. 6 विकाश.

उन्मीलन्नवनीलनीरजधिया पक्ष्मान्तरे नेत्रयोर्यास्तां
हस्तलंताहता अपि परिभ्राम्यन्ति भृङ्गाङ्गनाः ॥ ३८ ॥

इतोऽप्यवलोकयतु देवः ।

बालोन्मीलत्कुवलयवनं विस्तरद्गन्धरुद्ध-
भ्राम्यद्भृङ्गैरनुकृतपयःपूर्णमेघान्धकारम् ।
हर्षात्पश्यत्ययमतितरां तीरचारी मयूरो
मुग्धः पार्श्वे भ्रमति चे भयाच्चक्रवच्चक्रवाकः ॥ ३९ ॥

इदं च

कुररभरसहं सहंसमालं
मुदितमयूरचकोरचक्रवाकम् ।
क इह सुरुचिरं चिरं विलोक्य
प्रवरमते रमते नरो न रोधः ॥ ४० ॥

इतश्च ।

बककृतनिनदं नदं न दम्भा-
त्कृतसवनं सवनं भजन्त एते ।
निरुपमविभवं भवं स्मरन्तः
प्रशमधना मुनयो नयोपपन्नाः ४१ ॥

बालेति ॥ विस्तरता प्रसरता गन्धेन रुद्धाः । अतएव भ्राम्यन्तो भृङ्गास्तैरनुकृतः पयःपूर्णमेघोऽन्धकारश्च येनेति वनविशेषणम् । मेघाद्धि मयूरस्य हर्षः । अन्धकाराच्च रात्रिशङ्कया चक्रवाकस्य भयम् ॥ ३९ ॥

कुररेति ॥ प्रवरा मतिर्यस्य तत्संबोधनम् । इह रोधस्तटं विलोक्य को नरो न रमते क्रीडत्येव सर्वः । कथंभूतम् । कुरराणां भरमतिशयं सहते । तथा सह हंसमालया तथा मुदिता मयूराश्चकोराश्चक्रवाकाश्च यत्र । यतः सुष्ठु रुचिरम् ॥ ४० ॥

बकेति ॥ प्रशम एव धनं येषां ते मुनयो नययुक्ताः । अनुपमसामर्थ्यं भवमीश्वरं स्मरन्तो बकैः कृतशब्दम् । तथा न दम्भात्कपटादपि तु धर्मवासनया कृतं सवनं स्नानं

१ तलाहता. २ तु.

विधूतपाप्मानः खल्वमी महानुभावाः ॥ क ॥

तथाहि ।

मुहुरधिवसतां सतां मुनीना-
मपविपदां विपदाङ्कपङ्कभाञ्जि ।
तटनिकटवनानि नर्मदायाः
कथमिभवन्ति भवन्ति कल्मषाणि ॥ ४२ ॥

इतश्च ।

क्वचित्प्रवरगैरिकासमसमुल्लसत्पल्लवं
लवङ्गलवलीलतातलचलच्चकोरं क्वचित् ।
क्वचिद्गिरिसरित्तटीतरुणविस्फुरत्कन्दलं
दलन्निचुलमञ्जरीमधुनिरुद्धभृङ्गं क्वचित् ॥ ४३ ॥

क्वचिच्चटुलकोकिलाकुलितनूतचूताङ्कुरं
कुरङ्गकुलसेवितप्रबलसालमूलं क्वचित् ।
क्वचित्प्रवरसंचरत्सुरवधूपदैः पावनं
वनं नयति विक्रियामिह मनो मुनीनामपि ॥ ४४ ॥ युग्मम् ॥

यत्र तम् । तथा सह वनैः सवनं वनयुक्तम् । नदं जलाधारविशेषम् । एते भजन्ते ॥ ४१ ॥

मुहुरिति ॥ इभवन्ति गजवन्ति । तथा वीनां पक्षिणां पदमङ्को यत्र तथोक्तं पङ्कं भजन्ते तानि नर्मदायास्तटसमीपवनानि कर्मभूतानि अधिवसतां सतां विदुषाम् । अपगता विपद्येभ्यस्तादृशां मुनीनां कथं कल्मषाणि पापानि भवन्ति । न भवन्त्येवेत्यर्थः ॥ ४२ ॥

क्वचिदिति ॥ प्रवरं गैरिकं यत्र । तथा असममप्रतिमम् । सर्वोत्कृष्टमिति यावत् । तथा समुल्लसन्तः पल्लवा यत्र । पश्चाद्यथायुक्ति कर्मधारयः । गैरिकशब्दो नपुंसकः । “ प्रवरगैरिकोपम ” इति वा पाठः ॥ ४३ ॥ ४४ ॥

तदिदम[1]द्यतनं दिवसमस्य सैन्यस्याध्वश्रमापन्नखेदापनुत्तिनिमित्तमधिवसतु देवः ॥ क ॥

यत्र

वायुस्कन्धमवष्टभ्य स्फारितैः पुष्पलोचनैः ।
वियद्विस्तारमेते हि वीक्षन्त इव पादपाः ॥ ४५ ॥

अपि च येषाम्

स्कन्धशाखान्तरालेषु पश्य जीमूतपङ्क्तयः ।
लम्बमाना विलोक्यन्ते [2]चलद्वल्गुलिका इव ॥ ४६ ॥

येषां च

उच्चैः शाखाग्रसंलग्ना मन्ये नूनं [3]वनौकसाम् ।
कुर्वन्ति पुष्पसंदेहं निशि नक्षत्रपङ्क्तयः ॥ ४७ ॥

इतश्च ।

एतेषु प्रचण्डपवनाहत[4]तरुतलगलितसुगन्धिविविधविकचकुसुमप्रकरमकरन्द[5]मापीय पुनः शिखरशाखाभिमुखमुत्पतन्त्यो विभान्ति दुरारोहतया कृताः केनापि निश्रेणय इव श्रेणयो मधुलिहाम् ॥ख॥

इतश्च ।

निश्चलानां सैन्यभयेन [6]तुङ्गतरुशिखरपञ्जरपुञ्जितगोलाङ्गू-

तदिति ॥ खेदापनुत्तिः खेदापनोदः ॥ क ॥

वायुस्कन्धमिति ॥ स्कन्धः संहत्यर्थोऽसार्थश्च । कुतोऽत्रावासः । हि यस्मात् तुङ्गाः पुष्पिताश्चात्र पादपाः सन्ति ॥ ४५ ॥

इतश्चेति ॥ गोलाङ्गूलानां कृष्णमुखमर्कटानां । लाङ्गूललतिकाः पुच्छवल्लयः । अतिलोमशत्वान्निर्यन्नवप्ररोहाङ्कुर आकारो यासाम् ॥ ख ॥

---

१ अद्यतन. २ वल्गद्वल्गुलि; वटवल्गुलि. ३ नगौकसाम्. ४ पवनाहतितल; पवनाहतलतागलित. ५ मकरन्दामोदम्. ६ तुङ्गतरतरु.

लमण्डलानां निर्यन्नवप्ररोहाङ्कुराकाराः कुर्वन्ति वनदेवतानां क्रीडान्दोलनदोलारज्जुशङ्काम[1]धोविलम्बिलाङ्गूललतिकाः ॥ क ॥

इतश्च ।

चकासत्युड्डीयमानास्तरुशिरःशिखरशाखाग्रस्खलनविलग्नग्रहगणविमानपङ्क्तिपताका इव विहं[2]गावलयो निश्चलम् ॥ ख ॥

इतश्च ।

विजृं[3]म्भमाणमञ्जरीजालेषु सर्वर्तुविकासिसहकारवनेषु वनदेवताभिरुद्दामदवदहनप्रतीकारार्थमनागतमेव संगृहीत[4]वारिगर्भाम्भोदपटलमिवा[5]लोक्यते कोकिलाकुलकदम्बकम् ॥ ग ॥

इतश्च ।

विकसितसितपुष्पपिण्डपाण्डुर[6]शिखराः सुधाधवलितोर्ध्वभूमयो विलासप्रासादा इव कुसुमसायकस्य जराधवलमौलयः कञ्चुकिन इव वनदेवतानाम्, उन्मादयन्ति मनोऽमन्दमुचुकुन्दपादपाः॥घ

तदेवंविधेषून्मिषन्मुकुलविगलितबहलमकरन्दसीकरासारसुरभितभूतलेषु मुग्धमृगपरिहृतदावानलज्वालायमानोन्मदशबरसीमन्तिनीचरणप्रहारविकसिताशोककाननेषु नवजलधरनिकुरम्बकान्तितमालत[7]रुशिरःस्थितशब्दानुमेयमाद्यन्मयूरमण्डलेषु मदनालसपुलिन्दराजसुन्दरीशिक्ष्यमाणवनकपोतकुक्कुटकुक्कुहकुलकुहरितेषु कूजत्कुररपरिवारितसरःपरिसरेषु चलच्चकोरसारसरवरमणीयेषु विहरतु देवः सह सैन्येन नर्मदोर्मिमन्दानिलान्दोलितलतापल्लवेषु वनेषु ॥ ङ ॥

तदेवमिति ॥ मुग्धमृगेत्यादि वनविशेषणम् । लौहित्यान्मुग्धमृगैर्दावानलभ्रान्त्या कुसुमिताशोककाननानि परिहृतानीति भावः ॥ ङ ॥

---

१ अधोलम्बित. २ विहङ्ग. ३ जृम्भमाण. ४ संगृहीतमिव. ५ अवलोक्यते. ६ पाण्डुशिख. ७ तरुशिखरशिरः. ८ चरतु.

राजापि श्रुतशीलेन दर्शितांस्तांस्तान्देशान्[1] अवलोक्य चिन्तितवान् ॥ क ॥

“ कृतक्रीडाः क्रोडैर्मदकलकुरङ्गैर्हतमृगाः[2]
परिभ्राम्यद्भृङ्गाः परभृतकुलाक्रान्ततरवः ।
वनोद्देशाः पौष्पैः सुरभितदिगन्ताः परिमलै-
र्न चेतः कस्यैते विलसितविकारं विदधति ॥ ४८ ॥

इतश्च ।

वीचीनां निचयाः स्पृशन्ति जलदानुद्गन्धिसौगन्धिका
नृत्यत्केकिकदम्बकानि विकसद्वीरुन्धि रोधांसि च ।
धत्ते सैकतमुन्नदन्[3] मदकलक्रौञ्चावली[4] सारसा-
नस्याः पद्मपरागपिङ्गपयसः सेव्यं च[5] सिन्धोर्न[6] किम्॥४९॥

तदुचितमिहाद्य दिवसमावासं[7] कर्तुम्” इति विचिन्त्य भ्रूकोणसंज्ञाज्ञापितसेनासंनिवेशस्तत्कालमेव “ विरचयत तुरङ्गममन्दुराः सरसदीर्घदूर्वानल[8] नीलनिम्नस्थलीषु, कुरुत कायमानानि सरित्सेव्यसैकतेषु, उन्नमयत पटकुटीः कूलकाननेषु, आलानयत मदमत्तमतङ्गजान्[9] मदकण्डूकपोलकाषसहेषु[10] सरलसालसल्लकीसर्जार्जुनस्कन्धेषु, दूरमुत्सारयत शैवलशिलाजालकाष्ठकूटकण्टकपटलानि, समीकुरुत विषमभूभागान्, ” इति सेनापतिप्रमुख-

वीचीनामिति ॥ उद्गन्धिसौगन्धिका वीचिनिचया जलदान्स्पृशन्ति। रोधांसि च स्पृशन्ति ॥ तदेवं यस्याः सिन्धोः, किं वा न सेव्यम् । चकारो वार्थे ॥ ४९ ॥

तदुचितमिति ॥ मन्दुरा वाजिशाला । कायो मात्यत्रेति कायमानं लोकप्रसिद्ध्या रोहिषादितृणमयावासविशेषः। मदमत्तमतङ्गजानिति। मदेन वीर्यविपाकेन मत्ता नत्वो

---

१ मदेशान्; उद्देशान्. २ वृत. ३ मुन्नमन्. ४ क्रौञ्चावलीः सालसास्तस्याः. ५ न. ६ किमु. ७ समावासं. ८ नाल. ९ समदमतङ्गजा. १० मलकण्डूलकपोल.

मुखरलोककलकल[1]मुत्तालमुत्थितमसहमानस्तद्विरामावसरं प्रतिपालयन्नेकान्तेऽन्यतमप्रदेशे तस्याः सरितः सूक्ष्ममुक्ताफलक्षोदधवलवालुकापुलिनपृष्ठ एवास्थानगोष्ठीं बबन्ध ॥ क ॥

अथ नातिदूरे पुरोऽस्य शीतशैवलचक्रवाले चरतश्चक्रवाककदम्बकस्य मध्ये कोऽप्युत्क्षिप्य पक्षपुटम्, उन्नमय्य ग्रीवाग्रम्, अनङ्गपरवशो दूरादुपसर्पन्ननुरागिणीं कांचिच्चक्रवाकीं, दर्शितचाटुचातुर्यश्चक्रवाकयुवा दृष्टिपथमवातरत् ॥ ख ॥

अपरे च चत्वारो राजहंसास्तामेव चक्रवाकीं कामयमानास्तमापतन्तम[2]न्तरान्तरा निपत्य स्खलयांबभूवुः ॥ ग ॥

तां[3]श्चावलोक्य राजा विहसन्नासन्नवर्तिनं श्रुतशीलमाबभाषे॥ख

“ वयस्य, विलोक्यतामिदमसमञ्जसम् ॥ घ ॥

अमी राजहंसाः सतीष्वपि स्वजात्युचितानुचरीषु कथमन्यासक्तामपीमां चक्रवाककामिनीं कामयन्ते ॥ ङ ॥

न खल्वे[4]षामियमन[5]ङ्गभूमिः ॥ च ॥

अथवा

किमु कुवलयनेत्राः सन्ति नो नाकनार्य-
स्त्रि[6]दिवपतिरहल्यां तापसीं यत्सिषेवे ।
हृदयतृणकुटीरे दीप्यमाने स्मराग्ना-
वुचितमनुचितं वा वेत्ति कः पण्डितोऽपि ॥ ५० ॥

षधादिप्रयोगात् । जालानि मर्कडिकाख्यक्रमिकृतगृहाणि । कूटं वप्रम् ॥ क ॥

न खल्विति ॥ यथा चक्रवाकी चक्रवाकस्य सजातीया, एवं मनुष्यजातेर्नलस्य मानुषी दमयन्त्युचिता । यथा हंसानां सानुचिता, एवं लोकपालानामपि दमयन्तीति ॥ च ॥

किमु इति ॥ ह्रस्वा कुटी कुटीरः ॥ “ह्रस्वे” इत्यधिकारे “कुटीशमी–” इतिसूत्रेण रप्रत्ययः ॥ ५० ॥

---

१ मुत्तयैलमुत्थित. २ अन्तरा. ३ तां च. ४ एतेषाम्. ५ अनङ्गक्रीडाभूमिः. ६ त्रिदश.

एवंवादिनि राजनि, अकस्मात्कोमलकण्ठकुहरप्रेङ्खोलनालंकारसुन्दरोऽमन्दमूर्छनावच्छिन्नसरसस्वरस्वरूपः प्रसन्नप्रयुज्यमानतानविशेषा[1]भिव्यक्तिस्पष्टश्रुतिसुभगो गगने गान्धारग्रामगामी गीतध्वनिरुदचरत् ॥ क ॥

अवाहीच्च[2] चलदलिपटलपीयमानापूर्वपरिमलोद्गारिपारिजातमञ्जरीमकरन्दबिन्दुवर्षवाही वायुः ॥ ख ॥

अथ कौतुकोत्तानिताननेन नरपतिनाप्यदृश्यत, शातकुम्भभङ्ग[3]पिशङ्गप्रभामण्डलमध्यवर्तिनः प्रधानपुरुषस्याग्रे गृहीतजात्यजाम्बूनददीर्घदण्डः कुण्डलालंकारवानुन्मिषन्मन्दारमुकुलमालामण्डितमौलिरवतरन्नम्बरान्निर्मिमेषः सुवेषः पुरुषः ॥ ग ॥

अवतीर्य च सोऽतिविस्मयविस्फारितवि[4]लोचनमवनिपालमवादीत् ॥ घ ॥

"निषधेश्वर, त्वरितमुत्तिष्ठ। अर्घाय सज्जो भव ॥ ङ ॥

किं न पश्यसि।

अवतरति घृताचीस्कन्धविन्यस्तहस्तः
श्रुतिसुखकृतगीते किंनरे दत्तकर्णः।
किमपि सपरिरम्भं रम्भयारभ्यमाण-
व्यजनविधिरधीशः स्वर्गिणामेष देवः ॥ ५१ ॥

अपि च।

विरचितपरिवेषाः स्वाभिरङ्गप्रभाभि-
र्भुवनवहन[5]भारोद्धारधुर्यांसपीठाः।
उरसि परिविलोलद्दीर्घदामान एते
यमवरुणकुबेराः स्वामिनो लोकपालाः ॥ ५२ ॥

---

१ अभिव्यक्त. २ अवाच्च. ३ कुम्भनिभाङ्ग. ४ लोचन. ५ धरण; भरण.

राजा तु तदाकर्ण्य ससंभ्रमोत्थानवशवलितोत्तरीयाञ्चलस्खलत्कनककंकणरणत्कारमुखरितमाधाय मूर्ध्नि सं[1]पुटितपाणिपल्लवयुगलमाश्चर्यरस[2]रंभसवशसमुच्छ्वास्यमानसर्वाङ्गपुलकः कतिपयपदान्यभिमुखं सह परिजनेनोच्चलितवान् ॥ क ॥

अथ सकलसुरशिरःशे[3]खरायमाणचरणरेणुरनेकनाककामिनीकुचकुम्भकुङ्कुममञ्जरीमुद्राङ्कितविपुलवक्षःस्थलीदृश्यमानमहानीलमणिमण्डननिर्भ[4]भव्यवृत्रशस्त्रव्रणः, श्रवणशिखरारोपितप्रत्यग्रपारिजातमञ्जरीगलद्बहलकिंजल्ककणानुपान्ते गायतस्तुम्बुरोः साक्षादमृतायमानगीतरसतुषारानिव परिपूर्णकर्णोद्गीर्णान्कपोलपालिलग्नानुद्वहन्, अनवरतशचीचुम्बनसंक्रान्तताम्बूलला[5]ञ्छनायमानाच्छाच्छहरिचन्दननिरुद्धबन्धुरस्कन्धसंधिः, अन्धक इव हारयष्ट्यास्फालितवक्षःस्थलः, विन्ध्यगिरिरिव सहस्राक्षः, पन्नगेन्द्र इव कुण्डली पातालमुद्भासमानश्च, *कलिकालशापावतीर्णसरस्वतीगातप्रवाह इव मत्तमातङ्गगामी, दिशि दिशि विकीर्णकनककपिशांशुरंशुमानिवाविकृतपद्मरागारुणप्रभामण्डलमण्डनः, सह लोकपालैर्भगवान्पुरंदरः पूर्वदिग्भागाम्बरादवातरत् ॥ ख ॥

अथसकलेति ॥ अथानन्तरं पूर्वदिग्भागव्योम्नः पुरंदरोऽवातरत् ॥ हारयष्टिर्मुक्तालता । अन्यत्र हरस्येयं हारी यष्टिः शूललक्षणा । अन्धको दैत्यविशेषः ॥ सहस्रमक्षीणि यस्य । "बहुव्रीहौ–" इति समासान्तः षच् । विन्ध्यपक्षे सहस्रशब्दः प्राचुर्यवचनः । अक्षा विभीतकाः ॥ कुण्डलं कर्णालंकराः । तद्वान् । तथा पाता रक्षिता । अलमत्यर्थं रोचमानश्च ॥ पन्नगेन्द्रस्तु कुण्डलाकारः । तथा पाताले मुत्पातालमुत्तया भासमानः ॥ मत्तमातङ्ग औचित्यादैरावणः क्षीबचाण्डालश्च ॥ पद्मरागस्य मणेर्यदरुणं लोहितं प्रभामण्डलं तन्मण्डनमस्य । अंशुमांस्तु अविकृतः पद्मानां रागोऽरुणस्य प्रभा मण्डलं बिम्बम् । एतानि मण्डनं यस्य ॥ ख ॥

* पुराणादौ किल श्रूयते—पुरा सरस्वतीदधीच्योर्देवत्वविषये संवादे जायमाने क्रुद्धेन दधीचिना शप्ता सती सरस्वती कलिकाले चाण्डालकुलेऽवततार । अतएव कलिकाले चाण्डाला एव मधुरं गायन्तीति विवृतिनामकटीका ॥

---

१ संपुटपाणि. २ रभसोत्थाप्यमान. ३ शिरःशयचरण; शिरःपर्यस्तचरण; शयनचरण. ४ निरुद्ध; निभस्य. ५ लाञ्छनाच्छाच्छ.

अवतीर्य चक्षुषां सहस्रेणोन्मीलन्नीरजवनानुकारिणा निरूप्य पादयोः पुरः पतितमष्टाङ्गाश्लिष्टभूतलमिमम्, ऐरावतकुम्भकूटास्फालनकर्कशाङ्गुलिना, दुर्दान्तदैत्यदानववधूवैधव्यदानशालामूलस्तम्भेन, शचीकुचकलशसंस्पर्शसंक्रान्तकुङ्कुमपत्त्रवल्लीकेन, दक्षिणपाणिना, सहेलमुन्नमय्य मूर्ध्नि पस्पर्श ॥ क ॥

कृत्वा च कुशलप्रश्नालापव्यवहारानुच्चैः काञ्चनासनं समुल्लसन्मणिमयूखमञ्जरीजालजटिलमवनिभुजा स्वभुजोपनीतमध्यतिष्ठत् ॥ ख ॥

उपविष्टेषु यथोचितासन्नमासनेषु यमवरुणकुबेरप्रमुखेषु देवेषु क्रमेण कृतोचिताचारः पुरः पृथ्वीपृष्ठ एव विनयान्निषद्य निषधेश्वरः पुरंदरमवादीत् ॥ ग ॥

दिष्ट्या दिवौकसां नाथ जातो युष्मत्समागमात् ।
आकल्पं कीर्तनीयानां श्रेयसामस्मि भाजनम् ॥ ५३ ॥

अपि च ।

इष्ट्वा क्रतून्युगशतानि तपश्चरित्वा
वाञ्छन्ति संगमसुखं मुनयोऽपि येषाम् ।
तेषामनुग्रहकृतां स्वयमेत्य मेऽद्य
युष्माकमादिशत किं प्रियमाचरामि ॥ ५४ ॥

इति प्रकाशितप्रश्रयालापे पार्थिवपुंगवे पुरंदरो दरदलितकुन्दकलिकाकान्तदन्तद्युतिद्योतिताधरदलमीषद्विहस्य लीलावलितकंधरः कुबेरमुखमवलोकयांचकार ॥ घ ॥

सोऽपि "निषधेश्वर, श्रूयतामस्मदागमनकारणम् ॥ ङ ॥

इति प्रकाशितेति ॥ दरदलितेत्यत्र दरेत्यव्ययमीषदर्थे ॥ घ ॥

१ स्वहस्तोप. २ सनमासन्नेषु; चितमासनमासन्नेषु. ३ सविनय. ४ स्वयमेव; मद्ये. ५ प्रकाशितप्रश्रये.

'अस्ति विदर्भाधिपतेर्भीमभूमिपालस्य सुता सुतारनयननिर्जितेन्दीवरा वरार्थिनी निजकान्तितिरस्कृतत्रिदिवनारीरूपसंपत्तिः कुन्ददन्ती दमयन्ती नाम ॥ क ॥

तस्याश्च चम्पकदलावदातदेहायाः किल स्वयंवरमहोत्सवः सांप्रतं प्रस्तुतः' इति नारदादधिगम्य वयमपि विदर्भाधिपतिपुरं प्रस्थिताः ॥ ख ॥

किंतु लघयति पुरुषं स्वमुखेनार्थिभावो यतः तत्र गत्वापि दमयन्तीं किं ब्रूमो वयमिन्द्रादयो लोकपालास्त्वामर्थयामह इत्यसदृशं महिम्नोऽस्मद्विधेषु, स्पृहणीयरूपासि कं नोत्सुकयसीत्यनुचितमपरिचितेषु चाटुचातुर्यम्, अजरसः खल्वमरा वयमिति ग्राम्यः स्वप्रशंसोपक्रमः, प्राप्नुहि त्रयाणामपि लोकानामाधिपत्यमस्मत्संगमादिति महत्प्रागल्भ्यप्रलोभनम्, अल्पायुषो मनुष्यास्तदस्माकं देवानां मध्ये कंचिद्वृणीष्वेति पापीयः परदोषोदाहरणद्वारेणाभ्यर्थनम् ॥ ग ॥

अतो देशकालकार्योक्तिकुशलस्त्वमुच्यसे । गच्छाग्रे, भव दूतो देवानामशेषवैदग्ध्यविशेषोक्तिकोविद, किमन्यदिह शिक्ष्यसे, तैस्तैरुपायैः, ताभिस्ताभिः कलाभिः, तैस्तैः प्रलोभनप्रकारैः, क्रियतां देवकार्यम्, आर्याणां प्रायः परोपकारकरणार्थमेव जन्म च जीवितं च, न च भवन्तमस्मदनुभावादन्यः कोऽपि कन्यान्तःपुरे रहस्यपि वर्तमानां विदर्भेश्वरसुतामुपसर्पन्तमुपलक्षिष्यते" इत्यभिधाय व्यरंसीत् ॥ घ ॥

अस्तीति ॥ कुन्ददन्तीत्यत्र "नासिकोदरौ–" इति सूत्रेण ङीष् ॥ क ॥

---

१ निर्जित. २ धिपपुरं; धिपतेः पुरं. ३ मद्विधेषु. ४ प्रागल्भ्यप्रभं प्र. ५ मानुषाः. ६ अथोद्देश. ७ विशेषकोविदः. ८ उपलक्षिष्यते.

नलोऽप्येतदाकर्ण्य तदिदं संकटम् "इतो व्याघ्र इतस्तटी, इतो दवाग्निरितो[1] दस्यवः, इतो दुष्टदन्दशूक इतोऽप्यन्धकूपः" इति न्यायात् । इतः कर्णान्तकृष्ट[2]शरासनो मर्मप्रहारी प्रहरति मकरध्वज इतश्चायमेतेषामलङ्घनीय[3] आदेशः । तन्न जानीमः किमत्रोत्तरम् । एकत्रार्थेऽस्माकं भवतां च प्रवृत्तिरिति प्रणयप्रार्थनाभङ्गकारिणी विहतविनया प्रतिकूलोक्तिः, अनभिज्ञोऽस्मि दूतोक्तीनामिति शाठ्यम्, असमर्थोऽस्मि संदिग्धक्रियाकारितायामित्याज्ञालङ्घनम्, आज्ञालङ्घनं[4] च सेतुबन्धनमिव स्खलयति श्रेयःस्रोतः, षण्ढमुखदर्शनमिव[5] वर्धयत्यलक्ष्मीम्, रजस्वलाभिगमनमिव हरत्यायुः, इत्यनेकविधमवधार्य "न नाम दुरधिगमाः केऽपि पदार्थास्तत्र भवतामशेषजगदीश्वराणाम्, न च न जानीथ ममापि प्रसिद्धमध्यवसायम्, एवं स्थितेऽप्येष वः करोम्यादेशम्, आदिष्टपरामर्शो न श्रेयानादेशकारिणः, किं तु बलीयान्परतो विधिः प्रमाणम्" इत्यभिधाय भक्त्या भयेन च देवानां दौत्यादेशं समर्थितवान् ॥ क ॥

स्थित्वा च कंचित्क्षण[6]मुचितालापलीलया कृत्वा च कांश्चिदन्योन्यप्रस्तुतप्रियव्यवहारान्, आपृच्छ्य, यथागतं गतेष्वथ तेषु[7] देवेषु निषधेश्वरश्चिन्तयांचकार ॥ ख ॥

तदिदम्, अनुच्छ्वासविरामं मरणम्, अमोहं मूर्छनम्, अरोगमङ्गव्यथनम्, अशल्यप्रवेशमन्तःशूलम्, अदारिद्र्या निद्राविघातः॥ग॥

किमन्यत् ।

तस्यामाकर्णितानुरागायां यन्ममाद्य दीर्घदौर्जन्य[8]दोहदिना दै-

नलोऽपीति ॥ न नाम दुरधिगमा इत्यत्र "नाम" इत्यभ्युपगमे ॥ क ॥

---

१ दावाग्नि. २ कर्णान्ताकृष्ट. ३ अलङ्घनीयादेशः; अलङ्घनीयो निदेशः. ४ आज्ञालङ्घनमिति कचित्पुस्तके नास्ति. ५ षण्ढदर्शनमिव. ६ किंचित्. ७ तेषु निषधेश्वरश्चिरं चिन्तयां. ८ दौर्गत्य.

वेनाकस्मिकमौत्सुक्यानुरागव्यवसायं वन्ध्यमध्यवसितं कर्तुम्॥क॥

इदानीं किमत्र श्रेयो यस्माद्, अनुपयोगं गमनम्, श्लाघ्यं निवर्तनम्, अपार्थकमासनम्, असाधीयानध्यवसायः, ॥ ख ॥

इति चिन्ताकुले नले भयान्मूकीभूतेष्वासन्नवर्तिषु परिजनेषु प्रणयात्प्रावरणप्रान्तं[1]प्रच्छादितवदनभागं किमप्यासन्नमुपसृत्य शनैस्तत्कालयोग्यालापैरनुशीलयञ्शीलज्ञः श्रुतशीलो नलमाबभाषे ॥ ग ॥

“ देव, जानामि देवस्य देहं दहति दहन[2] इव दारु दारुणो दौत्य[3]चिन्ताभारः। को नाम सामान्योऽपि स्वयमभिलषितेऽर्थे दूतत्वदासभावमङ्गीकुर्यात्। विशेषतोऽनुरागिण्यङ्गनाजने । त[4]थापि किं न जानाति देवो, यथा याचको ब्राह्मण इव निर्वेदः कस्य संतोषाय, विषवैद्य इव विषादः संदेहकारी शरीरस्य, भीमाभिमन्युनिरुद्धं कुरुबलमिव मनो महान्तं संतापमनुभवति॥ घ ॥

तदलमनेन वातूलीभ्रमेणेव मीलयता चक्षुरुद्वेगेन ॥ ङ ॥

किं देवेन न श्रुतम्, अमृतमथनावसरे सुरासुरकरपरिवर्त्यमानमन्दरमन्थाननिर्घोषबधिरितसमस्तरोदःकंदरादिवापि दूरोच्छलितदुग्धतुषारासारतारकितनभसः, समुत्पन्नानेककौस्तुभादिवस्तुविस्ताराद्दुहृच्छदप्सरोमुखमण्डलैः क्षणमिव विहितविकच[5]नलिनखण्डशोभाद्, अनेकाश्चर्यकुक्षेः क्षीरसागरादजनि जनितजगद्वि-

देवेति ॥ निर्वेदः खेदो वेदरहितश्च॥ विषादोऽतीव शोचनम्, यश्च विषं कालकूटमादयति ॥ भीमो रौद्रोऽमितो मन्युर्दैन्यं तेन निरुद्धम्। कुरुबलं तु भीमेन मध्यमपाण्डवेनाभिमन्युना चार्जुनसुतेन निरुद्धम् ॥ घ ॥

तदलमिति ॥ उद्वेगो दुःखम्। वातूलीभ्रमस्तु उदूर्ध्वं वेगः॥ ङ ॥

---

१ प्रान्तच्छादित. २ दहनदाहदारुणो. ३ दूत्य. ४ तथापि इति कुत्रचिन्नास्ति. ५ विकचनवनलिन.

स्मया स्मरजननी हस्तस्थिततरुणारविन्दा देवी देदीप्यमानपुण्य-लक्ष्मा लक्ष्मीः॥ क॥

यस्याः सर्वाङ्गलावण्यमधु विकचलोचनचषकैरापीय पीयूष-जुषो मदनमदपरवशाः[1] परस्परमेवेर्ष्यन्तश्चक्रुश्चक्रपाणिना समं संगरम्॥ ख॥

अथ[2] सा सर्वानप्यन्तरान्तरापततस्तानुल्लङ्घ्य मन्दरगिरिशि-खरशातकुम्भनिकषोपलायितबाहोर्भगवतः[3] क्षिप्रं क्षेपीयः कण्ठे वैकुण्ठस्य स्वयंवरकुसुममालाम्[4]॥ ग॥

एवं साऽपि कदाचिच्चम्पककलिकाकलापगौराङ्गी रागिणी त्वयि वञ्चयिष्यति देवान्॥ वञ्चितो यतः पूर्वमात्ममुखमण्डलश्रिया शशी, तिरस्कृतो मदनः सौभाग्येन। सकृत्प्रनृत्तायाश्च[5] किमव-गुण्ठनेन। विधेरिव वामभ्रुवामचिन्त्यानि चरितानि भवन्ति॥घ॥

किन्तु न स्मरति देवो दिवि[6] विश्रुतमर्थसारं स्वर्लोकादवती-र्य पुरा गीतं गन्धर्वगायनैर्गीतगोष्ठीस्थितस्याग्रे युगलमिदमार्य-योर्देवस्य[7]॥ ङ॥

क्वचिदपि कार्यारम्भेऽकल्पः कल्याणभाजनं भवति।
न तु पुनरधिकविषादान्मन्दीकृतपौरुषः पुरुषः॥ ५५॥
अपहस्तितान्तरायानर्थानुररीकृतान्प्रसाधयतः।
विधिरपि बिभेति तस्मान्निरतिशयं साहसं यस्य॥ ५६ ॥

अथ सेति॥ अतिशयेन क्षिप्रं क्षेपीयः॥ "स्थूलदूर–" इत्यादिना सिद्धम्॥ग॥ एवं सापीति॥ सकृत्प्रनृत्तायाः। स्तोकमपि नर्तितुमारब्धवत्याः किं नीरङ्गयाः॥घ॥ क्वचिदिति॥ कल्पोऽनिर्विण्णः। तु पुनरिति शब्दौ संभूयवाचकत्वात्पुनरर्थमेव द्योतयतः, यथाऽपि चेति समुच्चयः॥ ५५॥

---

१ मदनपरवशाः. २ अथाभिलषतः सा सर्वा; अथ सा समभिलषतः सर्वा. ३ भगवत इति नास्ति. ४ मालिकाम्. ५ असकृत्प्रवृत्तायाश्च. ६ दिवि श्रुत. ७ गन्धर्वगीयमानं गीत; गन्धर्वैः समापन्नैः.

एवमनेकधा प्रस्तुतपुराणपुरुषाख्यानप्रपञ्चप्रक्रमेणातिक्रान्ते भूम्नि दिवसे मङ्गलोद्गार इव वाञ्छितार्थसिद्धेः, तर्जनहुंकार इवान्तरायाणाम्, ओंकार इवोत्साहस्मृतेः, पुण्याहध्वनिरिव हृदयप्रसादप्रासादस्य, पुनर्नवीकृतानुरागस्तम्भोत्तम्भनस्य तस्य नरपतेः शिश्राय श्रुतिं श्रुतशीलेन श्रावितमिममेवार्थं समर्थयन्निव मध्याह्नशङ्खध्वनिः ॥ क ॥

राजा तु तमाकर्ण्य विसर्जितपरिजनस्तत्रैव पुलिनमध्ये मध्याह्नसमयसमुचितव्यापारमकरोत् ॥ ख ॥

अनन्तरमतिक्रान्तेषु केषुचिन्मुहूर्तेषु गगनमध्यतलाद्विलम्बमाने मनाङ्मार्तण्डमण्डले चण्डवात्याहतशुष्कपत्त्रमिव दण्डप्रान्तप्रचलितकुलालचक्रमिव तेन पुरंदरादेशभ्रमेण भ्रान्तमात्मनो मनः क्वाप्येकान्तकमनीयनर्मदाप्रदेशदर्शनविनोदेन स्वस्थीकर्तुमिच्छन्निच्छानुकूलकतिपयाप्तपरिजनपरिवृतः श्रुतशीलस्कन्धावष्टम्भविहारो विहाय दूरमिव शिबिरसंनिवेशम्, इतस्ततस्तरुणतमालमण्डपमण्डलितमयूरहारिणा चलच्चकोरचक्रवाकचक्रवालवलयितेन स्नानागततापसपदपङ्क्तिखर्वितदूर्वाङ्कुरेणापसरत्पयःपूरतरङ्गितवालुकेन पुलिनप्रान्तेन प्राचीं दिशमयासीत् ॥ ग ॥

तत्र च चटुलचञ्चरीककुलाकुलितविविधवीरुधां तलेषु विचरतोऽस्य । रसातलविनिर्गताः पन्नगाङ्गना इव नागमदहारिण्य-

तत्र चेति ॥ चटुलालिकुलाकुलितवीरुन्मूलेषु विचरतो नृपतेर्दृष्टिपथमवतीर्णाः किरातकामिन्यश्चिरं चिक्रीडुरिति संबन्धः । कथंभूताः । नागमदेन गजमदजलेन हारिण्यस्तेनालंकृतत्वात् । पन्नगाङ्गनास्तु नागानां वासुकिप्रभृतीनां मदं गर्वं हरन्ति मुष्णन्ति ॥

---

१ स्मृतिरिव. २ तस्येति नास्ति. ३ मियाय. ४ ध्वनिरुदियाय. ५ तराङ्कितधवलवालुकेन.

स्तमालकन्दलीकोमलाङ्गयष्टयः श्रोणीभारालसगमनास्त्रिवलीतरङ्गिततनुमध्यलतिकाः, काश्चित्कण्ठकन्दलावलम्बितमातङ्गमौक्तिकलताः स्फुरन्नक्षत्रवलयाः कृष्णपक्षरात्रय इव कृतक्रीडाशरीरपरिग्रहाः, काश्चिदुभयश्रवणावसक्तदन्तिदन्तपत्त्रप्रभाधवलितमुखमण्डलाः सुरसरित्सलिलसंवेलित[1]कालिन्दीजलदेवता इव नर्मदे[2]यामन्त्रिताः, काश्चित्परिधानीकृतरक्तपल्लवास्तडिल्लता[3]लेखामेखलाश्चलदम्बुवाहपङ्क्तय इव विन्ध्यस्कन्धानुबन्धिन्यः, काश्चिन्मातङ्गमदमण्डलमिलन्मधुकरकरालिताः सकलनीलोत्पलवनलक्ष्म्य इवान्यजलाशयेभ्यो महानदीमवतरन्त्यः, काश्चिल्लोहिताशोक[4]कुसुमस्तबककृतकर्णावतंसोत्तंसास्त्रिपुरपुरंध्रय इव हरशरानलज्वालाकुलितशिरसो धूम[5]ध्यामलाः सलिलमनुसरन्त्यः, काश्चिल्ललितलीलामृगैरनुगम्यमानाः शरीरवत्योऽञ्जनशैलस्थलाधिदेवता इव तीर्थावगाहनानुरागिण्यः, काश्चिज्जराजर्जरशबरकञ्चुकिकरावलम्बलालागामिन्यः स्फुरदिन्द्रनीलशिलापुत्रिका इवेन्द्रजालिकैः संचार्यमाणाः कृष्णाञ्जनिकाकुसुमकान्तयः, काश्चि[6]च्चिपिटनासाः कुन्दकान्तदन्तपङ्क्तयो मायूर[7]पिच्छगुच्छावनद्धकर्बुरकबरीकलापाश्चलद्वलयमुखरकरतलोत्तालतालिकारम्भरमणीयरसिकरासकक्रीडानिर्भराः कादम्ब[8]मधुपानघूर्णितदृशो दृष्टिपथमवतेरुरपराह्णमज्जनागतास्तरुणकिरातकामिन्यः ॥ क ॥

कृतक्रीडाशरीरपरिग्रहा मूर्त्ता रात्रयः सनक्षत्रा इव । मुक्तानां नक्षत्राणि स्त्रीणां रात्रय उपमानम् ॥ दन्तपत्त्रप्रभाणां सुरसरित् स्त्रीणां कालिन्द्युपमानम् ॥ रक्तपल्लवानां तडिल्लता स्त्रीणामम्बुवाहपङ्क्तिरुपमा ॥ लोहिताशोककुसुमानां हरशरासनज्वाला स्त्रीणां च श्यामत्वेन धूम उपमा ॥ कृष्णाञ्जनिका तापिच्छलता ॥ क ॥

१ संकलित; संमिलित. २ नर्मदामन्त्रिताः. ३ तडिल्लेखा; तडिल्लवलेखा. ४ अशोककुलकुसुम. ५ धूमश्यामलाः. ६ काश्चित्किंचिच्चिपि. ७ मयूर. ८ कादम्बरी.

ततश्च ताः सूक्ष्ममुक्ताफलधवलवालुकापुलिनपृष्ठे लब्धपरभागाः स्वैरं स्वैरमनुच्चचरणचलनक्रमात्क्रेंकारितनूपुररवाकृष्ट[1]कलहंसकुलमनाकुलकलगीततरङ्गासन्नरङ्गितकुरङ्गमनङ्गभावभूयिष्ठमनुभूय तीरविहारसुखम्, अनन्तरमक्रूरजलचरमवेगवहत्सलिलमुत्फुल्लविविधविकसिताम्बुजजातिजीवितजीवंजीवकमुत्कूजितकुररमारसितसारसमुन्मदहासिहंसावतंसमुरःप्रमाणाच्छोदकमतिरमणीयं ह्रदमवातरन् ॥ क ॥

अवतीर्य च ताः काश्चित्पन्नगपति[2]पुरंध्रय इवोद्गीर्णविषगण्डूषाः, काश्चिद्राक्षसप्रमदा इव रक्तोत्पलाकृष्टिव्यसनिन्यः, काश्चिद्गोपाल[3]ाङ्गना इव गृहीतपुण्डरीकाक्षाः, काश्चित्कार्तिकेयशरपङ्क्तय इव विश्लेषितक्रौञ्चाः, काश्चित्कुरुसेना इव धार्तराष्ट्र[4]शकुनिमार्गेणानुधावमानाः, काश्चिद्रात्रय इव विघटितचक्रवाकमिथुनाः, काश्चिच्चकोराङ्गना इव चञ्चूकृतदीर्घकमलनालैः शशधरकरनिर्मलजलमास्वादयन्त्यः, काश्चित्करिण्य इव सरसबिसाग्राणि ग्रसमानाः, काश्चिज्जलयन्त्रपुत्रिका[5] इव संपुटितमुखपाणिपल्लवयुगलाग्ररन्ध्रोन्मुक्तसूक्ष्मवारिधाराः, काश्चिद्भीरुनार्य इव प्रिय-

ततश्चेति ॥ अम्बुजजातिभिर्जीविता जीवंजीवाः पक्षिविशेषा यत्र ॥ "शेषाद्विभाषा" इति कप् ॥ अम्बुजजातिरेव जीवितं येषामिति वा । अतिप्रियत्वात् ॥ उरःप्रमाणं वक्षोदघ्नमुदकं यत्र । अगाधे हि पयसि न जलक्रीडा ॥क॥

अवतीर्येति ॥ विषं जलं, गरश्च ॥ रक्तोत्पलं रक्ताब्जं, रक्तेनोत्कृष्टं पलं मांसं च ॥ गृहीतपुण्डरीके अवलोकितसिताम्बुजे अक्षिणी यासाम्, चक्षुषो हि ग्रहणमवलोकनमेव । यथा श्रोत्रपानमाकर्णनम् । अथवा शैत्यान्नेत्रन्यस्ताब्जाः* । अन्यत्र पुण्डरीकाक्षः कृष्णः ॥ क्रौञ्चः पक्षी गिरिश्च ॥ धृतराष्ट्रो दुर्योधनस्य पिता, शकुनिर्मातुलः । पक्षे धृतराष्ट्रो हंसः ॥ यद्विश्वः—"धृतराष्ट्रः सुराज्ञि स्यात्पक्षिक्षत्रियभेदयोः"॥ शकुनिः पक्षी ॥ अचञ्चूनि चञ्चूनि कृतानि चञ्चूकृतानि । अन्यत्र चञ्चुत्वं कृतानि

* यद्वा गृहीत आत्तः पुण्डरीकाणामक्षो बीजकोशो याभिस्ता इति बृहट्टीका ॥

१ कृष्टहंस. २ नागपति. ३ गोपाङ्गना इव. ४ धृतराष्ट्र. ५ पुत्तिका:.

वारितरणाः, स्तनगण्डशैलशिखरास्फालनोच्छलत्तरङ्गान्तरतरत्तरुणतामरसरससुरभिसलिलमवगाहमानाश्चिरं चिक्रीडुः ॥ क ॥

अवनिपतिरपि विस्मयविस्मृतनिमेषोन्मेषनयनस्ताश्चिरमवलोक्य चिन्तयांचकार ॥ ख ॥

जातिर्यत्र न तत्र रूपरचना नेत्रोत्सवारम्भिणी
रूपश्रीरपि यत्र तत्र सुलभः श्लाघ्यो न जन्मोदयः।
इत्येकस्थसमस्तसुन्दरगुणप्रद्वेषमभ्यस्यतो
धातस्तात वृथाश्रमस्य भवतः सृष्टिक्रमो दह्यताम् ॥५७॥

तथाहि।

ग्रीवालम्बितपद्मनाललतिकाः कर्णावतंसीकृत-
प्रत्यग्रोन्मिषितासितोत्पलदलैः संदिग्धनेत्रद्वयाः।
कस्यैता जलदेवता इव कुचप्राग्भारभुग्नोर्मयः
स्नानासक्तपुलिन्दराजवनिताः कुर्वन्ति नोत्कं मनः ॥५८॥

अपि च।

एतस्याः करिकुम्भसंनिभकुचप्राग्भारपृष्ठे लुठ-
द्गुञ्जागर्भगजेन्द्रमौक्तिकसरश्रेणीमनोहारिणि।
दूरादेत्य तरङ्ग एष पतितो वेगाद्विलीनः कथं
को वान्योऽपि विलीयते न सरसः सीमन्तिनीसंगमे ॥५९॥

धृतानि यानि दीर्घकमलनालानि तैः शशधरकरनिकरवन्निर्मलं जलम्। अन्यत्र किरणनिकर एव निर्मलजलम्। चकोर्यो हि चन्द्रकरान्पिबन्ति ॥ प्रियं वारिणो जलस्य तरणं यासाम्। अन्यत्र वारितो निषिद्धो रणो यकाभिः। ता वारितरणाः, प्रियाणां वारितरणाः प्रियवारितरणाः ॥ क ॥

एतस्या इति ॥ मौक्तिकसरो मुक्तादाम ॥ ५९ ॥

१ लोक्य चिरं. २ भग्नो.

इयं तु

निजप्रियमुखभ्रान्त्या हर्षेणाचुम्बदम्बुजम् ।
दष्टाधरा तु भृङ्गेण सीत्कारमकरोन्मृदु ॥ ६० ॥

अनयापि

अविरतमिदमम्भः स्वेच्छयोच्छालयन्त्या
विकचकमलकान्तोत्तानहस्तद्वयेन ।
परिकलित इवार्घः कामबाणातिथिभ्यः
सलिलमिव वितीर्णं बाल्यं[1]लीलासुखाय ॥ ६१ ॥

अस्याश्च

कर्णमूलविषये मृदु गुञ्जन्पाणिपल्लवहतोऽपि हठेन ।
एष षट्पदयुवा हरिणाक्ष्याश्चुम्बति प्रिय इवास्यसरोजम् ॥ ६२ ॥

इतोऽप्येषा

भ्रमकरं मकरं मकरन्दिनीं
कमलिनीमलिनीमलिनीकृताम् ।
तरलयन्तमवेक्ष्य महाभया--
दुदतरत्सरितस्त्वरितैः पदैः ॥ ६३ ॥

एताश्च

मन्दायते दिनमिदं मदनोऽपि सज्ज--
स्तत्किं न गच्छत गृहानिति पद्मिनीभिः ।
मीलत्सरोजगतभृङ्गरुतैरिवोक्ताः
स्नात्वा शनैरनुसरन्ति तटं तरुण्यः ॥ ६४ ॥

भ्रमकरमिति ॥ मकरन्दोऽस्त्यस्यां मकरन्दिनीम् । तथा अलिनीभिर्भृङ्गीभिर्मलिनीकृतां कमलिनीं तरलयन्तं क्षिपन्तं भ्रमकरमावर्तकरं मकरं यादोविशेषं विलोक्य यदुत्पन्नं महाभयं तस्मात्त्वरितैरुत्तालैः पादक्रमैरसौ शबरसुन्दरी सरित उत्तीर्णा ॥ ६३ ॥

---

१ बाल.

एवमनेकविधविलासासक्तशबरसुन्दरीदर्शनाल्हादपुलकिते विविधवितर्ककारिणि पङ्कनिमग्नजरत्करेणुकायमाननिःस्पन्ददृशि तत्कालमुत्पन्नया मनाङ्मन्मथव्यथया धीरतया च स्पृहया च विचिकित्सया च जिघृक्षया च जिहासया च समकालमाकुलितहृदये संकीर्णभावभाजि राजनि, राजीववनविराजिते तस्मिन्नर्मदाह्रदे सलिलक्रीडासुखमतिचिरम[1]नुभूय तीरभुवि सेव्यसितसैकतस्थलीमलंकुर्वाणासु च तासु शबरराजसुन्दरीषु श्रुतशीलश्चिन्तितवान् ॥ क ॥

"उन्मादि यौवनमिदं शबराङ्गनानां
देवोऽप्ययं नववयाः कमनीयकान्तिः ।
रेवातटं चलचकोरमयूरहारि
किं स्यान्न वेद्मि जयिनी च मनोभवाज्ञा ॥ ६५ ॥

तथाहि ।

विकलयति कलाकुशलं, हसति शुचिं, पण्डितं विडम्बयति ।
अधरयति धीरपुरुषं, क्षणेन मकरध्वजो देवः ॥ ६६ ॥

अपि च ।

म[2]ध्ये त्रिवलीत्रिपथे पीवरकुचचत्वरे च चपलदृशाम् ।
छलयति मदनपिशाचः पुरुषं हि मनागपि स्खलितम् ॥६७॥

तदस्तु प्रस्तुतरसानुनयेनैव प्रभूणां मतयो निवर्त्यन्ते निषिद्धनिषेवणात्, न प्रतिकूलतया" इत्यवधारयन्नवनिप[3]तिमवादीत्॥ख

विकलयतीति ॥ अधरयति विधुरयतीत्यर्थः ॥ ६६ ॥

तदस्त्विति ॥ निषिद्धस्य निषेवणं सेवनमाग्रहस्तस्मात्सकाशात् प्रभूणां मतयः प्रकृतरसानुमत्यैव व्यावर्त्यन्ते, न प्रतिकूलतया हठात् निषिद्धस्यानभिजातसंगमादेरा-

---

१ मतिभूय. २ मध्यत्रिव. ३ अवनिपाल.

"देव, रमणीयः खल्वयं प्रदेशः ॥ क ॥

तथाह्यत्र

आल्हादयन्ति मृदवो मृदितारविन्द-
निष्यन्दिमन्दमकरन्दकणान्किरन्तः ।
एते किरातवनितास्तनशैल[1]गण्ड-
संघट्टजर्जररु[2]चः सरितः समीराः ॥ ६८ ॥

एताश्च

उपनदि पुलिने पुलिन्दवध्वः
स्तनपरिणाहविनिर्जितेभकुम्भाः ।
शिथिलितसलिलार्द्रकेशबन्धाः
किमपि मनोभववैभवं वहन्ति ॥ ६९ ॥

इतश्चावलोकयतु देवः ।

सरसिजमकरन्दामोदमत्तालिगीत-
श्रवणसुखनिमीलच्चक्षुषः किंचिदेते ।
अपि दिवसमशेषं निश्चलाङ्गाः कुरङ्गाः
पुलिनभुवि विहाराहारवन्ध्या वसन्ति ॥ ७० ॥

इतोऽपि

पद्मान्यातपवारणानि नलिनीपत्त्राणि पर्यङ्किका
दोलान्दोलनदोहदोऽपि[3] च चलद्वीचीचयैः पूर्यते ।
आहारो बिसपल्लवं[4], पुलिनभूर्लीलाविहारास्पदं-
रेवावारिणि राजहंसशिशवस्तिष्ठन्ति धन्याः सुखम् ॥७१॥

ग्रहं कुर्वाणः प्रभुः सहायसंपदानुजीविना निवार्यः ॥ परं तदभिमतं प्राक् पुरस्कृत्य दोषं च दर्शयित्वा । सहसा निवार्यमाणो हि पराभवमिव मन्येत ॥ ख ॥

सरसिजेति ॥ अपरिभिन्नक्रमे ततोऽशेषमपि दिवसमित्यर्थः ॥ ७० ॥

पद्मानीति ॥ अत्रातपत्रप्रभृतयो राजधर्मा राजहंसशिशुषूद्भावनीयाः ॥ ७१ ॥

---

१ स्तनगण्डशैल. २ रवाः; रयाः; जवाः. ३ दोहदोऽपि विचल. ४ पल्लवाः.

इहापि

चिरविरचितचाटुश्चन्द्ररेखायमाणः
प्रथमरसबिसाग्रग्रासलीलार्पणेन ।
इह रमयति हंसीं राजहंसो रिरंसुः
पुलकयति च चञ्चूकोटिकण्डूयनेन ॥ ७२ ॥

अपि च ।

इह चरति चकोरः कोरकं पङ्कजाना-
मिह चलदलिचक्राच्चक्रवाको बिभेति ।
इह रमयति जीवंजीवको जीवितेशा-
मिह वहति विकारं हारि हारीतकोऽपि" ॥ ७३ ॥

एवमसौ निषधेश्वरः श्रुतशीलेन प्रज्ञापूर्वमपररमणीयप्रदेशान्तरदर्शनव्याजेनान्तरितशबरसुन्दरीदिदृक्षाग्रहो गृहान्प्रति प्रत्यावृत्तः ॥ क ॥

चिन्तितवांश्च

"कथं नु सा दमयन्ती पुरंदरप्रमुखेषु लोकपालेष्वर्थिषु मया मनुष्यजन्मना लब्धव्येति। निवारयिष्यन्ति च तां खलु दिव्य-

इह चरतीति ॥ प्रतिष्ठमानभृङ्गवृन्दाच्चक्रवाको बिभेतीति तपस्विनीभ्रान्त्येति शेषः ॥ जीवंजीवकः पक्षी जीवितेशां प्रियां रमयतीति संबन्धः ॥ ७३ ॥

कथं नु सेति ॥ इन्द्रादिवरेषु सत्सु मयि विषये कीदृगनुरागः, बन्धवोऽप्येनां दिव्यसंबन्धार्थित्वात्तेष्वेव प्रोत्साहयिष्यन्ति, इति चिन्तयति राज्ञि शनैः क्रमेणाम्बरादवतीर्य भगवान्भानुः पश्चिमामगात् ॥ किं कुर्वन् । इमं नृपमित्यमुना प्रकारेणाश्वासयन्निव । तमेव प्रकारमाह– अहो राजंस्त्वया चेतसि नैतच्चिन्तनीयम् । यद्दिव्यसंबन्धार्थिनो बन्धव एतां निवारयिष्यन्तीति तदेषास्मत्तो विरङ्क्षतीति । यतो रामाजनो वारितो निषिद्धोऽतीव प्रवर्तते । तथाऽस्य स्त्रीजनस्य दीर्घमनुरक्तस्य बहुकालं सानुरागस्य सतोऽलमत्यर्थं न रागापायः स्यात् । तथास्यालीकोऽप्यभिनिवेशो न हीयते ॥

१ कथं सा दम.

संबन्धार्थिनो बान्धवाः। तत्किमिह शरणम्" इति विमुक्तदीर्घनिःसहनिःश्वासमसकृच्चिन्तयति राजनि "राजन्, रामाजनः पद्म इव वारितः सुतरां प्रवर्तते। नालमस्य दार्घमनुरक्तस्य जायतेपरागो नाप्यलीकाभिनिवेशोऽस्य हीयते। किंचान्यदन्यपरिग्रहवर्तिनीनामपि स्त्रीणामन्यत्रापि रागाग्रहो भवति[1]। यतः पश्य वरुणप्रतिग्रहेऽपि[2] प्रतीचीयं मयि[3] रागिणी भविष्यति" इत्येवमिममाश्वासयन्निव भगवान्भानुरुत्तुङ्गतरुशिखराणि करैः पतनभयादिवाबलम्बमानः शनैर्गगनतलादवतीर्य प्रतीचीं दिशमयासीत् ॥ क ॥

अम्बरान्तःप्रसारितकरे रागिणि रक्तया परियुक्ते तु पश्चिमककुभाऽम्भोजिनीजीवितेश्वरे ॥ ख ॥

पूर्वाहं विहितोदयाहमसकृत्तन्मां[4] विहायाधुना
यस्यामस्तमुपैति तां कथमयं रागी जघन्यामगात्।
इत्येवं श्लथितांशुके दिनपतौ याते दिशं पश्चिमा-
मीर्ष्यारोषविषादिनीव तमसा प्राची ककुब्लक्ष्यते[5] ॥७४॥

किं पुनर्यादृक्तव्यप्यभिनिवेशः। यथा पद्मोऽब्जं वारितो जलात्प्रवर्तते। तथास्य रक्तस्य सतो नालं काण्डं दीर्घमनु सह परागो मकरन्दः स्यात्। तथाली भृङ्गी कं जलं तयोरभिनिवेशः प्रवेशः सोऽप्यस्य न हीयते न हीनः स्यात् ॥ किं चान्यदुच्यते। स्वीकृतानामपि स्त्रीणां पुरुषान्तरे रागानुबन्धः। यस्मात्संप्रत्यपि पश्य त्वं वरुणस्वीकृतापि पश्चिमाशा ममापि विषये रागिणी भविष्यतीति ॥ पद्मशब्द उभयलिङ्गः ॥ क ॥

अम्बरान्तरिति ॥ नभोन्तःप्रसारितांशौ रक्ततान्विते रक्तया पश्चिमया दिशा युक्ते सत्यम्भोजिनीजीवितेश्वरे रवौ प्राच्या चिन्तितम् ॥ घ ॥

तदाह--**पूर्वेति** ॥ आद्याहम्। तथासकृद्विहितोदयाहं तस्माद्यस्यामस्तमेति जघन्या च निकृष्टा तामिमां रागी आरक्तः सन् रविर्मां विहाय कथमगात् ॥ पश्चिमां

१ स्यात्. २ वरुणपरिग्रहोऽपि. ३ मय्यनुरागिणी. ४ तां मां. ५ लभ्यते.

विश्लेषाकुलचक्रवाकमिथुनैरुत्[1]पीडमाक्रन्दिते
कारुण्यादिव मीलितासु नलिनीष्वस्तं च मित्रे गते।
शोकेनेव दिगङ्गनाभिरभितः श्यामायमानैर्मुखै-
र्निःश्वासानलधूमवर्तय इवोद्गीर्णास्तमोराजयः॥ ७५॥

तथाविधे च वेलाव्यतिकरे राज्ञः संध्यावसरमावेदयितुमस्यासन्नविहा[2]रि हारि लीलाकिंनरमिथुनमिदमगायत्—

"रक्तेनाक्तं विनिहितमधोवक्त्रमेतत्कपालं
तारामुद्राः किमु कलयता कालकापालिकेन।
संध्यावध्वाः किमु विलुठिता कौङ्कुमी शुक्तिरेवं
शङ्कां कुर्वञ्जयति जलधावर्धमग्नार्कबिम्बम्" ॥ ७६॥

अथ क्रमेण गगनमन्दाकिनीतीरतापसैर्विकी[3]र्यमाणेषु संध्यार्घाञ्जलिजलबिन्दुबुद्बुदेष्विव किंचिदुन्मीलत्सु विर[4]लतरतारास्तबकेषु वासरविरामवादितवाद्येष्वमरसदनेषु, दह्यमानबहलधूपधूममञ्जरीष्विव वियति विहरन्तीषु तनुतिमिरवल्लरीषु, स्वप[5]त्पतत्त्रि-

दिशं गते शिथिलांशावंशुमतिविषये य ईर्ष्यारोषोऽसूयाकोपस्तस्माद्विषादिनी च सती पूर्वा दिक् तमसान्धकारेण लक्ष्यते॥ अन्यामपि प्रथमां कृतोदयां विहाय अस्तंकारिणीं निकृष्टां च यदा रागी विलासी याति, तदा तस्मिञ्शिथिलितवाससि पूर्वा स्त्रीर्ष्याविषादिनी तमसा तमोभावेन प्राप्यते॥ ७४॥

विश्लेषेति॥ उत्कृष्टा पीडा यत्रेत्युत्पीडमित्याक्रन्दक्रियाविशेषणम्॥ ७५॥

रक्तेनेति॥ अधस्ताद्वक्त्रं यस्य तदधोवक्त्रमधोमुखम्। तथा रक्तेन रुधिरेणाक्तं लिप्तम्। तत्तथाभूतं कपालं काल एव कापालिकस्तेन तारा नक्षत्राण्येव मुद्रा रुचकाख्यानि हस्तपादादीनामस्थ्याभरणानि कलयता युञ्जानेन किमु न्यस्तम्॥ किम्विति वितर्के। किंवा संध्यैव या वधूस्तस्याः संबन्धिनी कौङ्कुमी शुक्तिर्विपरीतमधोमुखी लुठिता। एवमित्थं शङ्कामुत्पादयत्समुद्रेऽर्धमग्नार्कबिम्बं जयत्यधुना॥ ७६॥

अथेति॥ कोशः कणिका शपथविशेषश्च। वयमन्यत्र न यास्याम इत्यर्थे पद्मिनीनां समीपे कोशयानं कुर्वत्सु भृङ्गविलासिषु॥ क्षामोदरीप्रकृष्टपाणिज्वलिततैलसिक्तव-

१ रुत्पक्ष. २ कुत्रचिन्नास्ति. ३ विकीर्णेषु. ४ विचल. ५ स्वपतत्पतत्त्रि; आपतत्पतत्त्रि.

कुलकोलाहलेन वासार्थिश्रान्तागताध्वगस्वागतालापमिव कुर्वाणासु वनराजिषु, अन्यत्र परिभ्रमणपरिहारार्थमिव पद्मिनीनां कोशपानमाचरत्सु चञ्चलचञ्चरीकेषु, रत्युत्सवोत्साहावेशमहामन्त्राक्षरेष्विव श्रूयमाणेषु महासरित्कूलकुलायनिलीनजलकुक्कुहकुहरितेषु, रामायणव्यतिकरेष्विव मन्दोदरीप्रहस्तप्रबोधितोत्सिक्तदशाननेषु संध्याप्रदीपेषु, जाते जरत्कुम्भकारकुक्कुटकुटुम्बपक्षपिच्छविच्छाये मनाक्तमोनुविद्धे संध्यारागे राजा विषादविस्मृतसंध्याह्निकः परिजनानुबन्धात्संध्यां ववन्दे ॥ क ॥

ततश्च क्रमेण

रजनिमवनिनाथः सांध्यकर्मावसाने
हरचरणसरोजद्वन्द्वसेवां विधाय ।
मृदु कलितविपञ्चीपञ्चमप्रायगीत-
श्रवणसुखविनोदैस्तां स तस्मिन्ननैषीत् ॥ ७७ ॥

इति श्रीत्रिविक्रमभट्टविरचितायां दमयन्तीकथायां हरचरणसरोजाङ्कायां पञ्चम उच्छ्वासः समाप्तः ॥

र्त्तिमुखेषु दीपेषु । रामायणसंपर्केषु तु मन्दोदरीनाम्न्या पत्न्या प्रहस्तेन सेनान्या प्रकर्षेण बोधित उत्सिक्तः उद्रिक्त सन्दशाननो रावणो येषु तथाभूतेषु । कुम्भकारः कुक्कुटः पक्षिविशेषः ॥ क ॥

इति विषमपदप्रकाशमेतं दमयन्त्यास्तनुते स्म चण्डपालः ।
शिशुमतिलतिकाविकासचैत्रं चतुरमतिस्फुटभित्तिचारुचित्रम् ॥

इति चण्डपालविरचिते दमयन्तीकथाविवरणे पञ्चम उच्छ्वासः समाप्तः ।

---

१ महेति नास्ति. २ कुटुम्बपिच्छच्छाये.

षष्ठ उच्छ्वासः ।

अथ द्विजजननिकायकीर्णसंध्याञ्जलिजलैरिव क्षाल्यमाने मनाग्विमलतां व्रजति तिमिरमलिनेऽम्बरे, मालाकारेणेव प्रभातप्रभोद्भेदेनावचीयमानेषु गगनपुष्पवाटिकाकुसुमेष्विव नक्षत्रेषु, निद्रापहारहुङ्कार इवोत्थिते प्रभातभेरी[1]ध्वनौ, नरपतेः प्रबोधनार्थमदूरे वैतालिकः पपाठ ॥ क ॥

उदयगिरिगतायां प्राक्प्रभापाण्डुताया-
मनुसरति निशीथे[2] शृङ्गमस्ताचलस्य ।
जयति किमपि तेजः सांप्रतं व्योममध्ये
सलिलमिव वि[3]भिन्नं जाह्नवं यामुनं च ॥ १ ॥

अपि च ।

यात्यस्ताचलमन्धकारपटले जातेऽरुणस्योदये
तापिच्छच्छदपद्मरागमहसोर्मध्यं ककुब्भागयोः ।

अथ द्विजेति ॥ अथ निशातिवाहनानन्तरम् । अम्बरं व्योम वस्त्रं च । व्योम्नः स्वभावस्वच्छस्यापि मालिन्यक्षालने भाक्ते । वस्त्रपक्षे तिमिरवन्मलिनम् ॥ क ॥

उदयेति ॥ उदयाद्रिगतप्रथमप्रभापाण्डिम्नि निशीथे चान्धकारेऽस्ताचलशृङ्गं गन्तुं प्रवृत्ते किमपि सर्वोत्कृष्टं तेजो जयति । तत्र कविरुत्प्रेक्षते—सांप्रतमिदानीं नभोमध्ये जाह्नवं गाङ्गं, यामुनं च कालिन्दीयं, सलिलं विभिन्नं संगतमित्यर्थः । व्योम्नि जाह्नव्येवासीत् । यमुनायाः संभेदः सांप्रतमेव । अत एवास्मिन्वृत्ते "यमुनात्रिविक्रमः" इति नाम कविरवापत् । तथा च–"प्राच्याद्विष्णुपदीहेतोरपूर्वोऽयं त्रिविक्रमः । निर्ममे विमलं व्योम्नि यत्पदं यमुनामपि"। प्रभया पाण्डुता प्रभाकृत उद्योतः प्रकाश इतियावत् । नतु प्रभायाः पाण्डुतेति समासः । उदये प्रभाया आरक्तत्वात् । प्रकाशस्तु इन्द्रनीलादीनामपि पाण्डुरेव । जाह्नवी देवताधिष्ठात्री यस्येति देवतार्थेऽण् । अन्यथा शैषिकश्छः स्यात् ॥ १ ॥

यातीति ॥ अस्तगिरिं गच्छति तमःसमूहे पश्चिमायाः कृष्णायाः, संपन्नारुणोदयायाः

१ भेरीशङ्खध्वनौ. २ निशान्धे. ३ निमग्नम्.

अन्तर्विष्णुविरञ्चयोरिव मनाग्लिङ्गोद्भवभ्रान्तिकृ-
त्तेजः पाण्डुरपिञ्जरं च किमपि श्यामं च तद्वोऽवतात्॥ २॥

अनन्तरमुत्तिष्ठतोत्तिष्ठतानयत गजवाजिंवेगसरीः, संयोजयत शकटानि, वेष्टयत पटकुटीः, मुकुलयत मण्डपिकाः, संवृणुत काण्डपटान्, उन्मूलयत कीलकान्, उद्वहत वेगाद्वहनीयभाण्डम्, भारयत करभकलभान्, उत्क्षिपत क्षीणोक्षकान्, उत्तरत सरितम्, अपसरत पुरतः, कुरुत संचारसहं मार्गम्, इत्यनेकविधप्रयाणाकुललोककोलाहले समुच्छलति, नदत्सु प्रस्थानवादित्रेषु, समुत्थाय नरपतिरावश्यकशौ[3]चावसाने नर्मदाम्भोभिषेकपूततनुर[4]नुबन्ध्य सांध्यविधिम्, अधिकृत्य भगवन्तमुदयगिरिशिरःशिखरभाजं भास्करम्, इमं श्लोकमपठत् ॥ क ॥

पूर्वस्याश्च लोहिताया दिशोर्मध्ये पाण्डु पिञ्जरं श्यामं वा किमपि दुर्लक्षं मनाक् स्तोकोदयं तेजोऽर्थात्प्रकाशात्मकं वो युष्मान्पातु ॥ प्रकाशारुणोदयतमःशेषसमुदायरूपत्वात् पाण्डु पिञ्जरं श्यामं चेत्युक्तम्। तदित्यनेन क्षिप्तं यच्छब्दवाच्यमुपमानमाह—**अन्तरित्यादि** । दिग्भागयोर्विष्णुविरञ्चौ, प्रकाशात्मनश्च तेजसो लिङ्गोद्भव उपमानम् । अथवा सत्त्वं पाण्डु तदेव विष्णुः, रजः पिञ्जरं तदेव स्रष्टा, तमः श्यामं तदेव च हरः, एतत्त्रयीमयश्च रविरित्यागमिकसमयः ॥ तदुक्तम्— "सत्त्वं शुभ्रं स हरिर्लोहितपीतं रजः स जगत्कर्ता। कृष्णं तु तमः स भवो भानुश्चैतत्त्रयीमूर्तिः" ॥ अभिधानकारोऽप्याह—"द्वादशात्मा त्रयीतनुः" ॥ एतेन पाण्डु तेज इत्युक्ते सत्त्वस्य, पिञ्जरमित्युक्ते रजसः, श्याममित्युक्ते तमसः प्रतीतिरिति । ततश्च तमोन्विताया अपाच्या अरुणान्वितायाश्च प्राच्या मध्ये मनागीषल्लक्ष्यं किमप्यद्भुतवैभवं तदुत्कृष्टं पाण्डु पिञ्जरं श्यामं च तेजोऽर्थात् सत्वरजस्तमस्त्रयीमयं त्रयीतनुलक्षणं वो युष्मानवतु । अमुमेवार्थं सत्वरजस्तमसां संज्ञान्तरेण विष्णुविरञ्चलिङ्गोद्भवलक्षणेन द्रढयन्नाह— **अन्तरित्यादि** ॥ "पुरा स्वमाहात्म्यार्थं विवदमानयोर्द्रुहिणनारायणयोः शिवेन स्वस्य लिङ्गोद्भवस्योर्ध्वाधोमानविज्ञानं महत्त्वहेतुः पण उक्तः" इत्यागमः ॥ २ ॥

अनन्तरमिति ॥ वेगसरी वेसरी । काण्डपटो गुणलयनी ॥ क ॥

---

१. वेसरी. २ मात्रं ३ कर्मवि. ४ अनुबन्ध.

"जयत्यम्भोजिनीबन्धुर्बन्धूकारुणरश्मिकः।
वैद्रुमो वासरारम्भकुम्भः पल्लववानिव" ॥ ३ ॥

अभ्यर्च्य च पञ्चोपचारैः सुरासुरगुरुं गौरीपतिं तत्प्रियस्य भगवतो नारायणस्यापि वाञ्छितार्थसिद्धये स्तुतिमकरोत् ॥ क ॥

"जयत्युदधिनिर्गतस्मरविलोललक्ष्मीलस-
द्विलासरसमन्थरस्फुटकटाक्षलक्षीकृतः।
अमन्दरयमन्दरभ्रमणघृष्टहेमाङ्गदः
सुरारिवधनाटकप्रथमसूत्रधारो हरिः ॥ ४ ॥

जयत्यमलकौस्तुभद्युतिविराजितोरःस्थलः
सहेलहतदानवो नवतमालनीलद्युतिः।
विनम्रसुरमस्तकच्युतविकासिपुष्पावली-
विकीर्णमधुसीकरस्नपितपादपीठो हरिः ॥ ५ ॥

जयत्युदरनिःसरद्वरसरोजपीठीपठ-
च्चतुर्मुखमुखावलीविहितरम्यसामस्तुतिः।
अलब्धमहिमावधिर्मधुवधूविलासान्तकृ-
ज्जगत्त्रितयसंभवो भवभयापहारी हरिः ॥ ६ ॥

जयत्यसुरसुन्दरीनयनवारिसंवर्धित-
प्रतापतरुरुल्लसत्तरुणकेकिकण्ठच्छविः।
दलत्कनककेतकीकुसुमपत्त्रपीताम्बरः
सुराधिपनमस्कृतः सकललोकनाथो हरिः ॥ ७ ॥

जयत्युदेति ॥ सुरारिवधनाटकस्य प्रथमे प्रस्तावनायां सूत्रधारः ॥ ४ ॥

---

१ तार्थी सिद्धये. २ बलद्वि. ३ भ्रमनिघृष्ट. ४ विधिः.

जयत्यखिललोकजिन्नरककालकेतूद्गमो
मदान्धदशकन्धरद्विरददुष्टपञ्चाननः ।
हिरण्यकशिपुप्रियामुखसरोजचन्द्रोदयः
सुरेन्द्ररिपुसिंहिकासुतशिरःकुठारो हरिः ॥ ८ ॥

जयत्यमरसारथिर्मदनतप्तलक्ष्मीलस-
त्पयोधरयुगस्थलीसरसचन्दनस्थासकः ।
अचिन्त्यगुणविस्तरः सकलकेशि[1]कंसाङ्गना-
कपोलफलकोल्लसत्तिलकभङ्गहारी हरिः ॥ ९ ॥

जयत्यसमसाहसः सकललोकशोकान्तकृ-
त्सहस्रकरभासुरस्फुरितचा[2]रुचक्रायुधः ।
विहङ्गपतिवाहनः कलुषकन्दनिर्मूलनः
समस्तभुवनावलीभवनशिल्पधा[3]री हरिः ॥ १० ॥

जयत्यमलभावनावनतलोककल्पद्रुमः
पुरंदरपुरःसरत्रिदशवृन्दचू[4]डामणिः ।
अरातिकुलकन्दलीवनविनाशदावानलः
समस्तमु[5]निमानसप्रवरराजहंसो हरिः" ॥ ११ ॥

एवमभिवन्द्य[6] देव[7]देवम्, समारुह्य विजयिवारणेन्द्रस्कन्धम्, अग्रतःप्रधावितानेककरितुरगपरिजनः, पुरः[8] पुरोधसा निवर्तिते महानदीयागे, युगसहस्रपरिवर्तवृत्तान्तसाक्षिणीम्, अनवरततपस्यद्व-

जयतीति ॥ नरको भौमासुरः ॥ ८ ॥

जयतीति ॥ अमराणां सारथिर्नेता अग्रणीरिति यावत् ॥ ९ ॥

एवमिति ॥ समुत्तीर्य भगवतीं मेकलकन्यामुत्फुल्लेत्यादौ लकारानुप्रासाद्धेतोः केचित् "अङ्कोल्ल" इति पठन्ति, तच्च प्राकृते । संस्कृते त्वङ्कोठ इति ॥ तथा उल्लङ्घ्य दक्षिणभागस्थितं मतङ्गजानां गजानामभिमतं नर्मदातीरं पुण्यारण्यम्, अग्रतो

१ केलि. २ सिद्ध. ३ कारो. ४ चिन्ता. ५ जन. ६ नन्द्य. ७ देवताः ८ पुरःसरपुरोध.

ह्मर्षिप्रतिष्ठितशिवलिङ्गरुद्धरोधसम्, अनेकसुर[1]सुन्दरीसेविततीरसंकेतलतामण्डपाम्, अनवरतमज्जद्वनगजमदामोदसुरभिततरङ्गाम्, अपरगङ्गाम्, अपरसागरराजमहिषीम्, अपरमार्कण्डेयतपःसिद्धिसखीम्, समुत्तीर्य भगवतीं मेकलकन्याम्, उत्फुल्लपल्लविताङ्कोल्लसल्लकीसरलसा[2]लसर्जार्जुननिम्बकदम्बजम्बूस्तम्बोदुम्बरखदिरकरञ्जाञ्जनाशो[3]कसौभाञ्जनकप्रायैस्तरुभिराकीर्णम्, अभिमतं मतङ्गजानाम्, अनुभूतसारं सारङ्गैः, शिशिरतरं तरङ्गानिलैः, स्वर्गवनसमं समञ्जरीकैर्लताजालकैरुल्लङ्घ्य दक्षिणं नर्मदातीरं[4] पुण्यारण्यम्, अग्रतो, गगनवीथीमिव सिंहराशिराजितामुत्पतङ्गामुत्थितवृश्चिकामाविर्भूतसार्द्ररोहिणीमूलां च, छन्दोजातिमिव शार्दूलविक्रीडितमनोहरां हारिहरिणीमन्दाक्रान्ता[5]मनवरतवसन्ततिलकोद्भासितामतिविचित्रचम्पकमालां च, सीतामिव बहुकोटरावण[6]वृतामुत्पन्नकुशल-

विविधविन्ध्याटवीमवगाहमान इति संबन्धः॥ कथंभूतां विन्ध्याटवीम्। सिंहराशिर्मृगेन्द्रवृन्दं ज्यौतिषोक्तः पञ्चमो राशिश्च। तेन राजिताम्। तथा पतङ्गः शलभः सूर्यश्च। वृश्चिकोऽली अष्टमराशिश्च। पुनः किंभूताम्। आविर्भूता सह आर्द्रेण शृङ्गवेरेण, रोहिणी ओषधिविशेषो, मूलो मूलकश्च, यस्याम्। पक्षे आर्द्रा—रोहिणी—मूलानि ताराः॥ शार्दूलविक्रीडितेन सिंहविलसितेन मनोहरा। तथा हारिणीभिश्चारुभिर्हरिणीभिर्मन्दमाक्रान्ताम्। सर्वदा वसन्तैस्तिलकैश्च तरुविशेषैर्भूषिताम्। तथा अतिविचित्राश्चम्पकानां माला श्रेणी यस्याम्। पक्षे शार्दूलविक्रीडितं हरिणी मन्दाक्रान्ता वसन्ततिलका चम्पकमाला च छन्दांसि॥ तथा बहुभिः कोटरावणैर्वृतां छन्नाम्। कोटराणां वनमिति कृत्वा "वनगिर्योः संज्ञायाम्—" इति सूत्रेण पूर्वपदस्य दीर्घः। "वनं पुरगा—" इति सूत्रेण णत्वम्। कुशो दर्भः। लवो लेशः। सीतां तु बहुकोटेन प्राज्यकौटिल्येन रावणेन रक्षसा प्रार्थिताम्॥ तथा उत्पन्नौ कुशलवौ स्वसुतौ यस्याः॥ तथा

१ सुरसिद्ध. २ सालेति नास्ति. ३ अशोकसौभाञ्जनकेति नास्ति. ४ तीरं पुण्या. ५ मत्तमयूराक्रान्ताम्. ६ रावणावृताम्; रावणाभृताम्.

वां च, लङ्कामिव संचरद्विगुणपञ्चाननविभीषणां चारुपुष्पकामका-ण्डाडम्बरितमेघनादां च, गीतविद्यामिव ततावनद्धघनसुषिरवं-शस्वनमनोहरामनेकतालभेदां निषादऋषभमध्यमग्रामयुक्तां च, चित्रविद्यामिवानेककण्टकपत्रलतास्थानकविषमामृज्वागततापसां च, कलियुगशिवशासनस्थितिमिव महाव्रतिकान्तःपातिभिः का-लमुखैर्वानरैः संकुलामनेकधाभिन्नस्त्रोतसं च, कापालिकखट्वाङ्गय-

संचरद्भिर्विगुणैर्विरज्जुभिः पञ्चाननैः सिंहैर्विशेषेण भीषणाम् । तथा चारुपुष्पमर्थात् मनोहरसरोजं कं जलं यस्याम् । अतएवानवसरेऽपि आडम्बरितो विस्तृतो मेघनाद-स्तण्डुलीयको यस्याम् । लङ्का तु द्वौ गुणौ येषां पञ्चानां, ते द्विगुणा दशेत्यर्थः। तत्संख्यान्याननानि यस्य स दशमुखो,-विभीषणश्च तद्भ्राता संचरन्यस्याम् । पुष्पकं विमानम् । मेघनादो रावणात्मजः ॥ गीतविद्यामिवेति ॥ तता विस्तीर्णा अवनद्धाः सुश्लिष्टा घनसुषिरा बहुविवरा वंशा वेणवस्तेषां स्वनेन रम्याम् । तालास्तरुविशे-षाः । निषादाः शबराः । मध्ये भवो मध्यमः । ग्रामः खेटकम् । पक्षे ततेन तन्त्रीग-तेन अवनद्धेन पौष्करेण च घनेन कांस्यकृतेन सुषिरसंज्ञकवंशस्वनेन च मनोज्ञाम् । यद्यपि "ततं तन्त्रीगतं ज्ञेयमवनद्धं तु पौष्करम् । घनं कांस्यकृतं प्रोक्तं सुषिरं वां-श्यमेव च" इति भरतः । तथाप्यत्रानेकविषयत्वाद्वंशस्वनोपादानमसंदेहार्थमुचितमे-व । अनेकतालभेदाश्च चत्पुटादयो यस्याम् । तथा निषादेन स्वरेण मध्यमसंज्ञकग्रामे-ण युक्ताम् ॥ चित्रविद्यामिवेति । कण्टकैः सूत्रैः पत्रैः पर्णैः, लताभिर्वल्लीभिः, शाखा-भिर्वा स्थानकैश्चालवालैर्विषमाम् । तथा ऋजवोऽकुटिला आगताः स्वापार्श्वे प्राप्ता-स्तापसा मुनयो यस्याम्। चित्रविद्यापक्षे कलिका-कण्टक-शाखा-त्रिभङ्गि-संज्ञाभिश्चत्वारः पत्रावयवाः । एतैर्मिलित्वा शिशु-सकल-स्वस्तिक-वर्धमान-सर्वतोभद्राख्याणि पञ्च प-त्राणि निष्पद्यन्ते । तदत्र शाखापर्यायो लताशब्दः । तथा स्थानकानि पार्श्वागत-ऋजु-ऋज्वागत-व्यर्धाक्ष-अर्धऋजु-गमनालीढ-त्वरित-त्रिभङ्गि-संज्ञानि । तैर्विषमाम् । स्थानक-शब्देनैव ऋज्वागतं गतार्थमपि व्यापकत्वात्पृथगुक्तम् । प्रायो हि चित्रे ऋज्वागतमेव लिख्यते । तपसि भवानि तापसानि। मयूरासनोष्ट्रासनादीनि करणानि तापसाख्यानि। तत ऋज्वागते तापसानि यस्याम् । यद्वा ऋज्वागतेन तापं स्यतीति केचित् । ऋज्वा-गतेन दुःखापहारिणीमित्यर्थः ॥ कलियुगेति ॥ अप्सु रतिरब्रतिः । महती अब्रतिर्येषां

१ ऋषभेति नास्ति. २ मिच्छागत.

ष्टिमिव समुद्रोपकण्ठलग्नाम्, मायामिव शम्बराधिष्ठिताम्, मरुभूमिमिव करीरैः केसरिप्रसवैरसंचाराम्, अतिचारुचन्दनैः कृतगोरोचनाविशेषकैरक्षतदूर्वावाहिभिरारब्धमङ्गलाचारैरिव तृणस्थलैरलंकृताम्, विविधव्याधां विन्ध्याटवीमवगाहमानो मेषवृषमिथुनयु-

ते महाव्रतिका वृक्षास्तेषामन्तर्मध्ये पतन्त्यभीक्ष्णं तैः कृष्णमुखैर्मर्कटैश्छन्नाम् । तथा स्फुटितप्रस्रवणाम् । पक्षे महाव्रतिकाः कापालिकाः । तदन्तःपातिभिस्तदन्तर्भूतैः कालमुखैर्वा शैवदर्शनविशिष्टैर्नरैराचिताम् । बहुधा भिन्नप्रवाहाम् । स्रोतोऽत्र लक्षणया प्रवाहः । आम्नाय इति यावत् । कृतयुगे ह्येकमेव शिवशासनमभूत्, कलौ तु बह्वाम्नायमिति भावः ॥ श्लेषचित्रादिषु बवयोरैक्यम् । तथाहि "मालामुत्पलकन्दलैः प्रविकचैरायोजितां बिभ्रती वक्रेणासमदृष्टिपातसुभगेनोद्दीपयन्ती स्मरम् । काञ्चीदाम नितम्बसङ्गि दधती व्यालम्बिना वाससा मूर्तिः कामरिपोः सितांशुकधरा पायादुमाया जगत्" ॥ अस्यार्थः--"कामरिपोः शिवस्य मूर्तिः पायात् । कीदृशी । विगतकेशैरुत्क्रान्तपलशिरोदलैरायोजितां मालां बिभ्रती । तथा विषमदृष्टिपातसुभगेन वह्निना स्मरं दहन्ती । तथा नितम्बसङ्गि काञ्चीदामप्रायं व्यालं सर्पं दधती । तथा वाससा वस्त्रेण विना व्यतिरिक्ता । तथा सितांशुकं चन्द्रं धरतीति ॥ पलं मांसम् । कमित्यव्ययं शिरोऽर्थम् ॥ उमापक्षे व्यालम्बिना लम्बमानेन । शेषं सुगमम्" ॥ समुद्रस्याम्भोधेरुपकण्ठे कूले लग्नाम् । यष्टिस्तु समुद्रं मुद्रान्वितं यदुपकण्ठं गलसमीपं तत्र लग्ना । मुद्रा भूषणास्थिग्रन्थिः ॥ शम्बरः श्वापदविशेषो दानवविशेषश्च । शम्बरेण हि विनिर्मिता माया । अतएव शाम्बरीत्युच्यते ॥ मरुभूमिमिति । न संचारो गतिर्यस्याम् । केसरिणां सिंहानां प्रसवैः पोतैः । कीदृग्भिः । करिणमीरयन्ति तैः । पक्षे करीरैस्तरुविशेषैः । तथा केसरिणः किञ्जल्कोपेताः प्रसवाः पुष्पाणि यत्र तथाविधैः ॥ अतिचेति ॥ चन्दनस्तरुस्तद्रसश्च । कृतो गवां रोचनाविशेषोऽभिलाषातिशयो यैः । पक्षे गोरोचना गन्धद्रव्यविशेषः । सा चातीव मङ्गल्या तस्या विशेषस्तिलकम् ॥ अक्षतामलूनां दूर्वां वहन्त्यभीक्ष्णम् । पक्षेऽक्षतस्तन्दुलादिः । दूर्वेति समानम् ॥ तथा एकस्मिन्स्थाने समूहीकृतनानानगग्रामप्राकृतजनानवलोकयन् ॥ कीदृशान् । मेषाणां वृषाणां मिथुनानि युञ्जन्ति

जः सधनुषः सकुम्भकन्यानेकत्रराशीभूतान्गिरिग्रामपामरलोका-नालोकयन्, "इयं गगनवीथीव चित्रशिखण्डिमण्डिता सरित्तीर-भूमिः, इयं सरिदिव बहुतरङ्गोपशोभिता गोष्ठवसतिः, इयं च न-क्षत्रमध्यगतापि न विशाखा तरुपङ्क्तिः, इयं पुष्पवत्यपि न दूषि-तस्पर्शा वीरुत्, इयं संनिहितमधुदानवापि हरिप्रिया वंशजालिः, इयं कृतमातङ्गसङ्गापि न परिहृता द्विजैः सल्लकीसंततिः, इमे च केचित्सशिखण्डिनो महाद्रुपदाः, केऽपि विच्छिन्नकीचकवंशा वृ-कोदराः, केचित्सपुण्डरीकाक्षाः पाण्डुसंतानकाः, केऽप्युद्धृतभुवो

धारयन्ति। तथा सह धनुषा कोदण्डेन सधनुषः। तथा सकुम्भा मङ्गलार्थं मस्तकन्यस्तकल-शाः कुमार्यो येषु। राशिसमूहो ज्योतिषोक्तो मेषादिश्च मेषवृषमिथुनकुम्भकन्याराशिवि-शेषसंज्ञाः ॥ मन्त्रिसूनुना श्रुतशीलेन सह "इयं च गगनवीथ्यादि" "इमे च केचित्स-शिखण्डिनः" इत्यादि च विहितविदग्धालापः प्रयाणविच्छेदमकरोत् ॥ यदुक्तं तद्व्या-ख्यायते। तद्यथा ॥ चित्राश्चित्रवर्णाः शिखण्डिनो मयूराः। पक्षे चित्रशिखण्डिनः स-प्तर्षयः॥ बहुतरामिति क्रियाविशेषणम्। गौपैर्बल्लवैः शोभिता। सरित्तु बहुभिस्तरङ्गैरुप-शोभिता। गोष्ठं गोकुलम् ॥ नक्षत्रमध्यं गता। न विगतशाखा च। एतेन तरूणामुच्च-ता साभोतगा चोक्ता ॥ विशाखा हि नक्षत्रमध्यं न गतेति विरोधसूचकोऽपिशब्दः ॥ पुष्पवती कुसुमिता रजस्वला च। न दूषितस्पर्शा मृदुत्वात्। रजस्वला त्वस्पृश्येति विरोधः ॥ संनिहितेभ्यो मधुदा क्षौद्रप्रदा। नवा अविच्छाया। हरिः सिंहः। या च हरेर्विष्णोः प्रिया वल्लभा सा कथमासन्नमधुसंज्ञकदैत्येति विरोधः ॥ मातङ्गा गजाः श्वपचाश्च। द्विजाः पक्षिणो विप्राश्च ॥ इमे चेति ॥ महद् द्रुपदं वृक्षस्थानं येषु तथोक्ताः। तथा सह शिखण्डिभिर्मयूरैः। अथ च महाद्रुपदाः क्षत्रविशेषाः। द्रुपदतनयश्च शिख-ण्डी। चित्रशिखण्डिमण्डितेत्यनेन पूर्वमटव्यां मयूरसद्भाव उक्तः। इदानीं विन्ध्यस्कन्धे-ष्विति न पौनरुक्त्यम् ॥ विच्छिन्नाः पृथग्भूताः कीचकाः सच्छिद्रा वंशाश्च निश्छिद्रा येषु। वृका अरण्यश्वान उदरे मध्ये येषु। वृकोदरो भीमोऽपि। स च विशेषेण छिन्न-कीचकाख्यराजान्वयः ॥ पाण्डुः संतानकस्तरुविशेषो येषु। तथा पुण्डरीकैः सिता-

१ भूमि.

महावराहाः, केऽप्युत्कृष्टसुरभिश्रीद्रुमावलिहरिकराकृष्टपन्नगनेत्राः स्फुरन्मणिभित्तयोऽमन्दरागाः, केऽपि सस्थाणवो दुर्गाश्रयाः श्रूयमाणगजवदनचीत्काराः सगुहाः कैलासकूटायमानाः सेव्याः खल्वमी विन्ध्यास्कन्धसंधिसानवः" इति मन्त्रिसूनुना श्रुतशीलेन सह विहितविदग्धालापः, कयापि वेलया कमप्यध्वानमतिक्रम्य क्वाप्यपरिमितपतन्निर्झरजलतुषारस्पर्शमञ्जरितपादपपुष्पपरिमलमिलन्मधुकरझंङ्कारहारिणि रममाणशबरमिथुनसंमर्दमृदितामन्दमृदुशाद्वले जलस्थलीप्रदेशे श्रान्तसैनिकानुकम्पया प्रयाणविच्छेदमकरोत् ॥ क ॥

तैस्तैश्चिरन्तनवासरव्यापारैरहःशेषसहितामतिवाह्य तामपि निशामनन्तरमुन्मिषत्पक्ष्मपक्षिपक्षावधूनितपवनैरिवापनीयमानेषु गगनचत्वरचर्चाप्रकरपाण्डुपुष्पपुञ्जकेषु नक्षत्रेषु, स्वविरहोत्पन्नतमःकलङ्ककलुषितानि मनाक्कुङ्कुमपङ्कपिञ्जरैः करैः परामृश्य प्रसादयति दिननाथे दिङ्मुखानि, पुनः पूर्वक्रमेण प्रस्थानमकरोत् ॥ ख

म्भोजैरक्षैश्च विभीतकैः सह ॥ पाण्डोः संताना एव संतानकाः सुताः पाण्डवास्ते तु पुण्डरीकाक्षेण विष्णुना सह महान्तो वराहा येषु । तथा उत्कर्षेण हृता विस्तारेण रुद्धा भूर्यैः । महावराहो विष्णुः । स चोत्क्षिप्तपृथ्वीकः ॥ अमन्दो रागो येभ्यस्तेऽमन्दरागाः । तथा उत्कृष्टा मनोज्ञाः सुरभयश्चम्पकाः श्रीद्रुमाश्च पिप्पलास्तेषामावलिस्तत्र हरयः कपयस्तैराकृष्टानि पन्नगनेत्राणि सर्पाक्षीणि येषु । इत्यमन्दरागत्वे हेतुः । पक्षे मन्दराख्योऽगोऽद्रिः । तदा उत्कृष्टोद्धृता सुरभिः श्रीर्लक्ष्मीर्द्रुमः पारिजातश्च यैः । मन्दरेण हि सुरभिप्रभृतीन्यम्भोधेरुद्धृतानि । सुरभिर्धेनुः । इह तु प्रस्तावात्कामधेनुः ॥ यद्विश्वप्रकाशः—"सुरभिश्चम्पके स्वर्णजातीफलवसन्तयोः । संधौ पले सौरभेय्याम्" इति । तथा बलेर्दैत्यस्य हरेर्विष्णोश्च करैराकृष्टं भ्रामितं पन्नगो वासुकिलक्षणं नेत्रं मन्थानमाकर्षणरज्जुर्यत्र ॥ कैलासकूटा इवाचरन्तः । स्थाणुः स्थिरपदार्थः शिवश्च । दुर्गा विन्ध्यवासिनी देवी गौरी च । दुर्ग आश्रयो येषामिति वा । तथा आकर्ण्यमानो गजानां वदनचीत्कारा बृंहितानि येषु । कैलासे च । गजवदनो हेरम्बः । गुहा पाषाणसंधिः । गुहः कार्तिकेयः ॥ क ॥

---

१ झंकार. २ अपीति नास्ति. ३ धूनन. ४ पङ्कजेषु. ५ पिञ्जरकरैः.

एवमपसरन्मार्गान्मार्गान्नीवारीणि वारीणि सहंसनिनदान्नदान् सकरेणु रेणुस्थलमाच्छादितदिशि[1] खराणि शिखराणि लङ्घयन् सुनीरागान् गिरिगहनग्रामाँस्तपस्विनश्च मानयन्नेकदा नातिदूर इवोत्ककादम्बकदम्बचुम्ब्यमानाम्बुजराजिरजोरञ्जिताम्भसि सरित्तीरे[2] तरुतलोपविष्टमेकमध्वश्रान्तमध्वनीनमिदं[3] चारुश्लोकयुगलमतिमधुरगीततरङ्गरङ्गिताक्षरं[4] गायन्तमद्राक्षीत् ॥ क ॥

तव सुहृदुपभुक्तश्रीफलः[5] कामकेलिं
जनयति वनितानां कुङ्कुमालोहितानाम् ।
श्रयति स च समूहो मेखलाभूषितः स-
ञ्जनयति वनितानां कुं कुमालोऽहितानाम् ॥ १२ ॥

एवमिति ॥ मार्गादीनां लङ्घनादिकं कुर्वन् । अध्वानमलंगामी इत्यध्वनीनस्तं चाटु श्लोकयुगं गायन्तमद्राक्षीत् ॥ अपसरत्सैन्यभयान्निवर्तमानं मार्गं मृगसमूहो येभ्यस्तांस्तथोक्तान् । नीवारोऽस्त्येष्विति । सह हंसनिनदैः । नदो जलाधारः । सह करेणुभिर्गजैः । आच्छादिता दिशो यैस्तान्याच्छादितदिंशि । खराणि तीक्ष्णानि । सुष्ठु नीरं जलमगाश्च तरवो येष्विति । पक्षे सुष्ठु निर्गतरागान् । मानयन्निति मानिरुपभोगार्थः पूजार्थश्च । उपभोगे यथा "मानयिष्यन्ति सिद्धाः सोत्कण्ठानि प्रियसहचरीसंभ्रमालिङ्गितानि" ॥ क ॥

तवेति ॥ तव संबन्धी सुहृन्मित्रजनो भुक्तलक्ष्मीफलः कुङ्कुमेन आ ईषल्लोहितानां वनितानां जनितात्यर्थरागाणां योषितां मन्मथलीलां जनयति । "वनिता जनितात्यर्थरागयोषिति" इति विश्वप्रकाशः ॥ तथा अहितानां समूहो मेखलायां गिरिमध्यभुवि उषितः कुमालः कुत्सितस्रक् सन् वैरत्यागात्सज्जनतायाः ब्रह्मचर्यादियोगाद्यतितायाः वहिपत्रवसनादिसंबन्धाद्वनितायाः शबरत्वस्य कुं भूमिकां श्रयति । स चेति चकारात् सुहृदहितसमूहयोरन्योन्यमयमक्रितपादस्थितविशेषणाभ्यां शब्दश्लेषद्वारेण संबन्धः । तद्यथा, मेखलया कटिपट्टिकया भूषितः सुहृत् अहितसमूहोऽपि अनुभुक्तबिल्वः । अत्र प्रथमतृतीयपादौ विशेषणगतश्लेषेणालंकृतौ द्वितीयचतुर्थौ तु संपूर्णयमकेन ॥१२॥

---

१ आच्छादितरविकराणि दीर्घतरुशिखराणि. २ सरिति तीरतरु. ३ इमं चाटु. ४ गीततरं तरङ्गिता. ५ अनु.

अपि च।

त्वत्तो भयेन नृप पश्य जनो वनेषु
कान्त्या जितस्मर तिरोहितवानरीणाम्।
शाखामृगश्चपल एष गिरेरुपत्य-
कां त्याजितः स्मरति रोहितवानरीणाम्॥ १३॥

"अहो नु खल्वयमनल्पशास्त्रीयसंस्कारामृतसंपर्कपल्लवितप्रज्ञाङ्कुरः कोऽपि कुशलः काव्यवक्रोक्तिषु पथिकयुवा योग्यः संभाषणस्य" इत्यवधारयति राजनि ससंभ्रममुत्थाय स्थित्वा च पुरः स पान्थः सप्रणाममिमं श्लोकमपाठीत्॥ क॥

"वेधा वेदनयाश्लिष्टो गोविन्दश्च गदाधरः।
शंभुः शूली विषादी च देव केनोपमीयसे"॥ १४॥

राजा तु तदाकर्ण्य क्षणमाग्रहोपरोधविस्मयहर्षरसैः समकालमाप्लावितमनाः, प्रथममुत्फुल्लया दृशा, ततो मुग्धस्मितार्घ्येण, तदनु सर्वाङ्गीणभूषणप्रदानेन, तमभ्यर्च्य "पान्थ, कथय केयमु-

त्वत्त इति॥ नृपेति संबोधनम्। कान्त्या सौन्दर्येण जितस्मरेति तद्विशेषणम्। पश्येत्याभिमुख्यकरणे। अरीणां जनस्त्वद्भयेन वनेषु तिरोहितवान्। जितस्मरेत्यनेन "स्मरोऽपि किल त्वया जित इति तिरोहितोऽभूत्" इति प्रतीयते स्मृतिगोचर एव नतु दृश्यते इत्यन्वर्थात्। तथा एष प्रत्यक्षवर्ती शाखामृगो वानरश्चपलो लोलः। अनेनैव वनवासिना रिपुजनेन गिरेरुपत्यकामधोभूमिकां त्याजितो रोहितवानरीणां मर्कटीनां स्मरति। वानरीणामिति "अधीगर्थ—" इति सूत्रेण कर्मणि षष्ठी॥ १३॥

वेधा इति॥ वेदनया पीडया आश्लिष्टः संबद्धः। गदेन रोगेण अधरो विधुरः। शूलं रुग्विशेषोऽस्य। अतएव विषादान्वितः। तस्मादेव केनोपमीयसे त्वमिति बाह्योऽर्थः॥ तत्त्वतस्तु वेदानां नयेन मतेनाश्लिष्टः। गदा कौमोदकी। अथवा गदो भ्राता सोऽधरोऽनुजो यस्य। शूलमायुधम्। विषमत्तीति विषादी नीलकण्ठत्वात्॥ १४॥

राजा त्विति॥ मृणालवलयानामक्षसूत्रम्, उत्कूजनस्य ब्रह्मयज्ञोद्गारः, राजहं-

१ उपेत्य. २ गदान्वितः.

त्तुङ्गकल्लोलदोलाधिरूढानुच्चचञ्चूत्क्षिप्तभृद्गमृणालवलयान्कूजतः[1] कलहंसानक्षसूत्रिणः प्रवर्तितब्रह्मयज्ञोद्गारमुखरमुखांस्तीरतापसानिव दिवमारोपयितुमुद्वहन्ती सरित्, तरुणतरुतलमलंकुर्वाणः प्रसन्नसरस्वतीकः कश्च भवान्" इति सप्रणयमपृच्छत् ॥ क ॥

सोऽपि "सभ्रमरया कूलकीचकवेणुलतया सदृशी नावातरणयोग्या किमियमप्रसिद्धा महानदी देवस्य" इत्यभिधाय कथयितुमारब्धवान् ॥ ख ॥

भानोः सुता संवरणस्य भार्या तापी सरित्सेयमघस्य हन्त्री।
यस्याः कुरुः सूनुरभूत्स यस्य नाम्ना कुरुक्षेत्रमुदाहरन्ति॥१५॥

एतस्याः सलिलावगाहसमये कुर्वन्ति नित्यं नृणां
नीरन्ध्रोन्नतकर्कशस्तनतटीसंघट्टपिष्टोर्मयः ।
भ्राम्यद्भृङ्गनिभालकैः क्षणमिव व्यालोलनेत्रैर्मुखै-
रुत्फुल्लोत्पलगर्भपङ्कजवनभ्रान्तिं महाराष्ट्रिकाः ॥१६॥

अपि च ।

यद्येतस्याः सकृदपि मरुन्नर्तिताम्भोजराजि-
प्रेङ्खत्पत्रव्यजनविधुतं वारि नीहारहारि ।

सानां तापसा उपमानम् । ब्रह्मयज्ञो वेदाध्ययनम् ॥ क ॥

सोऽपीति ॥ किमियं सरिद् देवस्य न विदिता, यासौ नावा वेडया तरणयोग्या। शब्दायमानकीचकवंशवल्ल्या । सभ्रमरया सभृङ्गया । सदृशी । वंशवल्ल्यपि अवाते वाताभावे रणस्य शब्दस्य योग्या न भवति । सरिदपि सभ्रमः सावर्तो रयो जवो यस्या इति सभ्रमरया ॥ ख ॥

भानोरिति ॥ संवरणः क्षत्रियविशेषः ॥ १५ ॥

एतस्या इति ॥ उत्फुल्लोत्पलानि गर्भे मध्ये यस्य पङ्कजवनस्य । महाराष्ट्रिकाः स्त्रियः ॥ १६ ॥

---

१ उत्कूजतः.

रोधोभाजां पिबति कुसुमैर्वासितं पादपानां
पीयूषाय स्पृहयति ततः किं क्वचिन्नाकिलोकः ॥ १७ ॥

मामपि पुष्कराक्षनामानं वार्तिकमवगच्छतु देवः ॥ क ॥

तथाहि।

स्थित्वा त्वदागमनमार्गमुखे गवाक्षे
वार्ताविशेषमधिगन्तुमिहायताक्ष्या।
संप्रेषितो निषधनाथ तयास्मि यस्याः
क्रीडागिरिस्त्वमसि मुग्धमनोमृगस्य ॥ १८ ॥

एष्यति च श्वस्तनेऽहनि मार्गश्रमक्लान्तमितो नातिदूर इवोत्तुङ्गसरलसालसर्जार्जुननिचुलनिचयान्तरचलच्चटुलचकोरमयूरहारीतहंसकुलकोलाहलिनि पयोष्णीपुलिनपरिसरे स्थितं तया प्रहितमाप्तं क्रीडाकिंनरमिथुनम् ॥ ख ॥

"इयं च वाच्यतां तया स्वहस्तकिसलयलिखिताक्षरगर्भा भूर्जपत्त्रिका" इत्यभिधाय पुरोऽस्य लेखपत्त्रिकां व्यसृजत् ॥ ग ॥

राजापि पार्श्वपरिजनेनोत्क्षिप्यार्पितां तामतिबहलपुलकाङ्कुरकण्टकितप्रकोष्ठकाण्डेन पाणिना स्वयमुन्मुच्य सादरमवाचयत् ॥ घ ॥

"नलोऽपि मां प्रत्यनलोऽसि यत्त्-
द्भवादृशां नैषध नैष धर्मः।

मामिति ॥ वार्तायां नियुक्तो वार्तिकः ॥ क ॥

स्थित्वेति ॥ गवाक्षे स्थित्वा तया आयताक्ष्या दीर्घदृशा वार्तान्तरं ज्ञातुमिह प्रेषितोऽहम्। यस्या मुग्धमनोमृगस्य त्वं क्रीडागिरिः मृगो हि गिरौ मनस्त्वयि रमते ॥ १८ ॥

नल इति ॥ नैषध इत्यभिजनान्तामन्त्रणेन कुलीनत्वोल्लिङ्गनम्। मानसमुद्रेत्यनेन च सबलानामेव पराजयो नाबलानाम्। मां प्रति त्वं नलाख्योऽपि सन्ननलो वह्निरु-

तथाबलानां बलवद्गृहीतुं
न मानसं मानसमुद्रयुक्तम् ॥ १९ ॥

अपि च ।

निपतति किल दुर्बलेषु दैवं
तदवितथं ननु येन कारणेन ।
बलवति न यथा तथाबलानां
प्रभवति कृष्टशरासनो मनोभूः ॥ २० ॥

अपि च ।

कदा किल भविष्यन्ति कुण्डिनोद्यानभूमयः ।
उत्फुल्लस्थलपद्माभभवच्चरणभूषिताः ॥ २१ ॥

इति लेखलिखितप्रणयसुभाषितामृतरसप्लवेनाप्लावितहृदयः, "विधे, विधेहि मे पक्षिण इव पक्षयुगलमुड्डीय येन तां पश्यामि" इति चिन्तयन्नरपतिः[1] पुरतः स्थितं तं प्रियावार्तिकमाश्लिष्यन्निवोच्चरोमाञ्चनिचयेन, पिबन्निवाभिलाषतृषितया दृशा, स्नपयन्निव मधुरस्मितामृतरसेन, पुनः पुनः सादरमभाषत ॥ क ॥

"पुष्कराक्ष, सा सर्वथा विजयते राजपुत्री । यस्याः प्रसन्नमुदा[2]रसत्कान्तिश्लिष्टं सुकुमारमनेकालंकारभाजनं वयो वचनं च, सप्रश्रयः प्रगल्भो विवेकवान्विदग्धबुद्धिर्भवद्विधः परिजनश्च ॥ ख ॥

तत्कथय "कथनीयकीर्तिः क्वास्ते कथमास्ते कं विनोदमनुति-

त्कण्ठाजनकत्वेन संतापक इत्यर्थः । न नलोऽनल इति विरोधः । परिहारस्तु प्रागेव व्याख्यातः । न चैष भवादृशां धर्मो यस्मादहमबला तस्मात्त्वाबलानां दुर्बलानां मानसं चेतो ग्रहीतुं न युक्तम् । बलवदिति क्रियाविशेषणं हठादित्यर्थेऽव्ययम् ॥ १९ ॥

निपतेति ॥ अबलाः स्त्रियोऽशक्ताश्च ॥ २० ॥

पुष्करेति ॥ प्रसन्नं निर्मलम् । उदारं रम्यम् । सत्कान्ति तेजस्वि । श्लिष्टं सुघटि-

---

१ नरपतिरग्रतः. २ मुदारकान्ति.

ष्यति केन व्यापारेण परिणामयति वासरं वाऽसौ भवत्स्वामिसु[1]ता" इत्येवमुक्तः स पुनः पल्लवयन्ननुरागकन्दलं नलमलपत् ॥क॥

त्वद्देशागतवायसाय ददती दध्योदनं पिण्डितं
त्वन्नाम्नः सदृशे दृशं निदधती वन्येऽपि मुग्धा नले।
त्वत्संदेशकथार्थिनी मृगयते तान्राजहंसान्पुनः
क्रीडोद्यानतरङ्गिणीतरुतलच्छायासु वापीषु च ॥ २२॥

अपिच । सांप्रतं तया

त्वद्देशागतमारुतेन मृदुना संजातरोमाञ्चया
त्वद्रूपाश्रितचारुचित्रफलके निर्वापयन्त्या दृशम् ।
त्वन्नामामृतसिक्तकर्णपुटया त्वन्मार्गवातायने
नीचैः पञ्चमगीतिगर्भितगिरा नक्तंदिनं स्थीयते॥ २३ ॥

एव[2]मनुगुणमनुरागस्य, सदृशं शृङ्गारस्य, सहोदरमादरस्य, प्रियं प्रेमप्रपञ्चस्य, प्रोत्साहनमनङ्गस्य, अनुकूलमुत्कण्ठायाः, समुचितमभिनिवेशस्य, कौतुकजननं जल्पति पुष्कराक्षे, श्रवणकु[3]तूहलिनि विस्मृतान्यव्यापारे तन्मयतामिवानुभवति भूभुजि, जरठीभवत्सु पूर्वाह्णवेलालवेषु, गगनमध्यासन्नवर्तिनि व्रजति तीव्रतां ब्रध्नमण्डले, स्खलयति पथि पथिका[4]नसह्योर्मिणि घर्मजा[5]-

तसर्वावयवम् । कुमारं मृदु । अनेकालंकारभाजनं बहुभूषणपात्रम् । वयःशब्देन तदाधारभूतं शरीरमुच्यते । पक्षे प्रसन्नं झटित्यर्थप्रतीतिकृत् । महार्थमुदारम् । औज्वल्यं कान्तिः । मसृणत्वं श्लेषः । अजरठं सुकुमारम् । अनुप्रासोपमादयोऽलंकाराः ॥ क ॥

त्वद्देशेति ॥ तव नामापि दुर्लभं ततोऽस्य सदृशे समुचिते । "नाम्ना त्वत्सदृशे" इत्याद्यः पाठः । सतु स्पष्ट एव ॥ २२ ॥

त्वद्देशागतेति ॥ नीचैरिति निभृतम् । प्रच्छन्नरागत्वात् ॥ २३ ॥

एवमिति ॥ एवं ब्रध्नमण्डलादिष्वीदृशेषु सत्सु प्रस्तावपाठकः पपाठ । पिपा-

---

१ पुत्री. २ मुक्त. ३ कौतूहलिनि. ४ असह्योष्मणि. ५ जले.

ले, जलाशयाननुसरत्सु पिपासाकूततरलिततारकेषु श्वासिषु[1] श्वापदेषु, पङ्किल[2]कूलकर्दमविमर्दोद्यतेषु सरित्परिसरवनविहारिकरिवराहमहिषमण्डलेषु, विटपिकोटरकुटीरनीडनिलयनिलीयमानेषु संपुटितपक्षेषु पक्षिषु, कूलकुलायकोणकूणितकोकूयमानकुक्कुहेषु गिरिसरित्[3]सुरङ्गाङ्गणेषु, रङ्गत्कुरङ्गचर्वितखर्व[4]दूर्वानलनीलनिम्नशाद्वलस्थलस्थितये हिण्डमानासु कारण्डवशिखण्डिमण्डलीषु, शिशिरनिवासवाञ्छया कूजत्सु करञ्जनिकुञ्जपुञ्जितकपिञ्जलकपोतपोतकेषु, वहति मनाङ्म्लानकोमलकुसुमकोशकोष्णा[5]मन्दमकरन्दबिन्दूद्गारिणि तापीतीरतरङ्गस्पर्शसेव्ये मध्याह्नमरुति, श्रमवशविलोलमीलन्नयननीलोत्पलासु बहलतरुतलच्छायामाश्रयन्तीषु सीदत्सैनिकनितम्बिनीषु प्रस्तावपाठकः पपाठ ॥ क ॥

"विचित्राः पत्रालीर्दलयति गलत्स्वेदसलिलै-
रमन्दं मृद्नाति प्रमदकरिकुम्भस्तनतटीः ।
प्र[6]बन्धेनाक्रामञ्जनजघनजङ्घोरुयुगलं
श्रमः सेनाङ्गेषु प्रसरति शनैः कामुक इव ॥ २४ ॥

साया आकूतेनाभिप्रायेण तरलिता तारा कनीनिका यैः । श्वासान्वितश्वापदैः । गिरिसरितां सुरङ्गाः संधयस्तदङ्गणेषु ॥ क ॥

विचित्रा इति ॥ अनेकविधाः पत्रालीर्वाहनश्रेणीर्विलेपनपत्रवल्लीश्च दलयति । तथा मत्तकरिकुम्भानेव स्तनतटीरमन्दं खेदयति । प्रबन्धेन सातत्येन प्रकृष्टबन्धनेन च । करणविशेषेण । प्रयाणारूढत्वात्कंदर्पभावाच्च । जघनं च जङ्घे चोरुयुगलं च प्राण्यङ्गत्वात्समाहारः । ततः कर्मधारयः । तदाक्रामन्कामीव श्रमः सेनाया अङ्गेषु हस्त्यश्वादिषु प्रसरति ॥ २४ ॥

---

१ श्वसु; श्वासिश्वापदेषु. २ कूलमौढकर्दम. ३ सभङ्गाङ्गणे; तरङ्गाङ्गणे. ४ खर्वेति नास्ति. ५ अमन्देति नास्ति. ६ प्रपञ्चेन.

अपि च।

कूजत्क्रौञ्चं चटुलकुररद्वन्द्वमुन्नादिहंसं
क्रीडत्क्रोडं निपतितलतापुष्पकिंजल्कहारि।
अस्याः सान्द्रद्रुमवनतलश्रान्तसुप्ताध्वनीनं
रोधः सिन्धोः स्थगयति[1] भवत्सैनिकानां प्रयाणम् ॥२५॥

राजा तु तदाकर्ण्य "बाहुक, बहूनां बहुमतो बाहुल्यादिहैव वासस:, तद्वद सैनिकान्, अवतरत तापीतीरतरुतले[2]श्रयान्, आश्रयत श्रमच्छिद[3]श्छायाः, कुरुत पटकुटीः, कारयत कायमानानि, मुञ्चतामन्दमृदुशाद्वलेष्व[4]बलान्बलीवर्दकान्[5], कूर्दयत कर्दमे महिषान्[6], खादयत वेसरीभि[7]र्वंशकरीराङ्कुरान्[8], प्रचारयत क्रमेण क्रमेलकान्, अवगाहावसाने पृष्ठावकीर्णपुलिनपङ्कपांसवो विहरन्तु स्ववशं वंशस्तम्बेषु स्तम्बेरमाः, तरुबुध्नेषु बध्नीत तीव्रवेगान्वेगसरान्[9], अवतरन्तु तापीतीरं[10]तरङ्गेषु तुरंगाः, शिशिरतरङ्गानिलान्दोलितविविधविकचमञ्जरीजालजटिलेषूत्फुल्लतास्वण्डमण्डपेषु[11] मध्याह्नसमयमतिवाहयन्तु[12] किंनरमिथुनानीति सेनापतिमादिदेश ॥ क ॥

स्वयमपि पुष्कराक्षसूचितार्धपथश्रमखिन्नकिंनरमिथुनदिदृक्षया कृतमृगयाविनोदव्यपदेशी[13] दिशि दक्षिणस्यामाप्तस्तोक[14]परिवारपरिवृतो झरन्[15]निर्झरझात्कारिवारिरमणीयासु विहितविहारहारिहरि-

कूजदिति ॥ क्रौञ्चकूजनादीनि विशेषणानि रोधसो रम्यताहेतुत्वात्सैन्यप्रयाणस्खलनसाधनानि ॥ २५ ॥

राजा त्विति ॥ कायमानानि तृणमयगृहाणि। वंशानां करीराणामङ्कुराः ॥ क ॥

---

१ स्खलयति. २ तरुतलानाश्रयत. ३ श्रमच्छिदच्छायाः. ४ शाद्वले. ५ बलीवर्दान्. ६ माहिषकम्. ७ वेसरीः. ८ करीरान्. ९ वेसरान्. १० तीरेति नास्ति. ११ जटिषूत्पल्लबलता; जटिलेषूत्फुल्लतामण्डपेषु. १२ मावाहय. १३ व्यपदेशो. १४ स्तोकपरिवृतः. १५ सरिन्.

णानेत्रोत्पलस्तबकितासु रममाणपुलिन्दनितम्बिनीवदनबिम्बचन्द्रितासु सान्द्रद्रुमद्रोणीषु विचरितुमारभत ॥ क ॥

पुरःस्थितश्चास्य वर्त्म दर्शयन् जात्यतरतुरंगमारोपितः पुष्कराक्षोऽप्यभाषत ॥ ख ॥

"देव, मार्कण्डेयप्रमुखमहामुनिनिवासपवित्रिताः पुण्याः खल्विमाः पयोष्णीपरिसरवनभूमयः ॥ ग ॥

तथाहि ।

श्रूयते किलास्माद्‌द्देशात्पूर्वदिग्भागे भगवतः पुराणपुरुषावतारस्य परशुरामस्य जनयितुर्जमदग्नेराश्रमः । ततोऽपि नातिदूरेण सुरासुरमौलिमालामुकुलमुक्तमकरन्दबिन्दुस्नपितपादारविन्दस्य भगवतः स्वस्वेदप्रसरप्रवर्तितपयोष्णीप्रवाहस्य महावराहस्यायतनम् ॥ घ ॥

इतोऽप्यवलोकयतु देवः ।

सैषा चलच्चन्द्रकिचक्रवाक-
चञ्चच्चकोराकुलकूलकच्छा ।
स्वःसीमसोपानसदृक्तरङ्गा
गङ्गाप्रतिस्पर्धिपयाः पयोष्णी ॥ २६ ॥

यस्याः पश्यैते

मुक्तास्तैः श्रूयमाणं सिकतिलपुलिनप्रान्तविश्रान्तपान्थै
रुन्धानं मञ्जुगीतप्रियहरिणकुलान्यम्बुपानागतानि ।

सैषेति ॥ चन्द्रकी मयूरः । कच्छाः काशादिक्षेत्रप्रदेशाः । स्वःसीमेत्यत्र स्वरित्यव्ययं स्वर्गार्थम् ॥ २६ ॥

मुक्तेति ॥ सिकतास्यास्तीत्यर्थे इलच् । मधुकरध्वानस्योत्कण्ठाजनकत्वात्पा-

१ दर्शनीयजात्यतरतुङ्गतुरङ्ग. २ नातिदूरे प्रणतसुरा.

सांध्यध्यानावसाने क्षणमिव मुनयः संनिधौ पङ्कजाना-
मोंकारोच्चाररम्यं मधुकरमधुरध्वानमाकर्णयन्ति"॥ २७॥

राजा तु "नमस्याः खल्वमी महानुभावाः ॥ क ॥

तथाहि ।

मृगेषु मैत्री मुदितात्मदृष्टौ
कृपा मुहुः प्राणिषु दुःखितेषु ।
येषां न ते कस्य भवन्ति वन्द्याः
कौशेयकौपीनभृतो मुनीन्द्राः" ॥ २८ ॥

इत्यवधारयँस्तान्ववन्दे ॥

मुनयोऽपि "सोऽयं सोमपीथी निषधनाथः"[1] इत्यनुध्यानादवगम्य प्रयुक्तब्रह्मोक्ताशिषः, अनुगृह्णन्त इवार्द्रार्द्रैर्दृष्टिपातैः[2], आश्वासयन्त इव प्रियस्वागतप्रश्नालापेन, स्नपयन्त इव दरहसितदन्तज्योत्स्नामृतप्लवेन, आह्लादयन्त इवादरेण, दत्वार्घ्यमनन्तरमिदं[3]मवोचन् ॥ ख ॥

"आयुष्मन्, अस्मदीयमिह धर्मोपदेशप्रदानमेव प्रथममाति-

न्थानां मुक्ताश्रुत्वम् । गीतप्रियत्वाद्धरिणानां रोधः । मुनीनां च देवत्रयीवेदत्रयीवाचिन्योंकारे लीनत्वात् । तत्प्रतिनिधौ मधुकरध्वाने बहुमानः ॥ तथा च "त्रयीं तिस्रो वृत्तीस्त्रिभुवनमथो त्रीनपि सुरानकाराद्यैर्वर्णैस्त्रिभिरभिदधत्तीर्णविकृति । तुरीयं ते धाम ध्वनिभिरवरुन्धानमणुभिः समस्तं व्यस्तं त्वां शरणद गृणात्योमिति पदम्" ॥२७॥

मृगेष्विति ॥ मैत्री मुदिता करुणा इति तिस्रोऽपि चेतःप्रसादिन्यो भावनाः । कौशेयकौपीनभृत इति निःसङ्गत्वोक्त्या पापकारिषूपेक्षाप्यभिहिता ॥ २८ ॥

मुनयोऽपीति ॥ दर अर्धं यद्धसितं तेन दन्तज्योत्स्ना सैवामृतप्लवस्तेन । दरेत्यव्ययमीषदर्थे ॥ ख ॥

---

१ निषधाधिप. २ आर्द्रार्द्रदृष्टिपातैः. ३ मेव.

थेयमतिथिजनेष्वतोऽभिधीयसे । पुण्यं पयोऽस्याः सरितः तदे- तदवगाह्य कुरु पुण्यमयमात्मानम् ॥ क ॥

तथाहि ।

पर्वतभेदिपवित्रं जैत्रं नरकस्य बहुमतङ्गहनम् ।
हरिमिव हरिमिव हरिमिव वहति पयः पश्यत पयोष्णी" ॥२९॥

राजापि "एवमेतत् ।

महावराहाङ्गविनिर्गतायाः[1]
किमन्यदस्याः परतः[2] पवित्रम् ॥
यदीयमालोकनमप्यघानि
निहन्ति पुंसां चिरसंचितानि ॥ ३० ॥

तदेष करोमि भवतामादेशम्" इत्यभिधाय[3] यथाविधि स्नानाय सरिन्मध्यमवातरत् ॥ ख ॥

अवतीर्य च मन्त्रमार्जनप्राणसंयम[4]संध्यासूक्तजपपितृतर्पणादिसमुचिताह्निकावसाने रक्तकमलगर्भमर्घ्याञ्जलि[5]मुत्क्षिप्य भगव-

पर्वतेति ॥ राजन् । पश्यत यूयमवलोकयत । पर्वतविदारकं पावनं नरकस्य दुर्गतेर्जैत्रं पराभविष्णु । अत एव बहुमतं बहुमाननीयम् । गहनमगाधम् । पयः पाथः । कर्मभूतम् । पयोष्णी वहति धारयति । उपमाने हरिशब्दत्रयमिन्द्रविष्णुसिंहार्थम् । तत्क्रमेण विशिष्यते । तद्यथा पर्वतभेदी गिरिविदारको यः पविर्वज्रं तं त्रायते धारयति वज्रधरम् । नरकस्य भौमासुरस्य जैत्रमभिभावुकं विष्णुम् । मतङ्गान्मुनिविशेषादीषदूना बहुमतङ्गा गजा मतङ्गादुत्पन्नत्वात् । तान् हन्तीत्यच् । क्विब्वा । अथवा बहून्मतङ्गान्हन्तीति सिंहम् ॥ २९ ॥

महावेति ॥ आदिवराहाद्विनिःसृताया अमुष्याः परतः परमन्यदपरं किं पवित्रं न किमपीत्यर्थः ॥ ३० ॥

अवतीर्येति ॥ मन्त्रमार्जनं मन्त्रस्नानम् । प्राणसंयमः श्वासप्रश्वासरोधने कर-

---

१ विनिर्मितायाः २ सरितः. ३ धाय नृपतिर्यथाविधि. ४ संयमनमायतप्राणं संयम्य संध्यासूक्तं प्रतिजप्य. ५ अर्घाञ्जलि.

तो भास्करस्य स्तुतिमकरोत् ॥ क ॥

जयति जगदेकचक्षुर्विश्वात्मा वेद[1]मन्त्रमयमूर्तिः।
तरणिस्तरणतरण्डकमघपटलपयोनिधौ पुंसाम् ॥ ३१ ॥

तदनु च चटुलचञ्चरीककुलाकुलितकमल[2]कुड्मलगलद्बहलमकरन्दसुरभिततरङ्गमुत्पतत्कपिञ्जलं जलमवगाह्य चिरमुत्तीर्यतीरमापृच्छ्य मुनिजनमभिवाद्य च पुनः पुलिनपालिपर्यटनाय प्रस्थितः प्रणयादनुव्रजतो मुनीन्निवर्तयन्निदमवादीत् ॥ ख ॥

"चक्रधरं विषमाक्षं कृतमद[3]कलराजहंससंचारम्।
हरिहरविरञ्चिसदृशं भजत पयोष्णीतटं मुनयः" ॥ ३२ ॥

एवमुक्तास्तेऽप्यार्द्रहृद[4]याः स्वल्पपरिचयेना[5]प्युपचितोचितप्रणयाः प्रियंवदतया प्रियमाशशंसुः ॥ ग ॥

"सुगमस्तवास्तु पन्थाः क्षेमा दिग्देवताः शिवाः शकुनाः।
अभिलषितमर्थमचिरात्साधयतु भवानविघ्नेन" ॥ ३३ ॥

इत्यभिधाय व्यावृत्तेषु मुनिषु कौतुकादितस्ततः संचरच्चटुलषट्चरणचक्रचुम्बनाकूततरलितपुष्पपरागपटलपांसुलिततरुतलेषु वहत्सुरभिशिशिरकोमलपवनेषु वनेषु, वनेचरमिथुनमन्मथक्रीडानुकूलेषु कूलेषु, पुलिन्दडिम्भकाध्यासितफलितबदरीषु दरीषु,

न्यासोऽङ्गन्यासश्च विद्यते यत्र तत् संध्यासूक्तम् ॥ क ॥

चक्रेति ॥ चक्रवाकधरम्। विषमविभीतकम्। तथा कृतो मदकलराजहंसानां संचारो येन तथाविधम्। पयोष्णीतटं यूयं भजत। मुनय इति संबोधनम्। हरिहरविरञ्चिसादृश्यं विशेषणत्रयेण। तदा चक्रं सुदर्शनं धारयति विष्णुः। विषमाण्यक्षीण्यस्य त्रिनेत्रत्वाद्धरः। कृतो मदकलराजहंसेन कृत्वा संचारो येन स ब्रह्मा, हंसवाहनत्वात् ॥ ३२ ॥

इत्यभिधायेति ॥ पुलिन्दडिम्भैरध्यासितासु कासु फलवद्बदरीषु, न केवलं

१ वेदमयमूर्तिः. २ कमलकुमुदकुड्मल. ३ कलहंससंचारं. ४ आर्द्रहृदयतया. ५ प्युचितोचितम.

पुञ्जितकुञ्जरेषु निकुञ्जेषु, दुर्दर्शभानुषु सानुषु, सानुचरश्चरन्नेकस्मिन्नतिनिबिडसंधिसंनिवेशे शिलान्तरालप्रदेशे, प्रियतममुद्दिश्य पठन्त्याः किंनर्याः साश्चर्यमार्यागीतमिमामशृणोत् ॥ क ॥

विपिनोद्देशं सरसं केतकमकरन्दवासितवियत्ककुभम् ।
ग्राममिमं वा सर संकेतकमकरं दवासितवियत्ककुभम्"॥ ३४॥

तदनु पुनस्तत्प्रतिवादिना किंनरेण च पठ्यमानामिमामार्यामश्रौषीत् ॥ ख ॥

" अजनि रजनिः किमन्यत्तरणिस्तरतीव पश्चिमपयोधौ ।
घनतरुणि तरुणि विपिने क्वचिदस्मिन्नेव निवसामः " ॥ ३५ ॥

एवमन्योन्यालापमाकर्ण्य किंनरमिथुनस्य विस्मितो नरपतिः " अहोमाननीयमहिमोद्दामा दमयन्ती यस्याः परिचारिणः पक्षि-

फलवद्बदरीषु, तथा दरीषु । चकारादिमन्तरेणापि समुच्चयः स्यादेव। तद्यथा (माघे दशमसर्गे,। "सावशेषपदमुक्तमुपेक्षा स्रस्तमाल्यवसनाभरणेषु गन्तुमुत्थितमकारणतः स्म द्योतयन्ति मदविभ्रममासाम्" ॥ अध्यासितास्विति व्यस्तमेव ॥ न च फलन्त्यो बदर्यो यास्विति दरीविशेषणम् । "नद्यृतश्च" इति कप्प्रत्ययस्य दुर्निवारत्वात् ॥ बाहुलकाश्रयणात्कप्प्रत्ययाभाव इति तु न युक्तम् ॥ क ॥

विपिनेति ॥ सरसं सजलम् । तथा केतकमकरन्देन वासितं वियन्नभः ककुभश्च दिशो येन तथाभूतम् । विपिनप्रदेशम् । अथवा इमं पुरोवर्तिनं ग्रामं सर व्रज । कीदृशं ग्रामम् । संकेतयति निवासयति अनुकूलत्वान्निवासहेतुर्भवतीति संकेतकम् । तदेवानुकूल्यमाह —अकरमिति । न विद्यते करो राजग्राह्योंऽशो यत्र। पार्वतीयत्वादकरम् ॥ आसनमासितं सद्भावः । दवस्यासिताद्वियन्तो विश्लिष्यन्तः ककुभास्तरवो यत्र। यदि वा "षिञ् बन्धने" आङ्पूर्वस्य आसयनमासितम् । आबन्ध इत्यर्थः। यद्वा सिताः संबद्धाः । दवेन असिता असंबद्धा वयः पक्षिणो यत्र । तथा यद् वहत् कं पयो यस्यां सा चासौ कुश्च तया भातीति । इणः शतरि यद्वहदित्यर्थः ॥ ३४ ॥

तदिति ॥ किंचिन्नराः किंचित्पक्ष्यश्वादिरूपमिश्राः किंनराः ॥ ख ॥

अजनीति ॥ घनास्तरवो यस्मिन् तस्मिन्विपिने । तरुणीति संबोधनम् ॥ ३५ ॥

र्णोऽपि श्रवणस्पृहणीयामेवंविधसुभाषितामृतमुचं वाचमुच्चारयन्ति ॥ क ॥

प्रथममिह तावदाभिजात्यवित्तविद्याविवेकविभवैरनाकुले कुले जन्म ततोऽप्यनुरूपरूपसंपत्तिस्तदनु श्लाघानुगुणगुणलाभस्ततोऽपिच शुचिविदग्धस्निग्धपरिजनावाप्तिरिति महती भाग्यपरम्परेति चिन्तयन्नातिदूरवर्तिनः पुष्कराक्षस्य मुखमवलोकयांचकार॥ ख ॥

पुष्कराक्षोऽपि पुरःसृत्य तं किंनरमभाषत ॥ ग ॥

"सुन्दरक, कान्तामुखावलोकनासक्तः समीपमागतानप्यस्मान्न पश्यसि ॥ घ ॥

तदितो दत्तदृष्टिर्भव ॥ ङ ॥

स एष निषधेश्वरः कुसुमचापचक्रं विना
प्रसादितमहेश्वरः स्मर इवागतो मूर्तिमान् ।
विलोकय विलोचनामृतसमुद्रमेनं नृपं
विधेहि नयनोत्सवं कुरु कृतार्थतामात्मनः ॥ ३६ ॥

त्वमपि विहंगवागुरे, परमरहस्यसखी देव्याः सा हि त्वच्चक्षुषा पश्यति, त्वत्कर्णाभ्यामाकर्णयति, त्वन्मनसा मनुते ॥ च ॥

प्रथममिति ॥ आभिजात्यादीनि अहंकारकृतवैक्लव्यस्य कारणानि । कुले त्वेभिरनाकुले । अनुगुणोऽनुरूपः ॥ ख ॥

सएषेति ॥ एष निषधेश्वरो नलः कुसुमचापचक्रं विनाभूतो मूर्तिमान् प्रसादितमहेश्वरः स्मरः । एतावता पूर्वस्मराद्व्यतिरेकोक्तिः । यतः पूर्वः कुसुमचापचक्रं धत्ते । न च मूर्तिमान् दग्धाङ्गत्वात् । तथा प्रकोपितमहेश्वरः ॥ यदा तु प्रसाधितेति पाठः, तदा प्रसाधिता अलंकृता महान्त ईश्वरास्त्राणादिना येन तादृग् निषधेश्वरः । स्मरस्तु साधयितुं वशीकर्तुं प्रारब्धो महेश्वरः शिवो येन । कुसुमान्येव चापचक्रं धनुर्मण्डलम् ॥ ३६ ॥

१ चित्र. २ श्लाघ्यानु. ३ न्नदूरवर्तिनः; न्नतिदूरव. ४ उपसृत्य; पुरोऽपसृत्य.

तदिह दमयन्तीमनोरथपान्थपिपासाच्छिदि लावण्यपुण्यह्रदेऽस्मिन्राजनि निर्वापय चक्षुः" इति किंनरमिथुनमभिमुखीकृत्य नरपतिमवादीत् ॥ क ॥

"देव, तदेतत्किंनरमिथुनम्, इदं हि द्वितीयमिव हृदयं देव्याः, प्रियं प्राणेभ्योऽपि प्रेम्णा प्राभृतमेतत्प्रहितं तुहिनाचलचक्रवर्तिना देवस्य, देवेन देव्यै दत्तम्। तया च दमयन्त्याः समर्पितं परं पात्रं मन्त्रगीतेः ॥ ख ॥

तथाहि। जातख्याति जातिषु, गीतयशो गीतकेषु, वर्धितमानं वर्धमानेषु, सारमासारितकेषु, निपुणं पाणिकासु, धाम साम्नाम्, आचार्यकमृचाम्, आलयः कलादिभेदानाम्, रसगीत्यामपि सुस्वरं स्वरालापेषु, अवग्राम्यं ग्रामरागेषु, विचित्रभाषं भाषासु, प्रवर्तकं नर्तनानाम्, कारणं करणमार्गस्य, वाद्येष्वपि प्रवीणं वीणावेणुषु, लब्धपाटवं पटहेषु, अप्रतिमल्लं झल्लरीषु ॥ ग ॥

किंबहुना।

कालमिव कलाबहुलं सर्वरसानुप्रवेशि लवणमिव।
तव नृप सेवां कर्तुं किंनरयुगलं तया प्रहितम् ॥ ३७ ॥

देवेति ॥ तुहिनाचलस्य हिमाचलस्य चक्रवर्तिना नृपेण प्राभृतं प्रहितमेतत्। भीमायेति शेषः। मन्त्रा गीयन्तेऽस्यामिति मन्त्रगीतिः ॥ ख ॥

जातेति ॥ जातयो नन्दयन्तीप्रभृतयः। वर्धमानान्यासारितकानि पाणिकाः सामानि ऋचः कलादिभेदा गीतविषया भरतशास्त्राद्गम्याः। मध्यमादयः सप्तस्वराः। षड्जमध्यमगान्धारास्त्रयो ग्रामाः। भाषाः षट्त्रिंशत्। कला गीतवाद्याद्या मुहूर्तभेदाश्च। करणानि तलपुष्पपुटादीन्यष्टोत्तरशतसंख्यानि ॥ ग ॥

कालमिति ॥ कला गीतवाद्याद्या मुहूर्तभेदाश्च विदन्त्यधीयते वा कालाः कलाविदः। तेषां समूहः कालम्। तद्यथा। कलाशास्त्रविषये बहुलं तन्निष्ठं भवति। तथेदमपि

---

१ तदेहि. २ तया च देव्या. ३ सरसं गीत्यामपि.

तदेतदात्मपरिग्रहेणानुगृह्यताम्" इत्यभिधाय विश्रान्तवाचि तस्मिन्स किंनरयुवा किमप्युपसृत्य मृगमदमिलन्मलयजरसोल्लासिलेखालाञ्छितललाटपट्टार्पितकरकमलमुकुलं प्रणतिप्रेङ्खितमणिकर्णावतंसया सह प्रियया प्रणाममकरोत् ॥ क ॥

उक्तवाँश्च।

" लब्धार्धचन्द्र ईशः कृतकंसभयं च पौरुषं विष्णोः।
ब्रह्मापि नाभिजातः केनोपमिमीमहे नृप भवन्तम् ॥ ३८॥

इदं च।

अरुणमणिकिरणरञ्जितलिखिताक्षरमङ्गुलीयकाभरणम्।
तस्याः करकिसलयमिव तव करकमले चिरं लगतु ॥ ३९ ॥

अनया च।

तव सुभग रम्यदशाया तयेव रक्तान्तनेत्रमण्डनया ॥
चीनांशुकयुगलिकया क्रियतामङ्गे परिष्वङ्गः ॥ ४० ॥

समग्रकलाप्रवीणम्। रसाः शृङ्गाराद्यास्तिक्ताद्याश्च। समयार्थे तु कालशब्दे पुंस्त्वं स्यात्। यदा तु "काल इव कलाबहुलम्" इति पाठः। तदा कालः कलाभिर्निमेषोन्मेषाद्यंशरूपाभिर्बहुलो व्याप्तः। इदं तु कलाभिर्गीतनृत्यादिभिर्व्याप्तम्। कालोऽवसरः आत्मसमर्पणायावसर इव प्रेषित इति भावः ॥ ३७ ॥

लब्धेति ॥ अर्धं चन्द्रस्य अर्धचन्द्रः शशिकला गलापहस्तनं च। तत्तु निन्दाभासे। तद्युक्त ईश्वरः ॥ कृतं कंसस्य भयं येन तत्पौरुषं विष्णोः। निन्दाभासे तु कृतकं कृत्रिमम्। सभयं भयान्वितम् ॥ वैष्णवतो नाभेर्जातो ब्रह्मा। निन्दाभासे तु अभिजातः कुलीनः पश्चान्नञ्योगः ॥ ३८ ॥

अरुणेति ॥ अनयाशिषा पाणिग्रहणं सूचितम्। अरुणमणिः पद्मरागादिः। लिखितान्यक्षराणि यस्मिन्। करकिसलयं त्वरुणम्। तथा मणिकिरणैराभरणरत्नकान्तिभिः कलितम्। तथा लिखितान्यक्षराणि येन ॥ ३९ ॥

तवेति ॥ दशा वस्त्रान्तसूत्रमवस्था च। नेत्रं चित्रवस्त्रविशेषोऽक्षि च ॥ ४० ॥

अयं च ।

उज्ज्वलसुवर्णपदकस्तस्याः संदेशकथनदूत इव ।

रुचिरमणिकर्णपूरः श्रयतु श्रवणान्तिकं भवतः ॥ ४१ ॥

किंचान्यत् ।

आनन्ददायिनस्ते कुण्डिननगरे कदा भविष्यन्ति ।

त्वन्मुखकमलविलोलन्नागरिकानयनषट्पदा दिवसाः"॥ ४२ ॥

एवमाविर्भावितप्रश्रयमुज्ज्वलितानुरागमुदीरितादरमाप्यायितप्रणयमभिधाय स्थितवति किंनरे, नरेश्वरो दमयन्तीप्रहितप्राभृतानि स्वयमादरेण गृहीत्वा, "सुन्दरक, तस्याः संदेश एवास्माकं कर्णपूरः, परिकरोऽयं मणिकर्णावतंसः । तस्याः सुगृहीतेन नाम्नैव वयं मुद्रिताः प्रपञ्चोऽयमङ्गुलिमुद्रालंकारः। तदनुरागेणैव वयमाच्छादिताः पुनरुक्तमाच्छादनयुगलमपरं च युवां प्रेषयन्त्या तया किं न प्रहितमस्माकम् । किमन्यत्त्वत्तोऽपि प्रियं प्राभृतं भविष्यतीति । तदेहि शिबिरमनुसरामः"इत्यभिधाय बहु मानयन्किंनरमिथुनमतिचपलकपिकुलान्दोलिततरुशिखराग्रगलितशिलास्फालनस्फुटत्फलरससुगन्धिना स्रवत्कुसुममकरन्दद्रवार्दितपांसुपटलेन वर्त्मना निजावासमुदचलत् ॥ क ॥

उच्चलिते च पश्चिमाम्भोनिधिसलिलक्षालितपादपल्लवे वासार्थिनीवास्तगिरिगह्वरं विशति वियद्वीथीपान्थे विवस्वति, क्रमेण तस्यां दिशि दिनकररथचक्रचङ्क्रमणचूर्णनोच्चलन्मन्दरगिरिगैरिका-

उज्ज्वलेति ॥ उज्ज्वलं सुवर्णं पदं यस्य । पक्षे उज्ज्वलान्यग्राम्याणि शोभनवर्णानि पदानि वचनानि यत्र ॥ ४१ ॥

एवमिति ॥ कर्णपूरोऽवतंसः कर्णयोः पूरणं च । मुद्रिता अपरस्त्रीनाम्नो दुष्करप्रवेशा कृता ॥ क ॥

उच्चलित इति ॥ पान्थो हि सलिलेन चरणौ प्रक्षाल्य वासागारं प्रविशति ॥ख॥

१ मुद्दीपितादर. २ आप्यायितप्राण. ३ मानयंश्च तत्किं. ४ करा. ५ गलिततलशिला.

धूलिपटलोल्लोल इवोल्ललास संध्यारागः ॥ ख ॥

तेन च संवलितानि विजृम्भितुमारभन्त जम्भनिसुम्भनककुभि विपिनजरत्कृकवाकुकंधरारोमरोचींषि तमांसि ॥ क ॥

ततश्च नष्टचर्याक्रीडयेवादर्शनमायान्तीषु दिक्कन्यकासु, वनमुनिहोमधूमगन्धेन संतर्प्यमाणासु वनदेवतासु, निद्रान्धसिन्धुरयूथेष्विवोन्नतवप्रस्थलीषु परिणमत्सु शनैस्तिमिरेषु, जाते मनाग्भिन्नाञ्जनपत्रस्तबकिते निशामुखे, नरपतिस्तेन किंनरमिथुनेन सार्धमर्धपथायातप्रज्वलितदीपिकापाणिपरिजनपरिकरितः शरणागतकपोतमुत्पतितोलूककृतशब्दं शिबिमिव शिबिरसंनिवेशमविशत् ॥ ख ॥

तत्र च क्रमेण कृतकरणीयस्त्वरमाणपाचकवृन्दोपनीतमुत्पतत्पाकपरिमलस्पृहणीयमत्युष्णमेदुरमांसोपदंशमाज्यप्राज्यमुपभुज्य पुष्कराक्षकिंनरमिथुनापजनैः सह मधुररससारमाहारम, अनन्तरमाचान्तः शुचिचन्दनोद्वर्तितकरः कर्पूरपारीपरिकरितताम्बूलोज्ज्वलवदनारविन्दः "सुन्दरक, कमपि प्रस्तारय विद्याविनोदं त्वयापि विहंगवागुरिके, गीयतां किमपि मधुरम्" इति मृदुमणिपर्यङ्किकासुखासीनः किंनरमिथुनमादिदेश ॥ ग ॥

तेन चेति ॥ जम्भनिसुम्भन इन्द्रः ॥ क ॥

ततश्चेति ॥ नष्टचर्या शिशुक्रीडाविशेषः । निद्रान्धेत्यादौ परिणामः परिपाकस्तिर्यक् प्रहारदानं वा । निशासु हि कपोताः पारावताः शरणं नीडमागच्छन्ति, उलूकाश्च घूका उड्डीयन्ते । उपमाने तु "नारदकृतां शिबिप्रशंसामसूयन्तौ कपोतोलूकरूपधारिणौ सुरौ सत्त्वं जिज्ञासमानौ शिबिनृपमागतौ" इत्यागमः ॥ ख ॥

तत्र चेति ॥ कर्पूरस्य पारी शकलम् ॥ ग ॥

---

१ विपिनेति नास्ति. २ पाचिकावृन्दारिकोप. ३ दि. ४ माहारमकरोदनन्तरं; माहारमाहारयांचकार.

दर्शिते च वांशिकेन वंशमुखोद्गीर्णगान्धारपञ्चमरागस्थानके स्थिरीकृतमध्यमश्रुतिप्रसन्नप्रेङ्खोलनाप्रयोगमुचितस्थानकृतकांस्यतालमकठोरतारस्वरम्, आकर्षदिव हृदयम्, अभिषिञ्चदिवामृतेन श्रवणेन्द्रियम्, अस्तं नयदिवान्यविषयसंधानम्, अनुच्चप्रपञ्चितपञ्चमं विपञ्चीस्वरसंदर्भितमभूत्तत्किमपि गीतम् ॥ क ॥

यत्र

प्रसरति रणरणकरसः कुण्ठयति हठेन चित्तमुत्कण्ठा ।
स्मरति स्मरोऽपि धनुषः प्रगुणीकृतनिशितबाणस्य ॥४३॥

एवंविधे च व्यतिकरे वैतालिकः पपाठ ॥

सकलविषयवृत्तीर्मुद्रयन्निन्द्रियाणां
हृदि विदधदवस्थां कांचिदुन्मादिनीं च ।
ध्वनिरनुगतवीणानिक्कणः कोमलोऽयं
जयति मदनबाणः पञ्चमः पञ्चमस्य ॥ ४४ ॥

अपिच ।

प्रियविरहविषादस्यौषधं प्रोषितानां
विविधविधुरचिन्ताभ्रान्तिविश्रान्तिहेतुः ।
अयममृततरङ्गः कर्णयोः केन सृष्टो
मधुररसनिधानं निःस्वनः पञ्चमस्य ॥ ४५ ॥

अपिच ।

अयं हि प्रथमो रागः समस्तजनरञ्जने ।

सकलेति ॥ पञ्चमस्य रागस्य ध्वनिर्जयति ॥ कथंभूतः । पञ्चमः पञ्चानां पूरणो मदनबाणः ॥ ४४ ॥

प्रियेति ॥ अत्र पञ्चमस्येत्याख्या । न तु पञ्चानां पूरणस्येति व्युत्पत्त्यर्थः ॥ ४५ ॥

अयमिति ॥ प्रथमः प्रधानभूत आद्यश्च । द्वितीयः समानो द्वयोः पूरणश्च । स

---

१ संवेदनं. २ कृत.

यस्य नास्ति द्वितीयोऽपि स कथं पञ्चमोऽभवत्" ॥४६॥

इति विविधमुदञ्चत्पञ्चमोद्गारगर्भे
पठति मधुरकण्ठे धाम्नि वैतालिकेऽस्मिन्[१]।
अपहरति च चित्तं किंनरद्वन्द्वगीते
सुखमय इव निद्रानिःस्पृहो लोक आसीत्॥ ४७॥

एवमनवरतमारोहावरोहमूर्छनाभङ्गितरङ्गिते गीतामृतस्रोतसि निमग्नमनसि कठोरितोत्कण्ठे रणरणकारम्भभाजि राजनि "रजनि किं न विरमसि। दिवस, किं नाविर्भवसि। अध्वन्[२], किं न स्तोकतां व्रजसि[३]। कुण्डिननगर, किं न नेदीयो भवसि[४]। श्रम, किमन्तरायोऽसि। विधे, किमुत्क्षिप्य न मां तत्र नयसि" इत्यनेकधा चिन्तयति स किंनरयुवा प्रक्रमोचितश्लेषमिदमवादीत्॥

"वर्धमानोल्लसद्रागा सुजातिमृदुपाणिका।
दमयन्ती च गीतिश्च कस्य नो हृदयंगमा॥ ४८॥

कथं पञ्चानां च पूरणोऽथ च पञ्चम इति संज्ञा ॥ ४६ ॥

इतीति ॥ परब्रह्मालोकनसमयसमुल्लासितसान्द्रानन्दमय इव। रसस्य हि तत्त्वं परब्रह्मास्वादसोदरत्वं पूर्वाचार्यैर्व्यचार्यत। सुखमय इव निद्रानिमीलित इवेत्युभयत्रापीवशब्दो योज्यः। अथवा सुखमयः सन्निद्रानिमीलित इवेतीवशब्दो भिन्नक्रमे॥ ४७॥

वर्धमानेति॥ वर्धमानो वर्धिष्णुः। न तु हीयमानः। उल्लसन् रागोऽनुरागो यस्याम्। सुष्ठु शोभना क्षत्रियाख्या यस्याः। पाणिः करः॥ पक्षे वर्धमाने तालविशेषे उल्लसन् रागः श्रीरागादिर्यत्र। जातयो नन्दयन्तीप्रभृतयः। पाणयः समपाण्यादयः॥ ४८॥

---

१ स्य. २ मार्ग. ३ यासि. ४ असि.

अपिच ।

साप्यनेककलोपेता साप्यलंकारधारिणी ।
सापि हृद्यस्वरालापा किंत्वसाधारणा तव ॥ ४९ ॥

अपिच ।

संगीतका त्वदौत्सुक्यात्त्वां स्मरन्ती समूर्छना ॥
किं तु तस्यास्त्वयि स्वामिँल्लयभङ्गो न दृश्यते" ॥ ५० ॥

एवमुक्तवति किंनरेश्वरे किमप्यलीककोपकुटिललोलभ्रूवलया वलितकंधरमवलोक्य किंनरी वक्तुमारभत ॥ क ॥

"सुन्दरक, मा मैवं वादीः ॥ ख ॥

शुष्काङ्गी घनचार्वङ्ग्याः सुवाचः काकलीस्वरा ।
दमयन्त्याः कथं गीतिः सादृश्यमवगाहते ॥ ५१ ॥

सापीति ॥ कला विज्ञानकौशलम् । अलंकार आभरणम् । स्वरः शब्दः । आलापो मिथोभाषणम् । गीतिपक्षे "पताकेनावकृष्टिश्च विरलाङ्गुलिना च या । आवाप इति विज्ञेया कलाविद्भिस्तु सा कला" इत्यावापादयः सप्त कलाः । अलंकारा उपमारूपकादयः । स्वराः षड्जादयः सप्त । आलाप आलप्तिः । परं किं नु दमयन्ती असाधारणा अनन्यविषयत्वादेकाश्रया । गीतिस्तु साधारणा स्वरसाधारणा जातिसाधारणा चेति ॥ ४९ ॥

संगीतेति ॥ त्वय्यौत्सुक्यं त्वदौत्सुक्यं तस्माद्धेतोः । सम्यग् गीतं प्रख्यातिरस्याः । इति सर्वत्र त्वदुक्ता गीयत इति भावः । तथा त्वां स्मरन्ती सहमूर्छनया वर्तते इति समोहा ॥ गीतिस्तु संगतं गीतं स्वरगुणदूषणग्रामश्रुतियतिमूर्छनालक्षणं यस्याम् । तथा "स्वरः संतर्जितो यत्र रागत्वं प्रतिपद्यते । मूर्छनामिति तां प्राहुर्मुनयो ग्रामसंभवाम्" ॥ सा चैकविंशतिविधा ॥ यदुक्तम्–"सप्त स्वरास्त्रयो ग्रामा मूर्छनास्त्वेकविंशतिः" इति ॥ तथोक्तया सह समूर्छना । इत्येतावता दमयन्तीगीत्योः साम्यमुक्तम् । अधुना तु भेदं निरूपयति–किंत्विति ॥ लयस्तत्परता । द्रुतमध्यविलम्बितलक्षणश्च ॥ ५० ॥

शुष्केति ॥ शुष्कमवकृष्टमङ्गमवयवो यस्याः । कु ईषत् कलोऽस्यामिति (गौरादित्वान्ङीषि) काकली निषादसंज्ञः स्वरो यस्याः ॥ वैसादृश्यपक्षे शुष्कमनार्द्रम् । काकली श्लेष्मवैगुण्याद्द्विधाभूतः स्वरः ॥ ५१ ॥

अपिच।

गीतेर्ग्रामाः किल द्वित्राः सा तु ग्रामसहस्रभाक्।
कूटतानघना गीतिः कथं तस्याः समा भवेत्॥ ५२॥

किं चान्यत्।

ज्वरितेव बहुलङ्घनप्रयोगप्रकाशितमूर्छना बहुलकम्पा च। उन्मत्तेव बहुभाषा बहुताला च। वेश्येव बहुगा बहुदृष्टरागा च। अटवीव बहुककुभभेदा बहुलनिषादस्थानका च। गीतिरियम्॥क॥

तद्वरमिदमुच्यताम्।

वेदविद्योपमा देवी मनोहरपदक्रमा।
उद्द्योतिता पुराणाङ्गमन्त्रब्राह्मणशिक्षया॥ ५३॥

गीतेरिति॥ षड्जमध्यमगान्धारास्त्रयो ग्रामाः। गान्धारस्य स्वर्गविषयत्वाद्भावेवेति द्वित्राः। ग्रामः खेटकं च। कूटतानाः पञ्चत्रिंशत्। तैर्घना॥ दमयन्ती तु न कपटविस्तारबहुला॥ ५२॥

ज्वरित इत्यादि॥ लङ्घनमुद्ग्राहितादधिकोच्चारणम्। पक्षे लङ्घनं शोषणम्। अनशनमिति यावत्। प्रयोगे उच्चारणे प्रकाशिता मूर्छना उत्तरमन्द्रादिका यस्याम्। पक्षे प्रकृष्टा योगाः क्वाथादयः। मूर्छना मोहः। कम्पोऽङ्गकृतं स्वरकृतं च चलनम्॥ उन्मत्तेति॥ भैरवीप्रभृतयः षट्त्रिंशद्भाषाः। तालश्चञ्चत्पुटादिः॥ उन्मत्ता तु बहु भाषते तालिकाश्च दत्ते॥ वेश्येवेति॥ रागः श्रीरागादिः। तथा बहुलष्टक्कनामा रागो यस्याम्। वेश्या तु बहुषु रागोऽस्या इति बह्वासक्तिः। प्रभूतठक्करागामिनी च॥ ठक्कशब्दोपलक्षिता क्रीडया कराहतिः ठक्करा। गमेः प्राप्त्यर्थाड्डुः॥ अटवीति॥ ककुभो ध्वनिविशेषः। निषादः स्वरविशेषः। स्थानकं मन्द्रमध्यमतारलक्षणम्। अटवीपक्षे ककुभोऽर्जुनवृक्षः। निषादाः शबराः। स्थानकान्यालवालाः शिबिरसंनिवेशश्च॥ एवं ज्वरिताद्युपमानप्रतिपादितदोषा गीतिः कथंकारमिव दमयन्तीसमा॥ क॥

वेदेति॥ पदक्रमः पदन्यासः। पुराणं जीर्णं वपुर्येषाम्। तथा मन्त्रप्रधानब्राह्मणानां पुरोधःप्रभृतीनां च शिक्षयोपदेशेनोद्द्योतिता॥ वेदविद्या तु पदक्रमाभ्यामभिधीयते। पुराणानां मार्कण्डेयादीनाम्। अङ्गानां शिक्षाकल्पादीनाम्। मन्त्रब्राह्मणस्य ग्रन्थविशेषस्य शिक्षयाभ्यासेन भूष्यते॥ अन्तःपुरे हि वृद्धा एवाधिक्रियन्ते। यदु-

१ किंबहुना.

किं त्वियमेकपथा, सा तु दृष्टशतपथा" इत्येवमनेक वधवक्रोक्तिविशेषैरभिनन्दयति दमयन्तीकिंनरमिथुने, भूतभूयिष्ठायां विभावर्याम्, सुरसङ्घ इवादृश्यमानमानुषे निशीथे, स्थगितवति भृङ्गभासि तमसि भुवनम्, अनन्तरमवसरपाठकः पपाठ ॥ क ॥

उपरम रमणीयात्किंनरद्वन्द्वगीता-
दभिभवति निशीथो[1] नाथ नेत्राणि पश्य ।
मदनवशविलोलल्लोचनाम्भोरुहाणां
मिलतु कुलवधूनां सेवको लोक एषः ॥ ५४ ॥

अपिच ।

शतगुणपरिपाट्या पर्यटन्नन्तराले
कमलकुवलयानामर्धरात्रेऽपि[2] खिन्नः ।
उपनदि दयितायाः क्वापि[3] शब्दं निशम्य
भ्रमति पुलिनपृष्ठे चक्रवच्चक्रवाकः ॥ ५५ ॥

अथ यथाप्रियं प्रेषित[4]परिजनो राजा रजनिशेषमतिवाहयितुमनुरूपं निरूप्य किंनरमिथुनस्य शयनमासन्ननिद्रा[5]गृहे हंसपिच्छच्छायाच्छप्रच्छदपटा[6]च्छादितहंसतूल[7]तल्पमभजत् ॥ ख ॥

तत्र च दमयन्त्यनुरक्तोऽयमितीर्ष्ययेवानायान्त्यां निद्रायां द्रो-

क्तम्–"आशीतिकाश्च पुरुषाः पञ्चाशत्काश्च योषितः। बुध्येरन्नवरोधानां शौचमागारिकाश्च ये" ॥ ९३ ॥

किंत्वियमिति ॥ इयं दमयन्ती एकमार्गा । वेदविद्या तु दृष्टशतपथाख्यग्रन्था । भूयिष्ठं भूता अतिक्रान्ता, भूतभूयिष्ठा । आहिताग्न्यादित्वात् । निशीथे तमोऽतिशयान्मानुषादर्शनम् । सुराणां समूहे च स्वभावात् ॥ क ॥

तत्रेति ॥ द्रोण्यां द्रुमास्तेषामन्तरालं द्रोणीद्रुमान्तरालम् मध्ये । निम्नः प्रान्तयो-

१ निशीथे. २ प्यखिन्नः. ३ कोऽपि. ४ मोषित. ५ आसन्नं निद्रा. ६ पटघटिकाच्छादि. ७ तूलीतल्पतलमभजत्.

णीद्रुमान्तरालसुप्तोत्थितविविधविहंगविरुतानि विनिद्रवनदेवतापठ्यमानप्राभातिकपुण्यकीर्तनानीवाकर्णयन्ननेककालप्रणालिकापर्यायेण पर्यस्तेऽस्तगिरिमस्तके मुक्तास्तबकितनीलवितानपट इव तारातिमिरपटले, पट्टांशुकवैजयन्तीष्विव भविष्यति दिनकरोदयोत्सवे नभस्तलमलंकुर्वतीषु पूर्वस्यां दिशि प्रभातप्रभावल्लरीषु, वल्लकीक्वाणरमणीये श्रयति श्रवणपथमीषदुन्मिषत्कमलमुकुलसुखमुक्तमधुकरमन्द्रध्वनौ, ध्वस्तनिद्रेण प्रभातोचितषड्जानुविद्धशुद्धभाषामालपतानेन किंनरमिथुनेन गीयमानमिमं श्लोकमशृणोत् ॥ क ॥

धुतरजनिविरामोन्मीलदम्भोजराजि-
स्तनुतुहिनतुषारातुद्गिरन्गन्धवाहः ।
कलितकलभकुम्भभ्रान्तिपूद्घाटितेषु
स्खलति निधुवनान्तश्रान्तकान्ताकुचेषु ॥ ५६ ॥

तदनु पुनः प्रभातप्रहतप्रयाणभेरीरवविनिद्रितस्यापूरयतः स-

श्योन्नतस्तरुराजिविराजितो नौसदृशः पर्वतादिभूभागो द्रोणी । यदाह मुकुटताडितकनाटके बाणः–"आशाः प्रोषितदिग्गजा इव गुहाः प्रध्वस्तसिंहा इव द्रोण्यः कृत्तमहाद्रुमा इव भुवः प्रोत्खातशैला इव । बिभ्राणाः क्षयकालरिक्तसकलत्रैलोक्यकष्टां दशां जाताः क्षीणमहारथाः कुरुपतेर्देवस्य शून्याः सभाः" ॥ यया प्रणालिकया काल इयानिति ज्ञायते, सा कालप्रणालिका ताम्रमयघटिका । अथवा प्रकृष्टा नाडिकैव डलयोरैक्ये प्रणालिका । नाडिका कालविशेषः ॥ तथा च "अहोरात्रं च विद्वद्भिः कथ्यते षष्टिनाडिकम्" ॥ यथा च–"स्नात्वा तिष्ठति कुन्तलेश्वरसुता वारोऽङ्गराजस्वसुर्द्यूते रात्रिरियं जिता कमलया देवी प्रसाद्याद्य च । इत्यन्तःपुरसुन्दरीःप्रति मया विज्ञाय विज्ञापिते देवेनाप्रतिपत्तिमूढमनसा द्वित्राः स्थितं नाडिकाः ॥" अन्यदपि प्रणालिकया जलपद्धत्या परिक्षिप्यते ॥ ताराणां मुक्ताः, तिमिरपटलस्य नीलवितानपट उपमा ॥ क ॥

१ भविष्यद्दिनकरोत्सवे. २ मधुकरमधुरमन्दध्वना. ३ चित्तभिन्नषड्जानुबद्धमुग्धभाषाविद्धविशुद्ध. ४ तेन.

मविषमवनविभागानुत्कल्लोलजलनिधेरिव चलतः सैन्यसमूहस्य कलकलमाकर्णयन्नुत्थाय कृतोचिताचारश्चारु[1]चर्चितचन्द्रचूडचरणश्चटुलखुरचारीप्रचारेणाडम्बरितताण्डवस्य खण्डपरशोः पदलीलामिवाभ्यस्यता स्फुरद्घुरघुरायमाणघोणाग्रस्खलत्खलीनवशाविगलितबहललालाजल[2]प्लवेन वनभुवि फेनिलजलनिधिमिवाकारयता जात्यतरतुरगसैन्येन परिवृतः पूर्वप्रस्थानस्थित्या प्रतस्थे॥क॥

स्थपुटस्थलीस्थितं स्थूलमेकमव्यग्रमग्रे [3]राजा गजग्रामणयमवलोक्य पुष्कराक्षमभाषत ॥ ख ॥

"भद्र

सालानकमनालानमत्युन्नतमनुन्नतम् ।
दन्तवन्तमदन्तं च पश्यैनमगजं गजम् ॥ ५७ ॥

अयं हि मन्मथविलासेषु परं वैदग्ध्यमवलम्बते ।

तथाहि ।

मृदुकरपरिरम्भारम्भरोमाञ्चितायाः
सरसकिसलयाग्रग्रासशेषार्पणेन ।
मदमुकुलितचक्षुश्चाटुकारी करीन्द्रः
शिथिलयति रिरंसुः केलिकोपं प्रियायाः ॥ ५८ ॥

सालेति ॥ अलीनां समूह आलं तदेव प्रत्यायकत्वात्पटहस्तेन सह । मदविधुरगजे भृङ्गाः समीपीभवन्ति । तेन च मत्तो ज्ञायत इति भावः । तथा अनालानं वन्यत्वान्निरर्गलस्तम्भम् । तथातीवोन्नतमुच्चम् । तथा नास्ति उन्नता प्रेरणास्येति स्वच्छन्दचरमित्यर्थः । यद्वा अनुन्नेत्यामन्त्रणम् । तमिति गजविशेषणम् । दन्तवन्तं दन्तुरम् । अदन्तं तृणादिकमश्नन्तम् । अगजं गिरिजं गजं पश्येति संबन्धः ॥ अथवा सालांस्तरूनदन्तम् । तथा अकमकुत्सितम् । सर्वलक्षणपरिपूर्णम् । तच्च "उच्चैः कुम्भः—" इत्यादिना वक्ष्यति । अत्र "किम्" क्षेपे । शेषं पूर्ववत् ॥ ५७ ॥

---

१ चारुचर्चार्चित. २ जलाप्लवेन. ३ नास्ति.

अपिच ।

उपनयति करे करेणुकायाः किसलयभङ्गमनङ्गसंगताङ्गः ।
स्पृशति च चलदक्षिपक्ष्मलेखं मुखमखरेण करेण रेणुदिग्धम् ॥ ५९ ॥

अथवा विवेकपूर्वव्यवहारविचारेष्वमी मानुषेभ्यः[1] स्तोकमेवावहीयन्ते ॥ क ॥

तथाहि ।

श्रूयते पुरा किल नारायणनाभ्यम्भोरुहकुहरकुटीमधिशयान[2]स्य वेदविद्यां निगदतो भगवतः पितामहस्य बृहद्रथन्तरविकीर्णभासनामानि सामानि गायतः सामस्तोभरसनिष्यन्दादुदपद्यन्तैरावतसुप्रतीककुमुदवामनाञ्जनप्रभृतयोऽष्टौ दिग्गजेन्द्राः ॥ ख ॥

तेभ्योऽभवन्भद्रमन्द्रमृगसंकीर्णजातयो गिरिचरनदीचरोभयचारिणः करिणः ॥ ग ॥

प्रसिद्धं चैतत् । "सामजा गजाः" इति ॥ घ ॥

केचित्पुनरन्यथा कथयन्ति

किल सकलसुरासुरकरपरिवर्त्यमानमन्दरमन्थानमथितदुग्धाम्भोनिधेरजनि जनितजगद्विस्मयो लक्ष्मीमृगाङ्कसुरभिसुरद्रुमधन्वन्तरिकौस्तुभोच्चैःश्रवसां सहभूः[3] शशधरकरकान्तिरैरावतः । तत्प्रसूतिरियमशेषवनान्यलंकरोतीति[4] ॥ ङ ॥

तदेष भद्रजातिर्भविष्यति ।

तथाहि ।

उच्चैःकुम्भः कपिशदशनो बन्धुरस्कन्धसंधिः

श्रूयत इति ॥ सामस्तोभरसनिष्यन्दादिति । सामनि स्तोभ आसक्तिस्तस्माद्रसस्य स्वेदस्य निष्यन्दः स्रावस्तत इत्यर्थः। स्तोकरसपाठे तु रस आसक्तिः। निष्यन्दः स्वेदः ॥ ख ॥

---

१ मनुष्येभ्यः. २ कुटीर. ३ सुरभिसुरद्रुमधन्वन्तरिकौस्तुभोच्चैःश्रवःशशधरलक्ष्मीसहोदर ऐरावतः. ४ करोति.

स्निग्धाताम्रद्युतिनखमणिर्लम्बवृत्तोरुहस्तः ।
शूरः सप्तच्छदपरिमलस्पर्धिदानोदकोऽयं
भद्रः सान्द्रद्रुमगिरिसरित्तीरचारी करीन्द्रः ॥ ६० ॥

[1]तन्मोदतामयम्, अनुरागिणोर्दम्पत्योः क्रीडारसविघातः कृतो न श्रेयान्" इत्यभिधाय, [2]हृतहृदयः, स्वैरं रममाण[3]मृगमिथुनविलासैरुल्लासितपुलकः कुसुमितकाननानिलैः, रुत्कम्प्यमानः, झरन्निर्झरोपान्तपादपतलचलत्[5]केलिकिलकेकिकेकारवैर्विनोद्यमानः समीपचरसे[6]वकसुभाषितैश्च, सममसमं च, निम्नगात्रमनिम्नगात्रं च, ग्रावविष[7]ममग्रावविषमं च, सश्वापदमश्वापदं च, सपादपमपादपं च, विन्ध्यस्कन्धमुल्लङ्घ्य, "देव, विलोक्यतामिह विषमविषाणि पन्नगकुलानि द्रोणीगहनं च, इह शरासनकरम्बा-

तदिति ॥ उच्चैः कुम्भ इत्याद्यभिधाय तेनैव करिणा हृतहृदयो मृगमिथुनविलासादिभिः पुलकाद्युपेत ईदृशं विन्ध्यमतिक्रम्य "देव, वीक्ष्यताम् इह विन्ध्यस्कन्धे इदमिदमिति वनप्रदेशान्दर्शयतः पुष्कराक्षस्य वक्रोक्तीर्भावयन्नतिक्रान्तशिखरपरम्परः सह्यमयात् ॥ केलये किलतीति केलिकिलः ("इगुपध" इति कः) क्रीडापात्रम् । केलिकिलानां केकानुकारप्रवृत्तानां केकिनां च केकारवैर्विनोद्यमानः ॥ सह मया श्रिया समं सश्रीकम् । असमं विषमम् । न समोऽस्येति कृत्वा उत्कृष्टं वा । निम्नगा नदी-खायत इति कः । तथा अनिम्नमुच्चं गात्रं मूर्तिर्यस्य । ग्रावभिर्दृषद्भिर्विषमम् । अग्रे अवविषमं समम् । अवेति नञर्थे ॥ श्वापदं हिंस्रपशुः । अश्वानामपदमभूमिम् । समनिर्जलो हि देशोऽश्वीयः । अयं च ग्रावविषमो निम्नगाधारश्च ॥ सह पादपैर्वृक्षैः । तथा अपादान् गूढपदः पातीत्यपादपम् । शून्ये हि सर्पादिप्राचुर्यम् । अथवा अतिवैषम्यात्संचरतां पादान् न पातीत्यपादपम् ॥ इहविषेति ॥ विषमं विषं येषु पन्नगकुलेषु । द्रोणीगहनेषु तु विषमा विषाणिनो दन्तिनः शृङ्गिणो वा शम्बरादयो यत्र ॥ इहशेति ॥ शरेण

१ तत्सोच्यतामयम्. २ हृष्टहृदयः; हृतदयः. ३ रममाणपामरमिथुन. ४ उद्भासित. ५ केकिकेकारवैः. ६ सेवित. ७ ग्रावविषममप्यग्राव.

णि वनानि पापर्द्धिकपुलिन्दवृन्दं च, इह बहुसुखानि शबरद्वन्द्वानि रत्नाकरस्थलं च, इह सुमधुराणि फलानि कीचकवनं च, इहामोदितविश्वककुम्भि कुसुमानि सरित्तीरं च, इह सत्प्रभावन्ध्यानि दवदग्धारण्यानि मुनिमण्डलं च" इति विविधवनप्रदेशान्दर्शयतः पुष्कराक्षस्य विचित्रवचनोक्तीर्भावयन् क्रमेणातिक्रम्य शिखरपरम्परां[1] परैरसह्यः सह्याचलमवततार ॥ क ॥

रमणीयतया स्निग्धतया च पुनः[2] परिवर्तितमुखो विलोक्य विन्ध्यदक्षिणमेखलाशिखरश्रेणी[3]पादपान् पुष्कराक्षमभाषत ॥ ख ॥

"भद्र, दुस्त्यजाः खल्वमी विन्ध्यतटीतरवः ॥ ग ॥

तथाहि ।

आवासाः कुसुमायुधस्य शबरीसङ्केतलीलागृहाः
पुष्पामोदमिलन्मधुव्रतवधूझङ्कार[4]रुद्धाध्वगाः ।
सुस्निग्धाः[5] प्रियबान्धवा इव दृशो दूरीभवन्तश्चिरा-

मुञ्जेन असनेन बीजकवृक्षेण च करम्बाणि शबलानि । पुलिन्दवृन्दं तु शरासनं धनुः करे यस्य । तथा बाणाः सन्त्यस्येति बाणि सशरम् ॥ इह बेति ॥ बहु सुखं येषां तानि बहुसुखानि । स्थलं तु बहु विपुलम् । तथा सुष्टु खानिराकरो यत्र । बहुशब्दो वैपुल्येऽपि ॥ इह सुमेति ॥ सुष्टु मधुराणि । वनं तु सुष्टु मधु यत्र तत्सुमधु। तथा रणन्त्यवश्यं राणि। सच्छिद्रा हि वंशा वायुवशाद्रणन्तीति ॥ इहामविति ॥ आमोदिताः सुरभिता विश्वाः सर्वाः ककुभो दिशो यैः । तीरं तु आमोदिता हर्षिता वयः पक्षिणः श्वकाः शुनः प्रतिकृतयो वृकाः कुम्भिनश्च गजा यत्र । आमोदो हर्षेऽपि । यद्विश्वप्रकाशः—"आमोदो गन्धहर्षयोः" । यदा तु विश्वा शुण्ठी कुम्भीच वल्लीविशेषः । तदा बहुव्रीहौ "शेषात्—" इति कब्दुर्वारः । सादृश्यवृत्तेः शुनः । संज्ञाप्रतिकृत्योः कन् ॥ इह सेति ॥ सती शोभना प्रभा कान्तिस्तया वन्ध्यानि रहितान्यरण्यानि । मुनिमण्डलं तु सत्प्रभावम् ॥ तथाध्यानमस्यास्तीति ध्यानि ॥ क ॥

---

१ परंपराः. २ पुनः पुनः. ३ श्रोणी. ४ हु; क्रे. ५ सुस्निग्धप्रिय.

स्तकस्यैते न दहन्ति हन्त हृदयं विन्ध्याचलस्य द्रुमाः ॥६१॥

अपिच ।

भ्राम्यद्भृङ्गभरावनम्रकुसुमश्च्योतन्मधूद्गन्धिषु
च्छायावत्सु[1] तलेषु पान्थनिचया विश्रम्य गेहेष्विव ।
निर्यन्निर्झरवारिवारिततृषस्तृप्यन्ति येषां फलै-
स्ते नन्दन्तु फलन्तु यान्तु च परामभ्युन्नतिं पादपाः ॥ ६२॥

अपिच ।

यत्र न फलितास्तरवो विकसितसरसीरुहाः[2] सरस्यो वा ।
न च सज्जनाः स देशो गच्छतु निधनं श्मशानसमः ॥ ६३ ॥

तत्कथय कदा पुनरिमां विन्ध्यवनवीथीं विचित्रपत्रलकुचां दमयन्तीमिव[3] निर्विघ्नमवलोकयिष्यामः ॥ क ॥

तथाहि ।

पीनोन्नमद्घनपयोधरभारभुग्न-
मध्यप्रदेशरुचिमल्लवलीलतायाः ।
उत्कण्ठितोऽस्मि चलदेणदृशः प्रियाया-
स्तस्याश्च पर्वतभुवो वनवीथिकायाः ॥ ६४ ॥

यत्र नेति ॥ देशश्मशानयोः समतायामरतिजनकत्वं हेतुः ॥ ६३ ॥

तत्कथेति ॥ विचित्रपत्रा लकुचास्तरवो यस्याम् । दमयन्ती तु विविधपत्रवल्लीयुक्तस्तनी । पत्रं लात इति के पत्रलौ ॥ क ॥

पीनोन्नेति ॥ कठिनस्तनभरेण भुग्ने नम्रे उदरे रुचिं मल्लन्ते धारयन्तीति इत्यणि तथोक्ता वलय एव लता यस्याः । वली उदररेखा । तथा चलतामेणानामिव दृशौ यस्याः । वनवीथीपक्षे पयोधरो मेघः । रुचिमती तेजस्विनी लवली नाम्नी लता । तथा चलदेणानां दृक् दर्शनं यस्याम् ॥ ६४ ॥

---

१ छायावद्धतलेषु. २ विकासिसरसी. ३ दमयन्तिच.

अपिच।

सानूनां सानूनां विलोक्य रमणीयतां च सानूनाम्।
सालवने सालवने विहरिष्यति सह मयाऽत्र कदा॥ ६५॥

सखे सखेदा इव वयम्, तत्कथय कियद्दूरेऽद्यापि स विदर्भविषयः, यत्र ब्रह्माण्डशुक्तिसंपुटमध्यमुक्ताफलगुलिकया तयालंकृतं तत्कुण्डिनं नगरम्" इत्यभिदधाने निषधनाथे तैस्तैरालापैरनुवर्तितोक्तिः पुष्कराक्षोऽप्यभाषत॥ क॥

"देव, प्राप्ता ननु वयम्॥ ख॥

इदं हि।

वीरपुरुषं तदेतद्वरदातटनामकं महाराष्ट्रम्।
दक्षिणसरस्वती सा वहति विदर्भा नदी यत्र॥ ६६॥

इहाकरभया सिंहलद्वीपभुवा सदृशी, बहुदया त्यागिजनतया तुल्या, समृद्धनया भूनिखातकृपणजननिक्षेपकुम्भिकया समाना, प्रजा॥ ग॥

सानूनामिति॥ सानूनां तटानां संबन्धिनो ये सानवो मार्गास्तेषां रमणीयतामनूनां परिपूर्णां विलोक्य अलवनेन सह यत् सालानां सर्जतरूणां वनं तस्मिन्मया समं कदा सा विहरिष्यति। अत्र प्राच्यः सानुशब्दस्तटार्थोऽन्यश्चाध्वार्थः॥ यद्विश्वः— "सानुः शृङ्गे बुधे मार्गे पद्यायां पल्लवे वने"॥ यदि वा "णू स्तवने" आनवनमानूः प्रशंसा तया सह वर्तन्त इति सानूनि तेषां स्तुत्यानामित्यर्थः॥ ६५॥

सखे इति॥ ब्रह्माण्डमेव शुक्तिसंपुटः। सा च तन्मध्ये मुक्ताफलगुलिका साधुमुक्ताफलम् गुलिकाकारत्वात्। एतावता स्थूलवृत्तत्वम्॥ क॥

इहेति॥ न कराद्राजदेयांशाद्भयं यस्यां साऽकरभया। भुवा तु न करभा यस्यामिति करभरहितया॥ तथा बह्वी दया यस्यां सा बहुदया। त्यागिनां जनतया तु बहु ददातीति बहुदा तया बहुदया॥ जनानां समूहो जनता। "ग्रामजन—" इति

---

१ हि. २ वैदर्भ. ३ समा प्रजा.

इह समकरन्दानि कमलवनानि राजराजन्यचक्रं च, इह बहुधामानि नगराणि लोकहृदयं च, इह सारम्भाणि कृषाणकुलानि दशरूपकप्रेक्षणं च, इह बहुरूपाणि जनमनांसि प्रजापालबलं च, इह महाविप्राणि ग्रामपुरपत्तनानि मेषगोष्ठं च ॥ क ॥

इयं च गगनवीथीव पूर्वोत्तराफल्गुनीराशिवायूपयुक्ता ब्राह्मणाग्रहारभूमिः ॥ ख ॥

इतश्च ।

आरुह्यैताः शिखरिसदृशान्ग्राममध्योच्चकूटा-
न्योन्यांसप्रणिहितभुजाः संगताः कौतुकेन ॥
प्रेक्षावेशादविचलदृशो योषितः पामराणां
पश्यन्त्यस्त्वां निभृततनवो लेख्यलीलां वहन्ति ॥ ६७ ॥

समूहे तल् ॥ समृद्धो नयो यस्यां सा समृद्धनया । कुम्भिकया तु समृत् मृत्तिकोपेतं धनं यस्यां तया समृद्धनया ॥ ग ॥

इहेति ॥ सह मकरन्देन वनानि । राजन्यचक्रं तु समः करो राजांशो यस्य । तथा दानमस्यास्तीति दानि ॥ इह बेति ॥ बहूनि धामानि गृहाणि येषु । हृदयं च बहुधा अनेकधा मानोऽस्यास्तीति मानि ॥ इह सेति ॥ सह आरम्भैरुपक्रमैः कुलानि । प्रेक्षणकं तु सारमुत्कृष्टम् । तथा भाणो रूपकविशेषः सोऽस्यास्तीति भाणि ॥ यदाह धनिकः– "भाणस्तु धूर्तचरितं कृतं स्वेन परेण वा । यत्रोपवर्णयेदेको निपुणः पण्डितो विटः" ॥ इह बेति ॥ बह्वी कृपा येषु तानि । बलं च बहु । तथा कृपाणः खड्गोऽस्यास्तीति ॥ इह मेति ॥ महान्तो विप्रा येषु । गोष्ठं तु महान्तोऽवयो मेण्ढास्त एव प्राणिनो बलवन्तो यत्र ॥ क ॥

इयं चेति ॥ पूर्वस्यामुत्तरस्यां चाफल्गु सारमुत्कृष्टं यस्याम् । तथा शिवा कल्याणी । तथा यूपैर्यज्ञकीलैर्युक्ता । गगनवीथी तु पूर्वा उत्तराः फल्गुन्यो राशयो मेषाद्या वायुः पवनस्तैरुपयुक्तोपयोगीकृता ॥ ख ॥

आरुह्येति ॥ शिखरी गिरिः । कूटा अवकरोत्कराः । प्रेक्षायामवलोकने आवेश आग्रहः । पामराः प्राकृतजनाः ॥ ६७ ॥

---

१ राजन्यचक्रं च. २ रूपा.

किं चान्यत् ।

नृप चलसि यथा यथा त्वमस्मि-
न्नपि वदनानि तथा तथा चलन्ति[1] ।
तरलितनयनानि पामरीणां
पवनविनर्तित[2]पङ्कजोपमानि ॥ ६८ ॥

अपिच ।

उत्कम्पाद्गलितांशुकेषु रभसादत्यन्तमुच्छ्वासिषु
प्रोत्तुङ्गस्तनमण्डलेषु विलुठद्गुञ्जावलीदामसु ।
आसां स्वेदिषु दृश्यते मृगदृशां संक्रान्तबिम्बो भवा-
नाश्लिष्यन्निव गोपिकाः कृतबहुप्राकाम्यरूपो हरिः ॥ ६९ ॥

अहो नु खल्वाश्चर्यमिदमेतासां[3] तथाविधनेपथ्यनिरपेक्षाप्यु-
न्मादयति यूनां[4] मनो युवतीनां[5] यौवनश्रीः ॥ क ॥

तथा हि ।

माल्यं मूर्धनि कर्णिकारकलिकाः[6] पिष्टातकं चन्दनं
मुक्तादाम गले[7] च काचमणयो लाक्षामयाः कंकणाः ॥
रागोऽङ्गेषु हरिद्रया नयनयोरत्युल्बणं कज्जलं
वेषोऽयं विरसस्तथापि हृदयं ग्राम्या हरन्ति स्त्रियः ॥ ७० ॥

उत्कम्पेति ॥ भ्रष्टांशुकत्वं स्वेदित्वं च स्तनमण्डलस्य निरावरणत्वेन नृपप्रति-बिम्बस्य संक्रान्तौ हेतुः । प्राकाम्यं महासिद्धिविशेषः । प्राकाम्येण रूपाणि प्राकाम्य-रूपाणि । कृतानि बहूनि प्राकाम्यरूपाणि येन ॥ ६९ ॥

अहो न्विति ॥ तथाविधमुदारं हारकुण्डलादिरूपं नेपथ्यम् ॥ क ॥

माल्यमिति ॥ हरिद्रा तण्डुलचूर्णम् । पिष्टातकं विलेपनम् ॥ ७० ॥

---

१ वलन्ति. २ विनर्तन. ३ एतेषां. ४ कुत्रचिन्नास्ति. ५ कुत्रचिन्नास्ति. ६ कलितं; कलिलं. ७ पदे.

इतश्च ।

कन्दलितकन्दविशेषाः कर्कशकर्कटिका विशालकालिङ्गाः कूष्माण्डमण्डितमण्डपाः सुवृत्तवृन्ताकाः सुहस्तितहस्तिकर्णपुनर्नवाः स्थूलमूलकाः पिण्डितपण्डालवो वास्तूकवास्तुभूतभूतलाः संजीवितजीवन्तिकाः सर्षपराजिकाराजिराजिताः सरित्सारिणीसारिवारिसेचनसुकुमारपल्लवितविविधशाकाः शाकवाटिकाः॥ क ॥

इतश्च ।

विकसन्मुचुकुन्दानन्दिनो मकरन्दस्यन्दिसुन्दरसिन्दुवाराः पामरीसंकेतनिकेतकेतकीवनाः कम्राम्रातकाः कुड्मलितकङ्कोलफलाः कोरकितकुरण्टकाः पल्लवितवल्लीकाः फुल्लन्मल्लिकोल्लासिनः सुजातजातयो विचित्रशतपत्रिकास्ताण्डवितपाण्डुपिण्डितागुरुकरवीरवीरुधो दृश्यमानसर्वर्तुपुष्पाः पुष्पायुधावासा आरामाः ॥ख

इतश्च ।

नातिदूरे दक्षिणदिशि दृशं निवेशयतु देवः ॥ ग ॥

एतास्ताः परिपक्वशालिकलमाः सुस्वादुदीर्घेक्षवो
वप्रप्रान्तहरित्तृणस्थलचलत्पीनाङ्गगोमण्डलाः ।
दृश्यन्ते पुरतः सरोरुहवनभ्राजिष्णुनीराशयाः
प्रान्तोन्नादिविचित्रपत्रिनिचयाः सस्यस्थलीभूमयः ॥७१॥

कन्दलितेति ॥ शाकवाटिकाः । सुहस्तितेति । हस्तः कन्दलोद्भेदः संजातोस्येऽति ॥ तारकादित्वादितच् ॥ हस्तिकर्णः पुनर्नवा च वल्लीभेदौ । वास्तूकेन शाकविशेषेण वस्तुभूतं गणनार्हं भूतलं यासु । राजिकानां राजसर्षपाणां राज्या राजिता ॥ क ॥

एता इति ॥ विचित्रपत्रिणो विविधपक्षिणः ॥ ७१ ॥

---

१ वस्तु. २ शरपत्रिकाः. ३ पिण्डीतगरकर. ४ पुष्पागमाः; पुष्पारामाः. ५ नीराश्रयाः.

अपि[1]च ।

स्वःसौन्दर्यविडम्बि कुण्डिनमिदं सैषा विदर्भा नदी
सा चेयं वरदा स चायमनयोः पुण्याम्भसोः संगमः ।
अस्यैवोन्मदहंससहारिणि तटे सेनास्थितिः कल्प्यतां[2]
यस्मिन्मत्तकरीन्द्रकुम्भकषणक्रीडासहाः पादपाः ॥ ७२ ॥

एवमनेकधा दर्शनीयप्रदेशप्रकाशनव्याजेन विनोदलीलां पल्लवयति पुष्कराक्षे, प्राप्ताः कुण्डिनपुरम्' इत्युच्छ्व[3]सितहृदयो निषधेश्वरः परमपरितोषात्पारितोषिकप्रदानपूर्वमिदमवादीत् ॥ क ॥

"भद्र, भवतः सौकुमार्यमाधुर्यमधुविश्रम्भसंदर्भितभङ्गश्लेषगर्भाभिर्गी[4]र्भिराक्षिप्तमनसामस्माकमविदितखेद[5] इव, अदृष्टसमविषमविभाग इव, अनुत्पादितस्वेदलव इव, अर्धगव्यूतिमात्र[6]शेषोऽतिक्रान्तः क्रीडाविहारभूमिसमो महानपि मार्गः । समुचितश्चायं सेनानिवेशस्य सरित्संगमोपकण्ठवनविभागः ॥ ख ॥

तथा हि ।

इह भवतु निवासः सैनिकानामिहापि
श्रमतरलतुरंगग्रासयोग्या तृणाली ।
इह हि कवलयन्तः पल्लवान्वारणेन्द्रा
विदधतु तरुखण्डे गण्डकण्डूयनानि ॥ ७३ ॥

इतश्चात्यन्तमनोहरतयास्माकमासनयोग्या सरित्संगमोत्सङ्गभूमयः ॥ ग ॥

तथा हि ।

अपसृताम्बुतरङ्गितसैकता निचुलमण्डपनृत्तशिखण्डिकाः ।
कुररसारसहंसनिषेविताः पुलकयन्ति न कं पुलिनश्रियः ॥ ७४"

---

१ इतोऽपि; कुत्रतु नास्त्येव. २ कथ्यतां. ३ आश्वसितहृदयो. ४ रुक्तिभि. ५ खेदेति नास्ति. ६ मात्रावशेषः.

इत्यभिधाय "भद्र, यथाक्रममकृतान्योन्यसंबाधकलहम्, अनुपद्रुततीर्थायतनम्, अलुण्ठितासन्नोद्यानम्, अच्छिन्नचैत्यद्रुमम्, अविच्छिन्नकमलवनं निवेशय सेनाम्" इति सेनापतिमादिदेश ॥क॥

सोऽपि यथादिष्टमनुतिष्ठन्निदमवादीत् ॥ ख ॥

"भजत बलसमूहाः खर्वदूर्वास्थलानि
स्थविरशुकविशीर्यत्पक्षपिच्छच्छवीनि ।
उपनदि मृदुवीचीवायुनाऽन्दोलितानां
कुसुमितलतिकानामन्तरालेष्वमूनि ॥ ७५ ॥

अपिच ।

स्मरविहरणवेदीं षट्पदापानशालां
तटमनु वनमालां सस्मया मास्म भाङ्क्षुः॥
कमलवनविहारानन्तरं यत्र तैस्तै-
र्मदनमदविनोदैरासते राजहंसाः ॥ ७६ ॥

अपिच ।

सुरसदननिवासं सैनिका मास्म कुर्व-
न्सरिति मुनिकुटीनां भङ्गमुल्लुण्ठनं वा ।
इह निषधनृपाज्ञा तस्य यः क्वापि कोऽपि
क्रममुषि तरुखण्डे खण्डनं वा करोति" ॥ ७७ ॥

अच्छिन्नचैत्यद्रुमेति ॥ चैत्या ग्रामप्रदेशप्रसिद्धवृक्षाः ॥क॥

भजतेति ॥ यद्यपि पक्षपिच्छयोरभिधानकृता न भेदः प्रत्यपादि । तथापि महदेवान्तरम् । यतः पक्षशब्देन पक्षती एव । पिच्छशब्देन तदंशोऽभिधीयते ॥ ७५ ॥

स्मरेति ॥ तटमन्विति । तटं लक्ष्यीकृत्य । सस्मयाः सगर्वाः सन्तो भवन्तो वनमालां मा स्म भाङ्क्षुः । अन्यत्सकलं भङ्गनिषेधकारणम् । आसते इति बहुवचनान्तम् ॥ ७६ ॥

---

१ मलुठित. २ मखण्डितक. ३ विशीर्य; विकीर्य. ४ इति.

एवमनुशासति बलानि बहूनि बहुधा बाहुके, तत्क्षणादुत्तम्भितैः प्रेङ्खत्पताकापटपल्लवविराजितैः प्रयाणयोग्ययन्त्रचित्रशालागृहैः संचारिणि गन्धर्वनगर इव रमणीये, हरिततोरणैरुड्डीनशुकावलीमय इव, गैरिकारक्तोन्नमितपटकुटीभिरुत्फुल्लकिंशुकमय इव, श्वेतांशुकमण्डपैश्च[1] ताण्डवितबृहत्पुण्डरीकखण्डमय इव, जाते सौरत्संगमोत्सङ्गसङ्गिनि शिबिरसंनिवेशे, क्रमेणाक्रान्तसकलदिङ्मुखेषु निषधेश्वरागमनवार्तानिवेदनदूतेष्विव[2] विदर्भराजधानीधामनिर्गतेषु बहलसैन्यधूलिपटलेषु, रसति[3] विपक्षक्षितिपालकर्णपुटीकटुनि नवजलधरध्वनितगम्भीरे तत्कालप्रहतशङ्खसंखप्रयाणझल्लरीझांकृते, स्वयंवरायातसमस्तराजन्यचक्रकर्णकर्तरीषु पठ्यमानासु सानन्दवन्दारुबन्दिवृन्दारकवृन्देनोच्चैर्नलनाममालासु क्षणादेवोत्तम्भितशातकुम्भस्तम्भभवने[4][5] मृदुमसृणास्तरणभाजि जात्यवैदूर्यपर्यन्तपर्यङ्किकायां सुखनिषण्णे राजनि, सुस्थिते च परिजने, नातिदूरवर्तिनि कुण्डिने दण्डपासिकस्योच्चैर्वागुदतिष्ठत्[6]॥क॥

"सिच्यन्तां राजमार्गाः कलशमुखगलच्चन्दनाम्बुच्छटाभिः
स्तम्भाः प्रेङ्खत्पताकाः कुसुमपरिकरास्तोरणाङ्काः क्रियन्ताम् ॥
स्थाप्यन्तां पूर्णकुम्भाः प्रतिनगरगृहं प्राङ्गणे धान्यमिश्रैः
सिद्धार्थैः स्वस्तिकालीर्लिखत नरपतिर्नैषधः[7] प्राप्त एषः ॥ ७८ ॥

अपिच।

सत्का[8]श्च्यश्चन्दनार्द्रस्तनकलशयुगामुक्तमुक्तावलीकाः
पात्राण्यादाय दूर्वादलदधिकुसुमोन्मिश्रसिद्धार्थभाञ्जि ।

एवमिति ॥ वन्दारावित्यत्र वदिः स्तुत्यर्थः ॥

---

१ खण्डमण्डप इव. २ वेदनदूतेष्विव; विनोददूषितेष्विव. ३ विरस. ४ शात. ५ स्तम्भेति नास्ति. ६ दण्डवासि. ७ नैषधेऽप्येष एषः. ८ सत्कान्त्यः.

सोत्तंसा हंसपिच्छच्छविवसनभृतो वर्तिताश्चर्यचर्या
नार्यो निर्यान्तु तूर्यध्वनिलयललितं गीतमुच्चारयन्त्यः ॥ ७९ ॥
अपिच ।
अपि भवत कृतार्थाः पौरनार्यश्चिरेण
व्रजतु निषधनाथश्चक्षुषां गोचरं[1] वः ।
ध्रुवमयमवतीर्णः स्वर्गलोकादनङ्गो
हरचरणसरोजद्वन्द्वलब्धप्रसादः ॥ ८० ॥

॥ इति श्रीत्रिविक्रमभट्टविरचितायां दमयन्तीकथायां[2] हरचरणसरोजाङ्कायां षष्ठ उच्छ्वासः ॥ ६ ॥

सत्कान्त्येति ॥ आमुक्तं योजितम् ॥ ७९ ॥

इति विषमपदप्रकाशमेतं दमयन्त्यास्तनुते स्म चण्डपालः ।
शिशुमतिलतिकाविकासचैत्रं चतुरमतिस्फुटभित्तिचारुचित्रम् ॥

इति श्रीचण्डपालविरचिते दमयन्तीविवरणे षष्ठ उच्छ्वासः समाप्तः ॥

सप्तम उच्छ्वासः ।

एवमविश्रान्तमतितारस्वरेण पुरः पौरपुरंध्रिमण्डलान्युद्दण्डयतो दण्डपासिकस्य[3] कलकलमाकर्णयत्यास्थानस्थिते राजनि, प्रविश्य प्रणामप्रेङ्खोलितगलकन्दलावलम्बितजाम्बूनदस्थूलशृङ्खलास्फालितवक्षःस्थलः स्थविरवयाः सुवेषः[4] प्रतीहारः सविनयमुक्तवान् ॥ क ॥

एवमिति ॥ उद्दण्डयन्तो गाढमुत्साहयन्तः । दण्डपाशिकस्तलारः । दण्ड-

---

१ गोचरे च. २ सकलविबुधमनोहारिण्यां. ३ दण्डवासि. ४ क्वचिन्नास्ति.

"देव, धृतमाङ्गल्यकल्पवेषाः[1] पुष्पफलाक्षतपूर्णस्वर्णपात्रपाणयः[2] पुरः[3] स्थिता अधीयाना ब्राह्मणाः कुण्डिनपुरपौराः पुरंध्रयश्च देवदर्शनार्थितया द्वारि सेवावसरमनुपालयन्ति ॥ क ॥

कथयन्ति चैवमदूरे विदर्भेश्वरोऽपि देवं द्रष्टुमायाति ॥ ख ॥

लग्न इंव[4] श्रूयते च शङ्खस्वनविदर्भितो विदर्भोपकण्ठे पठद्बन्दिवृन्दकोलाहलः ॥ ग ॥

तदादिशतु देवो यथाकर्तव्यम्" इत्यभिधाय स्थिते तस्मिन् "भद्रभूते, त्वरितं प्रवेशय विदर्भाधिपस्य परिजनं स्वयमपि तदर्धपथमनुसर" इति नलो दौवारिकमादिदेश ॥ घ ॥

सोऽपि "यथाज्ञापयति देवः" इत्यभिधाय यथादिष्टमकरोत् ॥ ङ ॥

अनन्तरमनतिचिरादितस्ततो दोधूयमानचारुचामरकलापपवनैर्नर्तितकर्णकुवलयः,[5] वल्गुवल्गनोच्छलनलङ्घनलास्यलीलापदैः पथि प्लवमानमिव तरलतुरंगमधिरूढः,[6] कनककलशशिखरैरेकदेशस्फुरितविद्युत्स्तबकैरकाण्डाडम्बरितमेघमण्डलैरिव[7][8] मायूरातपत्रखण्डैराच्छादितगगनान्तरालः, शस्त्रोद्वहनकिणाङ्कितकठोरकण्ठोपकण्ठैः कठिनप्रकोष्ठलुठल्लोहवलयैरूर्ध्वबद्धोद्भटजूटकैरलंक-[9][10]

पाशोऽस्त्यस्येति । "अत इनिठनौ" इति ठन् । जाम्बूनदस्य कनकस्य स्थूला शृङ्खला आभरणविशेषः ॥ क ॥

देवेति ॥ धृतो माङ्गल्ये कल्पो दक्षो वेषो मण्डनं यैः ॥ क ॥

तदिति ॥ भद्रभूतिरिति द्वाःस्थस्य नाम । तस्य चामन्त्रणम् ॥ ख ॥

अनन्तरमिति ॥ वल्गु यद्वल्गनं विक्रममाणता । उच्छलनमुच्चैर्विलसनम् । लङ्घनं फाला । लास्यं नृत्यभूमिः । तेषु लीलापदैः प्लवमानं तरन्तमिव । आसनस्थैर्येणानुद्घातसुखत्वात् । मायूरातपत्रसमूहानां मेघमण्डलानि, सौवर्णकलशानां च विद्युत्ततय उपमानम् ॥ **कठिनेति** ॥ राजपुत्रा हि प्रकोष्ठे मणिकूर्परान्तरे दार्ढ्याय लोहवलयानि

१ धृतमङ्गल्यवेषाः २ स्वर्णेति क्वचिन्नास्ति. ३ पुरःस्थिताधीयानब्राह्मणाः. ४ इति. ५ पवनानर्ति. ६ तरलेति क्वचिन्न. तरुण. ७ शिखरैकदेश. ८ स्तोम. ९ लोहवहलै. १० रातङ्क.

करालमौलिभिरर्धोरुकपरिधानैर्नि[1]शातकुन्तपाणिभिरभितस्त्वरितपातिभिः पत्तिभिरनुगम्यमानः, मनाङ्मृदुमृदङ्गध्वनिकरम्बिते कोमलकांस्यतालशालिनि वांशिकवाद्यमानवंशनिस्वने दत्तकर्णः, कर्णिकारगौराङ्गोऽङ्गणस्य नातिदूरेऽप्यदृश्यत भीमभूमिपालः ॥क॥

ततश्च चामरग्राहिणीहस्तपल्लवमवलम्बमानः सहेलमुत्थाय प्रथममुत्थितेन संभ्रमवशवल्गितवक्षःस्थला[2]वलम्बितकुसुमदाम्ना वि[3]सर्पिकर्पूरकुङ्कुममिलन्मृगमदामोदेन त्वरितसंपातपतत्पटवासपांसुना सामन्तचक्रेण परिकरितः कतिपयपदानि निषधेश्वरस्तदभिमुखमगात् ॥ ख ॥

सोऽपि सत्वरोपसृतस्य ताम्बूल[4]प्रसेविकावाहिनः पुरुषस्य स्कन्धमवष्टभ्य दूरादेव तुरंग[5]पृष्ठादवातरत् ॥ ग ॥

एवमन्योन्यनयनसंपातस्मिताननौ समकालमीषन्नमितमौलिमण्डलौ समसमयप्रसारितभुजौ सरभसमाश्लेषवशविशीर्यमाणहारावलीगलन्मुक्ताफ[6]लच्छलेनाङ्गेष्वमान्तमिव प्रथमप्रेमामृतनिष्यन्दिबिन्दुबि[7]सरमुद्गिरन्तावन्योन्यमाशिश्लिषतुः ॥ घ ॥

तथाविधे च व्यतिकरे, प[8]प्रथे प्रेक्षकाणां दक्षिणोत्तरदिक्पालयोर्धर्मराजधनदयोरिव समागमे महान्नयनोत्सवो हर्षोत्कर्षकलकलश्च ॥ ङ ॥

धारयन्ति । जूटकः केशबन्धविशेषः । अलकाः कुटिलाः करालाः सटालत्वाद्रौद्रा मौलयः संयतकेशा येषाम् । अर्धे ऊरू प्रमाणमस्य तदर्धोरुकम् । येन वाससा कटीप्रभृति अर्धोरुपर्यन्तमाच्छाद्यते ॥ क ॥

ततश्चेति ॥ पटवासो वासःसुरभीकरणद्रव्यम् । परिकरितः परिवारितः ॥ ख ॥

सोऽपीति ॥ चर्मनिर्मितं पर्णपूगाद्यास्पदं प्रसेविका स्थगितेति ख्यातिः ॥ ग ॥

---

१ निखात. २ कुत्रचित्तकाररहितम्. ३ कुत्रचित्तकारसहितम्. ४ स्थगिका. ५ कुत्रचिन्मकारसहितम्. ६ बली; कली. ७ प्रसर; क्वचिन्नास्त्येव. ८ प्रथमप्रेक्ष.

तदनु पुनः प्रधावितप्रतीहारोपनीतम्, अतिविचित्रत्रिभङ्गिभङ्गोत्कीर्णकर्णाटिकारूपरमणीयस्तम्भिकावष्टम्भम्, उज्जृम्भमाणमाणिक्यमकरमुखमुक्तमौक्तिकसरविराजितम्, अपूर्वकर्मनिर्मितभव्यव्यालावलीकीर्णमुखालंकृतम्, उच्चकाञ्चनसिंहासनद्वितयमुभौ भेजतुः ॥ क ॥

अन्योन्यकुशलप्रश्नसुखालापव्यतिकरविरामे च विदर्भेश्वरो निषधनाथमवादीत् ॥ ख ॥

"अद्यास्मत्कुलसंततिः सुकृतिनी धन्याद्य दिग्दक्षिणा
पुण्यप्राप्यसमागमातिथिजना जाताः कृतार्थाः श्रियः ।
श्लाघ्यं जन्म च जीवितं च निजमप्यद्यैव मन्यामहे
यत्रास्मत्सुकृतोदयेन बहुना यूयं गृहानागताः ॥ १ ॥

इतः प्रभृति च ।

आ ब्रह्मावधिविस्तरत्कविगिरो गीर्वाणकर्णातिथेः
कीर्तेः पूर्णकलेन्दुसुन्दररुचो यास्याम्यहं पात्रताम् ।
किं चान्यज्जनितक्रमोऽप्ययमभूदाकण्ठतृप्तस्य मे
युष्मत्सङ्गसुखामृतेन सफलः संसारचक्रभ्रमः" ॥ २ ॥

इत्यभिधाय प्रवणं प्रणयस्य, प्रगुणं गुणानाम्, अनुकूलं कुलक्रमस्य, योग्यं भाग्योदयस्य, सदृशं देशकालस्य, समानं मानोत्स-

तदन्विति ॥ सिंहासनादौ ह्युत्तम्भनस्तम्भिकासु पश्चिमभागे त्रिभङ्गिभङ्गेन स्थानकविशेषवैचित्र्येण स्त्रीरूपमुत्कीर्यते । मौक्तिकसरो मुक्ताहारः । व्यालः सिंहादिर्हिंस्रसत्त्वम् । तदावली काष्ठदन्तादिनिर्मिता शोभार्थं क्रियते ॥ क ॥

अद्येति ॥ पुण्यैः प्राप्यः समागमो येषां तथोक्ता अतिथिजना यासु । श्रियां ह्येतदेव फलम् । यदतिथयः सत्क्रियन्ते ॥ १ ॥

आब्रह्मेति ॥ कविवर्ण्यायाः स्वर्गतायाः इन्दुशुभ्रायाः कीर्तेः पात्रमहम् ॥ २ ॥

इत्यभिधायेति ॥ (अतिथेः) तस्य राज्ञोऽगर्वः सन्नातिथेयं कुर्वन्भीमभूपो वारणा-

१ भक्ति. २ द्वय. ३ मुखा. ४ मानोक्तेः.

वसंततेः, सरूपं रूप[1]संपदाम्, उचितमा[2]चारस्यातिथेराथिथेयमगर्वः कुर्वन्, दुर्वारवैरिवारणान्वारणान्, वायुवे[3]गातुरगांस्तुरगान्, समुल्लसितांशुमञ्जरीजालजनितेन्द्रचापचक्र[4]भ्रमप्रमाणं मा[5]णिक्यम्, एकत्रग्रथिततारा प्रकरानुकारान्हारान्, [6]उज्ज्वलभांसि वासांसि, सलावण्याः पण्यनारीश्च स्वँयमुपढौकयांचकार ॥ क ॥

प्रथमसमागमेऽप्यप्रमेयप्रेमारम्भरभसोल्लासितहृदयः पुनः सोत्कर्षहर्षोद्रेदगद्गदाक्षरमिदमवादीत् ॥ ख ॥

"आसेतोः कपिकीर्तनाङ्कशिखरादाराच्च विन्ध्यावधे-
रा पूर्वापरसिन्धुसीमावषयस्त्वन्मुद्रया मु[8]द्र्यताम् ।
अद्यास्मद्गृहमागतस्य भवतो जाता विधेया वयं
स्वीकारः क्रियतां किमन्यदपरं प्राणेषु चार्थेषु च ॥ ३ ॥"

एवमुपबृंहयति प्रेम, प्रकाशयति प्रियंवदताम्, उद्योतयत्युदारताम्, दर्शयत्यादरम्, आविर्भावयति सर्वभाव, भीमभूभुजि नलोऽपि "सरलस्वभावः स्वच्छार्द्रहृदयोऽयं महानुभावः" इति चिन्तयन् "अलमलमखिलात्मसर्वस्वोपनयनेन, भवद्दर्शनमेवास्माकमिह सार्णवसुवर्णपूर्णवसुमतीलाभादपि परमो लाभः । नहि प्रि[9]यतमदर्शनसुखाद्वित्तलाभसुखमतिरिच्यते । न चं[10] भवद्विभवे[11]ऽप्यस्माकं परस्वबुद्धिर्नापि भवच्छरीरे[12]ऽप्यनात्मभावः । किंचान्यदेवंविधसूक्तसूनृतामृतगर्भगीर्भिरानन्दयतास्मन्मनो महानुभावेन किं न कृतमभिहितं वा प्रणयोचितम्," इति ब्रुवाणस्तं बहु मानयामास ॥ग॥

दिकमुपढौकयांचकार । वारणा निषेधका गजाश्च ॥ क ॥

आसेतोरिति ॥ कपिकीर्तनाङ्कानि शिखराणि यस्येति सेतुविशेषणम् । सेतोः कपिभिः कृतत्वात् ॥ ३ ॥

---

१ रूपेति क्वचिन्नास्ति. २ माचारस्य तस्याति. ३ वायुवेगांस्तुरगान्; अमूल्यं समु. ४ क्रमप्रमाणम्. ५ माणिक्यजातं. ६ उज्ज्व लभासिरसाः सलावण्याः. ७ श्वायमुप. ८ मुद्रितम्. ९ प्रियदर्शन. १० हि. ११ विभवेष्वस्माकं. १२ रेनात्मभावः

एवंविधे च व्यतिकरे वैतालिकः प्रस्तुतमपाठीत् ॥ क ॥

आ पूर्वापरदक्षिणोत्तरककुप्पर्यन्तवेलावना-
दाज्ञां मौलिषु मालिकामिव नृपाः कुर्वन्तु दीर्घायुषोः।
ब्रह्मस्तम्बविलम्बिकीर्तिलतयोर्विस्तारिलक्ष्मीकयो-
रन्योन्यस्य दिनानि यान्तु युवयोः स्नेहेन सौख्येन च ॥४॥

एवमुपक्रमाविरुद्धविद्दग्धालापलीलया परस्परमाश्यानतुहिनशिलाशकलाकारकर्पूरपारीपरिकरितताम्बूलार्पणप्रणयेन च परितुष्टपरिजनपरिहासगोष्ठ्या च किमप्यभिनवम्, किमपि पुरातनम्, किमप्युत्पाद्यम्, किमपि यथावस्थितं जल्पाकजनजल्पितं भावयन्तौ तस्थतुः स्थवीयसीं वेलाम् ॥ ख ॥

अनन्तरमनुसरति मध्यभागमम्बरस्यांशुमालिनि नलः "स्वगृहानलंकुर्वन्तु भवन्तः" इति प्रश्रयेण विदर्भेश्वरं विससर्ज ॥ ग ॥

गते च तस्मिन् "अहो वात्सल्यम्, अहो परमौदार्यम्, अहो लोकवृत्तकौशलम्, अहो वाग्विभववैदग्ध्यम्, अहो प्रश्रयोऽस्य विदर्भराजस्य" इति तद्गुणप्रवणाः कथाः कुर्वन्नाप्तजनपरिजनेन सह मुहूर्तमिवासांचक्रे ॥ घ ॥

चिन्तितवांश्च।

अनुगुणघटनेन यद्यपीयं भवति हि हस्तगतेव कार्यसिद्धिः।
भयतरलभुजंगवक्रवृत्तेस्तदपि न विश्वसिमो वयं विधातुः ॥५॥

आपूर्वेति ॥ ब्रह्मस्तम्बो ब्रह्माण्डम् ॥ ४ ॥

एवमिति ॥ आश्यानमविलीनं यत्तुहिनं हिमं तस्य शिलाशकलं तदाकारस्य कर्पूरस्य पारी शकलं तया परिकरितस्य संबद्धस्य ताम्बूलस्यार्पणप्रणयेन। अतिशयेन स्थूला स्थवीयसी। "स्थूलदूर–" इत्यादिना सिद्धम् ॥ ख ॥

अन्विति ॥ अनुगुणानामनुकूलानां घटनेन संयोजनेन हि स्फुटं सिद्धिर्हस्तगतैव

१ विदग्धा. २ गोष्ठ्यां च. ३ उत्पाद्यम्. ४ भावयन्तावबतस्थतुः.

तथाहि ।

अङ्गाः क[1]ङ्ककलिङ्गवङ्गमगधाः सर्वेऽप्यमी पार्थिवा
दिक्पालाश्च मरुत्पतिप्रभृतयः कन्यार्थिनः संगताः ।
नो विघ्नः कथमेष्यतीह घटनां कार्यं यतस्तत्क्षणा-
न्नानाभङ्गिभिरिन्द्रजालसदृशं दैवं हि चित्रीयते ॥ ६ ॥

अथवा ।

का नाम तत्र चिन्ता प्रभवति पुरुषस्य पौरुषं यत्र ।
वाङ्मनसयोरविषये विधौ च चि[2]न्तान्तरं किमिह ॥ ७ ॥

एवमने[3]कवितर्कभ[4]ङ्गभाजि भूभुजि, भुजबलशालिषु विसर्जितेषु सेवकसामन्तेषु, विरलीकृते परितः परिजने, परिहासपेशलालापाप्तजनगोष्ठीप्रक्रमेणातिक्रान्ते स्तोकसमये, भूरिभव्याभरणावरणरमणीयरूपाः, काश्चिदार्द्रक्रमुकफ[5]लहस्ताः, काश्चित्कक्षावलम्बिततताम्बूलीपत्रपिण्डकरण्डकाः, काश्चित्पिहितपट्टांशुकपटलिकापाणयः, काश्चित्काश्मीरकरम्बितकस्तूरिकामोदामन्दचन्दनभाञ्जि भाजनानि भजमानाः,काश्चि[6]दवाननालिकेरजम्बीरबीजपूरकपूरितपात्रीपाणयः काश्चिदसंख्यखण्डखाद्यविशेषानमूल्यमा[7]ङ्गल्यमाल्याभरणानि च सकौतुकमादाय दमयन्त्या प्रहिताः [8]प्रथमप्रबोधितप्रतीहारसूचिताः प्रविविशुरन्युब्जाः कुब्जिका वामनिकाश्च ॥ क ॥

भवति । भङ्गेन तरलो लोलः । तरलत्वं चात्र वक्रतातिशयहेतुः ॥ ५ ॥

का नामेति ॥ यत्र कार्ये पुरुषस्य पौरुषं भवति तत्र का चिन्ता, नैवेत्यर्थः । विधौ दैवे पुनर्वाङ्मनसयोरगोचरे किं चिन्तान्तरम्, तदेव प्रमाणमित्यर्थः । अन्तरशब्दो विशेषार्थः । उभयथापि चिन्ता न कार्येति भावः ॥ वाक् च मनश्च वाङ्मनसे । "अचतुर–" इति सूत्रेण सिद्धम् ॥ ७ ॥

एवमिति ॥ अवानानि सार्द्राणि नालिकेरजम्बीरबीजपूराणि तैः पूरिता या पात्री

१ कुम्भ. २ चिन्तान्तरं किमप्याह. ३ मनेकविध. ४ भङ्गेति क्वचिन्न. ५ फलकहस्ताः; फलहस्तकहस्ताः. ६ न्नारङ्गनारि. ७ मङ्गल्य. ८ प्रथमप्रधावितमती.

प्रविश्य च सविस्मयाः स्मररूपातिशायिनं नरपतिमवलोक्य "साधु भोः स्वामिनि, साधु । स्थानेऽभिनिविष्टासि, योग्ये जाताग्रहासि, पात्रे जातं[1]स्पृहासि, लप्स्यसे जन्मफलम्, अवाप्स्यसि स्त्री[2]स्वभावभाग्यम्, अनुभविष्यसि यौवनसुखानि, मानयिष्यसि संसार[3]फलमहोत्सवम् । अहो वन्दनीया सा कापि पुरुषरत्नाकरकुक्षिर्जननी, य[4]स्यां सकलसंसारनरहारावलीमध्यमहानायकोऽयमुत्पन्नः" इत्यवधारयन्त्यो मनाङ्नमितमौलिदोलितसीमन्तमुक्ताफलाः "स्वामिन्नयमस्मदीयः प्रणामः, अन्यापि क्वापि काचित्प्रणमति" इत्यभिधाय स्मयमानवदनकमलाः सलीलमवनिपालं प्रणेमुः ॥ क ॥

अन्योन्यकृतसंबोधनाश्च सहर्षमिदमवोचन् ॥ ख ॥

"हंहो हंसि चकोरि चन्द्रवदने चन्द्रप्रभे चन्दने
चम्पे चङ्गि लवङ्गि गौरि कलिके कक्कोलिके मालति ।
ए[5]त प्राप्नुत जन्मजीवितफलं लावण्यलक्ष्मीनिधौ
सौभाग्यामृतनिर्जरे नरपतौ निर्वान्तु नेत्राणि वः ॥८॥

अपिच ।

कुन्दे सुन्दरि चन्द्रि नन्दनि हले दिष्ट्याद्य वर्धामहे
देव्याः सोऽयमनङ्गसुन्दरवपुः प्राणेश्वरः प्राप्तवान् ।
तस्याः संप्रति यत्कृते कृशतनोः क्रीडावने शाखिनां
दीर्घश्वासमरुद्भिरग्निपरुषैर्म्लायन्ति ते पल्लवाः ॥ ९ ॥

सा पाणौ यासाम् । वानं शुष्कं फलम् ॥ न्युब्जा अधोमुख्यः पश्चान्नञ्योगः । दिदृक्षारसेनोर्ध्ववदना इति भावः । एतच्च कुब्जिकादीनां विशेषणम् ॥ क ॥

हंहो इति ॥ हंहो इति संबोधने । एत आगच्छत ॥ ८ ॥

कुन्द इति ॥ चन्देरगन्तादाह्लादार्थाद्गौरादित्वान्ङीष् । वर्धामह इति हर्षातिशयोक्तिः ॥ ९ ॥

---

१ बद्धस्पृहा. २ स्त्रीसौभाग्यभावभाग्यं; स्त्रीभावभाग्यम्. ३ संसारम्. ४ यस्याः ५ एतत्माक्तन; एतत्मामुत.

अपिच ।

यं श्रुत्वैव मनोभवालसदृशा देव्या धृतोन्मादया
नीयन्ते गृहदीर्घिकातटतरुच्छायाश्रये वासराः ।
प्राप्तः शोणसरोजपत्रनयनो निःशेषसीमन्तिनी-
भ्राम्यन्नेत्रपतत्रिविश्रमतरुः सोऽयं नलो नैषधः" ॥ १० ॥

एवमन्योन्यमभिधाय समीपमुपसृतास्ताः क्षितिपति[1]स्त्वनुरागतरङ्गतरत्तारकेण सादरं दूरोत्क्षिप्तपक्ष्मणा चक्षुषा संतोषपुञ्जमञ्जूषिका इव, आनन्दकन्दलीरिव, अमृतपङ्कपुत्रिका इव, मधुमासविकसितसहकारमञ्जरीरिव दमयन्तीप्रेषिताः सस्पृहमवलोकयन् "इत एत[2] कुशलं तत्रभवतीनाम्, उपविशत, गृह्णीत ताम्बूलम्, आवेदयत भ[3]वत्स्वामिनीसंदेशम्," इति ससंभ्रमं संभाषयामास ॥ क॥

ताश्च "महानयं प्रसादः" इति ब्रुवाणाः समुपविश्य "राजाधि[4]राज, राजीवदलदीर्घाक्षी क्षेमवार्तां पृच्छति 'न नाम देवस्यापघने घर्मांशुघर्मोर्मिनिर्मितः कोऽपि खेदः[5] समपद्यत, न वा समविषममार्गलङ्घनश्रमेण कापि परिमाथिनी परिजनस्य ग्लानिरभूत्, बहूनि दिनानि देवेनाध्वनि विलम्बितम्' इदं च तया प्राणेश्वरस्य प्रियं प्राभृतं प्रहितम्, इदमुक्तम्, इदमेकान्तसंदिष्टम्, इदं प्रकाशप्रश्रयापलीलायितम्" 'इति राजानमञ्जसा जजल्पुः ॥ ख ॥

यं श्रुत्वेति ॥ नेत्राण्येव पतत्रिणः पक्षिणस्तेषां विश्रामतरुः ॥ १० ॥

एवमिति ॥ एवं परस्परमभिधाय समीपं गतास्ताः प्रेमोर्मिचञ्चत्कनीनिकेन सादरं दूरोत्क्षिप्तपक्ष्मणा चक्षुषा सस्पृहमवलोकयन् क्षितिपतिः ससंभ्रमम् "इत एत—" इत्याद्यालपत् ॥ संतोषपुञ्जमञ्जूषिका इत्यादि तासां विशेषणानि ॥ क ॥

ताश्चेति ॥ ननामेति । देवस्य, अपघने शरीरे न नामेत्यभ्युपगमगर्भायां पृच्छा-

१ तिः सानुराग. २ इतइत एत. ३ स्व. ४ राजाधिराजं ५ स्वेदः.

सोऽपि स्मरव्यापारकोरकिताभिः शृङ्गाररससेकपल्लविताभिर्मुग्धस्मितांशुमञ्जरिताभिरमृतच्छटाभिरिव वाग्भिः किमपि सरलाभिः, किमपि नर्मोक्तिकुटिलाभिः, किमपि कथयन्, किमपि पृच्छन्, किमपि संदिशन्, अनु जल्पमनुजल्पितम्, अनु हासमनुहसितम्, अनु सुभाषितमनुसुभाषितम्, अनु प्रियमनुप्रीतम्, प्रसादप्रदानोद्दीपितोद्दामानुरागास्ताः कुर्वन्नतिचिरमिव गोष्ठीलीलयाऽवतस्थे ॥ क ॥

"अहो नु खल्वस्य नरपतेः, अनश्लीलं शीलम्, अनाहार्यमौदार्यम्, अवञ्चनं वचनम्, अदैन्यं दानम्, अस्मयं स्मितम्, अविचारगोचरं गाम्भीर्यम्" इति भावयन्त्यस्ताश्च कांचिदुचितविनोदैरतिवाह्य वेलाम्, अनुभूय किमपि गोष्ठीसुखम्, आख्याय च किंचिदिव दमयन्तीविनोदविलासव्यतिकरम् "आज्ञापयतु देवोऽस्मान्गमनाय, भवद्वार्तामृतपानार्थिनी देवी त्वरिताऽस्मत्प्रत्यावृत्तिमवेक्षमाणा तिष्ठति" इत्यभिधायानुमता यथागतमगच्छन् ॥ ख ॥

गतासु च तासु, प्रगल्भं प्रज्ञायाम्, अचरमं वाचि, कुशलं कलासु, निपुणं नीतौ, सप्रतिभं सभायाम्, आश्चर्यभूतमाहूय पर्वतक-

याम् । नवेति पक्षान्तरगर्भायाम् ॥ ख ॥

सोऽपीति ॥ नल एवमेवं कुर्वन् गोष्ठीविलासेनास्थात् ॥ जल्पितमनु लक्ष्यीकृत्य जल्पितं कुर्वन् । ता उद्दीपितानुरागाः कुर्वन् इत्येवं कुर्वञ्शब्द उभयत्रापि संबध्यते । "अनु जल्पमनुजल्पितम्" इति यदा क्वचित्पाठः । तदा अनुजल्पितमिति क्रियाविशेषणम् । अनुगतं जल्पितं यत्रेति । अनु जल्पमित्यादिषु तु अनुयोगे द्वितीया ॥ क ॥

---

१ सुरहितः क्वचित्पाठः. २ अनुप्रियमप्रमेयप्रसाद. ३ क्वचिन्न. ४ कांचिदप्यविदितामुचित. ५ त्वरितमस्म. ६ नुमतास्ता. ७ प्रतिभायाम्.

नामानं वामनकमुपायनीकृत्य कर्कशकर्कन्धूफलस्थूलोज्ज्वलमुक्ता[1]-वलीमुख्यभव्यभूषणांशुकादिसंमानदानादरपरि[2]तोषितेन तेन पुष्कराक्षपुरःसरं किंनरमिथुनेन सह दमयन्तीं प्रति प्रेषयामास ॥क॥

स्वयं च शाङ्खिकमुखमरुत्पूर्यमाणशङ्खस्वनविभिन्नभांकारि[3]मध्याह्नभेरीरवेण निर्यद्वेलाविलासिनीचरच्चरणाभरणरणन्मणिनूपुरझंकारेण च निवेद्य[4]माने मध्याह्नसमये माध्याह्निककरणायोदतिष्ठत् ॥ख॥

क्रमेण च निःसृते समस्तसेवकजने, विश्रान्ततूर्यतालगीतासु निर्यातनर्तकीविरहखेदादिव मूकीभूतासु नृत्यशालासु, निःशब्दतया सुप्तास्विवार्थाधिकार[5]ककुटीषु, शून्यतया मध्याह्नतन्द्रीमूर्छितेष्विव समस्तमण्डपेषु, संक्रान्तसेवाविलासिनीचरणकुङ्कुमपदपङ्क्तितया विकीर्णविकसितरक्तारविन्दे[6] इव प्रकाशमाने राजभवनाङ्गणे, घनं ध्वनन्तीषु[7] भोजनावसरशङ्खकाहलासु[8], प्रधावमानेषु[9] प्रत्यास्वादकजनेषु, परिमृज्यमानास्वतिथिसत्रशालासु, सज्जीक्रियमाणेष्वग्राशन[10]ब्राह्मणेषु, प्रवेश्यमानासु गोग्रासयोग्यासु कपि[11]लासु पुण्यगवीषु, प्रक्षाल्यमानेषु वायसबलिस्तम्भशिखरफलकेषु, बहिर्दीयमानेषु, दीनानाथभिक्षुकभैक्ष्य[12]पिण्डेषु, समुपलिप्यमानासु भोजनस्थानवेदीषु संचार्यमाणेषु चकोर[13]पञ्जरेषु, निवेद्यमाननैवेद्यासु पूज्यराज्याधिदेवतासु, वैश्वदेवाहुतिगन्धवाहिनि वहति विविधान्नपाकपरिमलमनोहरे महानसमरुति, निर्वर्तितमज्जनादिक्रियाकलापे भजति भोजनभुवं भूभुजि, बहिः सूपकारकलकलः समुल्ललास ॥ ग ॥

क्रमेणेति ॥ महानसं पाकस्थानम् ॥ ग ॥

---

१ मौक्तिकावली. २ संतोषिते. ३ भांकारि क्वचिन्नास्ति; मध्याह्नभांकारिभेरी. ४ निवेद्यमानमध्यान्हसमयः. ५ कारिकाकुटीषु. ६ विन्दमकरे. ७ स्वनन्तीषु. ८ कालहलासु. ९ प्रवाद्यमानेषु. १० सन. ११ क्वचिन्न. १२ क्ष. १३ शुकचकोर.

आज्यं प्राज्यमभिन्नकुन्दकलिकाकल्पश्च शाल्योदनो
[1]धूपामोदमनोहरा शिखरिणी स्वादूनि शाकानि च ।
पेयास्वाद्यकवल्यलेह्यबहुलं नानाविधं भुज्यतां
भोज्यं भीममहानृपस्य सुतया संप्रेषितं सैनिकाः॥११॥

अहो नु खल्वमी मत्स्य[2]मांसैर्विरहितमुदीच्यप्रतीच्य[3]प्राच्यजनाः प्रियसक्तवो भोक्तुमेव न जानन्ति ॥ क ॥

विरलः खलु दाक्षिणात्येषु मांसाशनव्यवहारः ॥ ख ॥

तदाकर्ण्यतां भो नैषधाः ॥ ग ॥

आज्यप्राज्यपरा[4]न्नकूरकवलैर्मन्दां विधा[5]य क्षुधां
चातुर्जातकसंस्कृतो नु शनकैरिक्षो रसः पीयताम् ।
सं[6]भारस्पृहणीयतेमनरसानास्वाद्य किंचित्ततः
स्निग्धस्तब्धदधिद्रवेण स[7]रसः शाल्योर्[8]दनो भुज्यताम् ॥१२॥

राजा तु "प्रतीहार, विनिश्चीयतां किमयं बहिः कलकलव्यतिकरः" इत्यभिधाय तत्कालयोग्यपरिजनपरिवृतो भोक्तुमुपाविशत् ॥ घ ॥

त्वरितं च गत्वागतश्च[9] स प्रतीहारो विज्ञापयांबभूव ॥ ङ ॥

"देव, दमयन्त्या प्रहिताः सूपकाराः सैन्यजनम्, आ ब्राह्म-

आज्यमिति ॥ अभिन्नकुन्दकलिकया कल्यते मीयते उपमीयते इति यावत् । कलेरदन्तात् "अचो यत्" इति सूत्रेण यत् । केचित्तु पवर्गोपधं पठन्ति ॥ ११ ॥

आज्यप्राज्यमिति ॥ "त्वगेलापत्रकं चैव त्रिगन्धं च त्रिजातकम् । तदेव मरिचैर्युक्तं चातुर्जातकमुच्यते" तेन संस्कृतः कृतगुणान्तरश्चातुर्जातकसंस्कृतः ॥ सरलः सुनिष्पन्नदीर्घतण्डुलपाकजः । अतिक्लिन्नतादिदोषरहितश्च ॥ दधिद्रवो वस्त्रगालितं दधि ॥ १२ ॥

---

१ सूपो धूपमनो. २ मत्स्येति क्वचिन्न. ३ प्राच्यप्रतीच्य; प्राच्यप्रतीच्यपरिजनाः. ४ वरान्न. ५ निधाय. ६ संसार. ७ सरलः. ८ शाल्योदनं. ९ ततः.

णान्त्यजगोपालबालकम्, आ करितुरगवाहनम्, आ सामन्तनियुक्तकम्, आस्वाद्यैस्तैस्तैरन्नविशेषैर्भोजयन्ति ॥ क ॥

लग्नाः सर्वतो दृश्यन्ते पर्वताः पक्कान्नस्य, राशयः शाल्योदनस्य, स्तूपाः सूपस्य, निर्झराः सर्पिषः, सिन्धवो मधुनः, निकराः शर्करायाः, स्रोतांसि दधिदुग्धयोः, शैलाः शाकानाम्, निपानानि पानकानाम्, कुल्याः फलरसानाम्, कूटाः कषायाम्ललवणतिक्तमधुरोपदंशानाम् ॥ ख ॥

एवमकार्पण्यमिच्छया भोजितं सैन्यम् ॥ ग ॥

अपिच ।

भुक्तान्ते घृतदिग्धहस्ततलयोरुद्वर्तनं चन्दनं
पश्चान्नागरखण्डपाण्डुरदलैस्ताम्बूलदानक्रमः ।
एकैकस्य मृणालतन्तुमृदुनी दत्ते ततो वाससी
देव्या किंचिदचिन्त्यमेव भवतः सैन्यातिथेयं कृतम् ॥ १३ ॥

इयं च रसवती देवस्य तया स्वहस्तपल्लवपरिमलनसंस्कृतैः पाकविशेषैरलंकृत्य स्वमुद्रया मुद्रिता प्रहिता" इत्यभिधाय व्यरंसीत् ॥ घ ॥

राजा तु मनाक्तरलितशिराः "सस्मितमहो निरतिशयमुदारगम्भीरमुचितव्यवहारहारि लीलायितं तस्याः, स्पृहणीयपरिमलश्चायमपूर्व इव कोऽपि पाकक्रमः ॥ ङ ॥

भुक्तान्त इति ॥ वनवासदेशोद्भवानि नागवल्लीदलानि नागरैर्विदग्धैश्चर्व्यन्ते खण्ड्यन्ते इति नागरखण्डसंज्ञानि ॥ १३ ॥

इयं चेति ॥ स्वहस्ताभ्यां परिमलनं यथोचितगन्धद्रव्यक्षेपेण सुरभीकरणम् ॥ घ ॥

---

१ तैस्तैः पाक.

तथाहि ।

इदमम्लमप्यनम्लास्वादम्, इदमीषत्कषायमपि मधुरतां नीतम्[1], इदमेकरसमप्यनेकरसीकृतम्, इदमतिमृष्टतया[2]ऽमृतमप्यतिशेते, रसवत्यामपि[3] रसवती विदर्भराजात्मजा" इति विभावयंस्तांस्तया[4] प्रहितान्पाकविशेषानादरेणास्वादयामास ॥ क ॥

चिन्तितवांश्च

"षड्रसाः किल वैद्येषु भरतेऽष्टौ नवापि वा ।
तया तु पद्मपत्राक्ष्या सर्वमेकरसीकृतम् ॥ १४ ॥

तथाहि ।

अग्रस्थामिव चेतसः पुर इव व्यालम्बमानां दृशो-
र्जल्पन्तीमिव रुन्धतीमिव मनाङ्मुग्धं हसन्तीमिव ।
निद्रामुद्रितलोचना अपि वयं तां विश्वरूपायितां
पश्यामो बहिरन्तरे निशि दिवा मार्गेषु[5] गेहेषु च ॥ १५ ॥"

एवमवधारयन् अतृप्त इव तया प्रहितेषु स्वहस्तपक्कपाकरसविशेषेषु, असंतुष्टस्तत्कथायाम्, आचम्य, चन्दनागुरुपरिमलेन[6]

इदमिति ॥ रसवत्यामपि रसवती रसिका रागिणीति यावत् । तात्पर्यवतीति च ॥ क

षडिति ॥ एकरसीकृतमुत्कृष्टास्वादीकृतम् । चमत्कृतत्वात् । आत्मविषये एकानुरागीकृतं वा । यदनेकरसं तत्कथमेकरसीभवेदिति विरोधं पुनरर्थस्तुशब्द उद्भावयति ॥ १४ ॥

तथाहि । इत्यनेनात्मानुभवसंभावनाद्वारेणैकरसत्वमेव व्यनक्ति ॥

अग्रस्थामिति ॥ विश्वं रूपमस्येति विश्वरूपो हरिः ॥ १५ ॥

एवमिति ॥ उत्तम्भितस्य तत्कालारोपितस्य जङ्गमस्य चित्रकूटाख्यस्याभ्रंलिह-

---

१ आनीतम्. २ मिष्टतया. ३ तद्रसव. ४ तांस्तान्. ५ रसेषु ६ परिमलपाण्डुरित.

पाण्डुरितपाणिपल्लवः, लवङ्गकक्कोलकरम्बितताम्बूलमुत्सर्पिकर्पूरपरिमलमादाय, विकीर्णविविधकुसुमप्रकर[1]हारिणि यक्षकर्दमाच्छच्छटो[2]च्छोटितपर्यन्तभित्तिभागे लम्बितप्रलम्बजाम्बूनदपद्मदाम्नि धूपधूमामोदिनि चूर्णितकर्पूररङ्गरेखाभाजि भोजनानन्तरमपरेऽपराह्णविनोदमण्डपे मनाग्विश्रम्य रणरणकाक्रान्तहृदयो दूरदिगन्तालोकनकुतूहलितः स[3]रित्तीरोत्तम्भिताभ्रंलिहसौधस्कन्धभूमिर्मा[4]रुह्य च तस्यामूर्ध्वे एव ध्रि[5]यमाणमायूरातपत्र[6]युगलः, सलीलालसपदैरितस्ततः परिक्रामन्, नेदीयसि सरित्संगमाम्भसि मध्याह्नमखिलमवगाहनसुखमनुभूय तीरमुत्तीर्णासु तिमिरशङ्कया कृतदूरचङ्क्रमणैश्चक्रवाकचक्रवालैराकुलमव[7]लोक्यमानासु, पुलिनपांसुविहरणविरामे विकसितविविधवीरुन्धि रोधांसि रदन्तीषु दन्तिपङ्क्तिषु दत्तदृष्टिः, विरलनलिनीप[8]त्रान्तरालसुप्तोत्थितस्य, किंचिदं[9]वाश्रितचटुलचञ्चोः, चरतः, चटुलचञ्चरीकिणि विकचकमलवने, राजहंसकुलकलापस्य करिकलभदन्तदण्डपाण्डुबिसकाण्डभङ्गटंकारानाकर्णयन्, अपराह्णमज्जनागताभिः कुण्डिनपुरपुरंध्रिभिराश्चर्यरसोर्मिमुषितनिमेषैर्निष्कम्पनीलोत्पलपलाशलीलायमानैर्नेत्रपुटैरापीयमानमुखेन्दुद्युतिः, दर्शिततरङ्गभ्रूभङ्गया, दूरोच्छलद्बालश-

सौधस्य स्कन्धभूमिमारुह्य तस्यामितस्ततः परिक्रामन्, निकटतरे नदीसंभेदोदके कृतजलक्रीडासु, तमोभ्रान्त्या चक्रैराकुलमालोक्यमानासु, कृतधूलीस्नानासु, तटीः पाटयन्तीषु दन्तिपङ्क्तिषु न्यस्तदृष्टिः, वने चरतो हंसवृन्दस्य बिसभङ्गरवाञ्शृण्वन्, कुण्डिनस्त्रीभिर्दृश्यमानमुखेन्दुश्रीः, उच्छलच्छफरीछलविलोकितया जलदेवतया वीक्ष्यमाणरूपसंपदिव, क्षणमेकं सरसीषु क्षणं चूतालीषु क्षणं गृहालीषु क्षणमवरोधभवनपङ्क्तिषु क्षणं पुरपद्धतिषु विश्रान्तनेत्रो नलश्चिरमस्थात् ॥ सादरेक्षणं नेत्रपानम् । तच्च

१ प्रकरमकारहारि. २ छटाच्छोटित. ३ सरित्तीरोत्तंसिता. ४ मारुरोह. आरुह्य च. ५ क्रियमा. ६ पत्रमण्डलः. ७ मालोक्यमा. ८ वनान्तराल. ९ किंचिदिवा.

फरीछलेन विस्फारितविलोचनया, सरित्संगमसलिलाधिदेवतयापि विलोक्यमानरूपसंपत्तिरिव, क्षणमविरलचलच्चञ्चरीकचक्रचुम्बिताम्बुरुहासु क्रीडाकमलसरसीषु, क्षणमुपान्तपङ्क्तीभूतमञ्जरितसहकारराजिषु स्मर[1]वाजिवाह्यालीषु, क्षणमुन्मिषत्कुसुममनोहा[2]रितरुलतारमणीयासु भवनोद्यानमालासु, क्षणमुत्पतत्पताकापटपल्लवराजिविराजितासु भीमभूपालान्तःपुरप्रासा[3]दपङ्क्तिषु, क्षणमवकीर्णकुसुमरङ्गावलीरम्यासु नगरवीथीषु विश्रान्तविलोचनश्चिरमवतस्थे ॥ क ॥

चिन्तितवांश्च ।

नोद्याने न तरङ्गिणीपरिसरे नो रम्यहर्म्ये[4] न वा
पुष्प्यत्पुष्करगर्भगुञ्जदलिषु क्रीडातडागेष्वपि ।
वात्याघूर्णितशीर्णपर्णतरला दृष्टिर्मदीयाधुना
लुभ्यल्लुब्धकभी[5]षितेव हरिणी श्रान्तापि विश्राम्यति ॥ १६ ॥

अपि च ।

न गम्यो मन्त्राणां न च भवति भैषज्यविषयो
न चापि प्रध्वंसं व्रजति विहितैः शान्तिकशतैः ।
भ्रमावेशादङ्गे कमपि विदधद्भङ्गमसमं
स्मरापस्मारोऽयं भ्रमयति दृशं घूर्णयति च ॥ १७ ॥

पत्रपुटैर्युक्तमिति नेत्रपुटैरापीयमानेत्युक्तम् । कण्टकादिदोषरहितासु तरुराजिराजितासु च भूमिषु वाह्वाहना ॥ तथा च– "रम्या समतला लोष्टकीलकण्टकवर्जिता । वाह्याली भूमिरभ्यर्णतरुराजिविराजिता" इति ॥ एतदेव पङ्क्तीभूतेत्यादिनोक्तम् ॥ हिङ्गुलुहरितालादिविचित्रवर्णकवच्चित्रहेतुत्वात्कुसुमान्येव रङ्गावली विचित्रवर्णकुसुमभक्तिः॥क

नोद्यानेति ॥ विश्राम्यतीति प्रत्येकं योज्यम् ॥ १६ ॥

न गम्य इति ॥ भ्रमः संदेहः । स चात्र दमयन्तीलोभविषयः ॥ १७ ॥

---

१ क्षणं वाजिवा. २ मनोहारिणीषु तरलितरमणीषु. तरलतारमणीयासु. ३ प्रासादपदपङ्क्तिषु. ४ हर्म्येषु वा, हर्म्येऽपि वा. ५ भायितेव; भापितेव.

किंचान्यदद्भुतम् ।

पौष्पाः पञ्चशराः शरासनमपि ज्याशून्यमिक्षोर्लता
जेतव्यं जगतां त्रयं प्रतिदिनं जेताप्यनङ्गः किल ।
इत्याश्चर्यपरंपराघटनया चेतश्चमत्कारय-
न्व्यापारः सुतरां विचारपदवीवन्ध्यो[1] विधेर्वन्द्यताम् ॥ १८ ॥

एवमनेकविधवितर्कतरलितहृदये कुण्डिननगरवीथीविश्रान्तदृशि शनैरुद्वेल्लितमल्लिकाक्षपल्लवस्य[2] मृदुतरतरङ्गितसरितः[3] कमलवनवायोः समर्पितवपुषि निषधभूभुजि, भुजंगनिर्मोकधवले वसानो वाससी, रणन्मणिकंकणैराकूर्परं पूरितप्रकोष्ठः श्रीखण्डपिण्डपाण्डुरिततनुरपूर्व इव पर्वतकः प्रतीहारसूचितः प्रविवेश ॥क॥

प्रविश्य च प्रकटितप्रणयप्रणामः प्रभुणा सविस्मयस्मितहुंकारेणाभिभाषितः[4] स्तोकान्नमितभ्रूसंज्ञया[5] विज्ञपयितुमारेभे ॥ ख ॥

"देव, श्रूयताम् । इतो गतवानहम् । अनन्तरमतिशयितस्वर्गान्मार्गाननेकविधचर्चाचारूणि चत्वराणि विलङ्घ्य, विहितमनःप्रसादान्प्रासादानवलोकयन्, इतस्ततः सस्मितस्मरालसचलद्वेलाविलासिनीविकारकूणितकोणेक्षणाक्षिप्तहृदयः, सेवाविरामनिःसरत्सामन्तसंकुलम्, अविरलगलन्मधुमञ्जरीपुञ्जपिञ्जरितसरससहकारव-

पौष्पा इति ॥ अत्र प्रथमोऽपिशब्दः शरासनस्य ज्याशून्यस्य शरापेक्षया द्वितीयश्च जेतुरनङ्गस्य प्रतिदिनजेतव्यजगत्त्रयापेक्षया वैषम्यव्यञ्जकः ॥ १८ ॥

एवमिति ॥ मल्लिकाक्षो हंसविशेषः ॥ चिरदृष्टस्यापि पर्वतकनाम्नो वामनस्यापूर्वत्वमिह पूर्वमभूषितस्य संप्रति पारितोषकभूषणभूषितत्वादयितोदन्तप्रश्नतात्पर्याद्वा॥क॥

देव श्रूयतामिति ॥ मार्गांश्चत्वराणि च विलङ्घ्य, प्रासादान्पश्यन्, ईदृग्राजभवनमविशमिति संबन्धः । चर्चा गन्धोदकसेचनपुष्पप्रकारादिवार्त्तावशात्प्रस्तावान्नलप्रव-

---

१ विंध्यो. २ रुन्नमित. ३ पल्लवस्पर्शमृदुतर. ४ आभिभूषितः. ५ स्तोको.

ननिकुञ्जपुञ्जितपुंस्कोकिलकुलकलरवरमणीयोद्यानमालावलयितम्, उपान्तकृतमणिमन्दुरामन्दिरनिबद्धस्निग्धपोषणोत्कर्षहर्षहेषित[1]राजवल्लभतुरंगम्, उत्तुङ्गशृङ्गसंगतमङ्गल[2]ध्वजम्, अङ्गणोत्सङ्गरङ्गत्क्रीडाकुरङ्गविहंगमम्, अभङ्गाङ्गरक्षिरक्षितकक्षान्तररममाणराजकुमारकम्, अतिसूक्ष्ममुक्ताफलरचिततरङ्गरम्यरङ्गरेखाराजिराजिताजिरं राजभवनमविशम् ॥ क ॥

अतिमनोहारिणि यत्र सुपुष्करमालानि क्रीडावापीपयांसि नागयूथं च, सारवाणि लीलोद्यानसारसमिथुनानि सेवककविवृन्दं च, विलम्बितानि काञ्चनकुङ्कुमदामानि गीतं च, अनलसङ्गानि लक्षप्रदीपवर्तिमुखानि प्रेक्षणकं च ॥ ख ॥

किं बहुना।

सुस्थिततेजोराशेर्लक्ष्मीजनकस्य रत्ननिलयस्य।
तस्योपरि प्लवन्ते वार्धेरिव वर्णकाः सर्वे ॥ १९ ॥

शादिलक्षणा चामुण्डापि ॥ मणिमन्दुरेत्यत्र षष्ठीसमासः ॥ क ॥

अतीति ॥ यत्र राजभवने। सुपद्मश्रेणीनि पयांसि। यूथं च सुष्ठु पुष्करं शुण्डाग्रं यस्य तथोक्तम्। आलानमर्गलनस्तम्भोऽस्यास्तीति ॥ तथा सह आरवैः सारवाणि। वृन्दं च सारोत्कृष्टा वाणिर्यस्य तथाविधम् ॥ विशेषेण लम्बितानि लम्बायमानीकृतानि। गीतं च स्वरकृतविलम्बोपेतं तानोपेतं च ॥ अनलेन ज्वालालक्षणेन सङ्गो येषाम्। प्रेक्षणकं च नालसमनलसमोजस्वि। उच्चैः स्थाने गीयमानत्वात्। तथा गानमस्यास्तीति। इनिः। लक्षसंख्यद्रव्यपतीनां हि वेश्मसु यावल्लक्षं दीपा ज्वाल्यन्ते इति ख्यातिः ॥ ख ॥

सुस्थितेति ॥ तेजोराशिर्वडवानलः प्रतापचयश्च। लक्ष्मीर्विष्णुपत्नी शोभा च। तथाभूतस्य तस्य सागरोपमस्योपरि वर्णकाः स्तोतारः प्लवन्ते तरन्ति। अपरिच्छिन्नगुणत्वादलब्धमध्या बाह्यमेव वर्णयन्तीति भावः। वारो जलानि धीयन्तेऽस्मिन्निति वार्धिः ॥ १९ ॥

---

१ हेषितोत्कर्षहर्षितराज. २ मयूरध्वज.

तत्र च चलत्कञ्चुकिसंकुलं पाताल[1]मिवान्तःपुरमनन्तालयं प्रविश्य विविधकुसुमसंपत्संपन्नपुण्यपादपपरिकरिताङ्गणवापीपरिसरचलच्चक्रवा[2]के चन्द्रशालाशालिनि, शैलूष इवानेकभूमिकाभाजि, धनंजय इव सुभद्रान्विते, कुरुवंशाख्यान इव चारुचित्रविचित्रभित्तिभाजि, तुहिनाचलोच्चकूटायमाने सुधाधवलस्कन्धे धाम्नि ध्वजावलीविल[3]सत्सप्तसप्तिसप्तौ सप्त[4]मभूमिकायाम्, इतोमुखवातायने निविष्टाम्, इतो गतास्ताः[5] कुब्जवामनकन्यकास्त्वद्वार्ताव्यतिकर[6]विनोदारम्भिणीः संभाषयन्तीम्, अनवरततरललोचनालोकनैर्नीलोत्पलोपहारमिव त्वदधिष्ठितायै दिशे दिशन्तीम्, उत्तरीयांशुकस्याच्छतया दृश्यमानमदनबाणव्रणकिणानुकारिकस्तूरिकापङ्कपत्रलताङ्कितकुचकलशश्रियम्, अष्टमीशशाङ्कशकलश्रीशोभाभाजि ललाटपट्टे स्मर[7]परवशात्रिपुरुषैरिव '[8]ममेयं ममेयं ममेयम्' इति संहर्षात्कृतं स्ववर्णानुकारिस्वीकारचिह्नमिव कुङ्कुममृगमदमलयजरसरचितत्रिपुण्ड्रकरेखात्रितयमुद्वहन्तीम्, आलोहितेन च[9] त्वद्वार्तामृतपानबालप्रवालप्रणालकेनेव कर्णप्रणयिना बालपल्लवेन विराजितवदनाम्, आसन्नमणिभित्तिदर्पणसंक्रान्तप्रतिबिम्बतया त्वत्संगमवा-

तत्र चेति ॥ कञ्चुकिनो महल्लका उरगाश्च । (बहुनिलयं शेषनिलयं च ।) प्रविश्य ईदृग्विधे धाम्नि गृहे, सप्तमभूमिका सप्तमक्षणः, तत्र स्थिते इतोमुखे एव हस्तादिसङ्केतकथिते एव, वातायने गवाक्षे, निविष्टामासीनां, दमयन्तीमद्राक्षमिति संबन्धः ॥ चन्द्रशाला शिरोगृहम् ॥ शैलूषो नटः । भूमिका गृहक्षणा वेषधारणं च ॥ शोभनानि भद्राणि गृहावयवविशेषास्तैरन्विते । पक्षे सुभद्रार्जुनपत्नी ॥ चारुचित्रेण विचित्रा भित्तीर्भजते । अन्यत्र चित्रविचित्रौ शान्तनुसुतौ । तौ च कुरुवंश्यानां भित्तिभूतौ । तत्कलत्राभ्यामम्बिकाम्बालाभ्यां पाण्डुधृतराष्ट्रयोरुत्पन्नत्वात् ॥ तथा लग्नाः

१ अनन्तभयं पातालमिव तदन्तःपुरं प्राविशम्. २ चक्रवाकचक्रवाले. ३ विलग्नसप्त. ४ सप्तभूमि. ५ तास्ताः. ६ व्यतिकरे. ७ स्मरबाणपरवशा. ८ ममेयमिति संहर्षा. ९ चेति क्वचिन्न. भवद्वार्ता.

ञ्छाकृतसंतापसंविभागार्थमिव बहून्यात्मरूपाणि सृजन्तीम्, आसन्नवर्तिनीभिर्वीणादिविनोदविदुषीभिः समानवयोवेषाभिः सखीभिः सरस्वतीमिव सकलविद्याधिदेवताभिरुपास्यमानाम्, उन्मिषत्कुसुमाभरणरमणीयाभिश्चामरग्राहिणीभिर्वनदेवताभिरिव श[1]रीरिणीं वसन्तमासश्रियमुपसेव्यमानाम्, अनुलेपनपुष्पपाणिभिः प्रसाधिकाभिर्भवानीमिवाने[2]कनाकनायकनारीभिराराध्यमानाम्, इतस्ततो निपतन्मण्डनमणिमयूखमञ्जरीजाल[3]च्छलेनामान्तमिव कान्तिरसबिसरमुत्सृजन्तीम्, अशेषाङ्गा[4]वयवेषु प्रतिबिम्बितैरासन्नचित्रभित्तिरूपकैर्मायाविभिः सुरासुरैरिव विधीयमानाश्लेषाम्, अग्र[5]स्थिते पद्मरागमणिदर्पणे कन्दर्पातुरे रागिणी शशिनीव करुणयार्पितच्छायाम्, अशेषजगद्विजयास्त्रशालामिव मन्मथस्य, सङ्केतवसतिमिव समस्तसौन्दर्यगुणानाम्, अधिदेवतामिव सौभाग्यस्य, विपणिमिव लावण्यस्य, शिल्पसर्वस्वपरिणामरेखामिव विधातुः, अ[6]नन्तसंसाररोहणैकरत्नकन्दलीं दमयन्तीमद्रा[7]क्षम् ॥क॥

ईक्षणामृतशलाका[8]मवलोक्य च तामतिहर्षविस्मयकौतुकोत्तानितचक्षुश्चिन्तितवानहम् ॥ ख ॥

सप्तसप्तेरादित्यस्य सप्तयोऽश्वा यत्र तस्मिन् ॥ अष्टमी शशाङ्कशकलेति ॥ खण्डशशिनो हि श्रियं ललाटं श्रयति । त्रयाणां सत्त्वरजस्तमसां पुरुषास्त्रिपुरुषाः ॥ यथा— "न बाधतेऽस्य त्रिगणः परस्परम्" इत्यत्र त्रयाणां धर्मादीनां गणः ॥ यथा च चण्डसिंहकृते चण्डिकाचरिते— "प्रियत्रिवर्गश्चकमे सकामम्" इति ॥ कर्मधारयस्तु संज्ञायामेव ॥ मणिदर्पणलक्षणे शशिनि कारुण्यादर्पितप्रतिकृतिमित्यर्थः । अवज्ञातो हि रागी म्रियते ॥ संसारो रोहणगिरिः, दमयन्ती च रत्नप्ररोहशलाका ॥ क ॥

---

१ सशरीरिणीं. २ माकिनाय. ३ छलेनाङ्गेष्वमाम्तमिव. ४ अशेषावयवेषु. ५ उपस्थिते. ६ अमृन. ७ अद्राक्षीत्. ८ कामिवावलोक्य.

"इयं हि

स्मरराजराजधानी मङ्गलवलभी[1] विलासविहगानाम्।

शृङ्गाररङ्गशाला हरति न बाला मनः कस्य ॥ २० ॥

अपि च।

दग्धो विधिर्विधत्ते न सर्वगुणसुन्दरं जनं कमपि।

इत्यपवादभयादिव हरिणाक्षी वेधसा विहिता ॥ २१ ॥

किं चान्यत्[2]।

लावण्यपुण्यपरमाणुदलं तदन्य-

दन्यः स चापि निपुणः खलु कोऽपि वेधाः।

येनाद्भुता कृतिरियं विहिता विशिष्ट-

कार्येण कारणविशेषगुणोऽनुमेयः ॥ २२ ॥"

एवं[3] वितर्कयन्तं सापि मां पुष्कराक्षसूचितमुचितसंभ्रमेण मनाग्वलितकंधराकन्दलीकम्पितकर्णोत्पलमवलोक्य[4] स्वागतप्रश्नानन्तरम् "अहो बहोः कालादभूत्सुप्रभातमद्योद्द्योतितमिव तम-

दग्ध इति ॥ दग्धशब्दो निन्दार्थे। दग्धो निन्द्यो विधिः (यतः) सर्वगुणपरिपूर्णं कमपि जनं न विधत्ते इति योऽसावपवादः। तद्भयादिव "तेनासौ सुन्दरी विहिता" तेन विधिना अपवादोद्विग्नेन। असाविति। साक्षाद्दृष्टा। सुन्दरीति। समग्रगुणसौन्दर्योपेता। अतस्तस्यां सृष्टायां स्रष्टुरपवादो न भविष्यतीति ॥ "हरिणाक्षी" इति पाठस्तु अक्षिमात्रसौन्दर्यार्थो न समग्रगुणसुन्दरतां वक्तीत्युपलक्षणपरतया निर्वाह्यः ॥ २१ ॥

लावण्येति ॥ येन निरुपमलावण्यदलपाटवेन वेधा दमयन्तीं सृष्टवान्। तद्दलपाटवमन्यत्। वेधाश्च। दलपाटवं वेधाश्च जगन्निर्माणविलक्षणावित्यर्थः। तद्द्वयमपि विशेषयन्नाह—येनेत्यादि ॥ येन दलपाटवेन वेधसा चेति ज्ञेयम् ॥ तत्रार्थे हेतुमाह—विशिष्टेत्यादि ॥ २२ ॥

एवमिति ॥ "स्मरराज–" इत्यादिपद्यत्रयेणैवमूहमानं पुष्कराक्षेण निवेदितं

१ वसतिः. २ इदं क्वचिन्न. ३ एवं हि. तर्कयन्तं. ४ मालोक्य.

स्काण्डपिण्डीकृतं कुण्डिनम्, अकाण्डाडम्बरितवसन्तविकासोत्सव इवाभवत्सरित्संगमोपकण्ठवनविभागः, चिरात्संपन्ना सलक्षणा दक्षिणा दिगियम्, उन्निद्रित इव सह्याद्रिः, अमृतद्रवार्द्रित इवो[1]ज्जीवितोऽयं जनः" इत्यभिधाय "पर्वतक, कच्चित्कुशली परबलदलदावानलो नलः" इति स्मितमुग्धमधुरया गिरा समभाषत ॥ क ॥

अहमपि प्रणम्य यथोचितमनन्तरमतित्वरितसखीजनोपनीतमासनमध्यास्य देवेन प्रहितानि तान्याभरणोपायनान्युपानैषम् ॥ ख ॥

आ[2]दरेण तया गृहीतेषु तेषु, बहुमते मयि, प्रक्रान्ते त्व[3]द्गुणग्रहणगोष्ठीव्यतिकरे, नर्मसुखालापलीलयातिक्रामति स्तोककालकलापे, पुष्कराक्षोऽप्यभाषत ॥ ग ॥

"देवि[4], विज्ञापयामि यद्यभयम्, ॥ घ ॥

एवमनुश्रुतमस्माभिः "किल सकलनाकिनायकपुरंदरपुरःसराः सर्वेऽपि लोकपालास्त्वामभिलषन्तोऽन्तःकरणारण्यलग्नमदनदावानला नलमायान्तमभ्यर्थितवन्तः यथा महानुभावा भवन्ति हि भवादृशाः[5] परोपकारव्रतधर्माणः, तदेष प्रार्थ्यसे स्वप्रयोजननिरपेक्षेण त्वयास्मदर्थे दमयन्ती वरणीया, इति" ॥ ङ ॥

तद्देवि, देवदूतकार्येणागतो निषधेश्वरः ॥ च ॥

मां "हे पर्वतक कच्चित्कुशली परसैन्यदावानलो नलः" इति वचनेन दमयन्ती संभाषितवती ॥ दावानलोपमानेन आत्मनोऽपि विरहसंतापहेतुत्वं नलस्य व्यनक्ति ॥ मनाग्वलितेत्याद्यवलोकनक्रियाविशेषणम् ॥ क ॥

१ इवोर्जितो. २ सपरितोषमादरेणेव. आदरेण च. ३ त्वद्गुणगोष्ठीव्य. ४ देव विज्ञापयसि. ५ भवादृशः.

पृच्छतु वा देवी पर्वतकम्" ॥ क ॥

इति श्रुत्वा पुष्कराक्षभाषितम्, ईषद्विषादविलक्षस्मितस्मेरां दृशं मयि साचि संचारितवती ॥ ॥ ख ॥

मयापि संवादिते पुष्कराक्षवचने तस्मिन्, आकस्मिककठोरकाष्ठप्रहारव्यथामिवानुभवन्ती, विन्दतु वीणाक्वणो माधुर्यमितीव प्रतिपन्नमौनव्रता, लभेतां कर्णोत्पले परभागमितीव मुकुलितनयना, प्राप्नोतु शोभां मुक्तावलीदीप्तिजालमितीव मुक्तस्मिता, गच्छतु च्छायां कण्ठावलम्बिनी चम्पकमालेयमितीवाङ्गीकृतवैवर्ण्या, लभतां लीलाकमलमिदं सौभाग्यमितीवोच्छ्वसितवदना, सा क्षणमभूत् ॥ ग ॥

तत्र च व्यतिकरे

विगलितविलासमपरसमाकस्मिकजातभङ्गश‍ृङ्गारम् ।
मूकितमिव मूर्छितमिव मुद्रितमिव भवनमिदमासीत् ॥ २३ ॥

राजा तु "पर्वतक, ततस्ततः" ॥ घ ॥

पर्वतकोऽपि "देव, श्रूयताम् ॥ ङ ॥

अतः परम्

ईषन्निःसृतकुन्दकुड्मलसदृग्दन्तप्रभामञ्जरी
रोचिष्णुस्मितमन्थरां मयि दृशं संचारयन्ती मनाक् ।
अस्यन्ती करपद्मभृङ्गमधरे बन्धूकबुद्ध्यागतं
वारंवारमकम्पयत्तरलितस्तोकावतंसं शिरः ॥ २४ ॥

ततः परम् । वारितवारविलासिनीचाटुवचनक्रमम्, आकस्मिकविस्मयविस्मृतस्मितविलासम्, अतनुतुहिनाहतनवनलिनदलदीनदीर्घेक्षणम्, उष्णसरलश्वासारम्भिविषमविषाददविच्छायि-

ततः परमिति ॥ तस्याः स्थानकमवस्था । लज्जितेव पिहितश्रवणा । श्रवणं

ताननेन्दुद्युति, तस्याः स्थानकमवलोक्य सखेदं सखीजनेन " देवि, भवन्निःश्वासपवनपरंपरया पर्यस्त इवास्ताचलहस्तावलम्बनमयमाश्रयति भगवान्भानुः, इयं च सौभाग्यशालिनि नले निलीनचित्तायास्तव लो[1]कपालपार्थिवप्रार्थनाव्यतिकरमिममाकर्ण्य लज्जितेव पिहितश्रवणा दूरे भवति वासरश्रीः, इमा[2]नि निश्चलनिलीनमधुपनिपीयमानगर्भमधूनि संकोचयन्ति लोचनानीव कमलानि, संविभागीकृतविषादा इव विलासवयस्याः सर[3]सीसरोरुहिण्यः, इमाश्च " कथमस्मत्पतयो मनुष्यकन्यकां कामयन्ते " इतीर्ष्याशोकवशादिव दिशः श्यामायन्ते, तत्प्रेष्यतामयं पर्वतकः " इत्यभिधीयमाना कथंकथमपि चिन्तान्तरायतिरस्कृतालापमीषदु[4]न्नमय्य मुखं समुल्लसदशोकपल्ल[5]वानुकारि करतलमुत्तानीकृत्य मामविस्मरणीयसंमानदानावसाने[6] व्यसर्जयत् ॥ क ॥

विसर्जितश्च तया तत्कालमाविर्भवद्विषादवशसंपन्नमौनया न पुनः संभाषितोऽस्मि, न वीक्षितोऽस्मि, न पृष्टम् , न संदिष्टं किमपि, केवलं चलन्नेत्रविभागप्रान्ततरत्तारया दृष्ट्या[7] समवलोक्य समुत्तानितकरकमलसंज्ञयैव कथमपि संप्रेषितः 'कष्टम्' इति चिन्तयन्नलसाल[8]सैरसमञ्जसपातिभिः पश्चिममुखैरिव पादैरिहा[9]यातवान् ॥ ख ॥

तदेव दमयन्ती देवदूतकार्याङ्गीकरणव्यतिकरमिममाकर्ण्य परं विषादमापद्यत ॥ ग ॥

नक्षत्रं श्रोत्रं च ॥ क ॥

---

१ लोकपालपार्थिवयोः. २ इमान्याश्चर्यनिश्चल. ३ सरसीषु. ४ उन्नम्य. ५ पल्लवाकारि. ६ सानेऽपि. न किंचिदवादीत् व्यसर्जयच्च. ७ दृशा. ८ लालसैरिव. ९ रिहाहमागतवान्.

अन्यच्च । मन्ये च ।

परिम्लानच्छायाविरहितसनिद्रद्रुमवनं
पतत्पङ्क्तीभूतध्वनितशकुनोन्नादितनभः ।
वियोगव्याकूतादुपनदि रुदच्चक्रमिथुनं
विषीदन्त्यां देव्यामिदमपि विषण्णं जगदभूत् ॥ २५ ॥

इत्यभिधाय स्थिते पर्वतके तत्कालोचितमिममेवार्थं समर्थयन्नवसरपाठकः पपाठ ॥ क ॥

कन्यामन्यानुरक्तां कथममृतभुजो मानुषीं कामयन्ते
तन्वङ्गीः सस्मितास्याः स्मरविवशदृशो नाकनारीर्विहाय ।
वक्तुं खेदादिवैतद्दिनपतिरधिकं व्रीडयैवावनम्रः
कोपेनेवारुणांशुः प्रविशति वरुणस्यालयं पश्चिमाब्धिम् २६

राजा तु तदाकर्णयन्, अवतीर्य सौधशिखरतलाल्लीलापदप्रचारेण संध्यावन्दनविधिविरामोपविष्टजपद्विजजनसनाथसैकते सरित्संगमे संध्याह्निकमकरोत् ॥ ख ॥

ततश्च पश्चिमायां दिशि स्फुरति संध्यारागे, रुधिरासवपिपासया कालवेतालमण्डलीव प्रधावमाना, त्रिभिः स्रोतोभिः प्रवृत्तया गङ्गया सह संहर्षादिवानेकैः स्रोतसां सहस्रैर्गगनतलमिव प्लावयन्ती कालिन्दीव, व्यजृम्भत तिमिरपटलपङ्क्तिः ॥ ग ॥

अनन्तरं च चन्द्रमसा गर्भिणी पौरंदरी दिक्केतकीपुष्पपत्रपाण्डिमानमगमत् ॥ घ ॥

कन्यामन्येति ॥ "वक्तुं खेदाद्" इत्यस्योपयोगि "वरुणस्यालयम्" इति । वाचो हि श्रोतारमपेक्षन्ते ॥ २६ ॥

अनन्तरमिति ॥ गर्भिणी हि केतकपत्रवत्पाण्डुतां धत्ते ॥ घ ॥

---

१ व्याघाता. २ णाङ्गः. ३ विधीति क्वचिन्न. ४ नृपद्विज. ५ मगात्.

उल्ललास च चण्डतरमारुतान्दोलितोदयाद्रिद्रुमकुसुमकिंजल्करेणुराजिरिव कपिशा शशाङ्कद्युतिः ॥ क ॥

अथ क्रमेण पूर्वपयोधिपुलिनाद्राजहंस इव गगनमन्दाकिनीमुच्चलितः, केसरिकिशोर इवोदयगिरिगुहागह्वरात्तिमिरकरियूथपपृष्ठलग्नः, स्फटिकमयः पूर्णकुम्भ इव जगद्विजयप्रस्थानस्थितस्य मङ्गलाय मकरकेतोः केनापि सज्जीकृतः, श्रीखण्डपिण्ड इव मण्डनाय महेन्द्रदिशा हस्तश्लेषोपलालितः, शङ्खिकापुष्पस्तबक इव गगनश्रिया श्रवणे संयोजितः, कुम्भ इवैकः प्राचीवनविहारिसुरकरीन्द्रस्य प्रकटतां गतः, वासरविरामवल्लीमुद्धूय कन्द इवोद्धृतो निशाशबरिकया, पाण्डुपुष्पाक्षतगुञ्जापुञ्ज इव सिद्धवधूभिरुदयाचलचतुष्पथे विरचितः, गण्डशैल इव कैलासशिखराल्लुठित्वागतः, सीमन्तमौक्तिकमिव पूर्वदिङ्मुखस्य, सितातपत्रमिव पूर्वाशाधिपतेः पुरंदरस्य, क्रीडामौक्तिककन्दुक इव कालकुमारस्य क्षीरडिण्डीरपिण्डसदृशो दृष्टिपथमवततार तारापतिः ॥ ख ॥

तदनु च

मदनमिति युवानं यौवराज्येऽभिषिञ्च-
न्कृतकुमुदविकासो भासयन्दिङ्मुखानि।
इममममृततरङ्गैः प्लावयञ्जीवलोकं
गगनमवजगाहे मन्दमन्दं मृगाङ्कः ॥ २७ ॥

अथेति ॥ वनगहने हि विचरतः करिणः प्रायेणैक एव कुम्भस्थलविभागो लक्ष्यते। पाण्डुगुञ्जा हि मङ्गलाय स्युः। उदयाचलशब्दश्रुतेः सोमागमनसूचा ॥ क्रीडार्थं मौक्तिककन्दुकः ॥ ख ॥

मदनेति ॥ यौवराज्याभिषेकाद्यनेककार्यव्यग्रतया मन्दमन्दावगाहः ॥ २७ ॥

---

१ प्रचण्ड. २ यूथशङ्कया. ३ माहेन्द्रदिशा. ४ पुष्प इव. ५ गच्छतः. ६ चलचलच्चतुः. ७ हा.

तदनन्तरम्, आप्लावितमिव मुक्तमर्यादेन दुग्धवार्धिना, सिक्त[1]-भूभागाङ्गणमिवामन्दचन्दनाम्बुच्छटाभिः, विलिप्तदिग्भित्तिकमिव [2]सान्द्रसुधापङ्कपिण्डितैः, पूरितमिवोत्सर्पिकर्पूरपांसुवृष्ट्या, प्रविष्टमिव [3]स्फाटिकमणिमहामन्दिरोदरदरीम्[4], उत्प्लवमानमिव द्रवीभूततुहिनाचलमहाप्लवेन[5], भुवनमासीत् ॥ क ॥

ततश्च ।

कैलासायितमद्रिभिर्विटपिभिः श्वेतातपत्रायितं
मृत्पङ्केन[6] दधीयितं जलनिधौ दुग्धायितं वारिभिः ।
मुक्ताहारलतायितं व्रततिभिः शङ्खायितं श्रीफलैः
श्वेतद्वीपजनायितं जनपदैर्जाते शशाङ्कोदये ॥ २८ ॥

अपिच ।

सर्वेऽपि पक्षिणो हंसाः सर्वेऽप्यैरावता गजाः ।
जाताश्चन्द्रांशुभिः सर्वे रौप्यपुञ्जाः शिलोच्चयाः ॥ २९ ॥

अपिच ।

सुधापङ्कोपलिप्तेव बद्धेव स्फटिकोपलैः ।
विलीनहिमदिग्धेव मेदिनी ज्योत्स्नया कृता ॥ ३० ॥

अपिच ।

सौधस्कन्धतलानि दीपपटलैः कम्पेन पाण्डुध्वजा
हंसाः पक्ष[7]विधूननेन मृदुना निद्रान्तनादेन च ।
लक्ष्यन्ते कुमुदानि षट्पदरुतैरुत्सर्पिगन्धेन च
क्षुभ्यत्क्षीर[8]पयोधिपूरसदृशे जाते शशाङ्कोदये ॥ ३१ ॥

तथाविधे च चन्द्रोदयप्रपञ्चे हठादुत्कण्ठयाभिभूयमानो निषधनाथश्चिन्तयांचकार ॥ ख ॥

---

१ संसिक्त. २ सारं. ३ स्फटिक. ४ दरीषु. ५ सप्तम्यन्तम्. ६ मृत्पिण्डेन. ७ पक्षतिधून. ८ क्षारपयोधि.

"इतश्चन्द्रः सान्द्रान्किरति किरणानग्निपरुषा-
नितोऽपि प्रोन्मीलत्कुमुदवनवायुर्विलसति।
इतः कादम्बानां ध्वनितमपि निद्रालसदृशा-
मसह्यः सर्वोऽयं मनसिजमहिम्नः परिकरः ॥ ३२ ॥

अपि च।

इतो मकरकेतनः किरति दुर्निवारः शरा-
नितोऽपि वयमाकुलाः कुलिशपाणिदत्ताज्ञया।
तदेतदतिसंकटं यदिह कैश्चिदुक्तं जनै-
रितो विषमदुस्तटी भयमितो महाव्याघ्रतः ॥ ३३ ॥

तदिदानीं किमिह कर्तव्यम्, कथं वा हास्येनाप्यवन्ध्यवचसामलङ्घनीयः खल्वादेशो लोकपालानाम्" इति चिन्तयन्नेकाकी पद्भ्यामेव विनिर्गत्य निजनिकेतनात्समन्तादापतद्भिः शशाङ्ककिरणजालैः परिजनैरिव परिदर्शितवर्त्मा कैश्चित्काललवैः कैलासकूटायमानाट्टालकाभोगभव्यं भीमभूपालभवनमवाप्य कन्यान्तःपुरं पुरंदरवरप्रदानाददृश्यमानरूपः प्रासादपालकैः प्रविवेश ॥ क ॥

प्रविश्य च दूरादभिमुखागतेनानवरतदह्यमानकृष्णागुरुधूपधूमवर्तिनर्तकेन बहलयक्षकर्दमाम्बुसिक्तसौधस्कन्धसंधिसंचारिणा गन्धवाहेन कृताभ्युत्थान इव, परिक्रम्य स्तोकमन्तरम् "इत इतो देवी वर्तते" इति गीतगोष्ठीस्थितसखीगीतझंकारेणाहूयमान इव, यत्रास्ते दमयन्ती तत्सौधपृष्ठमारूढवान् ॥ ख ॥

प्रविश्य चेति ॥ कर्पूरकस्तूरिकादीनां क्षोदो यक्षकर्दमः ॥ ख ॥

---

१ इतोऽपि विषमा तटी भ. इतो विषमदुस्तटीतटमि. २ किरणप्रभाजा. ३ कुत्रचिन्नास्ति. ४ प्रदानप्रभावाद.

आरुह्य च मनाग्व्यवहितोऽनुपलक्ष्यमाण इव, वेणुवीणाक्कणानुसारिणा कोमलकाकलीप्रायेण किंनरीप्रमुखसखीनां गीतेन विनोद्यमानाम्, अलकवल्लरीमध्यनिवेशिततारानुकारिमौक्तिकेन कज्जलकलङ्कितनयनोत्पलपक्ष्मपालिना मुखेन सचन्द्रगगनस्पर्द्धया भूतलमपि पूर्णोदितेन्दुमण्डलमिवापादयन्तीम्, उच्चकुचमण्डलविलोलया सस्मरसप्तर्षिग्रहगणपङ्क्त्येव हारलतया कृतकण्ठकन्दलाश्लेषाम्, ईषत्कपोलपालिं परामृशता चाटुकारेण वसन्तसमयप्रहितदूतेनेव कर्णलग्नेन कुसुममञ्जरीद्वितीयेन बालपल्लवेन विराजितवदनाम्, अच्छाच्छैः कस्तूरिकापङ्कपत्रभङ्गैर्भुजंगैरिव लावण्यामृतरक्षागतैरलंकृतभव्यभुजशिखराम्, आसन्नभुवि विकीर्णैः पाण्डुपुष्पप्रकरैर्गगनादवतीर्य रूपालोकनकुतूहलिभिर्नक्षत्रैरिव परिवृताम्, ऊरु[2]नितम्बमण्डलस्पर्शसुखलम्पटतया नीवीप्रान्तपुञ्जिततरङ्गं क्षीरोदमिव वस्त्रतां गतमच्छपाण्डु नेत्रपट्टं परिदधानाम्, 'अहमेव त्वया स्वयंवरे वरणीयः' इत्यर्थितया पादलग्नेन शेषोरगेणेव रौप्यनूपुरवलयेन विराजितवामचरणपल्लवाम्, विविधविलासवर्तिकाभिरिवाकारिताम्, अमृतद्रववर्णकैरिव चित्रितावयवाम्, आनन्दकन्दलैरिव घटिताम्, मोहनमणिशिलायामिवोत्कीर्णाम्, शृङ्गारदारुणीवो[3]त्कुट्टिताम्, वशीकरणपरमाणुभिरिव विनिर्मिताम्, म[4]दनमृत्पिण्डेनेव निष्पादिताम्, वज्रलेपपुत्रिकामिव दृशोः, आकर्षणमणिशलाकामिव हृदयस्य, जीवनौषधिमिवानुरागस्य, जयपताकामिव मद[5]नस्य, बहलचन्दनाम्बुच्छ-

आरुह्य चेति ॥ ईषत्कलोऽस्यास्तीति काकली । "निषादः काकलीसंज्ञो द्विश्रु-

---

१ मौक्तिके नवीनकज्ज. २ उरुनितं. गुरुनि. ३ वोत्कुट्टिताम्. ४ मदनमदमृत्पिण्डेन. मदनचन्दनकुंकुमहरिद्राम्. ५ शृङ्गारस्य.

टार्द्रितभुवि विकीर्णसुरभिपरिमलमिलन्मधुकररवानुमेयपाण्डुरपुष्पप्रकरे मसृणसितसुधाबन्धपिच्छले सौधस्कन्धे ज्योत्स्नामृतस्पर्शसुखमनुभवन्तीम्, अच्छांशुस्फटिकमणिपर्यङ्किकाङ्कभाजं दमयन्तीमलब्धनिद्रामद्राक्षीत् ॥ क ॥

तां चावलोक्य विचिन्तितवान्[1] ॥ ख ॥

"अहो स्थानेऽभिनिवेशो लोकपालानाम् । अशेषसुखनिधानाय को न स्पृहयति[2] ॥ ग ॥

मन्ये च ।

विस्फारिततारेक्षणैरिमामेव पश्यन्नयमाकाशः सग्रहोऽभूत् ॥ घ ॥

अयं च चन्द्रश्चन्दनपाण्डुभिः करैरिमामेव परामृशन्मदनानलदाहमयीं व्रणलेखां कलङ्कच्छलेन हृदयेनोद्वहति ॥ ङ ॥

अयमपि[3] समीपोद्यानमारुतोऽस्याः समर्पितकुसुमगन्धः शनैरुत्तरीयांशुकमाक्षिपन्मदनातुरस्तिर्यक् पतति ॥ च ॥

सर्वथा[4] जितं मनुष्यलोकेन, यत्रैवंविधमचिन्त्यम्, अनालोच-

त्युत्कर्षणाद्भवेत्" ॥ कज्जलेन कलङ्किता कलङ्क इवाचरितवती नयनोत्पलपक्ष्मपालिर्यत्र। कलङ्क इवाचरति स्मेत्याचारे क्विम्निष्ठे ॥ **अच्छेति** ॥ अमृतं हि भुजंगै रक्ष्यते॥ विविधविलासवर्तिकाश्चित्रकूर्चिकास्ताभिराकारितामालिखिताम् । आकारशब्दादाचारक्विबन्तान्निष्ठायां सिद्धम् ॥ क ॥

विस्फारीति ॥ तारा नक्षत्राणि कनीनिका च । ग्रहाः सूर्यादयो भूताद्यभिनिवेशाश्च ॥ घ ॥

अयमपीति ॥ अन्योऽपि स्मरातुरः कुसुमगन्धं कस्तूरिकादि चार्पयन्संव्यानाकर्षणपरस्तिर्यक्पतति ॥ च ॥

१ वानयम्. २ स्पृहयति भट्टरामेश्वरः. ३ अयमपि समीरणः समीपोद्यानागतोऽस्याः. ४ सर्वथा स्वर्लोकायितं म.

नगोचरम्, अप्रतिमरूपम्, अद्भुतम्, अमूल्यमुदपद्यत स्त्रीरत्नम् ॥ क ॥

आः। प्रजापते, परिणतशिल्पोऽसि। संसार, सनाथोऽसि। मदन, महोत्सववानसि। चक्षुः, कृतार्थमसि। हृदय, पूर्णमनोरथमसि। दूरागमनश्रम, सफलोऽसि ॥ ख ॥

सकलयुवजनमनोमधुकराकृष्टिकुसुमितलतिके निजनयननिर्जितराजीवे जीव चिरम् ॥ ग ॥

तथाहि।

लक्ष्मीं बिभ्राणयोः कांचिच्चञ्चद्भ्रूभङ्गभागयोः[1]।
बलिं यामो वयं तन्वि तवाब्जसदृशोर्दृशोः ॥ ३४ ॥

अपि च।

किंनरवदनविनिर्गतपञ्चमगीतामृते श्रुतिं श्रयति।
हरति हरिणीदृशो दृक् सालसवलिता च लुलिता च" ॥ ३५ ॥

इत्यनेकविधानि[2] चिन्तयन्मृदुलीलापदैरागत्य गीतगोष्ठीस्थितस्य 'कोऽयम्' इति विस्मयविस्फारितलोचनस्य[3] संभ्रमवतः सखीकदम्बकस्य[4] मध्यमविशत् ॥ घ ॥

आः प्रजेति ॥ "संसार" इत्यादीनि प्रत्येकं संबोधनानि ॥ ख ॥

लक्ष्मीमिति ॥ हे तन्वि तव नेत्रयोर्वयं बलिं याम उपहारीभवाम इति परम प्रीतिगर्भा लोकोक्तिः। अब्जानि लक्ष्मीं बिभ्रति। तथा भ्रूरेव भङ्गस्तरङ्गः स भाग एकदेशे ययोः। यदा तु "चञ्चद्भ्रूभृङ्गसङ्गयोः" इति पाठः। तदा भ्रुवावेव भृङ्गौ तयोः सङ्गो यत्र ॥ ३४ ॥

किंनरेति ॥ यत एव हरिणीदृक्, अत एव गीतानुरागलक्षणं हरिणी हेवाकमनुसरति ॥ ३५ ॥

---

१ कृतश्रवणासङ्गयोः. २ इत्यनेकविधं. ३ विस्मयविस्मित. ४ सखीजनकद.

प्रविष्टे च तस्मिन्, आकस्मिकविस्मयेन विस्फारितानि, भयेन भ्रमितानि, कौतुकेनोत्तानितानि, व्रीडया वलितानि, मुदा मिलदराळपक्ष्माणि, स्मराकूतेन विलुलितानि, दिदृक्षारसेनानिमिषाणि, दृष्टिसंघट्टनेन मुकुलितानि, विलासेन मिलितानि[1], चिरं चक्षूंषि बिभ्राणाः किमपि चलितासनम्, उत्कम्पितहृदयम्, अपसरद्धैर्यम्, अवगलत्स्वेदसलिलम्, उत्पुलकिताङ्गम्, अनङ्गभङ्गुरम्, अवलोकितान्योन्यमुखमवतस्थिरे तदभिमुखाः सख्यः ॥ क ॥

दमयन्त्यपि 'देवी, वर्धयामो वर्धयामः। कोऽपि कस्याश्चिज्जीवितेश्वरोऽयमत्रैवागतो दृश्यते' इति हर्षोत्कर्षगद्गदगिरां, गीतमुत्सृज्य ससंभ्रमोत्थितकुब्जवामनकन्यकानां मृदुकरतलतालिकाकलितकलकलेन मनाग्विलासवलितमुखी तदभिमुखमवलोक्य शय्यातला[2]दुदचलत् ॥ ख ॥

"आः कुतोऽस्यानेकप्राकाररक्षकरक्षिते[3] पक्षिणामपिदुष्प्रवेशे विशेषतो रजन्यां कन्यान्तःपुरे[4] प्रवेशः" इत्यद्भुतरसावेशास्तिमितेन किंचित्संचारितेन[5] चक्षुषा पुनःपुनर्नलमवलोक्य चिन्तयांचकार॥ग॥

" धन्या काप्युपराधिताद्रितनया यस्यास्त्वमाह्लादय-
न्मुक्ताहार इव प्रसारितभुजः[6] कण्ठे विलोठिष्यसि।
धातस्तात तवापि धन्यममुना सृष्टेन मन्ये श्रमं
मातर्मेदिनि वन्द्यसे किमपरं यस्यास्तवायं पतिः"॥३६॥

एवं चिन्तयन्त्येव तत्कालमाकूतकौतुकहर्षभयाद्यनेकरसपर-

धन्याकेति ॥ मातृशब्दं जननीपर्यायमपि स्त्रियः सपत्न्यादिष्वपि प्रणयसंबोधने प्रयुञ्जते इति नले भूपतावप्यर्थिन्या दमयन्त्या "मातर्मेदिनि" इति संबोधनं न दुष्टम्। अन्यथा सपत्नीं प्रति मातरित्यामन्त्रणमनुचितम् ॥ ३६ ॥

१ तानि चचि. २ तलाज्जवादुद. ३ अनेकप्रासादरक्षिणारक्षि. मकाररक्ष. ४ राजकन्या. ५ किंचित्साचिसं. ६ करः.

म्परापरावर्तिततनयनोत्पला लज्जावनमितमुखी विधेयविवेकवैकल्यमभजत ॥ क ॥

नलोऽपि "विहंगवागुरिके, भवत्स्वामिन्याः किमेवंविधः समाचारः, यदभ्यागतजनेन सह स्वागतालापमात्रेणापि न क्रियते व्यवहारः" इति तस्याः समीपवर्तिनीं पूर्वपरिचितां किंनरीमभाषत ॥ ख ॥

सापि ससंभ्रमप्रणामपूर्वमिदमवादीत् ॥ ग ॥

"किंचित्कम्पितपाणिकंकणरवैः पृष्टं ननु स्वागतं
व्रीडानम्रमुखाब्जया चरणयोर्न्यस्ते च नेत्रोत्पले ।
द्वारस्थस्तनयुग्ममङ्गलघटे दत्तः प्रवेशो हृदि
स्वामिन्किं न तवातिथेः समुचितं सख्याऽनयाऽनुष्ठितम् ॥ ३७ ॥

तदितः ससंभ्रमोत्थितयानया समर्पितमिदमुल्लसन्मणिपर्यङ्किकापृष्ठमधितिष्ठतु देवः ॥ घ ॥

त्वमपि देवि, विद्रुममणिपर्यङ्किकामिमामदूरवर्तिनीमध्यास्स्व ॥ ङ ॥

भवतु च भवतोः परमुखेन श्रुतान्योन्यस्वरूपयोरिदानीमात्मानुभवेन नयननिर्वृतिः, फलन्तु मनोरथाः सखीनाम्" इति ॥ च ॥

तयाभिहितौ तौ सर्वसत्वरसखीकरपरामृष्टयोः स्फटिकप्रवालपर्यङ्किकयोरुत्सङ्गभागं भेजतुः ॥ छ ॥

ततश्च तौ

हर्षाद्बाष्पचिते, भयात्तरलिते, विस्फारिते विस्मया,-
दौत्सुक्यात्स्तिमिते, स्मराद्विलुलिते, संकोचिते लज्जया ।
रूपालोकनकौतुकेन रभसादन्योन्यवक्त्राम्बुजे
किंचित्साचि च संमुखं च नयने संचारयामासतुः ॥ ३८ ॥

तत्र च व्यतिकरे

अन्तः केवलमुल्लसन्ति न पुनर्वाचां तु ये गोचरा
येषां नो भरतादयोऽपि कवयः कर्तुं विवेकं क्षमाः।
लज्जामन्थरयोः परस्परमिलद्दृष्टिप्रपाते तयो-
स्ते सर्वे समकालमेव हृदये केऽप्याविरासन्रसाः ॥ ३९ ॥

अपि च। तत्र च व्यतिकरे

कर्णान्तकृष्टवलयीकृतचापचक्र-
श्चञ्चद्गुणस्खलनजर्जरितप्रकोष्ठः।
लक्षद्वयेऽपि युगपद्विशिखान्विमुञ्च-
न्संधानसत्वरकरः श्रमवान् स्मरोऽभूत् ॥ ४० ॥

अनन्तरमाप्तसखीवचनेन स्वयमर्घदानोद्यतां ताम् "अलमलमुत्पलाक्षि, प्रयासेन। न खल्वसि पात्रं परिश्रमस्य। न पारिजातमञ्जरी जरठपवनप्रेङ्खोलनायासं सहते" इति दमयन्तीमभिधाय तस्याः स्वादुदुर्लभसूक्तिसुधासेककोमलालापपण्डिताभिः सखीभिः सह परिमितपरिहासेन, किमपि जल्पन्, किमपि हसन्, किमपि हासयन्, मुहूर्तमिवासांचक्रे ॥ क ॥

चिन्तितवांश्च।

लीलाताण्डवितभ्रुवोः स्मरभरभ्रान्तोल्लसत्तारयो-
रन्तर्मौक्तिकमालिकाधवलयोर्मुग्धस्मितस्मेरयोः।
किंचित्साचिदृशोः कृतानिलचलन्नीलोत्पलस्पर्धयो-
रुल्लोलैरिव याति पक्ष्मलदृशः कान्तिर्मदीये मुखे ॥ ४१ ॥

लीलेति ॥ उल्लोलैर्याति तरङ्गैः स्फुरति ॥ ४१ ॥

---

१ विनोदं. २ रासू रसाः.

अपि च ।

दरमुकुलितनेत्रप्रान्तपर्यस्ततारं
तव तरुणि सलज्जं सस्मितं सस्मरं च ।
क्षणमभिमुखवक्त्रे विस्मयस्मेरदृष्टौ
मयि वलति वलक्षं वीक्षितं मा निरौत्सीः[1] ॥ ४२ ॥

किंचान्यदपरमिदमाशास्महे ।

लावण्यामृतदीर्घिका कुलगृहं सौभाग्यसौन्दर्ययो-[2]
स्त्रैलोक्याकररत्नकन्दलिरियं जीव्यात्सहस्रं समाः ।
लोकालोकनकौतुकाय बहुना शिल्पश्रमेणादरा-
न्मन्ये यां विधिना विधाय[3] विहितं सृष्टेर्ध्वजारोपणम् ॥ ४३ ॥

अहो आश्चर्यम् ।

रङ्गत्यङ्गे कुरङ्गाक्ष्याश्चक्षुर्मे[4] यत्र यत्र तु ।
दृश्यते तत्र तत्रैव बलोद्बाणकरः[5] स्मरः ॥ ४४ ॥

तत्कथमियमन्यार्थे[6] प्रार्थ्यते । तदद्यतामयं परप्रेष्यभावः ॥क॥ यतः । तिरयति स्वातन्त्र्यसुखम्, अभिमुखयति[7] पारवश्यक्लेशम्, आमन्त्रयति तिरस्कारम्, आदरयति दैन्यम्, आव्हयति ल-

दरेति॥तवाभिमुखवक्त्रे मयि एवं गुणविशिष्टं वीक्षितं वलक्षं धवलं मा निरोत्सीः॥४२

लावण्येति ॥ आलोकनाय कौतुकमालोकनकौतुकम् । लोकस्यालोकनकौतुकम् । तेन पश्यतु लोको, द्रष्टव्यदर्शनाद्दृष्टिफलमाप्नोत्वित्यर्थः ॥ ४३ ॥

रङ्गेति ॥ तुः पुनरर्थे । किं पुनः यत्र यत्राङ्गे चक्षू रङ्गति तस्य साधिष्ठानत्वात् । स्मरबाणबाधा प्राप्यते ॥ ४४ ॥

तत्कथमिति ॥ अन्येषामिन्द्रादीनामर्थेऽन्यार्थे ॥

यत इति ॥ आङ्पूर्वस्य वहतेः करोत्यर्थत्वादावाहयति कारयतीत्यर्थः ॥

---

१ निरोधीः; विरोधीः. २ सौन्दर्यसौभाग्ययोः. ३ विहाय. ४ हि. ५ वलगन्बाण; चलद्बाण. ६ तत्किमिय; अथ कथमियमन्यथाप्रा. ७ मुखरयति पार; अतिमुखरय.

धिमानम्, आ[1]वाहयति हास्यपदम्, स[2]मानयत्यौचित्यभङ्गम्, अङ्गीकारयति कार्पण्यम्, अपहस्तयति व[3]स्तुभावम्, पुरुषस्य ॥ क ॥

तथा हि ।

सोच्छ्वासं मरणं निरग्नि दहनं निःशृङ्खलं बन्धनं
निष्पङ्कं [4]मलिनं विनैव नरकं सैषा महायातना ।
सेवासंजनितं जनस्य सुधियो धिक्पारवश्यं यतः
पञ्चानां सविशेषमेतदपरं षष्ठं महापातकम् ॥ ४५ ॥

किं चान्यत् ।

प्रस्तुतस्य विरोधेन ग्राम्यः सर्वोऽप्युपक्रमः ।
वीणायां वाद्यमानायां वेदोद्गारो न रोचते ॥ ४६ ॥

तत्किमिदानीमिदमुच्यते । "लोलाक्षि, लोकपालास्त्वामस्मन्मुखेन वृण्वन्ति इति प्रस्तुतानुरागभङ्गः, तदादेशोऽप[5]ह्नूयते स्वामिन्यन्यथा क[6]थ्यते श्रे[7]यस्खलनम्, य[8]थावृत्तमेवाख्यायते स्वार्थहानिः, तद्वरमस्तु स्वार्थविघातो न तु विश्वस्तदेवतावञ्चनापातकम्[9]" इति चिन्तयन्नशेषमपि तस्यै पुरंदरादे[10]शं सप्रपञ्चमाचचक्षे ॥ ख ॥

[11]सापि स्तो[12]कस्मितस्निग्धनम्रमुखी "हं हे प्रियंवदिके, प्रियास्मज्जीवितयाम्बया [13]तातेन च मध्याह्ने समाहूय किमुक्तासि, किं शिक्षिताऽसि । न नाम बालेयम्, अविनीतेयम्, [14]आग्रहग्रहग्रस्तेयम्, इति केनापि कर्णेजपेन तातस्य हृदयाद्दूरीकृताहम्[15] । वन्द्याः खलु गुरवो

प्रस्तुतेति ॥ उभयानुरागौचित्यादात्मार्थस्य प्रस्तुतत्वम् ॥ ४६ ॥

सापीति ॥ स्तोकेत्यादिना अर्थिनोऽपि लोकपालान्प्रत्यवज्ञा, नलं प्रत्यनुरागा-

---

१ आरोहयति प्रतिदास्यपदम्. २ आनयति. ३ पुरुषभावम्. ४ गलनं; नलिनं. ५ अपधीयते. ६ कथ्याने. ७ श्रेयःसंवलनम्. ८ यथावृत्तमाख्या. ९ वञ्चनपात. १० देशप्रपञ्चमा. ११ ततः सापि; सोऽपि. १२ स्तोकस्मितमुग्धनम्र; स्तोकस्मितास्निग्धमुग्धनेत्रमुखी; स्निग्धमुखनम्र. १३ कुप्यता तातेन च. १४ आग्रहग्रस्ते; आग्रहग्रस्तैवेयम्. १५ अहमिति; अहमपि.

देवाश्च बिभेमि तेभ्योऽहम्" इति। प्रियंवदिकाख्यया सख्या सार्धमन्याला[1]पमकरोत् ॥ क ॥

नलोऽपि "मदिराक्षि, मदयति मदिरा, तरलयति तारुण्यम्, अन्धयति धनम्, उत्पथयति मन्मथः, विरूपयति रूपाभिमानः, खर्वयति[2] गर्वः। सर्वजनप्रसिद्धमेतत्। किं तु त्वमिदमसत्यतां मा[3] नैषीः। [4]व्यभिचरतु तवाङ्गे सर्वमेतत्। नहि शशिनि वह्निः, अमृते च विषाङ्कुरः संभवति। [5]तदिमं देवादेशं मावज्ञासीः। सर्वथा प्रभवन्ति प्राणिनाममी लोकपालाः। तत्रापि विशेषतः सकलत्रिदशाधिपतिरशेषसुरकिरीटमणिमयूखमालार्चितचरणारविन्दः पुरंदरो देवः। तद्वृ[6]णु कमप्यमीषाममृतभुजां मध्ये। मानय स्वर्गसुखानि। अभूमिरसि मर्त्यलोकस्तोकसुखानाम्" इति पुनस्तामभ्यधात् ॥ ख

एवं विधे च व्यतिकरे दमयन्त्या पुनरुक्तमिमं जल्पमरण्यकरिण्येवारुंतुदमङ्कुशमसहमानया मनाक्तरलिते शिरसि, स्तोकीकृते मनसि, मुक्ते निःसहनिःश्वासमरुति, परावर्तिते चक्षुषि, विवर्णतामानीते वदनारविन्दे, प्रस्तावपण्डिता प्रियंवदिका प्राह ॥ ग ॥

"देव, श्रुतं श्रोतव्यम्, अवधारितो देवादेशः। किं तु न स्वतन्त्रेयम्, ईश्वरेच्छया प्रवृत्तिनिवृत्तयो यतः प्राणिनाम्, अनालोचनगोचरश्चायमनुरागोऽङ्गनाजनस्य ॥ घ ॥

तथा हि।

तीव्रतपनतापप्रियाम्भोजिनी न सहते स्तोकमप्यमृतमुचो रुचश्चन्द्रस्य, परिम्लायति मालतीमालिका सलिलसेकेन ॥ ङ ॥

ग्रहं चान्यालापव्याजेन दमयन्ती प्रतिपादितवती। न नामेति वितर्के। "किं दूरीकृताहम्" इति वितर्कः ॥ क ॥

---

१ मन्योन्यालापलीलामकरोत्. २ इति. ३ मनैषीः. ४ व्यभिचरति. ५ तमिमं. ६ वृणुष्व.

प्रसिद्धं चैतत् ।

भवति हृदयहारी क्वापि कस्यापि कश्चि-
न्न खलु गुणविशेषः प्रेमबन्धप्रयोगे[1] ।
किसलयति वनान्ते कोकिलालापरम्ये
विकसति न वसन्ते मालती कोऽत्र हेतुः ॥ ४७ ॥

एवमनेकविधोपाख्याननिपुणया तत्कालोचितम्[2], अनुच्चस्मितसुधास्निग्धम्, अविरुद्धम्, परिमित[3]परिहाससुन्दरम्, अनुवृत्तिबृंहितानुरागम्, उचितचाटुचटुलम्, अशाठ्यम्[4], अकठोरम्, अनुज्झितप्रियम्, प्रियंवदिकया सहाल्पाल्पं जल्पन् "अयुक्तमिह कन्यान्तःपुरे चिरं स्थातुम्" इति चिन्तयन्नापृच्छ्य दमयन्तीं नलः पर्यङ्किका[5]पृष्ठादुदतिष्ठत् ॥ क ॥

प्रथमोत्थितया च तया लज्जावनम्रवदनारविन्दया सह सखीकदम्बकेन द्वित्राणि पदान्यनुगम्यमानो विहसन्[6] "अलमलमायासेन, स्थीयतां सुखम्" इत्यभिधाय स्वगृहानयासीत् ॥ ख ॥

गत्वा च शिरीषकुसुमदाममृदुनि शय्यातले निषण्णश्चिन्तयांचकार ॥ ग ॥

हर्षादुत्पलकं विकासि रभसादुत्तानितं कौतुका-
च्छृङ्गारादलसं, भयात्तरलदृङ् नम्रं च लज्जाभरात् ।
तस्यास्तन्नवसंगमे मृगदृशो दृश्येत भूयोऽपि किं
किंचित्काञ्चनगौरगण्डगलितस्वेदाम्बुरम्यं मुखम् ॥४८॥

---

१ प्रयोगी; प्राप्तबन्धप्रयोगी. २ चितभुवा. स्निग्धम्. ३ परिमितं. ४ असाध्यकठोरम्. ५ पर्यङ्किकातलादुद. ६ विरहातुरामलमलंप्रया.

अपिच ।

अपसरति न चक्षुषो[1] मृगाक्षी
रजनिरियं च न याति नैति निद्रा ।
प्रहरति मदनोऽपि दुःखितानां
बत बहुशोऽभिमुखीभवन्त्यपायाः ॥ ४९ ॥

इति विविधवितर्कावेशविध्वस्तनिद्रः
सजलजडिम मीलत्पक्ष्म चक्षुर्दधानः ।
हरचरणसरोजद्वन्द्वमाधाय चित्ते
नृपतिरपि[2] विदग्धः स त्रियामामनैषीत् ॥ ५० ॥

इति श्रीत्रिविक्रमभट्टविरचितायां दमयन्तीकथायां हरचरणसरोजाङ्कायां सप्तम उच्छ्वासः समाप्तः ॥ ग्रन्थोऽपि समाप्तः ॥

इति विषमपदप्रकाशमेतं दमयन्त्यास्तनुते स्म चण्डपालः ।
शिशुमतिलतिकाविकासचैत्रं चतुरमतिस्फुटभित्तिचारुचित्रम् ॥
श्रीप्राग्वाटकुलाब्धिवृद्धिशशभृच्छ्रीमान् यशोराज इ-
त्यार्यो यस्य पिता प्रबन्धसुकविः श्रीचण्डसिंहोऽग्रजः ।
श्रीसारस्वतसिद्धये गुरुरपि श्रीलूणिगः शुद्धधीः
सोऽकार्षीद्दमयन्त्युदारविवृतिं श्रीचण्डपालः कृती ॥

इति श्रीचण्डपालविरचिते दमयन्तीविवरणे सप्तम उच्छ्वासः समाप्तः ॥

१ चक्षुषोः. २ नृपतिरयमसङ्गीतां त्रि०.

दमयन्तीकथास्थश्लोकानामकारादिक्रमेणानुक्रमणिका।

दमयन्तीकथायाः शुद्धिपत्रम् ।

पृष्ठे	पङ्क्तौ	शुद्धपाठः	पृष्ठे	पङ्क्तौ	शुद्धपाठः
३	५	परं	५३	१९	कुट्टल
४	२५	" कच बन्धे "	५८	६	मुक्ताहारो
६	१५	वाऽतिलाघवेन	६०	१८	तथोक्ते अर्थात्रिजाते
८	१	श्रीधरस्या—	६२	१२	राजीवपत्राक्ष
	२५	बन्धोऽपि दुष्कर .	६३	९	मैत्रीभावः
१०	१२	गलग्रहो	६४	१	सीतास—
११	५	सत्राणि	७०	२०	आनीताः
	२३	,,	७१	१३	भयाददर्शनं
	२८	घनाः प्रचु	७२	२३	पुष्पाणि
१२	२६	मामुतोऽभीक्ष्ण—	८५	१६	मैत्रीसुधायाः
१४	८	मित्रो	८९	२१	स्वभावादेव
१८	८	नगरी	९०	११	यशोभाजन०
	२१	सर्वोऽपि विजिगीषुः	९४	११	खण्डित०
१९	१	विश्वामित्र	९५	२३	भवने
	१९	विश्वामित्रो मुनिः	९६	२३	कुर्वन्ति
	२३	शीलः।	९७	२	मुद्गान्
२१	१०	निरुपमानवायौवनश्रीः	९८	४	अपराह्ण
२४	३	नक्षत्रभूः क्षत्र—		१५	आवेदयत्
	१९	नक्षत्रेति	११२	१	नलिनीवन०
२५	१	मित्रं च	११५	१८	च्छेदः
२७	१०	मधु मकरन्द—	१२०	९	उपदेशको
	२४	याच्ञा	१२३	९	सँस्त्वं
२८	३	सुमित्रोपेतो		२१	वाणैः
	१०	जगज्जेगीयमान	१२४	२५	विवर्धनं
३०	१६	लोकोत्तरान्	१२५	२	मित्रमण्डली
३८	८	"अब्जश्री		११	मित्रम०
	१२	भवन्ति" इत्येव		२४	देवैः
३९	८	"अस्ति स्वर्ग—	१२७	२७	पुत्राश्च पितृभ्यो
४२	८	विस्मृत	१२८	४	कारणेऽभ्रान्तः
४३	३	"स्त्रीमा०		१५	श्रीपक्षे
	१९	व्यापारः"इ०	१३१	२५	अतिशयं भियं
५२	१६	श्रुतिसु—	१३८	१३	प्राप्तमुदधेः

पृष्ठे	पङ्क्तौ	शुद्धपाठः	पृष्ठे	पङ्क्तौ	शुद्धपाठः
	१९	"नूनमय		२१	कृत्वा
१३९	१५	चामीकर	२००	१७	चञ्चत्पुटादयो
१४०	११	श्रियम्"	२०२	१०	मेषवृषमिथुनकुम्भकन्या रा-शिवि०
१४१	४	श्रूयमाणेषु परितः			
१४३	२१	५९		१६	साभोगता चौ०
१४४	५	इत्यभिधायेव—मुग्धे		२५	पुण्डरीकैः
	१४	श्राम्यति श्रोत्रे०	२०३	४	विन्ध्यस्कन्ध०
१५१	८	हंसी"	२०४	६	गीत
१५९	४	श्च्योत०		१०	जनयति वनितानां
	१८	श्च्योत० ।		२०	मेखलाभुवि गिरिम
१६२	१७	मम"	२०६	८	"भानोः०
१६४	२१	क्षैरेयीदधि०		१४	अपिच
१६८	१	पाणिनीया	२०७	८	क्रीडागिरि०
	१३	बहुमानयन्	२०८	१०	भूषिताः ॥ २१ ॥"
१७२	३	मुनीनां	२०९	३	"त्वद्देशा०
१७४	१९	परिसरेषु		११	स्थीयते ॥ २३ ॥"
१७६	१०	तांश्चावलोक्य—	२१०	१२	पत्त्रालीर्दल०
१७८	१४	सरस्वतीगीतप्र	२११	५	प्रयाणम् ॥ २९ ॥"
१८१	२०	ग्र्यदारिद्र्यो		६	वासः
१८३	१९	यस्य"		१०	करीराङ्कुरान्
	२१	नीरङ्ग्या		१५	–नि"इति
	२३	यथापिचेति समुच्चयः	२१२	१	हरिणी
१८४	१९	पन्नगाङ्गना	२१६	४	"विपिनो०
१८५	१३	लीलागामिन्यः	२१७	५	भाग्यपरम्परा" इति
१८७	५	"जातिर्यत्र०	२२०	१६	द्रवार्द्रित—
१८८	२१	तरुण्यः"	२२१	१३	आहारम्—
१९२	३	दीर्घ		१८	तेन चेति ।
	८	अवलम्बमानः	२२२	१०	"सकल०
१९३	१३	स्तबकेषु, वास०	२२३	९	नेदीयो
१९४	१७	उद्रिक्तः सन्	२२६	१	अनेकविधवक्रोक्ति
१९५	१०	अपिच		५	"उपरम—
१९९	१८	अतिविचित्रा चम्पक०		१३	चक्रवाकः ॥ ५५ ॥"

पृष्ठे	पङ्क्तौ	शुद्धपाठः	पृष्ठे	पङ्क्तौ	शुद्धपाठः
२२७	१०	"धुतरज—		११	सौख्येन च"
	१३	कुचेषु ॥ ५९ ॥ "	२४६	१८	"अनुगुण—
२२९	१६	लक्ष्मीमृगा०	२४७	८	किमिह"
२३०	६	पुलकः, कुसु०निर्लिरूत्कम्प्य-मानः	२५१	१६	दिष्टयाद्य वर्धा—
				१	"आज्यं०
२३१	२२	शुनः संज्ञावृ०	२५५	१२	भुज्यताम् ॥ १२ ॥"
२३७	५	पादपाः"	२५६	१०	"नोद्याने—
	७	'प्राप्ताः कु०	२५९	५	वन्द्यताम्–"
२३९	११	नाममालासु,		१०	रागिणि
२४०	२१	उद्दण्डयतो गाढमुत्साहयतः	२६४	१७	अष्टमीशशाङ्कशक-
२४४	९	सीमविषयः		५	जगदभूत् ॥ २९ ॥"
	१४	सर्वभावम् ।		८	"कन्यामन्या—
२४५	२	"आपूर्वापर		११	पश्चिमाब्धिम् ॥ २९ ॥ "